GL SANS 615.536
MAD

122666
LBSNAA

त्री राष्ट्रीय प्रशासन अकादमी
Academy of Administration
मसूरी
MUSSOORIE

पुस्तकालय
LIBRARY

— 122666

अवाप्ति संख्या
Accession No. 14110

वर्ग संख्या
Class No. GL-Sans 615.536

पुस्तक संख्या
Book No. माधव

Mad

THE

HARIDAS SANSKRIT SERIES

158

THE

# MĀDHAVA NIDĀNA

OF

## S'RĪ MĀDHAVAKARA

WITH

THE SUDHĀLAHARI COMMENTS

BY

Pt S'rī Umes'ānanda S'armā

Edited with Indices & Appendices etc.,

By

Pt. S'rī Brahma S'ankara S'āstri

PUBLISHED BY

JAYA KRISHNA DAS HARIDAS GUPTA

*The Chowkhamba Sanskrit Series Office.*

Benares City.

1943.

*All Rights Reserved by the Publishers.*

PRINTED BY

JAYA KRISHNA DAS GUPTA,

VIDYA VILAS PRESS, BENARES CITY.

1943.

* श्रीः *

→* हरिदास-संस्कृत-ग्रन्थमाला *←

१५८

श्रीमाधवकरप्रणीतं

# माधवनिदानम्

रामप्रतापकमलियाऽऽयुर्वेदविद्यालयाध्यापकेन
व्याकरण-साहित्यायुर्वेदाचार्य-मिश्रोपाह्व-

## पण्डितश्रीउमेशानन्दशर्मणा

विरचितया "सुधालहरी" नामकव्याख्यया
समुल्लसितम् ।

भिषग्रत्नपण्डितश्रीब्रह्मशङ्करशास्त्रिणा सम्प्रवर्तितं
नव्यरोगनिदानपरिशिष्टेन परिवर्द्धितञ्च ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

वि. सं. २००० ] ——— [ ई. स. १९४३

सर्वेऽधिकाराः प्रकाशकाधीनाः

# भूमिका

विदाङ्कुर्वन्तु तावत्समस्तविद्याऽपारपारावारावगतान्तास्तत्र भवन्तो भवन्त इह खलु निखिलेऽपि जगतीतले ये मानवा दरीदृश्यन्ते, ते सर्वे **'सुखमनुभवेम, दुःखं च मा स्पृशेम'** इति वासनात्रासितान्तःकरणा एव सम्भाव्यन्ते ।

**सुखन्तु द्विविधम्**-ऐहिकमामुष्मिकञ्चेति । **तत्रैहिकं**-विषयवासनामूल-**मामुष्मिकन्त्**वविनश्वरं वास्तविकञ्चेति । तद् द्विविधमपि सुखं शास्त्रोपासना-धीनं शास्त्राणि चाप्यनेकानि परन्तु सुस्थातुरपरायणं चिकित्साशास्त्रमेव प्राणा इव प्रियतमं प्रतिभाति समेषां मानवानाम् ।

भारतीयं चैतच्चिकित्साशास्त्रं **शल्य-शालाक्य-कौमारभृत्या-ऽगदतन्त्र-कायचिकित्सा-भूतविद्या-रसायन-वाजीकरणा**ख्येष्वष्टविधेष्वङ्गेषु विभक्त-मस्ति, तेषु सर्वेष्वङ्गेषु महामहिमशालिभिः परमकारुणिकैस्तपोधनैरनेकैः पूज्य-वर्यैरनेकानि तन्त्राणि पृथक् पृथग् निर्मितानि । परन्तु कालमहिम्ना प्रायः-सर्वाणि तन्त्राणि कथामात्रशेषाणि सम्प्रति समुपलभ्यन्ते ।

कायचिकित्साप्रधानं **चरकतन्त्रं**, शल्यचिकित्साप्रधानं **सुश्रुततन्त्रं**, च सम्प्रति दृष्टिपथमायाति । अत्र **सूत्रं, शारीरं, निदानं, चिकित्सा, ऐन्द्रियं, कल्पं, विमानं, सिद्धि**श्चेत्यष्टौ स्थानानि निर्दिष्टानि । तत्र—

आदौ **निदानविधिना विदध्याद् व्याधिनिश्चयम्** । इति वचनात् सर्व-प्रथमं निदानस्यैवावश्यकतया निदानमन्तरेण चिकित्साया असम्भवान्निदान-स्यापरेभ्यो मुख्यत्वम् ।

यद्यपि **चरकादौ** तत्र तत्र निदानोपादानमस्ति तथाऽपि **सर्वेषां रोगाणा-मेकत्र सुगमतयोल्लेखः क्वापि नास्ती**ति महता परिश्रमेणेन्दुकरात्मजेन **श्री माधवकरेण** चरकसुश्रुतप्रभृतिमुख्याचार्याणां निर्दिष्टवाक्यान्यादाय प्रायः सर्वेषामेव रोगाणां **निदान-पूर्वरूप-रूपो-पशये-सम्प्राप्त्यु-पद्रव-साध्या-साध्य**विचारात्मको रोगविनिश्चयो **माधवनिदाना**ख्यो ग्रन्थो निरमायि ।

अस्य ग्रन्थस्य बहुश उपयोगितां निरीक्ष्यानेकशो मनीषिणो बह्वीष्टीका-विरचितवन्तः । यासु सम्प्रति **मधुकोशातङ्कदर्पणा**भिधे द्वे टीके समुपयुक्ते समु-पलभ्येते । तत्राद्या—**मधुकोश**नाम्नी टीका बहुविस्तृतत्वात्परीक्षार्थिनामनुपयुक्ता द्वितीया—**आतङ्कदर्पणा**भिधा त्वतिक्लिष्टत्वादपि च्छात्राणां न तादृशी सन्तोषज-ननी, इमामनुपपत्तिं बहुशो विलोक्याधुनिकानां परीक्षार्थिच्छात्राणां सौलभ्यमो-प्सुभिश्चौखम्भापुस्तकालयाध्यक्षैः **श्रीजयकृष्णदास**श्रेष्ठिमहोदयैर्बहुशः प्रोत्सा-हितोऽहमिमां परीक्षार्थिच्छात्रकदम्बोपयोगिनीं नातिसंक्षेपविस्तरां गूढशब्दार्थ-भावोद्बोधिनीं स्थले स्थले च पारस्परिकभेदवर्णनपरां **"सुधालहरी"**ति नाम्नीं संक्षिप्तटीकां निर्माय **श्रेष्ठिमहोदयेभ्य उपायनीकरोमि** । समयस्याल्पतया नानाकार्यजालग्रस्तचेतसः प्रमादाद्वा यत्र कुत्रापि सम्भूतं स्खलनं भवेत्तर्हि गुण-मात्रैकपक्षपातिनो भवन्तो विद्वद्वरेण्या बोधनेनानुकम्पनीयोऽयं जन इति साञ्जलि समभ्यर्थये—

**श्रीगङ्गादशहरायाम्**
वि० सं० २०००

विदुषां वशंवदः—
**उमेशानन्दमिश्रः**

* श्रीगौरकृष्णः शरणं मम *

# सम्पादकीया द्वित्राः शब्दाः ।

**अयि प्राच्यपद्धत्त्यामयनिदानानुसंधित्सवो वैद्यवृन्दमहोदयाः !**

अद्य भगवतो यशोदानन्दामन्दानन्दविधायिनः परब्रह्मणः सच्चिदानन्द-विग्रहस्य श्रीकृष्णस्य परमानुकम्पयाऽदो "माधवनिदानम्" प्रायशः सर्वत्रा-युर्वेदसंसारे प्रचलिततरमिति मनसिकृत्य "चौखम्बासंस्कृतपुस्तकालया"ध्यक्षेण श्रीश्रेष्ठिवर्य-जयकृष्णदासमहोदयेन **पण्डितश्रीमिश्रोपाह्वोमेशानन्दशर्म्मणा** साग्रहं परीक्षार्थिविद्यार्थिजनोपकारिकया "सुधालहरी" नामिकया विषमस्थल-टीकया सनाथीकारितं सम्पादनार्थं मद्धस्ते यत् समर्पितं तन्मया यथामति बहुषु स्थलेषु निदानोपयोगिसंग्रहश्लोकानुद्धृत्य मूलपाठेन सह कोष्ठान्तर्गतान् संस्थाप्य; अन्ते च परिशिष्टरूपेण प्रचलितनवीनानवीनरोगाणां माधवनिदानेऽ-नुक्तानां बहूनां चिकित्सासमये दृष्टिपथं भविष्णूनां पाश्चात्यसम्मतानामपि निदानादिसमन्वितानां विविधामयानां च स्वरचितपद्यरूपेण संगृह्य समुचित-वर्णनपूर्वकं तथा चात्र रोगाणां राष्ट्रभाषायां राजकीयभाषायाञ्च यथाप्राप्तप्रच-लितनामनिर्देशपुरस्सरञ्च सम्पाद्य भवतां समक्षं समर्प्यते । आशास्यते चेति-यदिदं संस्करणं चिकित्सोपयोगि परीक्षार्थिविद्यार्थिजनानन्दप्रयोगि सर्वाति-शायि भावि । यद्यनेन कस्य चन कदा चन कश्चिदप्युपकारः स्यात्तर्हि प्रकाशकसंपादकयोर्द्वयोरपि श्रमसाफल्येन कृतकृत्यता भवेत् ।

अत्र शोध्यपत्राणां संशोधनादिकार्ये यत् सुहृद्वर-**पण्डितश्रीराम-चन्द्रझा**-व्याकरणाचार्येण साहाय्यमाचरितं तदर्थं सबहुमानं धन्य-वादास्पदं स महोदयः । अत्र च प्रमादाज्झटिति संशोधनप्रभृतिकार्येषु यावत्य-स्त्रुट्यः संजातास्तावतीर्यथास्थलं संशोध्य कृपया संक्षम्य च केवलगुणैकपक्ष-पातिनः कृतधियो महीयांसो जना मां प्रकाशकमहोदयं चानुगृह्णन्त्वित्यलं पल्लवितेनेति शम् ।

**अधिकाशि बुलानालास्थ-श्रीराधारमणमन्दिरे श्री गङ्गादशहरायाम् वै० सं० २०००**

**आयुर्वेदविदामेकान्तविनेयतमश्चिरपरि-चितपरिचारको भिषग्वर-व्रजमोहनि ब्रह्मशंकरमिश्र-शास्त्री ।**

# अथ माधवनिदानस्य विषयानुक्रमणिका ।


| विषयाः | पृष्ठाङ्काः |
|---|---|
| पञ्चलक्षणनिदानम् | १ |
| ज्वरनिदानम् | २ |
| अतीसारनिदानम् | ३० |
| ग्रहणीरोगनिदानम् | ३६ |
| अर्शोरोगनिदानम् | ४० |
| अग्निमान्द्याजीर्णविसूचिकालसकविलम्बिकानिदानम् | ४६ |
| क्रिमिरोगनिदानम् | ५१ |
| पांडुरोगकामलाकुम्भकामलाहलीमकनिदानम् | ५३ |
| रक्तपित्तनिदानम् | ५७ |
| राजयक्ष्मोरःक्षतनिदानम् | ५९ |
| कासनिदानम् | ६४ |
| हिक्काश्वासनिदानम् | ६७ |
| स्वरभेदनिदानम् | ७३ |
| अरोचकनिदानम् | ७५ |
| छर्दिनिदानम् | ७६ |
| तृष्णानिदानम् | ७८ |
| मूर्च्छाभ्रमनिद्रातन्द्रासन्न्यासनिदानम् | ८० |
| पानात्ययपरमदपानाजीर्णपानविभ्रमनिदानम् | [illegible] |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| दाहनिदानम् | ८८ |
| उन्मादनिदानम् | ८९ |
| अपस्मारनिदानम् | ९५ |
| वातव्याधिनिदानम् | ९७ |
| वातरक्तनिदानम् | १०७ |
| ऊरुस्तम्भनिदानम् | ११० |
| आमवातनिदानम् | १११ |
| शूलपरिणामशूलान्नद्रवशूलनिदानम् | ११३ |
| उदावर्त्तानाहनिदानम् | ११५ |
| गुल्मनिदानम् | ११८ |
| हृद्रोगनिदानम् | १२१ |
| मूत्रकृच्छ्रनिदानम् | १२२ |
| मूत्राघातनिदानम् | १२४ |
| अश्मरीनिदानम् | १२६ |
| प्रमेह-प्रमेहपिडकानिदानम् | १२९ |
| मेदोरोगनिदानम् | १३५ |
| उदरनिदानम् | ,, |
| शोथनिदानम् | १४० |
| वृद्धिनिदानम् | १४२ |
| गलगण्ड-गण्डमालापची-[illegible] | [illegible] |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| श्लीपदनिदानम् | १४७ |
| विद्रधिनिदानम् | १४८ |
| व्रणशोथनिदानम् | १५० |
| शारीरव्रणनिदानम् | १५२ |
| सद्योव्रणनिदानम् | १५४ |
| भग्ननिदानम् | १५६ |
| नाडीव्रणनिदानम् | १५८ |
| भगन्दरनिदानम् | १५९ |
| उपदंशनिदानम् | १६१ |
| शूकदोषनिदानम् | १६२ |
| कुष्ठनिदानम् | १६४ |
| शीतपित्तोदर्दकोठनिदानम् | ४६९ |
| अम्लपित्तनिदानम् | ,, |
| विसर्पनिदानम् | १७१ |
| विस्फोटनिदानम् | १७४ |
| मसूरिकानिदानम् | १७६ |
| क्षुद्ररोगनिदानम् | १७८ |

| विषयाः | पृष्ठाङ्काः |
|---|---|
| मुखरोगनिदानम् | १८३ |
| कर्णरोगनिदानम् | १९२ |
| नासारोगनिदानम् | १९५ |
| नेत्ररोगनिदानम् | १९९ |
| शिरोरोगनिदानम् | २१० |
| असृग्दरनिदानम् | २१३ |
| योनिव्यापन्निदानम् | २१४ |
| योनिकन्दनिदानम् | २१७ |
| मूढगर्भनिदानम् | २१८ |
| सूतिकारोगनिदानम् | २२१ |
| स्तनरोगनिदानम् | ,, |
| स्तन्यदुष्टनिदानम् | ,, |
| बालरोगनिदानम् | २२३ |
| विषनिदानम् | २२६ |
| विषयानुक्रमणिका | २३६ |
| परिशिष्टम् | २३७ |


---

नोटः—१९९ पृष्ठस्याग्रे २०० पृष्ठतः २२० पृष्ठपर्यन्तं दृष्टिदोषात् १०० इत्यारभ्य १२० इति मुद्रितमस्ति तद्विज्ञवरः परिशोधनीयम्।


सर्वविध पुस्तक प्राप्तिस्थानम्—

जयकृष्णदास—हरिदास गुप्तः—

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी।

श्रीहरिः शरणम् ।

सुधाऽभिधया विशदटिप्पण्याऽलङ्कृतं-

श्रीमाधवकर-विरचितम्—

# माधवनिदानम्

## तत्रादौ पञ्चलक्षणानिदानम् ।

### ग्रन्थकर्त्तुर्मङ्गलाचरणम्—

प्रणम्य जगदुत्पत्ति-स्थिति-संहार-कारणम् ।
स्वर्गाऽपवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥ १ ॥

### टिप्पणीकर्त्तुर्मङ्गलाचरणम्—

नत्वा गुरुपदद्वन्द्वं ध्यात्वा पितृपदाम्बुजम् ।
माधवोक्तनिदानस्य टिप्पणिर्लिख्यते मया ॥

सत्स्वप्यनेकेषु हेत्वादितत्त्वप्रतिपादकेषु ग्रन्थेषु प्रतिपित्सूनां प्रतिपत्तिसौकर्याय ग्रन्थमारभमाणो '**ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च समाप्तिकामो मङ्गलमाचरेदि**'ति श्रुत्या ग्रन्थारम्भे प्रारब्धग्रन्थपरिसमाप्त्यर्थं श्रोतृणां विघ्नव्यूहनिरासार्थञ्च ग्रन्थकारो **माधवकरः** स्वाचारपरम्परापरिप्राप्तस्वेष्टदेवताप्रणामरूपं मङ्गलं निबध्नाति—**प्रणम्येति** । युग्ममेतत् । **मया रोगविनिश्चयो ग्रन्थो निबद्ध्यते** इत्युत्तरग्रन्थेन सम्बन्धः । प्रशब्दोऽत्रात्युत्कृष्टभक्तिप्रकाशकः । **जगदुत्पत्तिस्थितिसंहारकारणम्**—उत्पत्तिश्च स्थितिश्च संहारश्च ते उत्पत्तिस्थितिसंहाराः, जगत उत्पत्तिस्थितिसंहारा जगदुत्पत्तिस्थितिसंहाराः, तेषु कारणं जगदुत्पत्तिस्थितिसंहारकारणम् । जगच्छब्देन पृथिव्यादयो गृह्यन्ते । उत्पत्तिः=स्वकारणसमवायः, स्थितिः=कतिचित् कालपर्य्यन्तावस्थितिः । संहारो=विनाशः ।

कारणं=हेतुः । **"हेतुर्ना कारणं बीजमि"**ति कोषः। **स्वर्गापवर्गयोर्द्वारं**-स्वर्गः=सुखम्, अपवर्गः=आत्यन्तिकदुःखनिवृत्तिः, तयोर्द्वारं=प्रधानकारणम्, **त्रैलोक्यशरणं**-"त्रैलोक्यमि"ति स्वार्थे ष्यञ् **चातुर्वर्ण्यवत्**। त्रैलोक्यस्य=भुवनत्रयवर्त्तिस्थावरजङ्गमात्मकसमूहस्य, शरणं=रक्षकम्, **"शरणं गृहरक्षित्रोरि"**ति कोषः। **शिवं**=महेश्वरम्, महादेवस्य नामबाहुल्येऽपि हरादिपर्यायान् परिहृत्य शिवपदनिर्देशेन ग्रन्थाध्यापकानां मध्ये नृणां च कल्याणमभिलष्यति ग्रन्थकारः। शिवशब्दो हि कल्याणवचनः, **"श्वः श्रेयसं शिवं भद्रमि"**ति कोषात्॥१॥

**नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात्।**
**सोपद्रवारिष्ट-निदान-लिङ्गो निबद्ध्यते रोगविनिश्चयोऽयम्॥२॥**

अभिधेयादिचतुष्टयोपादानाय श्लोकद्वयमाह—**नानेत्यादि** । **नानामुनीनाम्**=अनेकेषां महर्षीणाम्, **वचनैः**=वाक्यैः, **इदानीं**=सम्प्रति, **समासतः**=संक्षेपतः, सन्तश्च ते भिषजः **सद्भिषजस्तेषां** तथोक्तानां=सद्वैद्यानाम्, **नियोगात्**="अस्मदुपकाराय ग्रन्थः क्रियतामि"त्येवंविधप्रार्थनाकरणात्, अथवा—आज्ञायाः, एतेनार्थेन ग्रन्थकारस्य विनयत्वं स्फुटीभवति। **सोपद्रवारिष्टनिदानलिङ्गः**=उपद्रवश्चारिष्टञ्च, निदानञ्च, लिङ्गञ्च, उपद्रवारिष्टनिदानलिङ्गानि तैः सह वर्त्तमानः सोपद्रवारिष्टनिदानलिङ्गः। तत्रोपद्रवो हि रोगारम्भकदोषप्रकोपजन्योऽन्यविकारः, तदुक्तं पुनर्वसुना चरके-**"व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः। उपक्रमाविरोधी च स उपद्रव उच्यते"** इति। नियतमरणख्यापकं लिङ्गमरिष्टम्। रोगोत्पादको हेतुर्निदानं, रोगख्यापको हेतुर्लिङ्गम्, लिङ्ग्यन्ते ज्ञाप्यन्ते व्याधयो येनेतिविग्रहात् पूर्वरूपादीनामपि संग्रहो भवति। **रोगविनिश्चयः**=रोगाणां=व्याधीनां विनिश्चयो=विशेषेण वातजत्वादिसाध्यासाध्यत्वादिरूपेण विज्ञानं येन स तथाभूतोऽयं ग्रन्थो **निबध्यते**=संगृह्यते। अस्माभिरिति शेषः। सोपद्रवेत्यादिविशेषणोपन्यासाद् ग्रन्थस्य वाच्यवाचकभावलक्षणः सम्बन्धो बोद्धव्य इति॥ २॥

प्रयोजनम्—**नानातन्त्रविहीनानां भिषजामल्पमेधसाम्।**
**सुखं विज्ञातुमातङ्कमयमेव भविष्यति॥ ३॥**

**नानातन्त्रेति। नानातन्त्रविहीनानाम्**=अनेकतन्त्रशून्यानाम्, **अल्पा**=स्वल्पा, **मेधा**=धारणावती धीर्येषां तेषां तथोक्तानामल्पबुद्धीनां, **भिषजां**=वैद्यानाम्, **सुखम्**=अनायासेन यथा स्यात् तथा, **आतङ्कं**=रोगं, **विज्ञातुं**=विशेषेणावगन्तुम्, **अयम्**=ग्रन्थः, **भविष्यति**। कारणमिति शेषः। अत्र रोग-

ज्ञानं प्रयोजनं, फलञ्चास्य चिकित्सितमित्यवधेयम् ॥ ३ ॥

**निदानं (१) पूर्वरूपाणि रूपाण्युपशयस्तथा ।**
**सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥ ४ ॥**

रोगस्य पञ्च ज्ञानोपाया भवन्ति, तान् बोधयितुमाह— **निदानमित्यादि ।** **निदानं**=व्याधिनिश्चयकरणं, निर्दीयते=निश्चीयते व्याधिरनेनेतिव्युत्पत्तेः । निशब्दो निश्चयवाचकः । यथाऽऽह वररुचिः—“**नि निश्चयनिषेधयोरि**”ति । “**करणाधिकरणयोश्चे**”**ति**करणे ल्युट् प्रत्ययः । **पूर्वरूपाणि, रूपाणि, तथा उपशयः, सम्प्राप्तिश्चेति, रोगाणाम्**=आमयानां, **विज्ञानं**=विशिष्टज्ञानं, **पञ्चधा**=पञ्चप्रकारेण, **स्मृतं** = कथितम् । महर्षिभिरिति शेषः । ननु निदानादिपञ्चसु व्याधिबोधकेष्वेकेनैव रोगाणां बोधसम्भवेऽन्येषां ग्रहणं व्यर्थमिति चेद्, न, भिन्नप्रयोजनकत्वात् । तथा हि संकीर्णलक्षणेऽनभिव्यक्तलक्षणे वा व्याधौ रोगाणामुपशयं विना बोधासम्भवस्तस्मात् तदावश्यकमेवमप्यन्येषां प्रयोजनवशादुपादानमावश्यकमिति । तदुक्तं चरके पतञ्जलिना—“**गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां ।परीक्षेते**”ति । सुश्रुतेऽपि—“**अभ्यङ्गस्नेहस्वेदाद्यैर्वातरोगो न शाम्यति । विकारस्तत्र विज्ञेयो दुष्टमत्रास्ति शोणितमि**”ति ॥ ४ ॥

निदानमाह—**निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।**
**निदानमाहुः पर्य्यायैः····················॥ ५ ॥**

निदानस्य पर्यायानाह—**निमित्तेति ।** निमित्तञ्च, हेतुश्च, आयतनञ्च, प्रत्ययश्च, उत्थानञ्च, कारणञ्चेति **निमित्तहेत्वायतनप्रत्ययोत्थानकारणानि तैः**तथोक्तैः, **पर्यायैः, निदानमाहुः,** मनीषिण इति शेषः । निदानं हि द्विविधं— **सन्निकृष्टविप्रकृष्ट**भेदात् । **सन्निकृष्टो** यथा—प्रकुपिता वातादयो दोषा ज्वरादिकमुत्पादयन्ति । **विप्रकृष्टो** यथा—हेमन्ते सञ्चितः कफो वसन्ते प्रकुप्यतीति । एतैः शब्दैरभिधीयमानत्वं निदानत्वं, **लक्षणं तु** सेतिकर्त्तव्यताको रोगोत्पादकहेतुर्निदानमिति ॥ ५ ॥

पूर्वरूपमाह—........................**प्राग्रूपं येन लक्ष्यते ।**
**उत्पित्सुरामयो दोष-विशेषेणानधिष्ठितः ।**
**लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ॥ ६ ॥**

---

( १ ) जायते जन्म रोगाणां येन केनापि हेतुना ।
प्रकोपश्चापि दोषाणां निदानं तद्विदुर्बुधाः ॥

प्रागूरूपमाह—**प्रागूरूपमिति । येन**=जृम्भाऽऽलस्यगात्रगौरवादिना, **उत्पित्सुः**=उद्बुभूपुः। उत्पत्तिमिच्छति-उत्पित्सतीति-उत्पित्सुः । पद्यतेः सन्नन्तात् **'सनाशंसभिक्ष उः'** इत्युप्रत्ययेन सिध्यति । **आमयो**=रोगो ज्वरादिः, **"रोगव्याधिगदामयाः"** इत्यमरः । **दोषविशेषेण**=वातादिजन्यासाधारणवेपथ्वादिना, **अनधिष्ठितः**=असम्बद्धः । **लक्ष्यते**=ज्ञायते, **तत्प्रागूरूपं**=पूर्वरूपं, विद्यादिति शेषः । **पूर्वरूपं** द्विविधं—सामान्यं विशिष्टञ्चेति । तत्र सामान्यमुक्त्वा विशिष्टमाह—**लिङ्गमित्यादिना । व्याधीनां**=रोगाणाम्, **अल्पत्वाद्**=अणुत्वाद्, **अव्यक्तम्**=अस्पष्टं, **लिङ्गं**=लक्षणं, **यथायथं**—यस्य रोगस्य यद् रूपं **तदे**वाविस्पष्टं तस्य पूर्वरूपं विज्ञेयमिति । केचित्तु—**स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते ॥**

तन्नातिरमणीयं, राजयक्ष्मणः पूर्वरूपस्य तृणकेशादिनिपातस्याव्यापकत्वाद् । तस्माद् **भविष्यद्व्याधिव्यापकत्वलिङ्गं** पूर्वरूपलक्षणं विज्ञेयम् ॥६॥

रूपम्—**तदेव व्यक्ततां यातं रूपमित्यभिधीयते ।**
**संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ॥ ७ ॥**

रूपमाह—**तदेवेति । तदेव**=प्रागूरूपमेव पूर्वोक्तं शरीरसम्बन्धि, **व्यक्तताम्**=उद्भूततामिति यावत् । **यातम्**=उत्पन्नं, **रूपमिति,अभिधीयते**=कथ्यते, बुधैरिति शेषः । शास्त्रे व्यवहारार्थं रूपपर्यायानाह—**संस्थानमिति । संस्थानं, व्यञ्जनं, लिङ्गं, लक्षणं, चिह्नम्, आकृतिः,** एते शब्दा रूपस्य पर्यायाः शास्त्रे व्यवहृताः ॥ ७ ॥

उपशयमाह—**हेतु-व्याधि-विपर्य्यस्त-विपर्य्यस्तार्थकारिणाम् ।**
**औषधान्न-विहाराणामुपयोगं सुखावहम् ॥**
**विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥ ८ ॥**

उपशयं लक्षयितुमाह-**हेतुव्याधी**त्यादि । ( युग्मम् ) हेतुश्च व्याधिश्च हेतुव्याधी तयोर्व्यस्तसमस्तयोर्विपर्य्यस्ता विपरीता हेतुव्याधिविपर्यस्तास्तथा विपर्य्यस्तानामर्थां विपर्य्यस्तार्थाः, तयोरेव विपर्य्यस्तं विपरीतमर्थं कुर्वन्तीति विपर्य्यस्तार्थकारिणः, हेतुव्याधिविपर्य्यस्ताश्च विपर्य्यस्तार्थकारिणश्च **हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणः, तेषां** तथोक्तानाम् । विपर्य्यस्तानामर्थं कुर्वन्तीति प्रकृतत्वाद्धेतुव्याधिविपर्य्यस्तानामित्यर्थः । औषधञ्च अन्नञ्च विहारश्च **औषधान्नविहारास्तेषां** तथोक्तानाम्, हेतुविपरीतानां व्याधिविपरीतानां हेतुव्याधिविपरीतानां-

हेतुविपरीतार्थकारिणां व्याधिविपरीतार्थकारिणां हेतुव्याधिविपरीतार्थकारिणामौषधान्नविहाराणाम् , **सुखावहम्**=सुखजनकम्, **उपयोगम्**=उपायम्, **उपशयं, विद्यात्**=जानीयात् । **अयम्भावः**-यद्गुणक्रियो हेतुस्तद्गुणक्रियाविपरीतगुणक्रियावतामौषधान्नविहाराणां, यद्गुणक्रियो व्याधिस्तद्गुणक्रियाविपरीतगुणक्रियावताञ्चौषधान्नविहाराणां, यद्गुणक्रियौ हेतुव्याधी चोभौ तदुभयश्च तद्गुणक्रियाविपरीतगुणक्रियावतामौषधान्नविहाराणाम् । विपर्य्यस्तार्थकारिणामिति–औषधान्नविहाराणामित्यस्य विशेषणम् । अत्र द्वन्द्वाद् यदौषधं यच्चान्नं यो वा विहारो वा यदौषधान्नं ये चौषधान्नविहारा वा हेतुविपरीता न भवन्ति व्याधिविपरीता न भवन्ति, हेतुव्याध्योरुभयोर्वा विपरीता न भवन्ति । भवति च हेतुविपरीतमौषधं वाऽन्नं वा विहारो वा यमर्थं तद्व्याधिप्रशमनं करोति तदर्थकारिणश्च स्वप्रभावेण तेषां चौषधान्नविहाराणाम् , औषधस्य विहारस्य वाऽन्नस्य वा विहारस्य वा द्वन्द्वस्य समुदायस्य वा सुखानुबन्ध उपयोग–उत्तरकालं सुखं बध्नाति य उपयोगः स उपशय इति । **अथोदाहरणानि- हेतुविपरीतमौषधं यथा—**शीतकफज्वरे शुण्ठ्याद्युष्णं भेषजम् । **हेतुविपरीतमन्नं यथा**–श्रमानिलजे ज्वरे रसौदनम्। **हेतुविपरीतो विहारो यथा**–दिवास्वप्नोत्थकफे रात्रौ जागरणं रूक्षं-दिवानिद्राविपरीतम् । इत्युक्ता हेतुविपरीता औषधान्नविहाराः । **व्याधिविपरीतमौषधं यथा**–अतिसारे स्तम्भनम् पाठाऽऽदि, विषे शिरीषः, प्रमेहे हरिद्रा । **व्याधिविपरीतमन्नं यथा**–रौक्ष्यगुणतो वायुवृद्धौ स्निग्धं घृतादिकम् , अतिसारे स्तम्भनं मसूरयूषादि । **व्याधिविपरीतो विहारो यथा**–“रौक्ष्यगुणतो वातवृद्धौ दिवानिद्रा, उदावर्ते प्रवाहणम् । **उभयविपरीतमौषधं यथा**–शीतगुणतोऽतिवृद्धवातशोथे दशमूलमुष्णं शीतहेतुविपरीतं, वातशोथविपरीतञ्च । **उभयविपरीतमन्नं यथा**–शीतनिमित्तवृद्धवातजे ज्वरे यवागूरुष्णा ज्वरघ्नी च । **उभयविपरीतो विहारो यथा**–स्निग्धदिवास्वप्नजायां श्लेष्मवृद्धौ तज्जायां तन्द्रायां वा तदुभयविपरीतं रात्रिजागरणम् । **हेतुविपरीतार्थकारि–औषधं यथा**–कटुरसातिजनिते शुक्रक्षये रूक्षः पुराणगोधूमो वृष्यः । पित्तप्रधाने पच्यमानव्रणशोथे चान्नं विदाहि द्रव्यम् । **उभयविपरीतार्थकारी विहारो यथा**–भीतिजनितायामनिलवृद्धौ भयजे च ज्वरे कामः, कामजे वा ज्वरे शोकः क्रोधश्च । **व्याधिविपरीतार्थकारि औषधं यथा**–छर्द्यां वमनकारकं मदनफलादिकम् । **व्याधिविपरीतार्थकारि चान्नं यथा**–श्लेष्मवृद्धिजनिते प्रमेहे पुराणा यवगोधूमा वातजन्यातिसारे रेचनार्थं दुग्धम् । **व्याधिविपरीतार्थकारी विहारस्तु**–सस्नेहपित्त-

वृद्धिजाते स्निग्धो दिवास्वप्नः, छर्द्यां वमनार्थं प्रवाहणञ्च । **उभयीविपरीतार्थ-कारि औषधं यथा**–कट्वम्लोष्णाहारात्पित्तवृद्धौ अम्लमामलकं पित्तहरम् । अग्नि-प्लुष्टे चोष्णेऽगुर्वादिलेपः । **उभयविपरीतार्थकारि चान्नं यथा**–रूक्षाहारजाते पित्तरोगे मन्दं स्निग्धं घृतम् । मद्यपानोत्थे मदात्यये मदकारणमद्यञ्च । **उभ-यविपरीतार्थकारी विहारो यथा**–व्यायामातियोगजे वृद्धे वाते सम्यग् व्या-यामः, तथाऽतिव्यायामजे चोरुस्तम्भे जलप्रतरणं स्थलाक्रमणञ्च । उपशयस्य पर्यायमाह—**स ही**त्यादि । **सः**=उपशयः, **सात्म्यमिति** पर्यायशब्देन **स्मृतः** =कथितः, भिषग्भिरिति शेषः ॥ ८ ॥

अनुपशयमाह—**विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः ॥ ९ ॥**

**विपरीतः**=उपशयाद् विरुद्धः, **अनुपशयः** । तत्पर्यायमाह–**व्याध्यसा-त्म्ये**–इति । **अभिसंज्ञितः**=पर्यायैः स्मृतः । ननु अनुपशयस्यापि व्याधिबोध-कत्वेन **'रोगाणां विज्ञानं पञ्चधा स्मृतमि'**तिपूर्वप्रतिज्ञाविरोध आपद्यते, अनुप-शययोजनया तस्य षड्विधत्वादिति चेन्न, अनुपशयस्य निदानेऽन्तर्भावात् । वक्ष्यति च **'निदानोक्तानुपशय'**, इति ॥ ९ ॥

सम्प्राप्तिमाह—**यथादुष्टेन दोषेण यथा चानुविसर्पता ।**
**निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः ॥ १० ॥**

सम्प्राप्तिमाह—**यथे**त्यादि । **यथा**=येन प्रकारेण, दुष्टः=प्रकुपितो वाताद्य-न्यतमो दोषो यथादुष्टस्तेन **यथादुष्टेन । यथा चानुविसर्पता**=सन्निवेशविशेषे-णोर्ध्वाधस्तिर्यगादिभेदेन सकलं शरीरमनुधावता, **आमयस्य**=रोगस्य **"रो-गव्याधिगदामयाः"**इत्यमरः । **निर्वृत्तिः**=उत्पत्तिः,सा **सम्प्राप्तिः,** उच्यते= वैद्यैरिति शेषः । तस्याः सम्प्राप्तेः शास्त्रे व्यवहारज्ञानाय पर्यायावाह—**जातिः, आगतिरि**ति । जात्यादिशब्दैरभिधीयमानोऽर्थः सम्प्राप्तिशब्दार्थः ॥ १० ॥

सम्प्राप्तिभेदाः—**संख्याविकल्पप्राधान्यबलकालविशेषतः ।**
**सा भिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥ ११ ॥**

सम्प्राप्तेरौपाधिकभेदानाह—**संख्येत्या**दि । संख्या च विकल्पश्च प्राधा-न्यञ्च बलं च कालश्च **संख्याविकल्पप्राधान्यबलकालास्तेषां विशेषतः, सा**=सम्प्राप्तिर्बहुधा **भिद्यते, यथाऽत्रैव–अष्टौ ज्वरा** इति । अष्टत्वञ्च वातादिहे-तुभेदाद्बोध्यम् । अन्यत्राप्येवमेव । **'पञ्च गुल्माः पञ्च कासा विंशतिर्मेहा'** इत्यादि संख्याविवरणम् ॥ ११ ॥

विकल्पमाह—**दोषाणां समवेतानां विकल्पोंऽशांश-कल्पना ॥ १२ ॥**

विकल्पं लिलक्षयिषुराह—**दोषाणामिति । दोषाणां**=वातादीनां, **समवेतानाम्**=एकत्र रोगे मिलितानाम् । सङ्घटितानामिति यावत् । **अंशांशकल्पना**=अंशश्च अंशश्च अंशांशौ ताभ्यां कल्पना—वातादिगतरौक्ष्यशैत्यादिविशेषावबोधपूर्वकं तत्तद्दोषप्रकोपावधारणं विकल्पपदार्थः । दोषाणामिति बहुवचननिर्देशेनैव समवेतानामित्यर्थे लब्धे पुनः समवेतानामिति पृथग्द्वन्द्वसन्निपातानामपि चांशांशकल्पना विकल्प इति स्फुटप्रतिपत्तये ॥ १२ ॥

प्राधान्यमाह-**स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ॥१३॥**

प्राधान्यं निरूपयितुमाह-**स्वातन्त्र्येति ।** स्वतन्त्रस्य भावः स्वातन्त्र्यं, परतन्त्रस्य भावः पारतन्त्र्यं, स्वातन्त्र्यम् पारतन्त्र्यञ्च **स्वातन्त्र्यपारतन्त्र्ये ताभ्यां, व्याधेः**=रोगस्य, **प्राधान्यम् , आदिशेद्**=जानीयात् । **अयम्भावः**-रोगारम्भे हि खलु एकैको दोषो यदि व्याधिमारभते तर्हि प्राधान्यं तत्र न सम्भवति तस्य सापेक्षकत्वात् । यत्रामयं द्वौ वा त्रयो वा दोषा आरभन्ते तत्र प्राधान्यमेकमपेक्ष्यान्यस्य सम्भवति, द्वयोर्मध्ये यस्तर उत्कृष्टोऽधिकलिङ्गस्तस्य प्राधान्यं लिङ्गतारतम्याभ्यां दोषयोर्दोषाणां वा प्राधान्यं निर्णेयम् । यदुक्तं चरके-**प्राधान्यं पुनर्दोषाणां तारतम्याभ्यामुपलभ्यते**"।तत्र द्वयोस्तरस्त्रिषु तम इति ॥ १३ ॥

बलाबलमाह—**हेत्वादिकात्स्न्यावयवैर्बलाबलविशेषणम् ॥ १४ ॥**

बलाबलमाह—**हेत्वादीति ।** हेतुरादिर्येषां ते हेत्वादयः, आदिशब्देन पूर्वरूपादीनामपि संग्रहः, कृत्स्नस्य भावः कात्स्न्यं कात्स्न्येन अवयवाः कात्स्न्यावयवा हेत्वादीनां कात्स्न्यावयवा **हेत्वादिकात्स्न्यावयवास्तैः**=तथोक्तैः । बलञ्चाबलञ्च बलाबले व्याधेः सम्बन्धिनी, तयो**र्विशेषणं**=विशिष्टता, **बलाबलविशेषणं ।** तद्यथासंख्येन हेत्वादिकात्स्न्यावयवैः, आदिशेत्=जानीयाद् । इति ॥१४॥

कालमाह—**नक्तंदिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम् ॥ १५ ॥**

कालमाह—**नक्त**मित्यादि । नक्तं च दिनञ्च ऋतुश्च भुक्तञ्च तानि नक्तंदिनर्त्तुभुक्तानि तेषामंशाः = अवयवा **नक्तंदिनर्त्तुभुक्तांशास्तै**स्तथोक्तैः । **नक्तं**=रात्रिः, **दिनम्**=अहः, **ऋतुः**=वसन्तादिः, **भुक्तम्**=आहारः, **व्याधेः**=रोगस्य, **कालः**=समयः, व्याधिकालः । **यथामलं**=यथादोषं, यो यस्य दोषस्यात्मीयकालस्तं नक्तंदिनर्त्तुभुक्तांशैर्व्याधिकालं रोगवृद्धिहानिहेतुसमयमुक्तं जानीयात् । तदुक्तं वाग्भटेन "**ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः । वयोऽहोरात्रिभुक्तानां तेऽन्त्यमध्यादिगाः क्रमात्**" इति । अत्र **ते** इत्यनेन वातपित्तश्लेष्माणः क्रमतो वेदितव्याः ॥ १५ ॥

**इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते ॥ १६ ॥**

उक्तनिदानपञ्चकमुपसंहरन्नाह—**इती**ति । **इति**=इति-शब्दः प्रकारे, अनेन प्रकारेण संक्षेपनामकेन यथानिर्दिष्टम्, **निदानार्थः**=निदानाभिधेयः, संक्षेपतः, **प्रोक्तः**=प्रकर्षेणोक्तः, न तु व्यासतः । य एव निदानार्थः पूर्वं समासतः प्रोक्तः=**स** एव सम्प्रति **व्यासेन**=विस्तरतः प्रतिरोगं समग्रेण ग्रन्थेन, **उपदेक्ष्यते**=कथयिष्यते, तन्त्रकृद्भिरिति शेषः ॥ १६ ॥

इदानीं सर्वव्याधीनां दोषाणां च निदानं ब्रवीति—

**सर्वेषामेव रोगाणां निदानं कुपिता मलाः ।**
**तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥ १७ ॥**

**कारणं हि द्विविधं**-विप्रकृष्टं सन्निकृष्टञ्चेति । तत्र **विप्रकृष्टं** विरुद्धासात्म्यभोजनादि, **सन्निकृष्टं** वातादि, तस्य वातादेः सन्निकृष्टकारणत्वेन सर्वरोगेष्वव्यभिचरितकारणत्वप्रदर्शनार्थमाह—**सर्वेषामि**त्यादि । कुपितत्वेन धातूनां दोषा एव मला अभिधीयन्ते । तदुक्तं "**मलिनीकरणान्मला**" इति । **मलाः**=दोषाः, **कुपिताः**=क्रुद्धाः, **सर्वेषां रोगाणाम्**=आमयानाम्, **निदानं**=कारणम् । तदित्यनेन वातादयः परामृश्यन्ते । **तस्य**=वातादेः, **प्रकोपस्य, निदानं**=कारणं, **विविधं**=नानाप्रकारकम्, **अहितसेवनम्**=विरुद्धानुष्ठानं, **प्रोक्तं**=कथितमिति ॥ १७ ॥

इदानीमन्यत्रापि निदानार्थकरतां दर्शयति चरकीयवचनेन—

**निदानार्थकरो रोगो रोगस्याप्युपजायते ।**
**तद्यथा ज्वरसन्तापाद्रक्तपित्तमुदीर्यते ॥**
**रक्तपित्ताज्ज्वरस्ताभ्यां शोषश्चाप्युपजायते ।**
**प्लीहाभिवृद्ध्या जठरं जठराच्छोथ एव च ।**
**अर्शोभ्यो जाठरं दुःखं गुल्मश्चाप्युपजायते ॥**
**दिवास्वापादिदोषश्च प्रतिश्यायश्च जायते**
**प्रतिश्यायादथो कासः कासात्संजायते क्षयः ।**
**क्षयो रोगस्य हेतुत्वे शोषस्याप्युपजायते ॥ १८ ॥**

ननु पूर्वोक्तमेव किं निदानमाहोस्विदन्यदपीत्यत आह-**निदानार्थकर** इत्यादि । **अपि** शब्दोऽत्र भिन्नक्रमे । **रोगः**=व्याधिरपि, **रोगस्य**=आमयस्य, **निदानार्थकरः, उपजायते**=सम्पद्यते, निदानेन योऽर्थो व्याधिनिश्चयरूपः क्रियते=साध्यते स रोगेणापीति भावः । रोगोऽपि रोगकर इति स्पष्टमनुक्त्वा निदा-

नार्थकर इति भङ्ग्या भाषणेन निदानान्तरोपबृंहितबल एव व्याधिर्व्याध्यन्तरमारभत इति ध्वन्यते । तथा च **रोगो रोगस्य निदानमुपजायत** इत्येव ग्रन्थकारहृदयं बोध्यम् । रोगाद् रोगान्तरोत्पत्तौ दृष्टान्तमाह—**तद्यथे**ति । ज्वरस्य सन्तापो **ज्वरसन्तापस्तस्मात्** कारणभूतात्, **रक्तपित्तं** लोहितपित्तसंज्ञको रोगः, **उदीर्यते**=उत्पद्यते । निदानभूताद् **रक्तपित्ताद् ज्वरः**, उत्पद्यते, **ताभ्यां**=रक्तपित्तज्वराभ्यां, निदानभूताभ्यां **शोथ उपजायते, प्लीहाभिवृद्ध्या** जठरम्=उदररोगः, जायते । **जठरात् शोथः** संजायते, **अर्शोभ्यः**=दुर्नामसंज्ञकेभ्यः, दुःखयतीति **दुःखं**=पीडाजनकं, **जाठरम्**=उदररोगः, **गुल्मश्चाप्युपजायते । दिवास्वापादिदोषैः प्रतिश्यायः=पीन**सः, जायते । **प्रतिश्यायात्**=पीनसात्, **कासः सञ्जायते कासात्क्षय** उत्पद्यते स च क्षयः **शोषस्य रोगस्य**=राजयक्ष्मणो-**हेतुत्वे उपजायत** इति । "ननु **कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च । द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसङ्ग्रह**" इति चरकवचनं विरुणद्धि । यदि रोगोऽपि रोगस्य निदानमुपजायते तदा तुरीयहेतुसद्भावादिति चेदत्र केचित् समाधिमभिदधति—रोगो रोगस्य निदानं भूत्वा त्रिविधनिदानव्यतिरेकेण निदानं न भवति यावदसात्म्येन्द्रियार्थसंयोगादिभिरुपबृंहितबलो न भवति न तावद् रक्तपित्तमारभते ज्वरः, तस्माद् रोगोत्पत्तौ त्रिविध एव हेतुः साक्षात् परम्परयेति बोध्यम् ॥ १८ ॥

> **ते पूर्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः ।**
> **कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति ॥ १९ ॥**
> **न प्रशाम्यति चाप्यन्यो हेतुत्वं कुरुतेऽपि च ।**
> **एवं कृच्छ्रतमा नृणां दृश्यन्ते व्याधिसंकराः ॥ २० ॥**

ननु य एते रोगा आमयान्तरस्य निदानत्वेनोपवर्णितास्ते उत्पन्नमात्रा एव व्याधिं जनयन्ति, उतानन्तरमित्यभिधातुमाह—**ते पूर्वमि**त्यादि । **ते रोगाः**=आमयाः, **पूर्वम्**=उपबृंहककारणलाभात् प्राक्, **केवलाः**=स्वतन्त्राः, **रोगा** एव रुजात्वात् । **पश्चाद्** उपबृंहककारणलाभाद्, **हेत्वर्थकारिणः**=हेतोर्निदानस्य योऽर्थो यत्प्रयोजनं, व्याध्यारम्भकत्वं तत् सम्पादयन्तीति । रोगोत्पादकस्य व्याधेर्वैचित्र्यमाह—**कश्चिदि**त्यादि । **कश्चिद् रोगो रोगस्य**=व्याध्यन्तरस्य, **हेतुर्भूत्वा प्रशाम्यति**=निवर्त्तते । **अन्यश्च** रोगस्य हेतुर्भूत्वा, **न प्रशाम्यति** व्याध्यन्तरस्य **हेतुत्वं कुरुते,** यथा—प्रतिश्यायो न निवर्त्तते कास उत्पद्यते । अर्शो न प्रशाम्यति जठरगुल्मौ संजनयत इति ॥ १९-२० ॥

**तस्माद् यत्नेन स दूवैद्यैरिच्छद्भिः सिद्धिमुद्धताम् ।**
**ज्ञातव्यो वक्ष्य.        ऽयं ज्वरादीनां विनिश्चयः ॥ २१ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने प्रथमं पञ्चलक्षणनिदानं समाप्तम्॥१॥**

अवश्यवेदनीयतामुपवर्णयति-**तस्मा**दित्यादिना । **तस्मात्** कारणात्, **उद्धताम्**-उत्कृष्टां, बहुविषयोपगुण्ठिताम्, **सिद्धिं** = कौशलम्, **इच्छद्भिः सद्वैद्यैः, योऽयं ज्वरादीनां विनिश्चयो** निदानादि प्रतिरोगमग्रे **वक्ष्यते** स **यत्नेन ज्ञातव्यः**=अवश्यं बोद्धव्य इति ॥ २१ ॥

इति माधवनिदाने सुधाऽभिधायां टिप्पण्यां पञ्चलक्षणनिदानं समाप्तम् ॥ १ ॥

## अथ द्वितीयं ज्वरनिदानम् ॥ २ ॥

ज्वरमूलहेतुसत्संख्या-**दक्षापमान-संक्रुद्ध-रुद्र-निःश्वास-सम्भवः ।**
**ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घातागन्तुजः स्मृतः ॥ १ ॥**

सर्वरोगाणां मध्ये ज्वरस्य प्राधान्यात् प्रथमं ज्वरमेव निर्वक्ति । प्राधान्यञ्च-देहेन्द्रियमनस्तापित्वाज्जन्ममरणयोरवश्यम्भावित्वात् सर्वरोगाग्रजत्वाच्च । यदुक्तं-चरके पतञ्जलिना-"**देहेन्द्रियमनस्तापी सर्वरोगाग्रजो बली । ज्वरः प्रधानं रोगाणामुक्तो भगवता पुरा**" इति । '**तस्य प्राणिसपत्नस्य ध्रुवस्य प्रलयोदये**' इत्यादि । एष एव ज्वरः । स्थावरजङ्गमरूपसर्वभूतव्यापकोऽधिष्ठानभेदेन नानानामधेयान्यभिवहति । तथा चोक्तं तन्त्रान्तरे-**पाकलः स तु नागानामभितापस्तु वाजिनाम् । गवामीश्वरसंज्ञस्तु मानवानां ज्वरो मतः ॥ अजावीनां प्रलापाख्यः करभे चालसो भवेत् । हारिद्रो महिषाणां तु मृगरोगो मृगेषु च ॥ पक्षिणामभिघातस्तु मत्स्येष्विन्द्रमदो मतः । पक्षपातः पतङ्गानां व्याडेष्वक्षिकसंज्ञितः । जलस्य नीलिका भूमेरूषरो वृक्षस्य कोटरः ॥** इत्यादि । पूर्वं ज्वरोत्पत्तिमाह-**दक्षापमाने**त्यादि । दक्षस्यापमानेन संक्रुद्धस्य रुद्रस्य निःश्वासात् सम्भवो यस्य स तथाभूतो **ज्वरोऽष्टधा** । अष्टधात्वं विवृणोति-**पृथगि**त्यादिना । **पृथग्जास्त्रयः**-१ वातिकः २ पैत्तिकः ३ श्लैष्मिकः । **द्वन्द्वजास्त्रयः**-४ वातपित्तिकः ५ वातश्लेष्मिकः, ६ पैत्तश्लेष्मिकः, ७ **संघातज एकः, आगन्तुज एकः** । एवमष्टविधो ज्वरो भवति संक्षेपेण ॥ १ ॥

ज्वरसम्प्राप्तिः-**मिथ्याऽऽहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः ।**
**बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥ २ ॥**

ज्वरस्य सम्प्राप्तिमाह—**मिथ्ये**त्यादि । आहारश्च विहारश्च आहारविहारौ ताभ्या**माहारविहाराभ्याम्** मिथ्याशब्द उभयत्र सम्बद्ध्यते । **आहारस्य मिथ्यात्वं** = प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपयोक्तृणामाहारोपयोगहेतूभूतानामष्टविधानां विरुद्धत्वेनोपयोगः । उदाहरणानि—अन्यतोऽवसेयानि विस्तरभयान्न लिखितानि । **विहारस्य मिथ्यात्वम्**—अयथाबलमारम्भादि । यथा चोक्तान्यन्यत्र मिथ्याऽऽहारविहारयोर्लक्षणानि—"**अकाले चातिमात्रञ्च ह्यसात्म्यं यच्च भोजनम् । विषमं चापि यद् भुक्तं मिथ्याऽऽहारः स उच्यते ।। अशक्तः कुरुते कर्म शक्तिमान्न करोति यः । मिथ्याविहार इत्युक्तः सदा तं परिवर्जयेत्**"।। इति । **दोषाः** = वातपित्तश्लेष्माणः, **आमाशयाश्रयाः** = आमाशयाधिष्ठिताः, आमाशयलक्षणं यथा—'**नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः**' इति । **रसानुगाः** = रससंबद्धाः, **कोष्ठाग्निं, बहिर्निरस्य** = पक्तृस्थानान्निष्काश्य ज्वरदाः=ज्वरकारिणः, **स्युः** = भवन्ति ।। २ ।।

सामान्यज्वरलक्षणं—**स्वेदावरोधः संतापः सर्वाङ्गग्रहणं तथा ।**
**युगपद्यत्र रोगे च स ज्वरो व्यपदिश्यते ॥ ३ ॥**

ज्वरलक्षणमाह—**स्वेदावरोधः** = घर्मानिर्गमः, अथवा स्विद्यत इति स्वेदोऽग्निः, तस्यावरोधोऽग्निमान्द्यम् । **सन्तापः** = देहेन्द्रियमनस्तापः, **सर्वाङ्गग्रहणं**=सर्वाङ्गपीडा, **यत्र**—व्याधौ, **युगपद्**=एककालावच्छेदेन, ईदृशं लक्षणं दृश्यते, **स ज्वरः, व्यपदिश्यते**=कथ्यते । इति ।। ३ ।।

सामान्यं ज्वरपूर्वरूपम्—**श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ।**
**इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥ ४ ॥**
**जृम्भाऽङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः ।**
**अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे ॥**
**सामान्यतः,**······························ **॥ ५ ॥**

विशेषपूर्वरूपम्—·······**विशेषात्तु, जृम्भाऽत्यर्थं समीरणात् ।**
**पित्तान्नयनयोर्दाहः कफादन्नारुचिर्भवेत् ॥ ६ ॥**

द्वन्द्वजसन्निपातपूर्वरूपम्— **रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः ।**
**सर्वलिङ्गसमवायः सर्वदोषप्रकोपजे ॥ ७ ॥**

**उत्पत्स्यति**=भविष्यति, **ज्वरे,** एतानि लक्षणानि भवन्ति । तथा हि—**श्रमः**=श्रान्तत्वमिव, **अरतिः**=अनवस्थितचित्तत्वम् , **वैरस्यं**=मुखस्य स्वादाभावः, **नयनप्लवः**=सास्रनेत्रत्वम् , शीतवातादिविषयेषु **इच्छाद्वेषौ**=अभि-

लाघवविद्वेषौ, **जृम्भा**=जृम्भणम्, **अङ्गमर्दो**=गात्रत्रोटनम्, **गुरुता**-शरीरगाणाम्, **रोमहर्षः**=रोमाञ्चः, **अरुचिः**=भोजनीयद्रव्येषु **अप्रहर्षः**=अप्रसन्नचित्तत्वम्, **सामान्यत** इति पूर्वपद्येन सम्बद्ध्यते। **'विशेषात् तु'** इति उत्तरेण सम्बद्ध्यते। **समीरणाद्**=वातात्, जायमाने ज्वरे, **अत्यर्थं जृम्भा, पित्तात्**-पैत्तिके च **नयनयोर्दाहः, कफात्**=श्लैष्मिके ज्वरे, **अन्नारुचिः**=भोजनानभिलाषः, **सर्वदोषप्रकोपजे**=सान्निपातिके ज्वरे, **सर्वलिङ्गसमवायः**=वातादिलिङ्गावाप्तिः ॥ ४-७ ॥

वातज्वररूपम्—**वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्।**
**निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥ ८ ॥**
**शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्कता।**
**शूलाध्माने जृम्भणं च भवन्त्यनिलजे ज्वरे ॥ ९ ॥**

दोषेषु वातस्य भयङ्करविकारकर्तृत्वेन प्राधान्यात् प्रथमं वातज्वरलक्षणमाह—**वेपथुरित्यादि। वेपथुः**=कम्पः, "टुवेपृ-कम्पने" धातुः "ट्वितोऽथुच्" इत्यथुच्प्रत्ययेन सिद्ध्यति। **विषमो वेगः**=हीनाधिकभावेन रंहसः प्रवर्त्तनम्, अङ्गेषु चौष्ण्याद्यनियतत्वं वा, **क्षवस्तम्भः**=छिक्काऽप्रवृत्तिः, **वक्त्रवैरस्यम्**=मुखस्य विरुद्धरसता, **शूलाध्माने**=शूलमुदरस्य, आध्मानं वायुना=सवेदनमुदरपूर्णत्वम्, **जृम्भणं**=जृम्भाया मुहुर्मुहुः प्रवृत्तिः, एतानि लक्षणानि वातज्वरे भवन्ति ॥ ८-९ ॥

पित्तज्वररूपम्—**वेगस्तीक्ष्णोऽतिसारश्च निद्राऽल्पत्वं तथा वमिः।**
**कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥ १० ॥**
**प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा।**
**पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ११ ॥**

पैत्तिकज्वरमाह—**वेग** इत्यादि। **वेगस्तीक्ष्णः**=तीव्रवेगः, **अतिसारः**=पित्तस्य सरत्वेन सद्रवा प्रवृत्तिर्न **त्वतिसार**स्तस्य ज्वरोपद्रवत्वात्। **निद्राऽल्पत्वं**=निद्रायाः स्वल्पता, **वमिः**=वमथुः, **स्वेदः**=घर्मनिर्गमः, **प्रलापः**=असंबद्धभाषणं, **वक्त्रकटुता**=मुखस्य तिक्तता, **मूर्च्छा**=रूपाद्यविज्ञानम्, **मदः**=धत्तूरकोद्रवादीनां भक्षणादाविव, **तृषा**=जलाभिलाषः, **भ्रमः**=चक्रारूढस्येव भ्रमन्निखिलपदार्थावभासः। ननु भ्रमस्य वातविकारत्वेन पित्तविकारे कथनमसङ्गतमिति चेन्न, पैत्तिकेऽपि वातानुबन्धदर्शनात् **"न रोगोऽप्येकदोषजः"** इत्यादिवचनात् ॥ १०-११ ॥

कफज्वररूपं—स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥ १२ ॥
( स्रोतोरोधो रुगल्पत्वं प्रसेको लवणास्यता ।
नात्युष्णगात्रता च्छर्दिर्लालास्रावोऽविपाकिता ) ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥ १३ ॥

श्लैष्मिकज्वरमाह—**स्तैमित्य**मित्यादि । **स्तैमित्यं**=गात्राणामार्द्रपटावगुण्ठितत्वमिव, **स्तिमितो वेगः**=मन्दो वेगः, **आलस्यं**=शक्येऽपि कर्त्तव्येऽनुत्साहः "**समर्थस्याप्यनुत्साहः कर्मण्यालस्यमुच्यते**" इति । **स्तम्भः** = जाड्यं गात्राणां, **तृप्तिः** = अनन्नाभिलाषः, **उत्क्लेदः**=उपस्थितवमनत्वमिव, **स्रोतोरोधः**=रसवाहिनां स्रोतसामवरोधः, **प्रतिश्यायः**=नासास्रवणम्, एतानि लक्षणानि कफजे ज्वरे भवन्ति ॥ १२-१३ ॥

वातपित्तज्वररूपं—तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥
पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ॥ १४ ॥

वातपित्तज्वरमाह—**तृष्णे**त्यादि । तृष्णाऽऽद्या जृम्भाऽन्ता वातपित्तज्वरस्याकृतिर्वेदितव्या । **वमथुः**=छर्दिः, **पर्वभेदः**=पर्वाणि भिद्यन्त इवेतिसन्धिपीडोपलब्धिः । एतानि लिङ्गानि विकृतिविषमसमवायारब्धस्य वेद्यानि । द्वन्द्वजेषु सान्निपातिकेषु च कानि चिल्लक्षणानि प्रकृतिसमसमवायारब्धानि, कानि चिच्च प्रकृतिविषमसमवायारब्धानि भवन्ति । प्रकृतया = हेतुभूतया, समः = कारणानुरूपः, समवायः=कार्यकारणभावसम्बन्धात्मकः, प्रकृतिसमसमवायः=कारणानुरूपं कार्यमिति यावत् । यथा शुक्लतन्तुसमवायात् पटस्य शुक्लत्वम् । विकृत्या—हेतुभूतया, **विषमः**=कारणाननुरूपः, समवायो **विकृतिविषमसमवायः**, यथा हरिद्राचूर्णसंयोगे रक्तत्वं, प्रकृते तु कफपित्तजे ज्वरे लिप्ततिक्तास्यत्वं प्रकृतिसमसमवायारब्धम् । वातपित्तयोर्लक्षणेऽरुचिरोमहर्षौ विकृतिविषमसमवायारब्धौ ॥१४॥

वातकफज्वररूपं—स्तैमित्यं पर्वणां भेदो निद्रागौरवमेव च ॥ १५ ॥
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ।
संतापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥ १६ ॥

वातश्लेष्मज्वरमाह—**स्तमित्यमि**त्यादि । **स्तैमित्यम्**—आर्द्रपटावच्छ-

न्नत्वमिव, **शिरोग्रहः** = मस्तकं गृहीतमिव जानाति, **स्वेदाप्रवर्त्तनं** = स्वेदस्य आ समन्ताद् भावेन प्रवर्त्तनमुत्पत्तिः। न तु स्वेदस्य–अप्रवर्त्तनमित्यर्थः। अन्यत्र हारीतादौ–**शिरोग्रहः स्वेदभवश्च कासो ज्वरस्य लिङ्गं कफवातजस्ये**'ति स्फुटदर्शनात् ॥ १५–१६ ॥

पित्तकफज्वररूपं— **लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।**
**मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥ १७ ॥**

श्लेष्मपित्तज्वरमाह–**लिप्ते**त्यादि। **लिप्ततिक्तास्यता** = श्लेष्मणा लिप्तं पित्तेन तिक्तञ्चास्यं = मुखं यस्य तस्य भावो लिप्ततिक्तास्यता। **तन्द्रा** = निद्रावत्क्लान्तिः, तन्द्रालक्षणं यथा—**"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः। निद्राऽऽर्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्।** इति ॥ १७ ॥

सन्निपात- **क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा।**
ज्वररूपम्–**सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ १८ ॥**
**सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः।**
**तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ॥ १९ ॥**
**परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्।**
**ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ २० ॥**
**शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।**
**स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ २१ ॥**
**कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।**
**कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ २२ ॥**
**मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।**
**चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ २३ ॥**

सन्निपातज्वरमाह—**क्षणे दाह** इत्यादि। **"अस्थिसन्धिशिरोरुजा"**–अत्र **रुजा**शब्दस्यास्थ्यादिभिरन्वयाद्, अस्थिरुजा–सन्धिरुजा–शिरोरुजेति वाक्यार्थः। **सास्रावे** = अश्रुयुक्ते, **कलुषे** = अस्वच्छे, निर्गता भुग्नता = कुटिलता ययोस्ते **निर्भुग्ने** = विस्फारिते, **लोचने** = नेत्रे, **सस्वनौ** = शब्दयुक्तौ, **सरुजौ** = वेदनावन्तौ, **शूकैः** = यवधान्याग्रजैः **"टूण"** इति लोके प्रसिद्धैः। **आवृतो** = व्याप्तः, **इव तन्द्रा** = निद्रावत् क्लान्तिः। लक्षणं पूर्वत्र वर्णितम्। **मोहः** = चेतनाऽभावः, **प्रलापः** = असम्बद्धभाषणं, **जिह्वा** = रसज्ञा, **खरस्पर्शा** = कण्टकाकीर्णा, **स्रस्ताङ्गता** = शिथिलगात्रत्वं, **रक्तपित्तस्य कफेनोन्मिश्रितस्य**

**ष्ठीवनम्**=उद्गिरणम्, **शिरसो लोठनं**=मूर्धनश्चालनमितस्ततः, **स्वेदमूत्रपुरीषाणाम्** अदर्शनम् **दर्शनञ्चेत् चिरादल्पशः, कोठानाम्**=अव्यक्तमुखानां पिडिकानां, **श्यावरक्तानां मण्डलानाञ्च** "दोदरा" इतिलोके प्रसिद्धानां **दर्शनम्**। वरटीदष्टसंकाशः त्तणिकोत्पादविनाशशाली **कोठ** इति। **मूकत्वं**=भाषणासामर्थ्यं, **दोषाणां चिराद्**=अविलम्बेन, **पाकः** सामताऽऽरब्धत्वात्। पाकश्चेति चकाराद् अन्यान्यपि लत्तणानि बोध्यानि। दोषाणां हीनमध्याधिकभावेन। सन्निपाताः षड् द्युल्वणत्वेन त्रय एकोल्वणत्वेन त्रयः, समत्वेन चैकः। एवं संकलनया त्रयोदश भेदाः सन्निपातस्य जायन्ते। ननु परस्परं विरुद्धगुणानावातादिदोषाणां सम्भूयैककार्यसम्पादकत्वमसम्भवदुक्तिकं जलतेजसोरिव सहावस्थानासम्भवात्तत्कथं सान्निपातिकरोगाणां सम्भव इति संशये "दैवाद्दोषस्वभावाद् वा दोषाणां सान्निपातिके। विरुद्धैश्च गुणैः कश्चिन्नोपघातः परस्परम्"। इति गयदासोक्तसमाधानं सन्तोषावहम्। दृढबलेन समाधानान्तरमुक्तं—"विरुद्धैरपि नन्वेतैर्गुणैर्हन्ति परस्परम्। दोषाः सहजसात्म्यत्वाद् घोरं विषमहीनिव"। इति। एतच्चान्ये दूषयन्ति परमन्ततो गत्वा दृढबलसमाधानमपि विदुषां सन्तापजनकमेवेति। विस्तरस्त्वन्यत्र द्रष्टव्यः ॥१८-२३॥

भालुकितन्त्रोक्तानि द्व्युल्वणैकोल्वणादीनां सन्निपातानां लत्तणानि—

**वातपित्ताधिको** यस्य सन्निपातः प्रकुप्यति।
तस्य ज्वरोऽङ्गमर्दस्तृट्तालुशोषप्रमीलकाः ॥ १ ॥
आध्मानतन्द्राऽरुचयः श्वासकासभ्रमश्रमाः।
**पित्तश्लेष्माधिको** यस्य सन्निपातः प्रकुप्यति ॥ २ ॥
अन्तर्दाहो बहिः शीतं तस्य तन्द्रा च बाधते।
तुद्यते दत्तिणं पार्श्वमुरःशीर्षगलग्रहाः ॥ ३ ॥
निष्ठीवेत् कफपित्तं च तृष्णा कण्डूश्च जायते।
विड्भेदश्वासहिक्काश्च बाधन्ते सप्रमीलकाः ॥ ४ ॥
विभुफल्गू च तौ नाम्ना संनिपातावुदाहृतौ।
**श्लेष्मानिलाधिको** यस्य सन्निपातः प्रकुप्यति ॥ ५ ॥
तस्य शीतज्वरो निद्रा त्तुत्तृष्णा पार्श्वनिग्रहः।
शिरोगौरवमालस्यमन्यास्तम्भप्रमीलकाः ॥ ६ ॥
उदरं दह्यते चास्य कटिर्बस्तिश्च दूयते।
सन्निपातः स विज्ञेयो **मकरी**ति सुदारुणः ॥ ७ ॥

**वातोल्वणः** सन्निपातो यस्य जन्तोः प्रकुप्यति ।
तस्य तृष्णाज्वरग्लानि–पार्श्वरुग्दृष्टिसंक्षयाः ॥ ८ ॥
पिण्डिकोद्वेष्टनं दाह ऊरुसादो बलक्षयः ।
सरक्तं चास्य विण्मूत्रं शूलं निद्राविपर्ययः ॥ ९ ॥
निर्भिद्यते गुदं चास्य बस्तिश्च परिकृत्यते ।
आयम्यते भिद्यते च हिक्कते विलपत्यपि ॥ १० ॥
मूर्च्छति स्फायते रौति नाम्ना **विस्फुरकः** स्मृतः ।
**पित्तोल्वणः** सन्निपातो यस्य जन्तोः प्रकुप्यति ॥ ११ ॥
तस्य दाहो ज्वरो घोरो बहिरन्तश्च बर्द्धते ।
शीतं च सेवमानस्य कुप्यतः कफमारुतौ ॥ १२ ॥
ततश्चैनं प्रबाधन्ते हिक्काश्वासप्रमीलकाः ।
विपूचिका पर्वभेदः प्रलापो गौरवं क्लमः ॥ १३ ॥
नाभिपार्श्वरुजा तस्य स्विन्नस्याशु विबर्द्धते ।
स्विद्यमानस्य रक्तं च स्रोतोभ्यः सम्प्रवर्त्तते ॥ १४ ॥
शूलेन पीड्यमानस्य तृष्णा दाहश्च बर्द्धते ।
असाध्यः सन्निपातोऽयं **शीघ्रकारी**ति कथ्यते ॥ १५ ॥
नहि जीवत्यहोरात्रमनेनाविष्टविग्रहः ।
**कफोल्वणः** सन्निपातो यस्य जन्तोः प्रकुप्यति ॥ १६ ॥
तस्य शीतज्वरस्वप्नगौरवालस्यतन्द्रयः ।
छर्दिमूर्च्छातृषादाहतृप्त्यरोचकहृद्ग्रहाः ॥ १७ ॥
ष्ठीवनं मुखमाधुर्यं श्रोत्रवाग्दृष्टिनिग्रहः ।
श्लेष्मणो निग्रहं चास्य यदा प्रकुरुते भिषक् ॥ १८ ॥
तदा तस्य भृशं पित्तं कुर्यात् सोपद्रवं ज्वरम् ।
निगृह्णाते तु पित्ते च भृशं वायुः प्रकुप्यति ॥ १९ ॥
निराहारस्य सोऽत्यर्थं मेदोमज्जास्थि बाधते ।
अथात्र स्नाति भुङ्क्ते वा त्रिरात्रं नहि जीवति ॥ २० ॥
मेदोगतः सन्निपातः **कफफणः** स उदाहृतः ।
कामान्मोहाच्च लोभाच्च भयाच्चायं प्रपद्यते ॥ २१ ॥
मध्यहीनाधिकैर्दोषैः सन्निपातो यदा भवेत् ।
तस्य रोगास्त एवोक्ताः प्रायो दोषबलाश्रयाः ॥ २२ ॥

काश्मीरपाठे चरके तु—

भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक् ।
**वातपित्तोल्वणे** विद्याल्लिङ्गं मन्दकफज्वरे ॥ १ ॥
शैत्यं कासोऽरुचिस्तन्द्रापिपासादाहहृद्व्यथाः ।
**वातश्लेष्मोल्वणे** व्याधौ लिङ्गं पित्तावरे विदुः ॥ २ ॥
छर्दिः शैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना ।
मन्दवाते व्यवस्यन्ति लिङ्गं **पित्तकफोल्वणे** ॥ ३ ॥
सन्ध्यस्थिशिरसां शूलं प्रलापो गौरवं भ्रमः ।
**वातोल्वणे** स्याद् द्व्यनुगे तृष्णा कण्ठास्यशुष्कता ॥ ४ ॥
रक्तविण्मूत्रता दाहः स्वेदस्तृष्णा बलक्षयः ।
मूर्च्छा चेति त्रिदोषे स्याल्लिङ्गं **पित्ते गरीयसि** ॥ ५ ॥
आलस्यारुचिहृल्लासदाहवम्यरतिभ्रमैः ।
**कफोल्वणं** सन्निपातं तन्द्राकासेन चादिशेत् ॥ ६ ॥
प्रतिश्या च्छर्दिरालस्यं तन्द्राऽरुच्यग्निमार्दवम् ।
**हीनवाते पित्तमध्ये** लिङ्गं **श्लेष्माधिके** मतम् ॥ ७ ॥
हरिद्रामूत्रनेत्रत्वं दाहस्तृष्णा भ्रमोऽरुचिः ।
हीनवाते मध्यकफे लिङ्गं **पित्ताधिके** मतम् ॥ ८ ॥
शिरोरुग्वेपथुश्वासप्रलापच्छर्द्यरोचकाः ।
**हीनपित्ते मध्यकफे** लिङ्गं **वाताधिके** मतम् ॥ ९ ॥
शीनता गौरवं तन्द्रा प्रलापोऽस्थिशिरोऽतिरुक् ।
**हीनपित्ते वातमध्ये** लिङ्गं **श्लेष्माधिके** विदुः ॥ १० ॥
वर्चोभेदोऽग्निदौर्बल्यं तृष्णा दाहोऽरुचिर्भ्रमः ।
**कफहीने वातमध्ये** लिङ्गं पित्ताधिके विदुः ॥ ११ ॥
श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक् ।
कफहीने पित्तमध्ये लिङ्गं वाताधिके मतम् ॥ १२ ॥ च. चि. अ. ३

**अथ अश्विनीकुमारसंहितोक्तास्त्रयोदशसन्निपातभेदाः ।**

**सन्निपाता-** अम्लस्निग्धोष्णतीक्ष्णैः कटुमधुरसुरातापसेवाकषायैः-
**नां निदानं** कामक्रोधातिरूक्षैर्गुरुतरपिशिताहारसौहित्यशीतैः ।
**कोपका-** शोकैर्व्यायामचिन्ताग्रहगणवनिताऽत्यन्तसङ्गप्रसङ्गैः-
**लश्च—** प्रायः कुप्यन्ति पुंसां मधुसमयशरद्वर्षणे सन्निपाताः ॥ १ ॥

**सन्निपातानां** सन्धिकश्चान्तकश्चैव रुग्दाहश्चित्तविभ्रमः ।
**नामानि**—शीताङ्गस्तन्द्रिकश्चैव कण्ठकुब्जश्च कर्णिकः ॥ २ ॥
विख्यातो भुग्ननेत्रश्च रक्तष्ठीवी प्रलापकः ।
जिह्वकश्चेत्यभिन्यासः सन्निपातास्त्रयोदश ॥ ३ ॥

**तेषां-** सन्धिके वासराः सप्त चान्तके दशवासराः ।
**दिनमर्यादा**—रुग्दाहे विंशतिर्ज्ञेया वह्न्यष्टौ चित्तविभ्रमे ॥ ४ ॥
पक्षमेकं तु शीताङ्गे तन्द्रिके पञ्चविंशतिः ।
विज्ञेया वासराश्चैव कण्ठकुब्जे त्रयोदश ॥ ५ ॥
कर्णिके च त्रयो मासा भुग्ननेत्रे दिनाष्टकम् ।
रक्तष्ठीविनि दिग्घस्राः प्रलापे स्युश्चतुर्दश ॥ ६ ॥
जिह्वके षोडशाहानि पक्षोऽभिन्यासलक्षणे ।
परमायुरिदं प्रोक्तं म्रियते तत्क्षणादपि ॥ ७ ॥

**तेषां साध्या-** सन्धिकस्तन्द्रिकश्चैव कर्णिकः कण्ठकुब्जकः ।
**साध्यत्वम्**—जिह्वकश्चित्तविभ्रंशः षट् साध्याः सप्त मारकाः ॥ ८ ॥

**संधिकसन्नि- पातलक्षणम्-** पूर्वरूपकृतशूलसम्भवं शोषवातबहुवेदनाऽन्वितम् ।
श्लेष्मतापबलहानिजागरं सन्निपातमिति **सन्धिकं** वदेत् ॥ ९ ॥

## अन्तकसन्निपातलक्षणम्—

दाहं करोति परितापनमातनोति मोहं ददाति विदधाति शिरःप्रकम्पम् ।
हिक्कां तनोति कसनं च समाजुहोति जानीहि तं विबुधवर्जित**मन्तकाख्यम्** ॥१०॥

**रुग्दाहसन्नि- पातलक्षणम्**— प्रलापपरितापनप्रबलमोहमान्द्यश्रम—
परिश्रमणवेदनाव्यथितकण्ठमन्याहनुः ।
निरन्तरतृषाकरः श्वसनकासहिक्काऽऽकुलः
स कष्टतरसाधनो भवति हन्ति **रुग्दाहकः** ॥ ११ ॥

## चित्तविभ्रमसन्निपातलक्षणम्—

यदि कथमपि पुंसां जायते कायपीडाभ्रममदपरितापा मोहवैकल्यभावः ।
विकलनयनहासो गीतनृत्यप्रलापोऽभिदधति तमसाध्यं केऽपि **चित्तभ्रमाख्यम्** १२

## शीताङ्गसन्निपातलक्षणम्-

हिमसदृशशरीरो वेपथुश्वासहिक्काः शिथिलितसकलाङ्गः खिन्ननादोग्रतापः ।
क्लमथुदवथुकासच्छर्दतीसारयुक्त-स्त्वरितमरणहेतुः **शीतगात्रः** प्रभावात् ॥ १३ ॥

**तन्द्रिकसन्नि-** प्रभूता तन्द्राऽऽर्त्तिर्ज्वरकफपिपासाऽऽकुलतरो-
**पातलक्षणम्—**भवेच्छ्यामा जिह्वा पृथुलकठिना कण्टकवृता ।
अतीसारश्वासक्लमथुपरितापश्रुतिरुजो-
भृशं कण्ठे जाड्यं शयनमनिशं **तन्द्रिकगदे** ॥ १४ ॥

**कण्ठकुब्जसन्निपातलक्षणम्—**

शिरोऽर्त्तिकण्ठग्रहदाहमोह-कम्पज्वरा-रक्तसमीरणार्त्तिः ।
हनुग्रहरतापविलापमूर्च्छाः-स्यात् **कण्ठकुब्जः** खलु कष्टसाध्यः ॥ १५ ॥

**कर्णिकसन्निपातलक्षणम्—**

प्रलापश्रुतिह्रासकण्ठग्रहाङ्ग-व्यथाश्वासकासप्रसेकप्रभावम् ।
ज्वरं तापकर्णान्तयोर्गल्लपीडा-बुधाः **कर्णिकं** कष्टसाध्यं वदन्ति ॥ १६ ॥

**कर्णिकसन्निपातोपद्रवाः—**

प्रलापकण्ठग्रहगात्रदुःखं-सश्वासकासज्वरतापकम्पाः ।
कर्णेऽश्रुतिर्ग्रन्थितया च पीडा-स्यात् कर्णिके कष्टतरा चिकित्सा ॥ १७ ॥
सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते ॥ १८ ॥
ज्वरादितो वा ज्वरमध्यतो वा ज्वरान्ततो वा श्रुतिमूलशोथः ।
क्रमेण साध्यस्त्वथ कष्टसाध्य-स्तथाऽप्यसाध्यः कथितो मुनीन्द्रैः ॥ १९ ॥

**भुग्ननेत्रसन्निपातलक्षणम्—**

ज्वरबलापचयः स्मृतिशून्यता-श्वसनभुग्नविलोचनमोहितः ।
प्रलपनभ्रमकम्पनशोफवां-स्त्यजति जीवितमाशु स **भुग्नदृक्** ॥ २० ॥

**रक्तष्ठीविसन्नि-** रक्तष्ठीवो ज्वरवमितृषामोहशूलातिसारा-
**पातलक्षणम्—**हिक्काऽऽध्मानभ्रमणदवथुश्वाससंज्ञाप्रणाशाः ।
श्यामा रक्ता विकृतरसना मण्डलोत्थानरूपा
**रक्तष्ठीवी** निगदित इह प्राणहन्ता प्रसिद्धः ॥ २१ ॥

**प्रलापकसन्निपातलक्षणम्—**

कम्पप्रलापपरितापनशीर्षपीडा-प्रौढप्रभावपवमानपरोऽन्यचिन्ता ।
प्रज्ञाप्रणाशविकलः प्रचुरप्रवादः-क्षिप्रं प्रयाति पितृपालपदं **प्रलापी** ॥२२॥

**जिह्वकसन्निपातलक्षणम्—**

श्वसनकासपरितापविह्वलः-कठिनकण्टकवृतातिजिह्वकः ।
बधिरमूकबलहानिलक्षणो भवति कष्टतरसाध्य**जिह्वकः** ॥ २३ ॥

**अभिन्याससन्निपातलक्षणम्—**

दोषत्रयस्निग्धमुखत्वनिद्रा वैकल्यनिश्चेतनकष्टवाग्मी।
बलप्रणाशः श्वसनादिनिग्रहोऽ**भिन्यास** उक्तो ननु मृत्युकल्पः ॥ २४ ॥

**हारिद्रकज्वरलक्षणम्—**

हारिद्रदेहनखनेत्रकराङ्घ्रिताप–निष्ठीवनादिकसनैरुपलक्षितो यः।
हारिद्रकः स कथितः किल सन्निपातः–साध्यो न चैष भिषजां ज्वरकालरूपः ॥२५॥

**सन्निपातावधिः—**सद्यस्त्रिपञ्चसप्ताहाद् दशाहाद् द्वादशादपि।
एकविंशद्दिनैः शुद्धः सन्निपाती सुजोवति ॥ २६ ॥ इति।

सन्निपातज्वरस्या-**दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः।**
साध्यलक्षणम्—**सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा ॥ २४ ॥**

समासतः सन्निपातज्वरस्यासाध्यलक्षणान्याह—**दोष** इत्यादि। **दोषे** = मले वातादिके वा, **विबद्धे। नष्टेऽग्नौ** = विगतजठराग्निप्रभावे आहारपाकागम्यत्वादिति भावः **सर्वाणि** = निखिलानि, **सम्पूर्णानि**=बलवन्ति, **लक्षणानि**- = चिह्नानि यस्य,स तथा। **सन्निपातज्वरः, असाध्यः** = प्रत्याख्येयः, **ततोऽन्यथा** = विसदृशः, अविबद्धदोषोऽल्पलक्षणः। **कृच्छ्रसाध्यः**। उक्तं च भालुकिना—**"मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता। यस्तु तत्र भवेज्जेता स जेताऽऽमयसंकुले ॥ सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम्। कस्तेन न कृतो धर्मः कां वा पूजां न सोऽर्हति ॥ २४ ॥**

सन्निपातमर्यादा—**सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा।**
**पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥ २५ ॥**

सन्निपातज्वरस्य मोक्षवधयोः कालावधिमाह—**सप्तम** इत्यादि। **सप्तमे दशमे द्वादशेऽपि वा दिवसे प्राप्ते पुनर्घोरतरो भूत्वा** प्रशमं याति = शान्तिमापद्यते। **हन्ति** = मारयति वा ॥ २५ ॥

तद्द्विगुणा-**सप्तमी द्विगुणा चैव नवम्येकादशी तथा।**
मर्य्यादा च—**एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥ २६ ॥**

**सप्तमी द्विगुणा** = चतुर्दशी, **नवमी तथा एकादशी द्विगुणा**= अष्टादशी द्वाविंशतिर्वा, **त्रिदोषमर्यादा मोक्षाय, वधाय च** विज्ञेया। **(अपि च—पित्तकफानिलवृद्धया दशदिवसद्वादशाहसप्ताहात्। हन्ति विमुञ्चति वाऽपि त्रिदोषजो धातुमलपाकात् ॥ १ ॥**

**धातुपाकलक्षणं तन्त्रान्तरे—सम्बाध्यमानो हृदि नाभिदेशे गात्रेषु**

**वा पाकरुजाऽन्वितेषु। पक्वेषु वा तेषु रुजाज्वरार्त्तः स धातुपाकी कथितोभिषग्भिः** ॥ २ ॥ २६ ॥

कर्णमूल-**सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ।**
शोथमाह—**शोथः सञ्जायते तेन कश्चिदेव प्रमुच्यते** ॥ २७ ॥

सन्निपातज्वरस्योपद्रवमाह—**सन्निपाते**त्यादि । सन्निपातज्वरावसाने सन्निपातग्लपितदेहस्य प्राणिनः **कर्णमूले सुदारुणो** = भयङ्करः, शोथः सञ्जायते । तेन कश्चिदेव मनुष्यो जीवतीति वाक्यार्थः ॥ २७ ॥

अभिन्यास- ( **त्रयः प्रकुपिता दोषा उरःस्रोतोऽनुगामिनः ।**
ज्वरमाह—**आमाभिवृद्ध्या ग्रथिता बुद्धीन्द्रियमनोगताः** ॥ २८ ॥
**जनयन्ति महाघोरमभिन्यासं ज्वरं दृढम् ।**
**श्रुतौ नेत्रे प्रसुप्तिः स्यान्न चेष्टां कां चिदीहते** ॥ २९ ॥
**न च दृष्टिर्भवेत्तस्य समर्था रूपदर्शने ।**
**न घ्राणं न च संस्पर्शं शब्दं वा नैव बुद्ध्यते** ॥ ३० ॥
**शिरो लोठयतेऽभीक्ष्णमाहारं नाभिनन्दति ।**
**कूजति तुद्यते चैव परिवर्त्तनमीहते** ॥ ३१ ॥
**अल्पं प्रभाषते किंचिदभिन्यासः स उच्यते ।**
**प्रत्याख्यातः स भूयिष्ठः कश्चिदेवात्र सिद्ध्यति)** ॥ ३२ ॥

अभिन्यासज्वरमाह—**त्रयः प्रकुपिता** इति । "उरः स्रोतोऽनुगामिनः प्रकुपितास्त्रयो दोषा आमाभिवृद्ध्या ग्रथिता बुद्धीन्द्रियमनोगताः सन्तो दृढं महाघोरमभिन्यासज्वरं जनयन्ती"त्यन्वयः । **श्रुतौ** = श्रोत्रेन्द्रिये, **नेत्रे** = नयने, **प्रसुप्तिः** = तद्‌तद्‌विषयाग्राहित्वम् । **अभीक्ष्णं शिरो लोठयते** = मुहुर्मुहुर्मस्तकं चालयति, **आहारं नाभिनन्दति** = भोजनं नेच्छति, **कूजति** = क्रोशति, **परिवर्त्तनं** = पार्श्वपरिवर्त्तनम्, ईहते = चेष्टते । **भूयिष्ठः प्रत्याख्यातः** = आधिक्ये नासाध्य एव भवति । कश्चिदेवात्र सिद्ध्यति = प्राणान् धारयति ॥ २८–३२ ॥

आगन्तुज्वर-**अभिघाताभिचाराभ्यामभिशापाभिषङ्गतः ।**
निदानम्—**आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्** ॥ ३३ ॥
अभिषङ्गविषये-( **कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः ।**
चरकोक्तिः— **सोऽभिषङ्गज्वरो ज्ञेयो यश्च भूताभिषङ्गजः )**

आगन्तुज्वरमाह—अभिघातेत्यादि । **अभिघातः** = लोष्ठशस्त्रमुद्‌गरादिभिरभिहननम् । **अभिचारः** = विपरीतमन्त्रैः सर्षपादिहोमः । **अभिशापो** = ब्राह्म-

णगुरुवृद्धतपस्विनामनिष्टवाक्यम् , **अभिषङ्गः** = कामादीनां भूतानां च सम्बन्धः। एभिः कारणैरागन्तुर्ज्वरो जायतेऽत्रापि दोषसम्बन्धो भवति। भेदस्तु—**इयानेव,** अन्यत्र व्याधौ पूर्वं दोषसम्बन्धो जायतेऽत्र पश्चाद्दोषसम्बन्धो न त्वारम्भ-काले इति ॥ ३३ ॥

विषकृतज्वररूपं--**श्यावास्यता विषकृते तथाऽतीसार एव च।**
**भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥३४॥**

विषजज्वरमाह—**श्यावास्यते**ति । **विषकृते** = स्थावरादिविषभक्षणाज्जा-यमाने, **श्यावः** = धूम्रवर्णः, **आस्यं** = मुखं तस्य भावस्तत्ता श्यावास्यता ( **"श्यावः स्यात्कपिशो धूम्र"** इति कोपः )। अतिसारः,,विषस्याधोगमनशी-लत्वात् ॥ ३४ ॥

ओषधिगन्धजो ज्वरः—**ओषधिगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥ ३५ ॥**

ओषधिगन्धजमाह—**ओषधिगन्धजे** = तीव्रौषधीनां गन्धाज्जाते, **मूर्च्छा** =अचैतन्यम् , **वमथुः** = छर्दिः, **क्षवः**=छिक्का ॥ ३५ ॥

कामजो ज्वरः—**कामजे चित्तविभ्रंशस्तन्द्राऽऽलस्यमभोजनम् ।**
**( हृदये वेदना चास्य गात्रं च परिशुष्यति ) ॥ ३६ ॥**

कामजमाह—**कामजे** = अनङ्गोद्वेगजे, अभीप्सितकामिन्याद्यसङ्गमजे ज्वरे, **चित्तविभ्रंशः** = किंकर्त्तव्यहीनता ॥ ३६ ॥

भयशोककोपजा ज्वराः–**भयात्प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः ॥३७॥**

अभिचारशापजौ--**अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ॥ ३८ ॥**

भूताभिषङ्गजः--**भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम् ॥३९॥**

भूताभिषङ्गजमाह—**भूताभिषङ्गात्** = भूतस्य = देवादिग्रहस्य, अभिषङ्गः = सम्बन्धः, भूताभिषङ्गस्तस्माद् भूताभिषङ्गात् । उद्वेगः = चित्तविकलता॥३९॥

दोषकोपविवेकः--**कामशोकभयाद्वायुः, क्रोधात्पित्तं, त्रयो मलाः ।**
**भूताभिषङ्गात्कुप्यन्ति भूतसामान्यलक्षणाः ॥४०॥**

विषमज्वरहेतुः--**दोषोऽल्पोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः ।**
**धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥ ४१ ॥**

विषमज्वरमाह—**ज्वरोत्सृष्टस्य** = ज्वरमुक्तस्य **वा, अल्पः** = स्वल्पोऽपि, **दोषः, अहितसम्भूतः** = विरुद्धाचारादिजनितः, **अन्यतमं धातुं** = रसासृङ्मां-सादिकं, व्याप्य, **विषमज्वरं** = तृतीयादिकं-ज्वरं, **करोति** = विदधाति,यस्तु– आरम्भादेव बलवान् स नित्यं ज्वरयति विषमज्वरलक्षणं 'यथा–**यः स्यादनिय-**

**तात् कालाच्छीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरः स-विषमः स्मृतः'** इति ॥ ४१ ॥

तस्यागन्तुकारणं—**केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥४२॥**

एकीयमतमाह—**केचिदि**त्यादि । भूताभिषङ्गजमप्येकं विषमज्वरं केचिद् भाषन्ते ॥ ४२ ॥

समविषमौ ज्वरौ–**( पुनः पञ्चविधो दृष्टो दोषकालबलाबलात् )**

**सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।**
**सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।**
**मेदोगतस्तृतीयेऽह्नि ह्यस्थिमज्जगतः पुनः ॥**
**कुर्यात्चतुर्थकं घोरमन्तकं रोगसंकरम् ॥ ४३ ॥**

पञ्चविधं सन्ततादिज्वरमाह—सन्ततमित्यादिना । सन्ततशब्दः सततस्योपलक्षणम् । तथा च रसाश्रयो दोषः **सन्ततं** करोति, रक्तस्थश्च **सततं, पिशिताश्रितः**=मांसाधिष्ठितो दोषः, अन्येद्युष्कं, मेदोगतः तृतीये दिवसे तृतीयकम् **अस्थिमज्जगतः**, घोरं = सुदुःसहं रोगसङ्करं=नानाव्याधिसंकुलम् , अन्तकं = यमराजमिव प्राणनाशकत्वाच्चतुर्थकं कुर्यात् ॥ ४३ ॥

**समज्वरलक्षणम्—**

सन्ततस्वरूपम्—(**स्रोतोभिर्विसृता दोषा गुरवो रसवाहिभिः ।**
**सर्वदेहानुगाः स्तब्धा ज्वरं कुर्वन्ति सन्ततम् ॥** )
**सप्ताहं वा दशाहं वा द्वादशाहमथापि वा**
**सन्तत्या योऽविसर्गी स्यात्सन्ततः स निगद्यते ॥ ४४ ॥**

अथैषां लक्षणान्याह—रसवाहिभिः **स्रोतोऽभिर्विसृताः** = विस्तारङ्गताः, गुरवो=महान्तः, दोषाः सर्वदेहानुगाः = सकलशरीरानुधाविनः स्तब्धाः सन्तः सन्ततमविच्छिन्नं, ज्वरं कुर्वन्तीत्यन्वयः । कालमर्यादामाह—**सप्ताह**मित्यादि **सन्तत्या** = नैरन्तर्य्येण, सप्तदिनं यावत् । **अविसर्गी**=अत्यागस्वभावः ॥४४॥

**विषमज्वरलक्षणानि तत्र—**

सततान्येद्युष्कयोः- **अहोरात्रे सततको द्वौ कालावनुवर्त्तते ।**
स्वरूपम्— **अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ॥४५॥**

सतत इति । **सततको** = ज्वरः, अह्नि, **द्वौ कालौ - रात्रौ** वा द्वौ कालौ । **'दिवसे एककालं निशीथे वाप्येककालमिति मिलित्वा द्वौ कालावनुवर्त्तते' इत्येकः-पक्षः । अन्येद्युष्कस्तु**—अह्नि रात्रौ वा एककाले वेगं करोति ॥ ४५ ॥

(१)तृतीयकचतुर्थकौ—**तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥ ४६ ॥**

तृतीयदिवसे यः प्रवर्त्तते स तृतीयकः। चतुर्थे दिवसे यः प्रवर्त्तते स चतुर्थक इति। ननु मुक्तानुबन्धित्वरूपस्य विषमत्वस्य सततादावभावाद् विषमज्वरे पाठोऽसङ्गत इति चेन्न। एतेषामपि तथा भावात्। **"विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणः। दुर्लभोपशमः कालं दीर्घमप्यनुवर्त्तते"** इति चरकोक्तेः। सन्ततादौ मुक्तानुबन्धस्यैकदाभावित्वेन स्वल्परूपत्वात् तद्व्यवहारोनोपपद्यते एकहरिमन्थभक्षणेऽप्यनशनशब्दव्यवहारवत्॥ ४६॥

तृतीयकप्रभावः—**कफपित्तात् त्रिकग्राही पृष्ठाद्वातकफात्मकः।**
**वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ॥ ४७ ॥**

दोषोल्वणभेदेन तृतीयकचतुर्थकयोर्लक्षणान्याह—**कफपित्ता**दिति। त्रिकं गृह्णातीति त्रिकग्राही वेदनया त्रिकव्यापीत्यर्थः। **पृष्ठादिति** 'ल्यब्लोपे पञ्चमी" **वेदनया पृष्ठं** व्याप्य तद्ग्राहीत्यर्थः। वातपित्तात् शिरोग्राही। एवं तृतीयको ज्वरस्त्रिविधो भवति॥ ४७॥

चतुर्थकप्रभावः—**चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः।**
**जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसम्भवः ॥४८॥**

चातुर्थिको ज्वरोऽपि द्विविधः-श्लैष्मिको जङ्घाभ्यां प्रथमं जायते। **इत्येकः।** अनिलसम्भवः पूर्वं शिरसो जायमानो **द्वितीयः**॥ ४८॥

चतुर्थकविपर्ययः—**विषमज्वर एवान्यश्चतुर्थकविपर्ययः।**
**स मध्येऽह्नि ज्वरयति ह्यादावन्ते च मुञ्चति ॥ ४९ ॥**

चतुर्थकविपर्य्ययमाह—**विषमे**त्यादि। अयमप्यन्यो विषमज्वर एव चतुर्थकविपर्य्ययाभिधानः। स मध्ये ज्वरयत्यह्नि, ह्यादावन्ते विमुञ्चति, आरम्भे चैकं दिनं मुक्त्वा मध्ये दिनद्वयं ज्वरयति। अन्ते चैकदिनं न भवतीति चतुर्थकविपर्ययः। एवं तृतीयकादिविपर्ययोऽप्यूहनीयः॥ ४९॥

वातबलासकज्वरः—**नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति।**
**स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥ ५० ॥**

वातबलासकज्वरमाह—**नित्य**मित्यादि। वातेन प्रेरितो बलासक आरम्भ-

---

**( १ ) तृतीयकचतुर्थकयोरुत्पत्तिबीजम्—**

अधिशेते यथा भूमिं बीजं काले प्ररोहति। अधिशेते तथा धातून् दोषः काले प्रकुप्यति॥
समृद्धिं बलकालं च प्राप्य दोषस्तृतीयकम्। चतुर्थकं च कुरुते प्रत्यनीकबलक्षयात्॥

को यस्य स तथाभूतो ज्वरोऽस्यास्तीति **वातबलासकी** मनुष्यः । **तेन**=ज्वरेण, नित्यं **मन्दज्वरः**=सततं मन्दवेगेन वर्त्तमानज्वरः, **शूनकः**=शोथी, **सीदति**=अवसीदति । **स्तब्धाङ्गः**=जडताऽऽपन्नकलेवरः, **श्लेष्मभूयिष्ठः**=कफबहुलश्च जायत इति ॥ ५० ॥

प्रलेपकज्वरः—**प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण च ।**
**मन्दज्वरविलेपी च सशीतः स्यात्प्रलेपकः ॥ ५१ ॥**

प्रलेपकमाह—**प्रलिम्पन्नि**वेत्यादि । घर्मेण=आतपेन, **गौरवेण**=गुरुत्वेन, **गात्राणि**=शरीराणि, **प्रलिम्पति**=सम्बध्नातीति । प्रलेपकः, मन्दज्वरश्चासौ विलेपी चेति मन्दज्वरविलेपी, सशीतः=शीतयुक्तः, अयं कफपित्तजो-ज्वरः । के चित्तु त्रिदोषज एवायमित्यभिवदन्ति, यद्मादौ तदुपलम्भात् ॥ ५१ ॥

अर्द्धांगज्वरः—**विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।**
**तेनार्द्धं शीतलं देहे चार्द्धं चोष्णं प्रजायते ॥ ५२ ॥**

विषमज्वरविशेषानाह—**विदग्ध** इत्यादि । **अन्नरसे**=आहाररसे **विदग्धे**=दुष्टे, **श्लेष्मपित्ते**=कफपित्ते । दुष्टे पित्ते कफे च दूषिते सति, **तेन** हेतुना **देहेऽर्द्धं शीतलं** श्लेष्मणा, पित्तेन—अर्धमुष्णञ्च जायते ॥ ५२ ॥

तद्रूपान्तरमाह—**काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः ।**
**तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः ॥ ५३ ॥**

काय इत्यादि । **काये**=कोष्ठे, **अन्ते**=हस्तपादयोः । यदा मध्यकाये पित्तं हस्तादिषु च कफो व्यवस्थितो भवति तदा च शरीरस्यौष्ण्यमुपजायते, इति भावः ।

उपर्युक्तप्रतिकूलं—**काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम् ।**
**शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः ॥ ५४ ॥**

**यदा** मध्यशरीरे, **श्लेष्मा व्यवस्थितो** भवति, हस्तपादयोश्च व्यवस्थितं पित्तं जायते, तदा शरीरस्य शैत्यमुपलभ्यते । हस्ताभ्यां सहितौ पादौ हस्तपादौ तयोर्हस्तपादयोः, मध्यमपदलोपी समासः ॥ ५४ ॥

शीतादिज्वरः—**त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।**
**तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥ ५५ ॥**

**त्वक्स्था**विति । यदा **श्लेष्मानिलौ त्वक्स्थौ**=त्वचि व्यवस्थितौ, तदा ज्वरस्यारम्भकाले त्वचि शीतलतां जनयतः,के चित्तु त्वक्शब्देन रसोऽपि गृह्यत-इति वदन्ति । तात्स्थ्यात् लक्षणाऽभ्युपगमात् ॥ ५५ ॥

दाहादिज्वरः—**करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च।**
**तस्मिन्प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥ ५६ ॥**

तयोः परिणामः—**द्वावेतौ शीतदाहादिज्वरौ संसर्गजौ स्मृतौ।**
**दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥ ५७ ॥**

एतौ द्वौ शीतदाहादिज्वरौ संसर्गजौ भणितौ, तत्र दाहपूर्वः कष्टः शीतपूर्वकश्च कष्टतमोऽत्यर्थं दुःस्साध्य इत्यर्थः ॥ ५७ ॥

रसगतज्वरः—**गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ।**
**रसस्थे तु ज्वरे लिङ्गं दैन्यं चास्योपजायते ॥ ५८ ॥**

अथ रसादिधातुगतज्वरमाह—**गुरुते**त्यादि। **रसस्थे**=रसधातुस्थे, ज्वरे ॥५८॥

रक्तगतज्वरः—**रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ।**
**प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥ ५९ ॥**

मांसगतज्वरः—**पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता।**
**ऊष्माऽन्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगेत ज्वरे ॥६०॥**

**पिण्डिकोद्वेष्टनं**=जान्वधोजङ्घामांसपिण्डस्य लगुडादिना पीडनेनेव पीडा। **विक्षेपः**=हस्तपादादीनां चालनम् ॥ ६० ॥

मेदोगतज्वरः—**भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च।**
**दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥ ६१ ॥**

अस्थिगतज्वरः—**भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च।**
**विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे ॥ ६२ ॥**

**अस्थ्नां भेदः**=भेद इव भेदः, भङ्गवत् पीडेत्यर्थः ॥ ६२ ॥

मज्जगतज्वरः—**तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा।**
**अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ॥ ६३ ॥**

**तमःप्रवेशनं**=तिमिराविष्टस्येव ज्ञानशून्यता। **मर्मच्छेदः**=हृदयस्य च्छेदइव पीडा ॥ ६३ ॥

शुक्रगतज्वरः—**मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे।**
**शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥ ६४ ॥**

**शेफसः**=जननेन्द्रियस्य, **स्तब्धता**=चेतनत्वं, **शुक्रस्य मोक्षः**=वीर्य्यपातः ६४

तत्साध्याऽसा-**रसरक्ताश्रितः साध्यो मांसमेदोगतश्च यः।**
ध्यभेदाः—**अस्थिमज्जगतः कृच्छ्रः शुक्रस्थस्तु न सिद्ध्यति ॥ ६५ ॥**

प्राकृतवैकृतौ—**वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्।**
**वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः॥ ६६॥**

कालभेदेन ज्वरस्यासाध्यत्वादिकमाह—**वर्षे**त्यादि। **वर्षासु** वातिको ज्वरः, **शरदि** पैत्तिकः, **वसन्ते** श्लैष्मिकः **प्राकृतः** स सुखसाध्यः। अन्योऽस्माद्, यथा वर्षासु पैत्तिक इत्यादि। स **वैकृतो** दुःसाध्यः प्राकृतोऽपि वातोद्भवो दुःसाध्य एव॥६६॥

दोषाणां प्राकृतज्व- **वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्।**
रकर्त्तृता— **कुर्यात्पित्तं च शरदि तस्य चानुबलः कफः॥**
**तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्।**
**कफो वसन्ते तमपि वातपित्तं भवेदनु॥ ६७॥**

प्राकृतज्वराणां चिकित्साप्रणयनार्थमुत्पत्तिक्रममाह—**वर्षा**स्विति। वर्षासु **दुष्टः**=कुपितः, **पित्तश्लेष्मान्वितः**=पित्तकफानुबन्धः, **मारुतः**=पवनः, ज्वरं कुर्यात्। शरदि दुष्टश्च पित्तं ज्वरं कुर्यात्, तस्य=पित्तस्य, अनुबलः कफो भवति। अनुबलमिवेत्यनुबलम्। **तत्प्रकृत्या**=तयोः पित्तकफज्वरयोः, प्रकृत्या= लङ्घनसाध्यस्वभावेन, **विसर्गाच्च**=समयस्य विसर्गाख्यभावात्, **अनशनात्**=लङ्घनात्, भयं न भवति, ज्वरस्यामाशयोत्पन्नत्वादिति केचित्। केचित्तु—तच्छब्देन वातपित्तज्वरौ परामृशन्ति। तथा च तयोः प्रकृतिस्तत्प्रकृतिस्तया तत्प्रकृत्या=वातपित्तज्वरनिसर्गेण, तत्र प्राकृते ज्वरे अनशनाद् भयं न भवतीति। शिशिरवसन्तग्रीष्मा आदानसंज्ञकाः। वर्षाशरद्धेमन्ता विसर्गसंज्ञकाः, तत्र आदानो हि सौम्यस्वभावः, विसर्गस्तु—आग्नेयस्वभाव इति विशेषः॥ ६७॥

दोषप्रवृत्तिवृद्धी— **काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा॥ ६८॥**

कालोऽपि दोषविशेषबोधक इत्याह—**काल** इत्यादि। **यथास्वं काले**—यस्य वातादिदोषस्य यः प्रकोपकालस्तत्र तज्जन्यज्वरस्य प्रवृत्तिर्वृद्धिर्वा भवतीति भावः॥ ६८॥

अनुपशयोपशयौ— **निदानोक्तानुपशयो विपरीतोपशायिता॥ ६९॥**

अन्तर्वेगज्वरः— **अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः।**
**सन्ध्यस्थिशूलमस्वेदो दोषवर्चोविनिग्रहः॥**
**अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत्॥ ७०॥**

ज्वराणां मध्ये सम्प्राप्तिवशात् कश्चिदन्तर्वेगः कश्चिच्च बहिर्वेगस्तयोर्लक्षणान्याह—**अन्तर्दाह** इत्यादिना। **श्वसनं**—श्वासः, **दोषवर्चोविनिग्रहः**=दोषाणां= वातादीनां, वर्चसां=पुरीषाणाञ्च विनिग्रहः अप्रवृत्तिः॥ ७०॥

बहिर्वेगज्वरः—**सन्तापो ह्यधिको बाह्यस्तृष्णाऽऽदीनां च मार्दवम् ।**
**बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥ ७१ ॥**

तृष्णाऽऽदीनामित्यत्र आदिपदेन प्रलापादीनाञ्च ग्रहणं बोध्यम् । **मार्दवं**=स्वल्पता ॥ ७१ ॥

आमज्वरमाह—**लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः ।**
**तन्द्राऽऽलस्याविपाकास्यवैरस्यं गुरुगात्रता ।**
**क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवाञ् ज्वरः ॥ ७२ ॥**
**आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ।**
**भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम् ॥ ७३ ॥**
**(शोधनं शमनीयं तु करोति विषमज्वरम् ।**
**तस्मादत्रौषधं प्राज्ञैर्न देयं सप्तरात्रकम् ॥)**

चिकित्साविशेषप्रणयनाय आमपच्यमाननिरामज्वरांल्लिलक्षयिषुराह—**ला-लेत्यादि** । **लालाप्रसेकः**=मुखेन लालाविनिर्गमः, **हृल्लासः**=उपस्थितवमनत्वमिव, **आस्यवैरस्यं**=मुखस्य विरुद्धरसता ॥ ७२-७३ ॥

पच्यमानज्वरः—**ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ।**
**मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥ ७४ ॥**

प्रलापोऽसम्बद्धभाषणं, मलस्य प्रवृत्ति**र्मलप्रवृत्तिः**=पुरीषस्य प्रवर्त्तनम्॥७४॥

निरामज्वरः—**क्षुत्क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम् ।**
**दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ ७५ ॥**

**क्षुत्**=क्षुधा, **क्षामता**-गात्राणां, **लघुत्वञ्च**-गात्राणामेव । दोषप्रवृत्तिः=सम्यग्वायुमोक्षः, अष्टाहः=अष्टदिनात्मकः कालः ॥ ७५ ॥

साध्यज्वररूपं—**बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥ ७६ ॥**

ज्वरस्य साध्यलक्षणान्याह-**बलवत्स्विति** । **बलवत्सु**=मनुष्येषु,क्रियासहेषु, **अल्पदोषेषु**=नात्युत्कृष्टदोषेषु, **अनुपद्रवः**=उपद्रवशून्यः, **ज्वरः साध्यः**=सुचिकित्स्यः । **कासो मूर्च्छाऽरुचिश्छर्दिस्तृष्णाऽतीसारविड्ग्रहाः । हिक्काश्वासाङ्गभेदाश्च ज्वरस्योपद्रवा दश'** ॥ ७६ ॥

असाध्यज्वररूपं—**हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ।**
**ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः ॥ ७७ ॥**

ज्वरस्यासाध्यलक्षणानि विवृणोति-**हेतुभिरित्यादिग्रन्थेन** । यो ज्वरो बहुभिर्बलिष्ठै**र्हेतुभिः**=कारणैः, **जातः**=उत्पन्नः, **बहुलक्षणः**=बहूनि लक्षणानि यस्य

स तथाभूतः, सम्पूर्णलक्षणः **प्राणान्तकृत्**=प्राणानामन्तं विनाशं करोतीति विग्रहः, मारक इत्यर्थः। शीघ्रं ज्वरोत्पत्तिकाले **इन्द्रियनाशनः**=इन्द्रियाणां कर्मेन्द्रियाणां हस्तपादगुदोपस्थरसनानां चक्षुःश्रोत्रघ्राणरसनस्पर्शनानां ज्ञानेन्द्रियाणाञ्च, उभयात्मकस्य मनसश्च **नाशनः**=सामर्थ्योपघातकः॥ ७७॥

पुनश्च—**ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घरात्रिकः।**
**असाध्यो बलवान् यश्च केशसीमन्तकृज्ज्वरः॥ ७८॥**

**शूनस्य**=शोथयुक्तस्य, **दैर्घरात्रिकः**=बहुकालानुबन्धी, **गम्भीरो**ऽन्तर्धातुस्थः केशानां सीमन्तं योऽकस्मात् करोतीति **केशसीमन्तकृत्**॥ ७८॥

गम्भीरज्वररूपं—**गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया।**
**आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च॥ ७९॥**

**आनद्धत्वेन**=बद्धमलत्वेन॥ ७९॥

असाध्यगम्भीरः—**आरम्भाद्विषमो यस्तु यश्च वा दैर्घरात्रिकः।**
**क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम्॥८०॥**

असाध्यज्वरः—**विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा।**
**शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः॥ ८१॥**

असाध्यज्वरी—**यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान्।**
**वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम्॥ ८२॥**

**हृष्टरोमा**=रोमाञ्चितशरीरः, **रक्ताक्षो**=रक्तनयनः, **वक्त्रेण**=मुखेन, **उच्छ्वसिति**=ऊर्ध्वश्वासं गृह्णाति, एव पदेन नासान्यवच्छेदः॥ ८२॥

अपरः—**हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम्।**
**सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः॥ ८३॥**

**विभ्रान्त लोचनं**=भ्रान्तनेत्रम्॥ ८३॥

अपरः—**हतप्रभेन्द्रियं क्षामरोचकनिपीडितम्।**
**गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत्॥ ८४॥**

**हतप्रभेन्द्रियं**=हता प्रभासामर्थ्यं येषां तानि हतप्रभाणि—विगतसामर्थ्यवन्ति स्वविषयाग्राहीणीत्यर्थः। इन्द्रियाणि—चक्षुरादीनि यस्य तं तथोक्तम्। **गम्भीरो**ऽन्तर्वेगः, **तीक्ष्णो**ऽनिकष्टदः, बहिरन्तश्च ताभ्यामार्त्तं=पीडितम्, **ज्वरितं**=सञ्जातज्वरं, ज्वरः सञ्जातोऽस्येति विग्रहः **'तदस्य सञ्जातमिति'** इतच् प्रत्ययेन साधुः॥ ८४॥

ज्वरमोक्षलक्षणं—**दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिदसंज्ञिता ।**
**कूजनं चास्यवैगन्ध्यमाकृतिर्ज्वरमोक्षणे ॥ ८५ ॥**

ज्वरविमुक्तिपूर्वरूपमाह—**दाह** इत्यादि । **ज्वरमोक्षणे**=ज्वरस्य परित्यागकाले, एतादृशी–**आकृतिः**=लक्षणं दृश्यते । **दाहः** विड्भित्=पुरीषप्रवृत्तिः, **असंज्ञिता**=चेतनानाशः, **कूजनम्**=अस्फुटध्वनिः–**आस्यवैगन्ध्यं**=मुखस्य दुर्गन्धता ॥ ८५ ॥

विज्वरपुरुष-**विगतक्लमसन्तापमव्यथं विमलेन्द्रियम् ।**
लक्षणम्—**युक्तं प्रकृतिसत्त्वेन विद्यात् पुरुषमज्वरम् ॥ ८६ ॥**

ज्वरमुक्तलक्षणं—**स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।**
**क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥ ८७ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने द्वितीयं ज्वरनिदानं समाप्तम्॥२॥**

ज्वरमुक्तस्य लक्षणमाह—**स्वेद** इत्यादि । **स्वेदः**=घर्मनिर्गमः, **लघुत्वं**=शरीरस्य लाघवं, **क्षवथुः**=छिक्का, **अन्नलिप्सा**=अन्नभोजनेच्छा ॥ ८७ ॥

इति सुधाऽभिधायां माधवनिदानटिप्पण्यां द्वितीयं ज्वरनिदानम् ॥ २ ॥

## अथ तृतीयमतीसारनिदानम् ॥ ३ ॥

कारणम्—**गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः ।**
**विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः ॥ १ ॥**
**स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः ।**
**शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्तुपर्ययः ॥ २ ॥**
**जलाभिरमणैर्वेगविघातैः क्रिमिदोषतः ।**
**नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ ३ ॥**

ज्वरातिसारयोरन्योऽन्योपद्रवत्वाज्ज्वरानन्तरमतीसारमाह—**गुर्वती**त्यादि । एभिर्निर्दिष्टैः कारणैर्नृणामतिसारो भवति । **गुरु**शब्देन मात्रागुरुर्गृह्यते । **अति**शब्दः **स्निग्धादिस्थूलान्तः** प्रत्येकमन्वेति । **अतिस्निग्धैः**=**अतिरूक्षैः**–**अतिद्रवै**रित्यादि । तथाऽति, शीतलैर्द्रव्यै**र्विरुद्धभोजनैः**=संयोगसंस्कारादिविरुद्धैः । **अध्यशनैः**=भुक्तोपरिभुक्तैः **(भुक्तस्योपरि यद् भुक्तं तद्-**

ध्यशनमिष्यते । **स्नेह:**=स्नेहनमाद्यो येषां तैस्तथोक्तै:। स्वेदनवमनविरेचनानुवासननिरूहैरतियोगयुक्तै:, मिथ्यायुक्तै=हीनयोगयुक्तै:। **दुष्टाम्बुमद्यातिपानैः**=दुष्टमम्बु जलं मद्यं चैतयोरतिपानैः। **सात्म्यर्त्तुपर्ययैः**=सात्म्यपर्ययैः, ऋतुपर्ययैः, **जलाभिरमणैः**=जलक्रीडाऽऽदिभिः, **वेगविघातैः**=मूत्रादीनाम् १–३

अतीसारसम्प्राप्तिः—

**संशम्यापां धातुरग्निं प्रवृद्धः शकृन्मिश्रो वायुनाऽधः प्रणुन्नः ।**
**सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति ॥**
**एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ॥ ४ ॥**

अतिसारसम्प्राप्तिमाह—**संशम्येति** । अपांधातुः=रसादिः **अग्निं संशम्य**=जठराग्निं मन्दीकृत्य, **प्रवृद्धः**=प्रदुष्टः, वायुना=अनिलेन **अधः–प्रणुन्नः**=प्रेरितः, **शकृन्मिश्रः**=पुरीषयुक्तः अतिसरति=वेगेन वहति, बहुद्रवद्रव्यसरणादतीसारस्तस्यान्वर्थनाम । तमतीसारं **षड्विधं**=षट्प्रकारं वदन्ति भिषजः। स्तथा हि—**एकैकशः**=पृथग्वातादिभिस्त्रयः, वातिकः, पैत्तिकः, श्लैष्मिकः, अत्र वीप्सायां शस्प्रत्ययः । **सर्वशः**=सान्निपातिकः, शोकेन चान्यः, **आमेन**=अपक्वरसेन षष्ठः॥४॥

पूर्वरूपं—**हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसन्निरोधाः ।**
**विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि॥५॥**

पूर्वरूपमाह–**हृदित्यादि**। **तस्य** अतिसारस्य, **भविष्यतः**=भाविनः=इमानि **पुरस्सराणि**=अग्रेसराणि, लक्षणानि जायन्ते । तथाहि **हृन्नाभिपायूदरकुक्षितोदेत्यत्र** तोदशब्दोः, हृदादिभिः सर्वैः सम्बद्ध्यते । द्वन्द्वान्ते श्रूयमाणत्वात् । तोदो=व्यथा । हृदयतोदः, नाभितोद इत्यादि । **गात्रावसादः**=शरीरसादः । **अनिलसन्निरोधः**=वायोरप्रवृत्तिः, **विट्सङ्गः**=पुरीषाप्रवर्त्तनम् । **अविपाको**ऽन्नस्येति ॥ ५ ॥

वातजः—**अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः ।**
**शकृदामं सरुक्शब्दं मारुतेनातिसार्यते ॥ ६ ॥**

पित्तजः—**पित्तात्पीतं नीलमालोहितं वा तृष्णामूर्च्छादाहपाकोपपन्नम्॥७॥**

कफजः—**शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं विस्रं शीतं हृष्टरोमा मनुष्यः८**

त्रिदोषजः—**वराहस्नेहमांसाम्बुसदृशं सर्वरूपिणम् ।**
**कृच्छ्रसाध्यमतीसारं विद्याद्दोषत्रयोद्भवम् ॥ ९ ॥**

शोकातिसारः—

**तैस्तैर्भावैः शोचतोऽल्पाशनस्य बाष्पोष्मा वै वह्निमाविश्य जन्तोः ।**

**कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं तच्चाधस्तात्काकणन्तीप्रकाशम् ॥ १० ॥**
**निर्गच्छेद्वै विड्विमिश्रं ह्यविड् वा निर्गन्धं वा गन्धवद्वाऽतिसारः ।**
**शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥ ११ ॥**

शोकजातीसारमाह—तैस्तैरित्यादि । **तैस्तैर्भावैः**=धनबन्धुनाशादिभिः ॥ **शोचतः**=शोकं विदधतः, अतएव **अल्पाशनस्य**=अल्पं भुञ्जानस्य नरस्य=पुंसः । **बाष्पोष्मा**=बाष्पं नेत्रनासाऽऽदिच्युतं जलं तत्सहित ऊष्मा=शोकजं शरीरतेजः। कोष्ठं गत्वा **वह्निमाविश्य**=जठराग्निनाऽव्याकुलीकृत्य तस्य रक्तं **क्षोभयेत**=सञ्चालयेत् । तच्च रक्तं **काकणन्तीप्रकाशं**=गुञ्जाफलसदृशम् , अधस्तान्निर्गच्छेत्—गुदद्वारेति भावः । तच्च रक्तं **विड्विमिश्रं**=पुरीषयुक्तम् । **अविड् वा**=मलरहितं वा, **निर्गन्धं**=गन्धवर्जितम् । **गन्धवद् वा**=गन्धयुतं वा । **निर्गच्छेत्**=गुदेनाधस्तान्निस्सरेत् । **एषः शोकोत्पन्नः**=शोकजोऽतीसारः, अतिमात्रं दुश्चिकित्स्यः । **कष्टः**=कृच्छ्रसाध्यः, वैद्यैः **प्रदिष्टः**=कथितः ॥ १०–११ ॥

आमातीसारलक्षणम्—

**अन्नाजीर्णात्प्रद्रुताः क्षोभयन्तः कोष्ठं दोषा धातुसंघान्मलांश्च ।**
**नानावर्णं नैकशः सारयन्ति शूलोपेतं षष्ठमेनं वदन्ति ॥ १२ ॥**

आमातीसारमाह—**अन्नाजीर्णाद्**=अन्नञ्च तदजीर्णमन्नाजीर्णं तस्मात् , अन्नापरिपाकात् । **प्रद्रुताः**=विमार्गगताः, दोषाः, **धातुसङ्घान्**=धातुवृन्दान् । मलांश्च, **क्षोभयन्तः**=सञ्चालयन्तः, दूषयन्त इति यावत् । **नानावर्णम्**=अनेकवर्णविशिष्टं, **शूलोपेतं**=वेदनोपद्रुतं, **नैकशः**=अनेकवारान् , **सारयन्ति**=रेचयन्ति । एनं षष्ठमतिसारं वदन्ति वैद्या इति शेषः ॥ १२ ॥

आमलक्षणं—**संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति ।**
**पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितम् ॥ १३ ॥**

चिकित्सासौलभ्यार्थमामलक्षणमाह—**संसृष्टेत्यादि** । एभिर्दोषैः **संसृष्टं**=सम्बद्धम् । **अप्सु**=जलेषु । **न्यस्तं**=क्षिप्तम् । **पुरीषं**=विष्ठा, **अवसीदति**=निमज्जति । **भृशदुर्गन्धि**=अत्यन्तदुर्गन्धम् । **पिच्छिलं**=चिक्कणम् । आमसंज्ञितं जानीयात् ॥ १३ ॥

पक्वलक्षणं—**एतान्येव तु लिङ्गानि विपरीतानि यस्य वै ।**
**लाघवं च विशेषेण तस्य पक्वं विनिर्दिशेत् ॥ १४ ॥**

पक्वलक्षणमाह—एतान्येव **विपरीतानि लिङ्गानि**=विरुद्धानि लक्षणानि, भवन्ति विशेषेण **लाघवं**—कोष्ठस्य देहस्य वा, तस्य पक्वं **विनिर्दिशेत्**= जानीयात् ॥ १४ ॥

असाध्य- **पक्वजाम्बवसङ्काशं यकृत्पिण्डनिभं तनु ।**
लक्षणानि- **घृततैलवसामज्जवेशवारपयोदधि ॥ १५ ॥**
**मांसधावनतोयाभं कृष्णं नीलारुणप्रभम् ।**
**मेचकं स्निग्धकर्बूरं चन्द्रकोपगतं घनम् ।**
**कुणपं मस्तुलुङ्गाभं सुगन्धि कुथितं बहु ॥ १६ ॥**

असाध्यलक्षणान्याह—पक्वेत्यादिना । **पक्वजाम्बवसङ्काशं**=सुपक्वजम्बूफलसदृशवर्णम् । **यकृत्खण्डनिभं**=यकृत्पिण्डसदृशम् । कृष्णलोहितमित्यर्थः । **तनु**=स्वच्छम् । **घृततैलवसामज्जवेशवारपयोदधि-मांसधावनतोयाभम्** । एकम् पदं द्वन्द्वानिर्दिष्टम् । अत्र **आभा**शब्दो घृतादिभिः सर्वत्र सम्बद्धयते, द्वन्द्वान्तनिर्दिष्टत्वात् । घृतादीनामाभा इवाभा यस्य तं तथोक्तम् । **घृततैले** प्रसिद्धे-**वसा** ( चर्बीति लोके ख्यातः ) '**शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिते**'ति । **मज्जा**—स्थूलास्थ्यन्तर्गतस्नेहपदार्थः । **वेशवारः**= 'निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम् । कृष्णामरिचसंयुक्तं **वेशवार** इति स्मृतः' । **कृष्णम्**=अञ्जनवर्णं । **नीलारुणप्रभम्**=चाषपक्षवर्णम् । **मेचकं**=श्यामलम् । **कर्बूरं**=नानावर्णम् । **चन्द्रकोपगतम्**=मयूरपिच्छचन्द्रकैरिव धातुस्नेहैरुपगतम् । **घनं** धात्वन्तरमिश्रणात् । **कुणपं**—मृतकगन्धि । **मस्तुलुङ्गाभं**=मस्तुलुङ्गः=मस्तकान्तर्गतस्नेहः, तत्सदृशम् । **कुथितं**=पूति ॥१५-१६॥

**तृष्णादाहतमःश्वासहिक्कापार्श्वास्थिशूलिनम् ।**
**संमूर्च्छाऽरतिसंमोहयुक्तं पक्ववलीगुदम् ।**
**प्रलापयुक्तं च भिषग्वर्जयेदतिसारिणम् ॥ १७ ॥**
**असंवृतगुदं क्षीणं दूराध्मातमुपद्रुतम् ।**
**गुदे पक्वे गतोष्माणमतिसारकिणं त्यजेत् ॥ १८ ॥**

अतीसारोप- **(तृष्णा दाहोऽरुचिः शोथः पार्श्वशूलोऽरतिर्वमिः ।**
द्रवास्तु— **गुदपाकः प्रलापश्च ह्याध्मानं श्वासकासकौ ॥ १ ॥**
**मूर्च्छा हिक्का मदः शूलं बहुवेगो ज्वरस्तथा ।**
**एतैरुपद्रवैर्जुष्टमतिसारिणमुत्सृजेत् ॥ २ ॥**

अन्यच्च—**हस्तपादाङ्गुले: सन्धिप्रपाको मूत्रनिग्रहः।**
**पुरीषस्योष्णता चैव मरणायातिसारिणाम् ॥ ३ ॥)**

**तृष्णे**त्यादि। तृष्णाऽऽदीनां पार्श्वास्थिशूलान्तानां पदानां द्वन्द्वं कृत्वा मत्वर्थीय इनि प्रत्ययः। तृष्णायुक्तं दाहयुक्तमित्याद्यर्थः। एवमग्रेऽप्यर्थः। **संमूर्च्छाऽरतिसंमोहयुक्तं**—संमूर्च्छा=मनोमोहः, अरतिः=ग्लानिः, संमोहः=इन्द्रियमोहः, **पक्वबलीगुदम्**=पक्वा बलयो गुदे यस्य तं तथोक्तम्। **प्रलापयुक्तम्**=असम्बद्धभाषणोपेतम्। **अतिसारिणम्**=अतिसाररोगिणं, **त्यजेत्**=न चिकित्सेत्, असाध्यत्वादित्यर्थः। **असंवृतगुदं**=पायुसंवरणाक्षमम्। **क्षीणं**=बलोपचयरहितम्। **दूराध्मातम्**=अत्याध्मानयुक्तम्। **उपद्रुतम्**=अतिसारोपद्रवयुक्तम्। **गुदे पक्वे गतोष्माणं**=पाकारम्भकपित्तसद्भावेऽपि शीतशरीरम्। **अतिसारकिणम्**=अतिसारयुक्तम्। **( वातातीसाराभ्यां कुक् च )** इति कुक् चादिनिः ॥ १७-१८ ॥

**श्वासशूलपिपासाऽऽर्त्तं क्षीणं ज्वरनिपीडितम्।**
**विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥ १९ ॥**

**वृद्धं नरं विशेषेण** क्व चिद् बालस्याप्यसाध्यत्वं, यदाह सुश्रुतः-**'कृच्छ्रश्चायं बालवृद्धेष्वसाध्य'** इति ॥ १९ ॥

रक्तातिसार- **पित्तकृन्ति यदाऽत्यर्थं द्रव्याण्यश्नाति पैत्तिके।**
हेतुः— **तदोपजायतेऽभीक्ष्णं रक्तातीसार उल्वणः ॥ २० ॥**

ननु सप्तमस्य रक्तजस्याप्यतीसारस्य सम्भवात् षट्त्वं विरुध्यत इत्याशङ्क्य पैत्तिकस्यैवातिसारस्यावस्थाविशेषेण रक्तातीसारोऽपि भवतीति दर्शयति-**पित्ते**त्यादिना। **पैत्तिके**—अतिसारे भविष्यति वर्त्तमाने वा। यदा **पित्तकृन्ति**—पित्तकारीणि। **द्रव्याणि**=भोज्यानि, अत्यर्थम्=अत्यधिकम्। **अभीक्ष्णं**=निरन्तरम्, **अश्नाति**=भक्षयति तदा **उल्वणः**=महान्, रक्तातीसार उपजायत इति ॥ २० ॥

प्रवाहिकासंप्राप्तिः—

**वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य।**
**प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥२१॥**

प्रवाहिकायाः सम्प्राप्तिमाह—**वायुरित्यादि। अहिताशनस्य**=अपथ्यभुजः। **प्रवृद्धः**=प्रकुपितः। **वायुः**=अनिलः। **निचितम्**=पक्वस्थितम्। **ब-**

**लासं**=कफं, **मलाक्तं**=पुरीषयुक्तं, **प्रवाहतः**=प्रवहणं कुर्वतः । **अल्पं**=स्वल्पं, **बहुशः**=बहुवारान् , **अधस्तात्**=नीचैर्मार्गेण, **नुदति**=प्रेरयति । **तज्ज्ञाः**=वैद्याः, **तां**=पीडाम् , प्रवाहिकां, **प्रवदन्ति**=कथयन्ति । द्रवद्रव्यसरणसाम्यादामपक्वयोगसम्भवाच्च प्रवाहिकाऽतीसारयोः साधर्म्यं बुद्ध्वाऽतीसारे प्रवाहिकोल्लेखः । **अतीसारे** नानाविधद्रवधातुसरणं **प्रवाहिकायां** कफमात्रसरणमिति परस्परं भेदः । अन्यत्र प्रवाहिकाया नामान्तराण्युपलभ्यन्ते, यथा—विस्रंसी, अन्तर्ग्रन्थिः, निश्चारक—इत्यादि ॥ २१ ॥

वातजापित्तजारक्त- **प्रवाहिका वातकृता सशूला,**
जाप्रवाहिकाः— **पित्तात्सदाहा, सकफा कफाच्च ।**
**सशोणिता शोणितसम्भवा च, ताः स्नेहरूक्षप्रभवा मतास्तु ॥२२॥**
**तासामतीसारवदादिशेच्च लिङ्गं क्रमं चामविपक्वतां च ॥ २३ ॥**

वातादिभेदेन तस्या रूपाण्याह—वातकृता प्रवाहिका **सशूला**=शूलयुक्ता, पित्तात् ( जायमाना ) प्रबाहिका **सदाहा**=दाहयुक्ता । कफादुत्पन्ना प्रवाहिका, **सकफा**=श्लेष्मयुक्ता । **शोणितसम्भवा**=रक्तजा प्रवाहिका, **सशोणिता**=रक्तयुक्ता ज्ञातव्या । **ताः**=प्रवाहिकाः । स्नेहश्च रूक्षश्च तौ स्नेहरूक्षौ ताभ्यां सम्भव उत्पत्तिर्यासां ताः **स्नेहरूक्षप्रभवाः**, **मताः**=कथिताः । **तासां**=प्रवाहिकाणां, **लिङ्गं**=लक्षणं, **क्रमं**=चिकित्सितञ्च. अतीसारवत् , **आदिशेत्**=जानीयात् ॥ २२–२३ ॥

गतातीसाररूपं—**यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।**
**दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ २४ ॥**

ज्वरातीसाररूपं—**( ज्वरातीसारयोरुक्तं निदानं यत्पृथक् पृथक् ।**
**तत्स्याज्ज्वरातिसारस्य तेन नाम्नोदितं पुनः ) ॥ २५ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने तृतीयमतिसारनिदानं समाप्तम् ॥ ३ ॥**

अतीसारनिवृत्तिलक्षणमाह—**यस्येत्यादि** । **यस्य**=रोगिणः, **उच्चारं**=पुरीषं, विना मूत्रं प्रवर्त्तते । वायुश्च **सम्यक्**=प्रकर्षेण गच्छति । गुदेनेति शेषः । **दीप्ताग्नेः**=संदीप्तजठरानलस्य, **लघुकोष्ठस्य**=गुरुत्वशून्यामाशयादेः, **तस्य**=पुरुषस्य, **उदरामयः**=जठराधिष्ठितो रोगः, स्थितः=निवृत्त इति ॥२४॥

इति सुधायां तृतीयमतिसारनिदानं समाप्तम् ॥ ३ ॥

## अथ चतुर्थं ग्रहणीरोग-निदानम् ॥ ४ ॥

ग्रहणीहेतुः—**अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।**
**भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥ १ ॥**

द्रवद्रव्यसरणसाधर्म्यात्परस्परानुबन्धित्वाच्चातिसारानन्तरं ग्रहणीरोगं कथयति, तत्र सम्प्राप्तिमाह—**अतीसार** इति। अतीसारे **निवृत्ते**=शान्ते। **अपि** शब्दादनिवृत्तेऽप्यतीसारे। **मन्दाग्नेः**=स्वल्पीभूतजठरानलस्य। **अहिताशिनः**=अपथ्यभुजः। **भूयः**=अत्यर्थम्। सन्दूषितो **वह्निः**=जठराग्निः। **ग्रहणीं** षष्ठीं कलाम्। अभि**दूषयेत्**=हतप्रभावां कुर्यात् ॥ १ ॥

सम्प्राप्तिः—**एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।**
**सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥ २ ॥**

सम्प्राप्तिपूर्वकं सामान्यलक्षणमाह—**एकैकश** इति। **अत्यर्थमूर्च्छितैः**=अत्यर्थं प्रवृद्धैः, एकैकशः, सर्वशश्चापि **दोषैः**=वातादिभिः, सा ग्रहणी दुष्टा सती **बहुशो**=बहुवारान्। **भुक्तम्**=आहारम्, **आममेव**=अपक्वमेव। पक्वं वा **विमुञ्चति**=त्यजति ॥ २ ॥

ग्रहणीस्वरूपं—**पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।**
**ग्रहणीरोगमाहुस्तं ह्यायुर्वेदविदो जनाः ॥ ३ ॥**

**सरुजं**=रुजायुक्तम्। **पूति**=दुर्गन्धि (**'पूतिगन्धिस्तु दुर्गन्धः'** इत्यमरः) वातेन मुहुर्बद्धं, पित्तेन च मुहुर्द्रवम्। ग्रहण्या रोगो ग्रहणीरोगस्तं तथोक्तम्। **आयुर्वेदविदो जनाः**=आयुर्वेदशास्त्रमर्मज्ञाः, **आहुः**=आमनन्ति। ग्रहणीलक्षणं यथा—**'षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता। पक्वामाशयमध्यस्था ग्रहणी साऽभिधीयते'** इति। **कला**=धात्वाशयान्तरमर्यादा ॥३॥

पूर्वरूपं—**पूर्वरूपं तु तस्येदं तृष्णाऽऽलस्यं बलक्षयः ।**
**विदाहोऽन्नस्य पाकश्च चिरात्कायस्य गौरवम् ॥ ४ ॥**

पूर्वरूपमाह—**पूर्वरूपमि**त्यादि। **तस्य**=ग्रहणीरोगस्य, इदं पूर्वरूपम्। **तृष्णा**=पिपासा। **अन्नस्य विदाहः**=अग्निमन्दतयाऽऽहारस्य विदग्धता। अत एव अन्नस्य भुक्तस्य **चिरात्**=विलम्बेन पाकश्च भवति। **कायस्य**=शरीरस्य, **गौरवञ्च** सामत्वादिति ॥ ४ ॥

वातग्रहणीहेतुः—**कटुतिक्तकषायातिरूक्षसन्दुष्टभोजनैः ।**
**प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥**

**मारुतः कुपितो वह्निं संछाद्य कुरुते गदान् ॥ ५ ॥**

वातिकग्रहण्या निदानसम्प्राप्तिपुरस्सरं रूपमाह—**कटुतिक्ते**त्यादि । कटुतिक्तादिभोजनैः, एतैर्हेतुभिः प्रकुपितो मारुतः, वह्निं संछाद्य गदान् कुरुते, इत्यन्वयः । **सन्दुष्टभोजनं**=संयोग-संस्कारादिविरुद्धं भोजनम् । **प्रमितं**=स्वल्पभोजनम् । **अनशनं**=लङ्घनम् ॥ ५ ॥

तल्लक्षणञ्च—**तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ॥ ६ ॥**
**कण्ठास्यशोषः क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ।**
**पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विषूचिका ॥ ७ ॥**
**हृत्पीडाकार्श्यदौर्बल्यं वैरस्यं परिकर्त्तिका ।**
**गृद्धिः सर्वरसानां च मनसः सदनं तथा ॥ ८ ॥**
**जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।**
**स वातगुल्महृद्रोग-प्लीहाशङ्की च मानवः ॥ ९ ॥**
**चिराद्दुःखं द्रवं शुष्कं तन्वाम शब्दफेनवत् ।**
**पुनः पुनः सृजेद्वर्चः कासश्वासार्दितोऽनिलात् ॥ १० ॥**

कान् गदान् विदधातीत्यत आह—**तस्यान्न**मित्यादि **तस्य**=ग्रहणीरोगपीडितस्य, अन्नं, **दुःखं**=समयाधिक्येन, पच्यते । **शुक्तपाकम्**=अम्लपाकम् । **खराङ्गता**=कठोरकलेवरत्वम् । वायुना त्वग्गतस्नेहशोषणात् । **तिमिरं**=स्वल्पदृष्टिता । **कर्णयोः स्वनः**=श्रोत्रयोः शब्दः । **अभीक्ष्णं**=निरन्तरम् । पार्श्वोरुवङ्क्षणग्रीवारुक् । **रुक्**शब्दः पार्श्वादिभिः प्रत्येकं सम्बद्ध्यते । **विषूचिका**=वमनविरेचने । **वैरस्यं**=मुखस्य स्वादाभावः । **परिकर्त्तिका**=गुदे परिकर्त्तनवत् पीडा । **सर्वरसानां**=मधुरादीनां, **गृद्धिः**=अभिलाषा । **मनसः सदनं**=चित्तावसादः । जीर्णे जीर्यति चान्ने आध्मानम् । **भुक्ते**=भोजने कृते सति, स्वास्थ्यम् । **उपैति**=प्राप्नोति । **सः, मानवः**=मनुष्यः । वातगुल्महृद्रोगप्लीहाशङ्की च भवति । **अनिलाद्**=वायोः । कासश्वासार्दितः सन्, **चिराद्**=दीर्घकालेन । दुःखं द्रवं कदा चित् शुष्कं कदा चित्, **शब्दफेनवत्**=शब्दयुक्तं फेनयुक्तं च, **वर्चः**=पुरीषम् । **पुनः पुनः**=भूयोभूयः, **सृजेत्**=त्यजेत् ॥ ६-१० ॥

पित्तग्रहणीहेतुः—**कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम् ।**
**आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ॥ ११ ॥**

पैत्तिकग्रहण्या निदानसम्प्राप्तिपूर्वकरूपमाह—**कट्वजीर्णे**त्यादि । कट्वजीर्णादिभिः । **उल्वणं** = प्रवृद्धम् । पित्तं ( कर्त्तृपदम् ) तप्तं जलम्=उष्णोदकम्, अनलमिव । जठरानलम्, **आप्लावयत्** = अभिभवं कुर्वत् । हन्ति ॥ ११ ॥

तल्लक्षणञ्च—**सोऽजीर्णं नीलपीताभं पीताभः सार्यते द्रवम् ।**
**पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दितः ॥ १२ ॥**

**सः**=आतुरः, पीताभो जायते । अजीर्णम्=अपरिपक्वम्, **नीलपीताभं** = नीलपीतवर्णम् । द्रवं, पुरीषम्, **सार्यते**=रेचयति । स च पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृड्भिः **अर्दितः** = पीडितश्च भवति ॥ १२ ॥

कफग्रहणीहेतुः—**गुर्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।**
**भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥ १३ ॥**

श्लैष्मिकग्रहण्या निदानादिपूर्वकरूपं वर्णयन्नाह—**गुर्वि**त्यादि । अतिगुरुस्निग्धादिभोजनात्, अतिभोजनात्—भुक्तमात्रस्य च स्वप्नात्, **कुपितः** = प्रवृद्धः । **कफः** =श्लेष्मा, अग्निं हन्ति ॥ १३ ॥

तल्लक्षणञ्च—**तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।**
**आस्योपदेहमाधुर्यं कासष्ठीवनपीनसाः ॥ १४ ॥**
**हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।**
**दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥ १५ ॥**
**भिन्नामश्लेष्मसंसृष्टगुरुवर्चः प्रवर्त्तनम् ।**
**अकृशस्यापि दौर्बल्यमालस्यं च कफात्मके ॥ १६ ॥**

**तस्य** = रोगिणः, **अन्नं** = भुक्तं, **दुःखं**=चिरात्, पच्यते । हृल्लासादयोजायन्ते । **आस्योपदेहमाधुर्यम्** = आस्यस्य मुखस्य उपदेहमाधुर्यं=लिप्तत्वं मधुरत्वं च श्लेष्मणैव । हृदयं, **स्त्यानं**=घनद्रवापूरितमिव, उदरं, **स्तिमितं**= निश्चलं, **गुरु** = जडं, मन्यते । अस्य **दुष्टः** = विकृतः । **मधुरः** = माधुर्योपलक्षितः । उद्गारः । **सदनम्** = अग्निमान्द्यम् । **स्त्रीष्वहर्षणं** = स्त्रीविषयकप्रीत्यभावः । भिन्नं च तदामश्लेष्मभ्यां संसृष्टञ्च गुरु **वर्चःप्रवर्तनम्** = पुरीषनिर्गमः, **अकृशस्याऽपि दौर्बल्यं**=स्थूलवतोऽपि कर्मण्यसामर्थ्यम् ॥ १४–१६ ॥

त्रिदोषहेतुलिङ्गे—**पृथग्वातादिनिर्दिष्टहेतुलिङ्गसमागमे ।**
**त्रिदोषं निर्दिशेदेवं तेषां वक्ष्यामि भेषजम् ॥ १७ ॥**

सान्निपातिकग्रहण्या लक्षणमाह—पृथग्-वातादिनिर्दिष्टहेतुलिङ्गसमागमे त्रिदोषं निर्दिशेदिति ॥ १७ ॥

संग्रहग्रहणी- **अन्त्रकूजनमालस्यं दौर्बल्यं सदनं तथा ।**
लिङ्गम्— **द्रवं शीतं घनं स्निग्धं सकटीवेदनं शकृत् ॥ १८ ॥**
**आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम् ।**
**पक्षान्मासाद्दशाहाद्वा नित्यं वाऽप्यथ मुञ्चति ॥ १९ ॥**
**दिवा प्रकोपो भवति रात्रौ शान्तिं व्रजेच्च सा ।**
**दुर्विज्ञेया दुश्चिकित्स्या चिरकालानुबन्धिनी ।**
**सा भवेदामवातेन संग्रहग्रहणी मता ॥ २० ॥**

अन्त्रकूजनमित्यादिना लक्षणविशेषमाह—**अन्त्रकूजनम्**=अन्त्रस्य निनादः । **दौर्बल्यं**=बलह्रासः । सदनम्=अग्निमान्द्यम् । **सकटीवेदनम्**=कटीवेदनायुक्तम् । **शकृत्**=पुरीषम् । पक्षात्-मासाद् दशाहाद् वा व्यतीत्य ( ल्यब्लोपे पञ्चमी ) नित्यं वा । **मुञ्चति**=त्यजति । **दिवा**=दिवसे, **प्रकोपो भवति**=वर्द्धते । **रात्रौ**=निशीथे, शान्तिं, व्रजेत् । दुर्विज्ञेया दुश्चिकित्स्या **चिरकालानुबन्धिनी**=प्राचीना । आमवातेन जायमाना भवति सा संग्रहग्रहणी, **मता**=**कथिता,** भिषग्भिरिति शेषः ॥ १८–२० ॥

घटीयन्त्रग्रह- **स्वपतः पार्श्वयोः शूलं गलज्जलघटीध्वनिः ।**
णीलक्षणम्—**तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ॥ २१ ॥**
सामता निरामता च—**दोषं सामं निरामं च विद्यादत्रातिसारवत् ॥२२॥**

आमपक्वयोर्लक्षणज्ञानार्थमाह—**दोषमिति** । सामं निरामञ्च दोषम्, **अत्र**=ग्रहणीगदे, अतीसारवद्—निमज्जनोत्प्लवनादिना, **विद्यात्**=जानीयात् ॥ २१–२२ ॥

असाध्यरूपं—**लिङ्गैरसाध्यो ग्रहणीविकारो यैस्तैरतीसारगदो न सिध्येत् ।**
**वृद्धस्य नूनं ग्रहणीविकारो हत्वा तनूं नैव निवर्त्तते च॥२३॥**

वयोभेदेन ग्रहणीसाध्यासाध्यत्वादि—
**बालके ग्रहणी साध्या यूनि कृच्छ्रा समीरिता ।**
**वृद्धे त्वसाध्या विज्ञेया मतं धन्वन्तरेरिदम् ॥ २४ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुर्थं ग्रहणीरोग-**
**निदानं समाप्तम् ॥ ४ ॥**

असाध्यत्वमाह—लिङ्गैरित्यादिना। **लिङ्गैः**=लक्षणैः, **अतीसारगदो न सिध्येत्तै**रेव ग्रहणीविकारो न सिद्ध्येत्। यानि अतिसारस्यासाध्यलक्षणानि तान्येव ग्रहणीरोगस्यापीति भावः। वृद्धस्य तनं हत्वा पुनर्न **निवर्त्तते**=न जीवतीत्यर्थः। सुस्पष्टमाह—बालके साध्या-यूनि कृच्छ्रसाध्या। वृद्धे त्वसाध्या-एवेति धन्वन्तरीयाणाम् मतम्॥ २३–२४॥

इतिसुधायां ग्रहणीरोगनिदानम्।

## अथ पञ्चममर्शोरोग-निदानम्॥ ५॥

संख्या— **पृथग्दोषैः समस्तैश्च शोणितात्सहजानि च।**
**अर्शांसि षट्प्रकाराणि विद्याद् गुदवलित्रये॥ १॥**

अतीसारग्रहण्यर्शसां परस्परानुबन्धित्वाद् ग्रहण्यनन्तरमर्शोनिदानमाह—**पृथग्**ित्यादि। **पृथग्**वातादिभिर्**दोषैः**, **समस्तैश्च**=मिलितैस्त्रिदोषैः, **शोणितात्**=रक्तात्। सहजातानि **सहजानि**। षड्विधानि अर्शांसि गुदवलित्रये विद्यात्। अरिवत् प्राणान् हिनस्तीत्यर्श इति पृषोदरादित्वात्साधुः। सार्द्धचतुरङ्गुलमानं गुदम्। तदवयवभूताः प्रवाहणी–विसर्जनी–संवरणीनामिकास्तिस्रो वलयः सन्ति। तत्र **गुदौष्टमान**मर्धाङ्गुलं तदूर्ध्वमेकाङ्गुलपरिमाणा **प्रथमा वलिः**, सार्द्धाङ्गुलमाना **द्वितीया** तृतीया चेति धन्वन्तरीयाः॥ १॥

सम्प्राप्तिः— **दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन्।**
**मासाङ्कुरानपानादौ कुर्वन्त्यर्शांसि ताञ् जगुः॥ २॥**

अर्शःस्वरूपं सम्प्राप्तिपुरःसरमाह—**दोषा** इत्यादि। **दोषाः**=वातादयः, त्वङ्मांसमेदांसि, **संदूष्य**=दूषयित्वा। **अपानादौ**=अपाने=गुदम्, आदिपदेन नासाऽऽदीनामपि ग्रहणम्। **विविधाकृतीन्**=नानावर्णान्, **मासाङ्कुरान्**=पिशितप्ररोहान् कुर्वन्ति। तान् अर्शांसि, **जगुः**=कथयामासुः॥ २॥

वातार्शोहेतुः—**कषायकटुतिक्तानि रूक्षशीतलघूनि च।**
**प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम्॥ ३॥**
**लङ्घनं देशकालौ च शीतौ व्यायामकर्म च।**
**शोको वातातपस्पर्शो हेतुर्वातार्शसां मतः॥ ४॥**

वातार्शसां निदानमाह—**कषाये**त्यादि। कषायादिवातातपस्पर्शादिसेवनं **वातार्शसां हेतुर्मतः**=कथितः॥ ३–४॥

पित्तार्शोहेतुः—**कट्वम्ललवणोष्णानि-व्यायामाग्न्यातपप्रभाः।**

देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ॥ ५ ॥
विदाहि तीक्ष्णमुष्णं च सर्वं पानान्नभेषजम् ।
पित्तोल्वणानां विज्ञेयः प्रकोप हेतुरर्शसाम् ॥ ६ ॥

पित्तार्शोनिदानमाह—**पित्तोल्वणानां**=पित्तदोषप्रधानानाम् , अर्शसां प्रकोपे कट्वादिको गणो हेतुर्विज्ञेयः । **अशिशिरौ**=उष्णौ, देशकालौ । **कोपो**=रोषः । **असूयनं**=परसम्पत्तौ द्वेषः । **सर्वं**=निखिलं, **पानं**=द्रवद्रव्यादि, **अन्नं**=भोज्यद्रव्यादि, **भेषजम्**=औषधद्रव्यादि ॥ ५–६ ॥

कफार्शोहेतुः—**मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।**

अव्यायामो दिवास्वप्नः शय्याऽऽसनसुखे रतिः ॥ ७ ॥
प्राग्वातसेवाशीतौ च देशकालावचिन्तनम् ।
श्लैष्मिकाणां समुद्दिष्टमेतत्कारणमर्शसाम् ॥ ८ ॥

श्लेष्मार्शोनिदानमाह—**मधुरे**त्यादि । **श्लैष्मिकाणां**=कफानुबन्धिनाम् , अर्शसामेतत्कारणं, **समुद्दिष्टं**=कथितं, महर्षिभिरिति शेषः । मधुरादिपदार्थानां सेवनं शय्याऽऽसनयोः सुखे, **रतिः**=अभिलाषातिशयः । **प्राग्वातसेवा**=पूर्वानिलसेवनम् । **अचिन्तनम्**=चिन्ताराहित्यम् ॥ ७-८ ॥

द्वन्द्वार्शोहेतुः—**हेतुलक्षणसंसर्गाद्विद्याद् द्वन्द्वोल्वणानि च ॥ ९ ॥**

त्रिदोषार्शोहेतुः—**सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणैः समम् ॥ १० ॥**

पूर्वरूपं— विष्टम्भोऽन्नस्य दौर्बल्यं कुक्षेराटोप एव च ।
काश्यर्मुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ॥ ११ ॥
ग्रहणीदोषपाण्डवर्त्तेराशङ्का चोदरस्य च ।
पूर्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये ॥ १२ ॥

पूर्वरूपमाह—विष्टम्भ इति । **विष्टम्भोऽन्नस्य**=वातवैगुण्येन विष्टम्यान्नस्य परिपाकः, **दौर्बल्यं**=क्षीणशक्तिता, **कुक्षेराटोपः**=उदरे गुडगुडाशब्दः । **सक्थिसादः**=जङ्घाऽवसादः; अल्पविट्कता=पुरीषाल्पत्वम् , अर्शसाम् , **अभिवृद्धये**=उत्पत्तये, इमानि **पूर्वरूपाणि**=अग्रजलक्षणानि निर्दिष्टानि भवन्तीति शेषः ॥ ९–१२ ॥

वातगुदाङ्कुराः— गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमचिमान्विताः ।
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥
मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः ।

**बिम्बीखर्जूरकर्कन्धूकार्पासीफलसन्निभाः ॥ १३ ॥**
**केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः ।**
**शिरःपार्श्वांसकट्यूरुवङ्क्षणाद्यधिकव्यथाः ॥ १४ ॥**
**क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः ।**
**कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥ १५ ॥**
**तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ।**
**रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ॥ १६ ॥**

अर्शसां निदानमुक्त्वा वातादिभेदेन लक्षणानि कथयति, तत्र वातार्शोलक्षणमाह—**गुदाङ्कुरा** इत्यादि । बहुरनिलो यत्र ते तथोक्ता वातप्रधानाः । गुदे मांसप्ररोहाः, गुदाङ्कुराः । **शुष्काः**=स्रावहीनाः, **चिमचिमान्विताः**=वेदनाविशेषपीडिताः, **स्तब्धाः**=कठिनस्पर्शवत्वात्, **परुषाः**=कर्कशाः, **खराः**=सूक्ष्मानेककण्टकाकीर्णाः, **मिथोविसदृशाः**=परस्परविभिन्नाकृतयः, **बिम्ब्यादिफलसन्निभाः**=**बिम्बी** ('त्रिकोल' इति लोके ख्यातम्) रक्तातिशयादिसाधर्म्यमादाय सादृश्यम् । केचित् **सिद्धार्थकोपमाः**—सिद्धार्थकः 'सरसो' इति लोके प्रसिद्धः सूक्ष्मफलविशेषस्तत्सदृशाः सूक्ष्मपिडकारूपाः । **तैः** = अर्शोभिः, **आर्त्तः**=पीडितः, ।ग्रथितं=क्लिष्टम्, **स्तोकम्** = अल्पम् , **रुक्**=पीडा, **पिच्छा**=चिक्कणो जलोदगततैलाकृतिर्द्रवभागः, **उपवेश्यते** = पुरीषं त्याज्यते ॥ १३–१६ ॥

तदुपद्रवाः— **कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ।**
**गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च ॥ १७ ॥**

पित्तगुदाङ्कुराः—**पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः ।**
**तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥ १८ ॥**
**शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः ।**
**दाहपाकज्वरस्वेदतृण्मूर्च्छाऽरुचिमोहदाः ॥ १९ ॥**
**सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः ।**
**यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः ॥ २० ॥**

उपद्रवमाह—त्वङ्नखविण्मूत्रादीनां कृष्णता गुल्मादिसम्भवश्च जायते, **अष्ठीला** = वातव्याधिविशेषः ॥ १७–२० ॥

कफगुदाङ्कुराः—**श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः ।**
**उत्सन्नोपचितस्निग्धस्तब्धवृत्तगुरुस्थिराः ॥ २१ ॥**

पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः ।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ॥ २२ ॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः ।
सश्वासकासहृल्लासप्रसेकारुचिपीनसाः ॥ २३ ॥
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः ।
क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः ॥ २४ ॥
वसाऽऽभसकफप्राज्यपुरीषाः सप्रवाहिकाः ।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः ॥ २५ ॥

श्लेष्मार्शोलक्षणमाह—**श्लेष्मोल्वणाः** = कफप्रधानाः, **महामूलाः** = महान्ति मूलानि येषां ते तथोक्ताः, **घनाः** = निविडावयवाः, **मन्दरुजः** = स्वल्पवेदनायुक्ताः, **सिताः** = धवलवर्णाः । **उत्सन्नाः** = ऊर्ध्वमुद्गताः, **उपचिताः** = स्थूलाः, **स्तब्धाः** = जडाः, **वृत्ताः** = वर्त्तुलाः, **गुरवो** = भाराक्रान्ताः, **स्थिराः** = अचलाः, **पिच्छिलाः** = चिक्कणाः, **स्तिमिताः**=मन्दाः, **कण्ड्वाढ्याः**=खर्जूबहुलाः, **गोस्तनसन्निभाः**=गोस्तनसदृशाः, **वङ्क्षणानाहिनः**= वङ्क्षणा वानद्धुं शीलं येषां ते तथा पाय्वादिभागेषु आकर्षणवद्वेदनासम्पादकाः, तथा मेहादिविकारकारिणः, **क्लैब्यं**=नपुंसकता, **अग्निमार्दवं**=वह्निमन्दता, **वसाभं**=वसासदृशं, कफसदृशं वा, **प्राज्यं**=प्रभूतं, **पुरीषं**=विष्ठा यत्र तथा, **न स्रवन्ति=न क्लिद्यन्ति, न भिद्यन्ते**=गाढवर्चस्का अपि विदीर्णतां न यान्ति ॥ २१-२५ ॥

त्रिदोषसहजे च-**सर्वैः सर्वात्मकान्याहुर्लक्षणैः सहजानि च ॥ २६ ॥**
रक्तार्शोगुदा-**रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।**
ङ्कुराः— **वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ।**
**तेऽत्यर्थं दुष्टमुष्णं च गाढविट्कप्रपीडिताः ॥ २७ ॥**
**स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ।**
**भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ॥ २८ ॥**
**हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ।**
**विट् श्यावं कठिनं रूक्षमधो वायुर्न वर्त्तते ॥ २९ ॥**

रक्तार्शोलक्षणमाह—**रक्तोल्वणा** इति । **गुदे कीलाः**=इत्येकं पदम्, अलुक् समासः, गुदे पायुदेशे कीलवत्प्रतीयमानाः । **गुञ्जाविद्रुमसन्निभाः**=करञ्जप्रवा-

लवत्लोहितवर्णाः । गाढविट्कप्रपीडिताः=कठिनपुरीषपीडिताः, सन्तः । तस्य=रक्तस्य, अतिप्रवृत्तितः= अतिस्रावात् । भेकाभः=मण्डूकच्छविः, पीतवर्ण इति यावत् । विट्=पुरीषं, श्यावं=कृष्णवर्णम् , अधोवायुः=अपानशब्दो न वर्त्तते गुदेन, प्रतिलोमगत्वात् ॥ २६–२९ ॥

वातादिभेदेन **तनु चारुणवर्णं च फेनिलं चासृगर्शसाम् ।**
तल्लक्षणानि–**कटयूरुगुदशूलं च दौर्बल्यं यदि चाधिकम् ॥ ३० ॥**
**तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् ।**
**शिथिलं श्वेतपीतं च स्निग्धं विड्गुरुशीतलम् ॥ ३१ ॥**
**यद्यर्शसां घनं चासृक् तन्तुमत्पाण्डु पिच्छिलम् ।**
**गुदं सपिच्छं स्तिमितं गुरु स्निग्धं च कारणम् ॥**
**श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥ ३२ ॥**

रक्तस्य वातादिभेदेन लक्षणमाह–**तन्वित्यादि** । यदि, अर्शसाम् , **असृक्**=रक्तं, **तनु**= तरलम् , **अरुणवर्णं**=रक्तवर्णं, **फेनिलं**=फेनयुक्तं, च स्यात्कट्यादिषु शूलमधिकं दौर्बल्यं च यदा जायेत, रूक्षणं हेतुर्यदि भवेत्तदा तत्र वातस्यानुबन्धो विज्ञेयः । यदि च **विट्**= पुरीषं, **शिथिलं**=द्रवं, श्वेतपीतं स्निग्धं, गुरु, शीतलं च स्यात् , यदि चार्शसाम्, **असृक्**=रक्तं, **तन्तुमत्**=सूत्रवद्भासमानं, **पाण्डु**=पीतवर्णं, पिच्छिलादिलक्षणोपेतं च स्यात्तत्र श्लेष्मानुबन्धो विज्ञेयो बुधैः ॥ ३०–३२ ॥

कथमर्शांसि **पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रयम् ।**
कष्टानि—**सर्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥ ३३ ॥**
**तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ।**
**सर्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥ ३४ ॥**

गुददेशस्थस्यापि तस्य सर्वदेहव्यापित्वमाह—**गुदजानाम्**=अर्शसां, **समुद्भवे पञ्चात्मा मारुतः**=पञ्चविधवातः, **पित्तं** च पञ्चविधं, **कफश्च** पञ्चविधः, गुदबलित्रयं च सर्व एव युगपत् , **प्रकुप्यन्ति**=विकृता यान्ति, **तस्मादर्शांसि, दुःखानि**=पीडाकराणि बहुव्याधिं जनयन्ति, **सर्वदेहोपतापीनि**= निखिलशरीरक्लेशकराणि, **प्रायः**, कृच्छ्रतमानि=कष्टसाध्यानि, प्रायोग्रहणाद् असाध्यानि च भवन्ति ।

**'हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे च**

व्यानः सर्वशरीरगः ॥ अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये । त्वचि सर्वशरीरेषु पित्तं निवसति क्रमात् । आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु । स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात् । इति स्थान-भेदेन कार्यभेदेन च वातादीनां पञ्चविधत्वम् ॥ ३३-३४ ॥

साध्यानि—द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ ३५ ॥

अर्शसः साध्यलक्षणमाह—**बाह्यायां वलै**='संवरण्यां' जातानि, **एकदोषोल्वणानि**=एकैकदोषप्रधानानि, **न चिरोत्पतितानि**=अनतिक्रान्तसंवत्सराणि, सुखसाध्यानि ॥ ३५ ॥

दुःसाध्यानि—द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ ३६ ॥

**द्वितीयायां च वलौ**=विसर्जन्यां, जातानि, **परिसंवत्सराणि**=अतीत संवत्सराणि कृच्छ्रसाध्यानि ॥ ३६ ॥

असाध्यानि—सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् ॥ ३७ ॥

सहजानि **त्रिदोषाणि**=त्रिदोषोल्वणानि, आभ्यन्तरां वलिं च **संश्रित्य**=अवलम्ब्य यानि जायन्ते तान्यसाध्यानि **निर्दिशेत**=जानीयात् ॥ ३७ ॥

असाध्यानामपि शेषत्वादायुषस्तानि चतुष्पादसमन्विते ।
याप्यतामाह—याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ॥ ३८ ॥

**असाध्यो हि द्विधा**—याप्यप्रत्याख्येयभेदेन वर्णितः, तत्र **आयुषः शेषत्वात्**=आयुषि विद्यमाने । **चतुष्पादसमन्विते**=पादचतुष्टययुक्ते । **'भिषग् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम्'** । **दीप्तकायाग्नेः**=प्रदीप्तजठरानलस्य तान्यर्शांसि । **याप्यन्ते**=याप्यानि भवन्ति, **अतोऽन्यथा**=वैपरीत्येन प्रत्याख्येयान्येव विद्यात् । **'यापनीयं तु तं विद्यात् क्रिया धारयते तु यम् । क्रियायां तु निवृत्तायां सद्य एव विनश्यति । प्रत्याख्येयं तु तं विद्याच्चिकित्सा यत्र निष्फला'** ॥ ३८ ॥

असाध्यरोगि- हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।
लक्षणम्— शोथो हृत्पार्श्वशूलं च यस्यासाध्योऽर्शसो हि सः ॥ ३९ ॥

अपरञ्च—हृत्पार्श्वशूलं संमोहश्छर्दिरङ्गस्य रुग्ज्वरः ।

**तृष्णा गुदस्य पाकश्च निहन्युर्गुदजातुरम् ॥ ४० ॥**

उपद्रवमाह—**हस्त** इत्यादि। यस्य=अर्शोरोगयुक्तस्य, हस्तादिषु शोथः सोऽसाध्यः ॥ ३९–४० ॥

अपरञ्च—**तृष्णाऽरोचकशूलार्त्तमतिप्रस्रुतशोणितम्।**
**शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि ॥ ४१ ॥**

तृष्णाऽऽदिपीडितम्, **अतिप्रस्रुतशोणितम्**=अतिशयेन रक्तप्रवाहयुक्तम्। **क्षयपन्ति**=विनाशयन्ति ॥ ४१ ॥

लिङ्गादावर्शांसि—**मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च।**
**गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च ॥ ४२ ॥**

**मेढ्रादिषु**=लिङ्गादिष्वपि यथास्वमर्शांसि वक्ष्यन्ते नाभिजानि च, **गण्डूपदास्यरूपाणि**=किञ्चुलिकमुखसदृशानि, **मृदूनि**=सुकुमाराणि, भवन्तीतिशेषः ४२

चर्मकीलसम्प्राप्तिः—**व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।**
**कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः ॥ ४३ ॥**

चर्मकीलमाह—**व्यानः**=सकलदेहचरो वायुः, **श्लेष्माणं**=कफं, गृहीत्वा त्वचो बहिः कीलोपमं, **स्थिरखरं**=निश्चलत्वेन वर्त्तमानं सत्खरस्पर्शं, तं **चर्मकीलम्**=एतन्नामधेयं रोगं विदुः ॥ ४३ ॥

तल्लक्षणं—**वातेन तोदपारुष्यं पित्तादसितवक्त्रता।**
**श्लेष्मणा स्निग्धता चास्य ग्रथितत्वं सवर्णता ॥४४॥**
**( अर्शसां प्रथमे चित्तमाशु कुर्वीत बुद्धिमान्।**
**तान्याशु हि गुदं बद्ध्वा कुर्युर्बद्धगुदोदरम् ॥ ४५ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चममर्शोरोग-निदानं समाप्तम् ॥ ५ ॥**

तस्यैव वातादिभेदेन लक्षणमाह—**असितवक्त्रता**=नीलमुखत्वम्, **सवर्णता**—शरीरस्य तुल्याकृतित्वम् ॥ ४४ ॥

इति सुधायामर्शोरोगनिदानं समाप्तम्।

---

## अथ षष्ठमग्निमान्द्यऽजीर्ण विषूचिका-ऽलसक-विलम्बिका-निदानम् ॥ ६ ॥

अग्निमान्द्यवर्णनं—**मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः।**
**कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥ १ ॥**

अग्नेश्चातुर्विध्यमाह—**मन्द** इत्यादि । कफाधिक्यान्**मन्दः**, पित्ताधिक्यात्-**तीक्ष्णः**, अनिलाधिक्याद्**विषमः**, **तत्साम्यात्**-कफादीनां साम्यात्, **समो जाठरोऽनल** इति । जाठर इति कथनाद् भूताद्यग्निव्यवच्छेदो जायते ॥ १ ॥

तत्कार्य्यम्—**विषमो वातजान् रोगास्तीक्ष्णः पित्तनिमित्तजान् ।**
**करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥२॥**

तेषां कार्यमाह—**विषम** इत्यादि। विषमो वातजान् रोगान् करोति। तीक्ष्णः पित्तजान् व्याधीञ्जनयति । मन्दः श्लेष्मनिमित्तजान् रोगानुत्पादयति ॥ २ ॥

**समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।**
**स्वल्पाऽपि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥ ३ ॥**
**कदा चित्पच्यते सम्यक्कदा चिन्न विपच्यते ।**
**मात्राऽतिमात्राऽप्यशिता सुखं यस्य विपच्यते ।**
**तीक्ष्णाग्निरिति तं विद्यात्समाग्निः श्रेष्ठ उच्यते ॥४॥**

तेषां रूपमाह—समा उचिता मात्रा भोजनस्य सम्यग् यस्य पच्यतेऽसौ **समाग्निः** । स्वल्पाऽपि मात्रा भुक्ता सम्यग न पच्यतेऽसौ **मन्दाग्निः** । कदाचिन्न पच्यते वा कदाचित्सम्यक् पच्यते स **विषमाग्निः** । मात्राऽतिमात्राऽपि भुक्ता सुखं यस्य पच्यतेऽसौ **तीक्ष्णाग्निः** । अस्यैव **'भस्मक'** इति संज्ञा तन्त्रान्तरे । एतेषु **समाग्निः** श्रेष्ठ उच्यते ॥ ३–४ ॥

तत्संख्या च—**आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।**
**अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ ५ ॥**
**अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।**
**वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥ ६ ॥**

अग्निमान्द्याजीर्णयोः परस्परं हेतुत्वादजीर्णान्याह–**आम**मित्यादि। **त्रिभिः कफपित्तानिलैः**, **आमं-विदग्धं-विष्टब्ध**मिति । त्रिविधमजीर्णं केचिदामनन्ति । त्रिभिरिति कफादिभिरेकैकशो यथासंख्यमन्वयो बोध्यः। केचिच्च **रसशेषतः** । रसाय शेषो रसशेषस्तस्मात्, चतुर्थमजीर्णमिच्छन्ति केचिद् निर्दोषं दिनपाकि पञ्चममजीर्णमिच्छन्ति। **प्राकृतं**=स्वाभाविकं, **प्रतिवासरं** चाजीर्णं षष्ठमिति केचिद् वदन्ति । आमादित्रयमजीर्णमन्नजं रसशेषस्त्वाहाररसज- इति परस्परं भेदः। वातादिलिङ्गाल्पत्वाद्धेतुलक्षणचिकित्साभेदोऽपि भवति ॥५–६॥

तद्धेतुः—अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात्स्वप्नविपर्ययाच्च ।
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥७॥
ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन शुग्दैन्यनिपीडितेन ।
प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक्परिपाकमेति ॥ ८ ॥
मात्रयाऽप्यभ्यवहृतं पथ्यं चान्नं न जीर्यति ।
चिन्ताशोकभयक्रोध-दुःखशय्याप्रजागरैः ॥ ९ ॥

अजीर्णहेतुमाह—अत्यम्बुपानादिति । अत्यम्बुपानाद्=अतीवजलपानात्, विषमाशनाद्=विषमाहारात्, स्वप्नविपर्ययाद्=रात्रिजागरणदिवास्वापात्, नरस्य, काले=समयेऽपि, सात्म्यं लघु चापि भुक्तमन्नं सम्यक् परिपाकं न याति ॥ ७–९ ॥

आमाजीर्ण-तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः ।
लक्षणम्—उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते ॥ १० ॥

पूर्वोक्तानामजीर्णानां लक्षणान्याह—तत्रेत्यादि । तत्र=तेष्वजीर्णेषु, गण्डः=कपोलः, अक्षिकूटो=नेत्रगोलकः, उत्क्लेदो=उपस्थितवमनत्वम् ॥१०॥

विदग्ध- विदग्धे भ्रमतृण्मूर्च्छाः पित्ताच्च विविधा रुजः ।
लक्षणम्—उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते ॥ ११ ॥
विष्टब्ध- विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः ।
लक्षणम्—मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनम् ॥ १२ ॥
रसशेषाजीर्ण-रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे ॥ १३ ॥
लक्षणम्—यावत् संतिष्ठते ह्यस्य दुष्टोऽन्नस्य रसो हृदि ।
तावन्मर्माणि भिद्यन्ते विषं पीतवतो यथा ॥ १४ ॥

विविधा रुजः—ओषचोषादयो वेदनाविशेषाः । सधूमाम्ल-उद्गारः-अम्लोद्गारो धूमोद्गारश्च ॥ ११–१४ ॥

अजीर्णोप- मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
द्रवाः—उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः ॥ १५ ॥

उपद्रवमाह—मूर्च्छेत्यादि । प्रलापः=असम्बद्धभाषणम् । वमथुः=छर्दिः, अत्यजीर्णं मरणमपि ॥ १५ ॥

अजीर्णोत्पत्तौ- अनात्मवन्तः पशुवद् भुञ्जते येऽप्रमाणतः ।
कारणम्— रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ १६ ॥

अजीर्णकारणेषु भोजनाधिकस्य विशेषकारणत्वमाह—ये, **अनात्मवन्तः**=अजितेन्द्रियाः, **अप्रमाणतः**=अग्निबलमतिक्रम्य, **पशुवत्**=मूढवत्, भुञ्जते, **रोगानीकस्य**=रोगसमूहस्य, **मूलं**=प्रधानकारणम्, अजीर्णं प्राप्नुवन्ति॥ १६ ॥

अजीर्णावस्थायां क्षुद्भ्रान्तेः कारणम्—

**(स्वल्पं यदा दोषविबद्धमामं लीनं न तेजःपथमावृणोति।**
**भवत्यजीर्णेऽपि तदा बुभुक्षा या मन्दबुद्धीन् विषवन्निहन्ति॥ १७॥**
**प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम्।**
**तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति)॥ १८॥**

विषूच्यादि- **अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम्।**
हेतुः— **विषूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका॥ १९॥**

विषूच्यादीनामजीर्णजन्यत्वादजीर्णानन्तरं विषूच्यादीनाह-**अजीर्ण**मित्यादि। आमादिकमजीर्णं यद् **ईरितं**=कथितं, तस्माद्विषूच्यलसकौ भवेताम्, विलम्बिका चापि भवेत्॥ १९ ॥

विषूचिकानि- **सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः।**
रुक्तिः— **यत्राजीर्णेन सा वैद्यैर्विषूचीति निगद्यते॥ २०॥**

विषूच्या निरुक्तिमाह—अजीर्णेन, **अनिलः**=वायुः, यत्र सूचीभिरिव नरस्य गात्राणि **तुदन्**=व्यथयन्, सन्तिष्ठते, वैद्यैः सा विषूचीति निगद्यते॥ २०॥

**न तां परिमिताहारा लभन्ते विदितागमाः।**
**मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः॥ २१॥**

**तां**=विषूचीं, **विदितागमाः**=आयुर्वेदमर्मज्ञाः, न लभन्ते, किन्तु—**अशनलोलुपाः**=भोजनलुब्धाः॥ २१॥

विषूचिका- **मूर्च्छाऽतिसारो वमथुः पिपासा शूलो भ्रमोद्वेष्टनजृम्भदाहाः।**
लक्षणम्— **वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः॥२२॥**

विषूच्या लक्षणमाह—मूर्च्छेत्यादि। **तस्यां**=विषूच्याम्, मूर्च्छाऽऽदयो भवन्तीत्यन्वयः। **वमथुः**=वान्तिः, **वैवर्ण्यं**=गात्रस्य, **शिरसश्च भेदः**=मस्तकपीडा॥ २२॥

विषूचिको (**निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।**
पद्रवाः— **अमी उपद्रवा घोरा विषूच्यां पञ्च दारुणाः)॥ २३॥**

अलसकरूपं-**कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत्परिकूजति।**
**निरुद्धो मारुतश्चैव कुक्षावुपरि धावति॥ २४॥**

**वातवर्चो निरोधश्च यस्यात्यर्थं भवेदपि ।**
**तस्यालसकमाचष्टे तृष्णोद्गारो च यस्य तु ॥ २५ ॥**

अलसकमाह—**कुक्षिरित्यादि** । **कुक्षिः**=उदरम्, **आनह्यते**=आध्मायते, **प्रताम्येत्**=मोहं गच्छेत्, **परिकूजति**=आर्त्तरावं करोति, **यस्य**=नरस्य, **निरुद्धः**=प्रतिरुद्धगतिः, **मारुतः**=पवनः, **कुक्षौ**=उदरे, **उपरि-धावति**=ऊर्ध्वं हृदयादिकं गच्छति, **वातवर्चोनिरोधः**=विण्मूत्रावरोधः, **तस्य**=नरस्य, अलसकमिति अन्वर्थनाम दोषाणामलसीभूतत्वात् । यदुक्तमन्यत्र—**प्रयाति नोर्ध्वं नाधस्तादाहारोऽथ विपद्यते । आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः** ॥ २४-२५ ॥

विलम्बिका वा दण्डालसकः—

**दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्ध्वमधश्च यस्य ।**
**विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः ॥२६॥**

विलम्बिकामाह—**दुष्टमित्यादि** । भुक्तमन्नं कफमारुताभ्यां दुष्टं, **नोर्ध्वं-मधश्च प्रवर्त्तते**=वमनविरेचने न जायेते, तां, **भृशदुश्चिकित्स्यां**=वर्जनीयां, **पुराणाः**=प्राक्तनाः, विलम्बिकाम्, **आचक्षते**=कथयन्ति, नन्वलसकविलम्बिकयोरुभयोर्यद्यपि श्लेष्मानिलप्राधान्यं विरेचनवमनशून्यत्वं समानं तथाऽपि शूलाधिकमलसकविशेषादिति भेदः ॥ २६ ॥

विषूच्यलसकयोरसाध्यलक्षणानि—

**यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः ।**
**क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥ २७ ॥**

असाध्यलक्षणमाह—**अल्पसंज्ञः**=मृतप्रायः, **अभ्यन्तरयातनेत्रः**=प्रविष्टान्तर्नेत्रगोलकः, **क्षीणस्वरः**=दुर्बलशब्दः, **अपुनरागमाय**=मरणाय ॥२७॥

आमकार्य्यं—**यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः ।**
**दोषेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च ॥ २८ ॥**

अजीर्णजन्यस्यामस्य कार्यमाह—**यत्रस्थमित्यादि** । आमं यत्रस्थं भवति-तमेव देशं विशेषेण **रुजेत्**=पीडयेत् । येन=दोषेण, **अवततं**=व्याप्तं, **तल्लक्षणैः**=तल्लिङ्गैर्दाहरागादिभिः ॥ २८ ॥

अजीर्णमुक्त- **उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।**
लिङ्गम् **लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ २९ ॥**

जीर्णाहारलक्षणमाह—उद्गारेत्यादि । उद्गारशुद्धिः=अम्लिकादिशून्यता, उत्साहः=कार्यस्फूर्त्तिः, वेगोत्सर्गो=मलमूत्रादीनां सम्यक् प्रवृत्तिः, लघुता-शरीरस्येति ॥ २९ ॥

सामान्याजीर्ण- ग्लानिर्गौरवविष्टम्भभ्रममारुतमूढताः ।
लक्षणम्— विबन्धो वा प्रवृत्तिर्वा सामान्याजीर्णलक्षणम् ॥ ३० ॥

**इति श्रीमाधवकरविरचिते माधवनिदाने षष्ठमग्निमान्द्या-जीर्ण-विषूचिका-ऽलसक-विलम्बिका-निदानं समाप्तम् ॥ ६ ॥**

इत्यग्निमान्द्यादिनिदानम् ॥ ६ ॥

## अथ सप्तमं क्रिमिरोग-निदानम् ॥ ७ ॥

क्रिमिसंख्या— **क्रिमयश्च द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ।
बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥
नामतो विंशतिविधाः,...................... ॥ १ ॥**

प्रायः क्रिमीणामप्यजीर्णजन्यत्वादजीर्णानन्तरं क्रिमिनिदानावसरः ।

क्रिमयो द्विधा प्रोक्ता बाह्याभ्यन्तरभेदात् । बहिर्मलकफासृग्विड्जन्मभेदात् ते पुनश्चतुर्विधाः—बहिर्मलः=स्वेदादयः, कफः=श्लेष्मा, असृग्=रक्तम्, विट्=पुरीषम्, एषु जन्म तद्भेदात् । नामतोऽपि विंशतिविधाः ॥ १ ॥

बाह्यकृमिस्व-.................. **बाह्यास्तत्र मलोद्भवाः ।**
रूपम्— **तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥ २ ॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ।
द्विधा ते कोठपिडिकाकण्डूगण्डान्प्रकुर्वते ॥ ३ ॥**

बाह्यानाह—**तिलप्रमाणसंस्थानवर्णाः**=तिलानामिव प्रमाणं संस्थानमाकारो वर्णश्च श्वेतादिर्येषां ते तथा । **केशाम्बराश्रयाः**=केशः=बालः, अम्बरम्=वस्त्रम्, **बहुपादाः**=नानाचरणाः, **सूक्ष्माः**=अणवः, ते पुनः, यूकालिक्षाभेदेन द्विधा भवन्ति । तत्र सूक्ष्मा यूकाः ( 'ढील, लीख' चीलर इति लोके ) ते कोठादीन् प्रकुर्वते ॥ २-३ ॥

आभ्यन्तरक्रिमीणां हेतुः— **अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता ।
व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते क्रिमींस्तु ॥ ४ ॥**

तेषां निदानमाह—**अजीर्णेत्यादि** । **अजीर्णभोजी**=अजीर्णदशायां भो-

जनशीलः, **मधुराम्लनित्यः**=निरन्तरं मिष्टाम्लभक्षकः। **विरुद्धभोजी**=क्षीर-मत्स्यादिभुक्॥ ४॥

क्रिमिविशेषे नि- **माषपिष्टाम्ललवणगुडशाकैः पुरीषजाः।**
दानविशेषः— **मांसमत्स्यगुडक्षीरदधिशुक्तैः कफोद्भवाः॥**
**विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि॥ ५॥**

कफादिजन्मनां निदानविशेषमाह—**माषे**त्यादिना॥ ५॥

संजातक्रिमि- **ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः।**
रूपं— **भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्॥ ६॥**

आभ्यन्तरक्रिमिलक्षणमाह—**ज्वर** इत्यादि। **विवर्णता**-शरीरस्य, **सदनं**=ग्लानिः, **भक्तद्वेषः**=भोजनानभिलाषः॥ ६॥

आमाशयजाः- **कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः।**
**पृथुब्रध्ननिभाः केचित्केचिद्गण्डूपदोपमाः॥ ७॥**
**रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः॥**
**श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते॥ ८॥**

श्लेष्मजानाह—**कफा**दित्यादि। कफाद् आमाशये जाताः क्रिमयो वृद्धाः सन्तः, **सर्वतः**=उपर्यधोदेशेषु, **सर्पन्ति**=विचरन्ति। एषां मध्ये केचित्, **पृथुब्रध्ननिभाः**=स्थूलचर्मलतिकाऽऽकाराः, केचिद् **गण्डूपदोपमाः**=कञ्चुलिकासदृशाः, **तनुदीर्घास्तथाऽणवः**=तनवः परिणाहेन दीर्घा आयामेन, अणवः परिणाहविस्ताराभ्याम्॥ ७-८॥

तन्नामानि- **अन्त्रादा उदरावेष्टा हृदयादा महागुदाः।**
**चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते॥ ९॥**
तत्कार्य्यम्— **हृल्लासमास्यस्रवणमविपाकमरोचकम्।**
**मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षवथुपीनसान्॥ १०॥**

तेषां नामानि प्रकटयति-**अन्त्रादा** इत्यादिना। ते=क्रिमयः, हृल्लासादिकान् पीनसान्तानुपद्रवान् करोति॥ ९-१०॥

रक्तजाः— **रक्तवाहिसिरास्थानरक्तजा जन्तवोऽणवः।**
**अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः॥ ११॥**
**केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः।**
**षट् ते कुष्ठैककर्माणः सहसौरसमातरः॥ १२॥**

रक्तजानाह-**रक्ते**त्यादि। **रक्तवाहिसिरास्थानरक्तजाः**=रक्तवाहिसिरा-

स्थानाश्च ते रक्तजाश्चेति तथोक्ताः, **जन्तवः**=क्रिमयः, **वृत्तताम्राः**=वृत्ताः=वर्त्तुलाः, ताम्राः=रक्तवर्णाः, अदर्शनाः=चक्षुरिन्द्रियागोचराः, सह सौरसमातृभ्यां वर्त्तन्त इति सहसौरसमातरः, केशादादयः षट् कुष्ठमेवैकं प्रधानं कर्म येषां ते तथोक्ताः, कुष्ठकारका इति यावत् ॥ ११-१२ ॥

पक्वाशयजाः-**पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।**
**प्रवृद्धाः स्युर्भवेयुश्च ते यदाऽऽमाशयोन्मुखाः ॥ १३ ॥**

तल्लक्षणं-**तदाऽस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः ।**
**पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ॥ १४ ॥**

तन्नामानि-**ते पञ्च नाम्ना क्रिमयः ककेरुकमकेरुकाः ।**
**सौसुरादाः सशूलाख्या लेलिहा जनयन्ति हि ॥ १५ ॥**

तत्कार्य—**विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।**
**रोमहर्षाग्निसदनं गुदकण्डूर्विमार्गगाः ॥ १६ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने सप्तमं क्रिमिरोग-निदानं समाप्तम् ॥ ७ ॥**

पुरीषजानाह—**पक्वाशय** इत्यादि । **पुरीषोत्थाः**=विड्जाः, क्रिमयः, **अधोविसर्पिणः**=पायुबहिर्निस्सरणशीलाः, अतिवृद्धाः सन्तः, आमाशयोन्मुखा यदा जायन्ते तदोद्गारनिःश्वासाः, **विड्गन्धानुविधायिनः**=पुरीषगन्धयुक्ताः, भवन्ति । ते ककेरुकादिपञ्चनामधेयानि बिभ्रति, विड्भेदादिगुदकण्ड्वन्तानुपद्रवान् जनयन्ति च ॥ १३-१६ ॥

इति सुधायां क्रिमिरोगनिदानम् ॥ ७ ॥

## अथाष्टमं पाण्डुरोगकामलाकुम्भकामलाहलीमकनिदानम् ॥ ८ ॥

संख्या—**पाण्डुरोगाः स्मृताः पञ्च, वातपित्तकफैस्त्रयः ।**
**चतुर्थः सन्निपातेन, पञ्चमो भक्षणान्मृदः ॥ १ ॥**

पाण्डुरोगस्य पुरीषोत्थक्रिमिजन्यत्वसम्भवात्क्रिमेरनन्तरं पाण्डुरोगावसरः । **पाण्डुरोगा** इत्यादि । पाण्डुत्वेनोपलक्षिता रोगाः । ते पञ्चविधा वातादिभिस्त्रयः, सन्निपातेन चतुर्थः, मृदो भक्षणात्पञ्चमः ॥ १ ॥

पाण्डोर्हेतुः सम्प्राप्तिश्च—

**व्यायाममम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णम् ।**
**निषेवमाणस्य प्रदूष्य रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति ॥ २ ॥**

सम्प्राप्तिमाह—**व्यायाम**मित्यादि । व्यायामादिनिषेवमाणस्य पुंसः, **दोषाः**=वातादयः, रक्तं प्रदूष्य त्वचं पाण्डुरतां, **नयन्ति**=प्रापयन्ति । रक्तमित्युपलक्षणं त्वङ्मांसादीनाम् ॥ २ ॥

पूर्वरूपं— **त्वक्स्फोटनष्ठीवनगात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः ।**
**विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥३॥**

पूर्वरूपमाह—**त्वगि**त्यादि । **त्वक्स्फोटनं**=चर्मविदरणम्, **ष्ठीवनं**=(थुकथुक्कीति लोके), **प्रेक्षणकूटशोथः**=नेत्रगोलकसंरम्भः । **अविपाकः**-आहारस्य, **तस्य**=पाण्डुरोगस्य, **भविष्यतः**-भाविनः, **पुरस्सराणि**=पूर्वरूपाणि ॥३॥

वातपाण्डुः-**त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता ।**
**वातपाण्ड्वामये तोदकम्पानाहभ्रमादयः ॥ ४ ॥**

वातिकलक्षणमाह—**त्वगि**त्यादि । **वातपाण्ड्वामये**=वातिकपाण्डुरोगे, त्वगादीनां रूक्षकृष्णारुणाभताः, तोदादयश्च वेदनाविशेषा भवन्ति । आदिना भेदशूलादीनामपि संग्रहः ॥ ४ ॥

पित्तपाण्डुः-**पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।**
**भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥ ५ ॥**

पैत्तिकलक्षणमाह—**पीते**त्यादि । **पित्तपाण्ड्वामयी**=इतरदोषानाबद्धप्रबलपित्तजन्यपाण्डुरोगपीडितः । **पीतमूत्रशकृन्नेत्रः**=पीतानि मूत्रादीनि यस्य सः, **भिन्नविट्कः**=भिन्नं द्रवं विट्=पुरीषं यस्य स तथा । **अतिपीताभः**=पीतच्छविश्च भवति ॥ ५ ॥

कफपाण्डुः-**कफप्रसेकश्वयथुतन्द्राऽऽलस्यातिगौरवैः ।**
**पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ ६ ॥**

असाध्यपाण्डु-**ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।**
रोगिलक्षणम्-**पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥ ७ ॥**

श्लैष्मिकमाह—**कफे**त्यादि । कफाज्जातः पाण्डुरोगी शुक्लैस्त्वङ्मूत्रनयनाननैरुपलक्षितः, **नयनं**=नेत्रम् । **आननं**=मुखम्, 'ज्वरादिभिरन्वितश्च भवति । त्रिभिर्दोषैरन्वितो यदा जायते तदा, **क्षीणः**=कृशः, **हतेन्द्रियः**=विगतकरणप्रभावः, भवति, तदा, **त्याज्यः**=असाध्यः ॥ ६–७ ॥

मृज्जन्यपा- **मृत्तिकाऽदनशीलस्य कुप्यत्यन्यतमो मलः ।**
ण्डुसंप्राप्तिः-**कषाया मारुतं, पित्तमूषरा, मधुरा कफम् ॥ ८ ॥**

**कोपयेन्मृद्रसादींश्च रौक्ष्याद् भुक्तं च रूक्षयेत् ।**
**पूरयत्यविपक्वैव स्रोतांसि निरुणद्धयपि ॥ ९ ॥**
**इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा ।**
**पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ १० ॥**

मृत्तिकोद्भवस्य सम्प्राप्तिमाह—**मृत्तिके**त्यादि । **मृत्तिकाऽदनशीलस्य**=मृद्भक्षणस्वभावस्य, नरस्य, अन्यतमो **मलः**=वातादिः, **कुप्यति**=कोपं याति । **मृत्तिकाविशेषो** हि दोषविशेषं कोपयति तथाहि-**कषाया मृत् मारुत**मित्यादि । जठराग्निर्मृदं न पचति तस्मादविपक्वैव सा मृत् स्रोतांसि निरुणद्धि पूरयति च । **स्रोतांसि**=रसवहादीनि । **वीर्यौजसी**=वीर्यं=शक्तिः, ओजः=निखिल-धातुसारभूतम् , **आशु**=शीघ्रम्, **हत्वा**=विनाश्य, बलवर्णाग्निनाशनं पाण्डु-रोगं करोति ॥ ८–१० ॥

मृज्जपाण्डु- **शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।**
लक्षणम्—**क्रिमिकोष्ठोऽतिसार्येत मलं सासृक्कफान्वितम् ॥ ११ ॥**

मृत्तिकोद्भवस्य लक्षणमाह—शूनेत्यादि । **शूनं**=शोथयुक्तम्, अक्षिकूट-गण्डभ्रु यस्यासौ शूनाक्षिकूटगण्डभ्रूः, **शूनपान्नाभिमेहनः**=मेहनं=शिश्नम् । **सासृक्**=रक्तयुक्तं, कफान्वितं च मलमतिसार्येतेति ॥ ११ ॥

असाध्यपाण्डुरोगलक्षणम्—

**पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिद्ध्यति ।**
**कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥ १२ ॥**
अन्यच्च—**बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते ।**
**दीनः श्वेतातिदिग्धाङ्गश्छर्दिमूर्च्छातृडर्दितः ॥ १३ ॥**
अन्यच्च—**स नास्त्यसृक्क्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ॥ १४ ॥**

असाध्यलक्षणमाह—**पाण्डुरोग** इत्यादि । **चिरोत्पन्नः**=प्राचीनः, **काल-प्रकर्षात्**=समयाधिक्यात्, **खरीभूतः**=परिपक्वो न सिध्यति । अचिरोत्पन्नोऽपि **शूनानां**=शोथिनां, **पीतानि**=पीतवर्णानि पश्यति । एतच्चाप्यपरमसाध्यलक्षणम् । **बद्धाल्पविट्**=बद्धमल्पं च विड्, विट्शब्दोऽत्र नपुंसके । **दीनः**=म्लानशरीरः, **श्वेतातिदिग्धाङ्गः**=श्वेतेनातिदिग्धं=लिप्तम् अङ्गं यस्यासौ श्वेतातिदिग्धाङ्गः । सः=पाण्डुरोगी, **नास्ति**=न जीवति, **असृक्क्षयात्**=रक्तक्षयात् , **श्वेत-त्वं**=धवलताम् , आप्नुयात् , यः सोऽपि नास्ति ॥ १२–१४ ॥

अन्यच्च—**पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत्।**

**पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥ १५ ॥**

अन्यच्च—**अन्तेषु शूनं परिहीणमध्यं म्लानं तथाऽन्तेषु च मध्यशूनम्।**

**गुदे च शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पम्।**

**विवर्जयेत्पाण्डुकिनं यशोऽर्थी तथाऽतिसारज्वरपीडितं च॥१६॥**

**अन्तेषु**=हस्तपादादिषु **शूनं**=शोथयुक्तं, **परिहीणमध्यं**=दुर्बलमध्यशरीरम्, **असंज्ञकल्पं**=मृतप्रायं, **पाण्डुकिनं**=पाण्डुरोगिणम्, **यशोऽर्थी**=कीर्त्तिकामः, वैद्यः, **त्यजेत्**=विवर्जयेत्। असाध्यत्वादिति भावः ॥ १६ ॥

कामलाल- **पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।**

क्षणम्— **तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥ १७ ॥**

**हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः।**

**रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥ १८ ॥**

**दाहाविपाकदौर्बल्यसदनारुचिकर्षितः।**

**कामला बहुपित्तैषा कोष्ठशाखाऽऽश्रया मता ॥ १९ ॥**

कुम्भकामला-**कालान्तरात् खरीभूता कृच्छ्रा स्यात्कुम्भकामला ॥ २० ॥**

पाण्डुरोगस्यैवावस्थाविशेषः कामलारोगस्तमाह—यः पाण्डुरोगी, **पित्तलानि**=पित्तवर्धकानि, द्रव्याणि, निषेवते तस्य पित्तं ( कर्त्तृपदम् ) असृङ्मांसं दग्ध्वा रोगाय, **कल्पते**=सम्पद्यते। स कामली, **हारिद्रनेत्रः**=पीतनयनः, **भेकवर्णः**=मण्डूकच्छविः, एषा कामला, **बहुपित्ता**=पित्ताधिका, **कोष्ठशाखाऽऽश्रया**=कोष्ठाश्रया शाखाऽऽश्रया चेति। कालान्तरात्, **खरीभूता**=जठरतां गता एषा, कुम्भकामलेति कथ्यते, सा कृच्छ्रसाध्या भवतीति ॥ १७–२० ॥

असाध्यरूपं-**कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः।**

**स रक्ताक्षिमुखच्छर्दिविण्मूत्रो यश्च ताम्यति ॥ २१ ॥**

**दाहारुचितृडानाहतन्द्रामोहसमन्वितः।**

**नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते ॥ २२ ॥**

तस्या असाध्यलक्षणमाह—कृष्णेत्यादि। **कृष्णपीतशकृन्मूत्रः**=कृष्णं पीतञ्च शकृन्मूत्रञ्च यस्य स तथा। **शूनः**=शोथयुक्तः। **ताम्यति**=मोहं गच्छति। **नष्टाग्निसंज्ञः**=अग्निर्जठराग्निः, संज्ञा=चेतना, अग्निश्च संज्ञा चेत्यग्निसंज्ञे नष्टेऽग्निसंज्ञे यस्य स तथा, **क्षिप्रं**=शीघ्रं, **विपद्यते**=म्रियते ॥ २१–२२ ॥

अन्यच्च—**छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः।**

**नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली ॥ २३ ॥**

कुम्भकामलाया असाध्यलक्षणमाह—**छर्दी**त्यादि । **हृल्लासः**=उपस्थितवमनत्वम्, **विड्भेदी**=पुरीषप्रवृत्तिमान् ॥ २३ ॥

हलीमक- **यदा तु पाण्डोर्वर्णः स्याद्धरितः श्यावपीतकः ।**
लक्षणम्—**बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ॥ २४ ॥**
**स्त्रीष्वहर्षोऽङ्गमर्दश्च दाहस्तृष्णाऽरुचिर्भ्रमः ।**
**हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥ २५ ॥**

पाण्डुरोगस्यैवावस्थिकविशेषो हलीमकस्तमाह-**यदे**त्यादि । यदा **पाण्डोः**=पाण्डुरोगयुक्तस्य, हरितादिवर्णादय उपद्रवा स्युस्तदा वातपित्ताभ्यां हलीमकेति रोगविशेषं जानीयात् । **श्यावः**=नीलवर्णः । **स्त्रीष्वहर्षः**=रमणीरमणेच्छाया-अभावः । **अङ्गमर्दः**=गात्रत्रोटनम् ॥ २४–२५ ॥

इति सुधायामष्टमं पाण्डुरोगादिनिदानं समाप्तम् ॥ ८ ॥

पानकीरोग **(सन्तापो भिन्नवर्चस्त्वं बहिरन्तश्च पीतता ।**
लक्षणम्—**पाण्डुता नेत्रयोर्यस्य पानकीलक्षणं भवेत् ) ॥ २६ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदानेऽष्टमं पाण्डुरोगकामला-कुम्भकामला-हलीमक-निदानं समाप्तम् ॥ ८ ॥**

## अथ नवमं रक्तपित्त-निदानम् ॥ ९ ॥

कारणम्—**घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः ।**
**तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥ १ ॥**
संप्राप्तिः—**पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ।**
**ततः प्रवर्त्तते रक्तमूर्ध्वं चाधो द्विधाऽपि वा ॥ २ ॥**
**ऊर्ध्वं नासाऽक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः ।**
**कुपितं रोमकूपैश्च समस्तैस्तत्प्रवर्त्तते ॥ ३ ॥**

पाण्डुरोगवद्रक्तपित्तस्यापि पित्तजन्यत्वेन पाण्डुरोगानन्तरं रक्तपित्तमाह—**घर्मेति** । घर्मः=सूर्यसन्तापः–**व्यवायः**=मैथुनम्, **तीक्ष्णं**=मरिचादि, **उष्णम्**=अग्निसेवाऽऽदि, **स्वगुणैः**=निजतीक्ष्णादिगुणैः, **विदग्धं**=प्रकुपितं पित्तं (कर्त्तृ) **शोणितं**=रक्तं, **विदहति**=कोपयति । ततो रक्तमूर्ध्वमधो द्विधाऽपि वा **प्रवर्त्तते**=निःसरति । **ऊर्ध्वं**=नासाऽऽदिभिः, **अधो**=मेढ्रादिभिः, 'मेढ्रं=लिङ्गम्' । अति-

प्रकुपितं समस्तैः रोमकूपैर्वा प्रवर्त्तते ॥ २-३ ॥

पूर्वरूपं—**सदनं शीतकामित्वं कण्ठधूमायनं वमिः ।**
**लोहगन्धिश्च निःश्वासो भवत्यस्मिन् भविष्यति ॥ ४ ॥**

पूर्वरूपमाह-**सदन**मित्यादि । **अस्मिन्**=रक्तपित्ते, **भविष्यति**=उत्पद्यमाने सति, **कण्ठधूमायनम्**=कण्ठमार्गेण धूमनिःसरणमिव प्रत्ययः ॥ ४ ॥

श्लैष्मिकं—**सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफान्वितम् ॥ ५ ॥**

वातिकं—**श्यावारुणं सफेनं च तनु रूक्षं च वातिकम् ॥ ६ ॥**

पैत्तिकं—**रक्तपित्तं कषायाभं कृष्णं गोमूत्रसंनिभम् ।**
**मेचकागारधूमाभमञ्जनाभं च पैत्तिकम् ॥ ७ ॥**

पैत्तिकमाह—**रक्तपित्त**मित्यादि । **कषायाभं**=क्काथवर्णम्, **मेचकागारधूमाभं**=मेचकाभम्-आगारधूमाभं च, आगारं=गृहम्। **अञ्जनाभं**=सौवीराञ्जनसदृशम् ॥ ७ ॥

द्वन्द्वत्रिदोषजं-**संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सांनिपातिकम् ॥ ८ ॥**

मार्गभेदेन रक्तपित्तभेदद्वयम्—

**ऊर्ध्वगं कफसंसृष्टमधोगं पवनानुगम् ।**
**द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्त्तते ॥ ९ ॥**

साध्यासाध्यम्—

**ऊर्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।**
**एकमार्गं बलवतो नातिवेगं नवोत्थितम् ।**
**रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ।**
**एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।**
**यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् ।**
**व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥ १० ॥**

दोषभेदेन साध्यत्वादिकमाह—**एके**ति । **एकदोषानुगं**=दोषैकसम्बद्धम्, साध्यं द्विदोषानुगतं याप्यं त्रिदोषमसाध्यमिति, **क्षीणदेहस्य**=कृशतनोः, **अनश्नतः**=अरुच्यादिनाऽन्नमभुञ्जानस्य ॥ १० ॥

रक्तपित्तोपद्रवाः—

**दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा-**
**भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा ।**

**तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं,**
**भक्तद्वेषाविपाकौ विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥ ११ ॥**

उपद्रवानाह—**दौर्बल्यमि**त्यादि । **दौर्बल्यं**=शक्त्यभावः, **वमथुः**=वमिः, **घोरो विदाहः**=अतीव विदाहपाकः, **हृदि**=हृदये, **अतुल्या**=असदृशी, पीडा । **तपनं**=सन्तापः, **पूति**=दुर्गन्धम्, **विकृति**राहारस्य, **उपसर्गाः**=उपद्रवाः, रक्तपित्तस्योपसर्गा रक्तपित्तोपसर्गाः ॥ ११ ॥

रक्तपित्तस्यासाध्यलक्षणानि—

**मांसप्रक्षालनाभं कुथितमिव च यत् कर्दमाम्भोनिभं वा,**
**मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् ।**
**यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारा-**
**स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥१२॥**
**येन चोपहतो रक्तं रक्तपित्तेन मानवः ।**
**पश्येद् दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥ १३ ॥**
**लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्षणः ।**
**लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः ॥ १४ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने नवमं**
**रक्तपित्तनिदानं समाप्तम् ॥ ९ ॥**

असाध्यलक्षणमाह—**मांसेति** । **मांसप्रक्षालनाभं**=मांसधावनतोयसदृशम्, **कुथितमिव**=दुर्गन्धतां गतमिव, **कर्दमाम्भोनिभं वा**—कर्दमः पङ्कस्तन्निभं तत्सदृशम् अम्भोनिभं जलनिभं वा, **मेदःपूयास्रकल्पं**=मेदःकल्पं—पूयकल्पमस्रकल्पमित्यर्थः । **नीलं**=चाषपक्षवर्णम् । **कुणपं**=शवगन्धयुक्तम् । **सुरपतिधनुषा**=देवेन्द्रधन्वना तुल्यं कर्बुरत्वादिति भावः । **येन**=रक्तपित्तेन, **उपहतः**=पीडितः, **दृश्यं**=घटपटादिकं, **वियद्**=आकाशं वा रक्तं पश्येत् । **लोहितेक्षणः**=रक्तनेत्रः, सः । **रक्तपैत्तिकः**=रक्तपित्तरोगी, **म्रियते**=पञ्चत्वं याति ॥ १२–१४ ॥

॥ इति सुधायां नवमं रक्तपित्तनिदानम् ॥ ९ ॥

## अथ दशमं राजयक्ष्मो-रःक्षत-निदानम् ॥ १० ॥

कारणं—**वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।**
**त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥ १ ॥**

राजयक्ष्मणि रक्तदर्शनसम्भवाद्रक्तपित्तानन्तरं राजयक्ष्मप्रसङ्गः। **वेगरोधाद्**=वेगानां वातमूत्रपुरीषाणां रोधाद्=निग्रहात्, **क्षयात्**=क्षीयतेऽनेनेति क्षय-इति व्युत्पत्तेर्धातुक्षयकारणानि गृह्यन्ते। **त्रिदोषः**=दोषत्रयदुष्ट एक एव न तु हेतुभेदादनेकविधः। यदाह—**एक एव मतः शोषः सन्निपातात्मको यतः। उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि।** ननु वेगरोधादीनां वातप्रकोपकत्वेन त्रिदोषजस्य राजयक्ष्मणः कारणत्वं कथं सम्भवतीति चेदत्रोच्यते। वातप्रकोपाद् वह्निदुष्ट्या श्लेष्मपित्तयोरपि दुष्टिसम्भवात्॥ १॥

सम्प्राप्तिः—**कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु।**
**अतिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तराः।**
**क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः॥ २॥**

सम्प्राप्तिमाह—**कफे**त्यादि। कफप्रधानैः, दोषैः, **रसवर्त्मसु**=रसवाहिनीषु धमनीषु, रुद्धेषु, **अतिव्यवायिनः**=मैथुनमतिभजतः, पुंसः, **रेतसि**=वीर्ये क्षीणे सति, **अनन्तराः**=समीपगाः, धातवः क्षीयन्ते, शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयत इत्यादि, ततो मानवः, **शुष्यति**=कृशत्वं याति॥२॥

पूर्वरूपं—**श्वासाङ्गमर्दकफसंस्रवतालुशोष—**
**वम्यग्निसादमदपीनसकासनिद्राः।**
**शोषे भविष्यति भवन्ति, स चापि जन्तुः**
**शुक्लेक्षणो भवति मांसपरो रिरंसुः॥ ३॥**
**स्वप्नेषु काकशुकशल्लकिनीलकण्ठा गृध्रास्तथैव कपयः कृकलासकाश्च।**
**तं वाहयन्ति स नदीर्विजलाश्च पश्येच्छुष्कांस्तरून्पवनधूमदवार्दितांश्च॥४॥**

पूर्वरूपमाह—**श्वासेति**। **भविष्यति**=उत्पत्स्यमाने, **शोषे**=राजयक्ष्मणि, एतानि भवन्ति। **कफसंस्रवः**=श्लेष्मष्ठीवनम्, **अग्निसादः**=वह्निमान्द्यम्, **पीनसः**=प्रतिश्यायः, **शुक्लेक्षणः**=शुभ्रनेत्रः, **मांसपरः**=पिशिताधिकभोजनेच्छुः, **रिरंसुः**=रन्तुमिच्छति रिरंसति, रिरंसतीति रिरंसुः=रमणीरमणेच्छुः, **'सनाशंसभिक्ष उः'** इत्युप्रत्ययः। **नीलकण्ठः**=मयूरः, **कपयः**=वानराः, **कृकलासकाः**=सरटाः, **विजला नदीः**=निर्जलापगाः, **दवः**=वनाग्निः, **अर्दितान्**=अभिभूतान्, चकारात् तृणकेशपातादीनामपि संग्रहः॥ ३–४॥

क्षयस्य त्री-**अंसपार्श्वाभितापश्च सन्तापः करपादयोः।**
णि रूपाणि-**ज्वरः सर्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः॥ ६॥**

त्रिरूपसम्पन्नमाह—**अंसेति** । **अभितापः**=पीडा, **सन्तापः**=दाहः, करपादयोरिति मध्यमपदलोपी समासः ॥ ५ ॥

क्षयस्य चरकोक्तानि षड्रूपाणि—

**(कासो ज्वरः पार्श्वशूलं स्वरवर्चोग्रहोऽरुचिः ।**
**षडिमान्यपि जानीयाल्लक्षणानि च यक्ष्मणः ॥ ६ ॥**

सुश्रुतोक्ता- **भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम् ।**
नि तान्येव-**स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि) ॥ ७ ॥**

एकादशरू- **स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।**
पाणि— **ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥ ८ ॥**
**शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।**
**कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥ ९ ॥**

एकादशरूपमाह—**अनिलात्**=वातात्, स्वरभेदादयो जायन्ते । पित्ताद्रक्तस्य, **आगमः**=आविर्भावः, कफकोपतः **शिरसः परिपूर्णत्वं**=मूर्ध्नो गुरुत्वम्, **अभक्तच्छन्दः**=भोजनेऽरुचिः, कासः कण्ठस्योद्ध्वंसश्चेति ॥ ८–९ ॥

असाध्याव- **एकादशभिरेभिर्वा षड्भिर्वाऽपि समन्वितम् ।**
स्था— **कासातीसारपार्श्वार्त्तिस्वरभेदारुचिज्वरैः ॥ १० ॥**
**त्रिभिर्वा पीडितं लिङ्गैः कासश्वासासृगामयैः ।**
**जह्याच्छोषार्दितं जन्तुमिच्छन् सुविमलं यशः ॥ ११ ॥**

वर्ज्यचिकित्स्य- **सर्वार्द्धैस्त्रिभिर्वाऽपि लिङ्गैर्मांसबलक्षये ।**
योर्लक्षणम्-**युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्यतोऽन्यथा ॥१२॥**

असाध्य- **महाशनं क्षीयमाणमतीसारनिपीडितम् ।**
लक्षणम्—**शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत् ॥ १३ ॥**
पुनः—**शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितम् ।**
**कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवम् ॥ १४ ॥**

असाध्यलक्षणमाह—**एकादशभिरि**त्यादि । **सुविमलं**=सुप्रशस्तं, यश इच्छन् वैद्य एभिरेकादशभिर्षड्भिर्वा लक्षणैः, समन्वितं कासश्वासासृगामयैर्वा पीडितं शोषार्दितं, राजयक्ष्मिणं, **जह्यात्**=त्यजेत् । बलमांसक्षये सर्वैरर्धैस्त्रिभिर्वा रूपैर्युक्तं वर्जयेत्, अतः, **अन्यथा**=बलमांसादिक्षयं विना, सर्वरूपोऽपि चिकित्स्यः । अपरमप्यसाध्यमाह—**महाशनम्**=अधिकभोजिनम्, **अतीसारनिपीडितं**=पुरीषातिप्रवृत्तिमन्तं, **शूनं**=शोथयुक्तं, **मुष्कं**=वृषणम्, उदरञ्च यस्य तम् ।

मुष्कशोथस्य विरेकसाध्यत्वेन विरुद्धोपक्रमत्वात् शुक्लाक्षमित्यादिलक्षणान्वितं, **बहुमेहन्तं** = बहुमूत्रयन्तं, यक्ष्मा, **हन्ति** = मारयति ॥ १०-१४ ॥

साध्य- **ज्वरानुबन्धरहितं बलवन्तं क्रियासहम्।**
लक्षणम्— **उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ॥ १५ ॥**

साध्यलक्षणमाह—**ज्वरे**त्यादि। **उपक्रमेत्** = चिकित्सेत्, **आत्मवन्तं** = जितेन्द्रियम्, **अकृशम्** = अदुर्बलगात्रम् ॥ १५ ॥

शोषे हेतु **व्यवाय-शोक-वार्धक्य-व्यायामाध्व-प्रशोषितान्।**
भेदाः— **व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥ १६ ॥**

मैथुनशोषी—**व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः।**
**पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः ॥ १७ ॥**

व्यवायशोषिणो लक्षणमाह—**व्यवायेति**। **व्यवायो**=मैथुनम्, **शुक्रस्य-क्षयलिङ्गैः** = शुक्रक्षयेऽशक्तिर्मैथुने मेढ्रवृषणवेदनेत्यादिसुश्रुतोक्तैर्लक्षणैः, **उपद्रुतः**=पीडितः। यथापूर्वं शुक्रक्षये मज्जा, मज्जनि क्षीणेऽस्थि क्षयमेतीत्यादि ॥१७॥

शोकशोषी—**प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ॥ १८ ॥**

वार्द्धक्यशोषी-**जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः।**
**कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥ १९ ॥**
**ष्ठीवति श्लेष्मणा हीनं गौरवारतिपीडितः।**
**सम्प्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥ २० ॥**

वार्धक्यशोषिणो लक्षणमाह—**जरे**त्यादि। मन्दानि वीर्यादीनि यस्य स मन्दवीर्यबुद्धिबलेन्द्रियः। मन्दशब्दः प्रत्येकमन्वेति। **कम्पनः** = वेपनयुक्तः। शुष्करूक्षे मलच्छवी यस्य स तथा शुष्करूक्षमलच्छविः, शुष्करूक्षयोर्यथासंख्येनान्वयः ॥ १९-२० ॥

अध्वशोषी—**अध्वशोषी च स्रस्ताङ्गः संभृष्टपरुषच्छविः।**
**प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥ २१ ॥**

अध्वशोषिणो लिङ्गमाह—**अध्वेति**। **अध्वशोषी**=मार्गशोषी, **सम्भृष्टस्येव** = भर्जितस्येव परुषा **छविः** = कान्तिर्यस्य स तथा, **क्लोम**=पिपासास्थानम्, शुष्कं क्लोमगलाननं यस्य स तथा ॥ २१ ॥

व्यायामशोषी-**व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः।**
**लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥ २२ ॥**

व्यायामशोषिणो लिङ्गमाह—**व्यायामेति** । **एभिः**=अध्वशोषिलिङ्गैः, **क्षतं विना**=क्षतकार्यं विना, (उरसि क्षते रक्तं पूयः श्लेष्मा च गच्छति) ॥२२॥

व्रणशोषी—**रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।**

**व्रणितस्य भवेच्छोषः स चासाध्यतमो मतः ॥ २३ ॥**

व्रणशोषिणो लक्षणमाह—**रक्तेत्यादि** । **व्रणितस्य**=सञ्जातव्रणस्य, **वेदनाभिः**=व्रणपीडाभिः, **आहारयन्त्रणात्**=अल्पाहारकरणात्, असाध्यतमः स्वार्थिकस्तमप् ॥ २३ ॥

उरःक्षतस्य हेतवो लक्षणानि च—

**धनुषाऽऽयस्यतोऽत्यर्थं भारमुद्वहतो गुरुम् ।**
**युद्ध्यमानस्य बलिभिः पततो विषमोच्चतः ॥ २४ ॥**
**वृषं हयं वा धावन्तं दम्यं वाऽन्यं निगृह्णतः ।**
**शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान् ॥ २५ ॥**
**अधीयानस्य वाऽत्युच्चैर्दूरं वा व्रजतो द्रुतम् ।**
**महानदीर्वा तरतो हयैर्वा सह धावतः ॥ २६ ॥**
**सहसोत्पततो दूरं तूर्णं वाऽपि प्रनृत्यतः ।**
**तथाऽन्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य वा ॥ २७ ॥**
**विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते ।**
**स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ॥ २८ ॥**
**उरो विभज्यतेऽत्यर्थं भिद्यतेऽथ विरुज्यते ।**
**प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते ॥ २९ ॥**
**क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ।**
**ज्वरो व्यथा मनोदैन्यं विड्भेदाग्निवधावपि ॥ ३० ॥**
**दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः ।**
**कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्तते ॥**
**स क्षती क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ॥ ३१ ॥**

सनिदानमुरःक्षतमाह—**धनुषेत्यादि** । **आयस्यतः**=परिश्रमं कुर्वतः, **गुरु**=दुर्भरं, भारम्, उद्वहतः, **बलिभिः**=स्वोत्कृष्टपराक्रमैः, **युध्यमानस्य**=विगृह्णतः, **हयम्**=अश्वम्, अन्यं वा **दम्यं**=दमनीयं, **निगृह्णतः**=विधारयतः, **अत्युच्चैः** स्वरैः, **अधीयानस्य**=पठतः, **तूर्णं**=शीघ्रं, **प्रनृत्यतः**=नृत्यातिशयं कुर्वतः, तथाऽन्यैः, **क्रूरैः**=कठोरैः, कर्मभिः, **भृशम्**=अत्यर्थम्,

अभ्याहतस्य पुंसः, **वक्षसि**=हृदये, विक्षते सति बलवान् व्याधिः, **समुदीर्यते**=उत्पद्यते, स्त्रीषु, **अतिप्रसक्तस्य**=अनुरक्तस्य, **रूक्षाल्पप्रमिताशिनः**=रूक्षादिपदार्थभोजिनः, **उरः**=वक्षः, प्रपीड्यते भिद्यते विरुज्यते विभज्यते च, अङ्गं, **वेपते**=कम्पते, **क्रमात्**=क्रमतः, वीर्यादयो हीयन्ते ज्वरादयोऽपि भवन्ति। कासमानस्य, **अभीक्ष्णं**=निरन्तरम्, दुष्टश्यावादिलक्षणान्वितं, **सासृक्**=रक्तयुक्तः, **कफः**=श्लेष्मा, **प्रवर्त्तते**=निःसरति, शुक्रौजसोः क्षयात् स क्षती-**अत्यर्थम्**=अतिशयेन, **क्षीयते**=क्षीणो भवति॥ २४-३१॥

तत्पूर्वरूपम्—**अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतम्॥ ३२॥**

तस्य पूर्वरूपमाह—**अव्यक्तेति**। **तस्य**=राजयक्ष्मणः, अविस्पष्टं लिङ्गं पूर्वरूपमित्यर्थः॥ ३२॥

क्षतक्षीणयोरसाधारणलक्षणम्—

**उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते।**
**क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः॥ ३३॥**

क्षतक्षीणयोर्विशिष्टलिङ्गमाह—क्षते, **उरोरुक्**=हृदयव्यथा, **शोणितच्छर्दिः**=रक्तवमनम्, **वैशेषिकः**=विशिष्टः, कासश्च। क्षीणे-**सरक्तमूत्रत्वं**=मूत्रस्य रक्तवर्णता, पार्श्वयोः पृष्ठे कट्यां च **ग्रहः**=पीडा॥ ३३॥

तत्साध्यासाध्ये—

**अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।**
**परिसंवत्सरो याप्यः सर्वलिङ्गन्तु वर्जयेत्॥ ३४॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने दशमं राजयक्ष्मोरःक्षत-निदानं समाप्तम्॥ १०॥**

तयोः साध्यासाध्यलक्षणमाह—**अल्पेत्यादि**। **अल्पलिङ्गस्य**=स्वल्पलक्षणान्वितस्य, **दीप्ताग्नेः**=संदीप्तजठरानलस्य, **बलवतः**=बलिष्ठस्य जनस्य, **नवः**=स्वल्पकालोत्थः, **साध्यः**=चिकित्स्यः, **परिसंवत्सरः**=अनतिक्रान्तवर्षः, याप्यः, सर्वलिङ्गं तु **वर्जयेत्**=प्रत्याख्यायात्॥ ३४॥

इति राजयक्ष्मक्षोरःक्षतनिदानम्॥ १०॥

## अथैकादशं कास-निदानम्॥ ११॥

कासहेतुः-**धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च।**
**विमार्गगत्वाच्च हि भोजनस्य वेगावरोधात् क्षवथोस्तथैव**

सम्प्राप्तिः—**प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः।**
**निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः॥ २॥**

क्षये कासोपलम्भात्क्षयानन्तरं कासनिदानावसरस्तत आह—**धूमेति**। धूमेनोपघातस्तस्माद्—**धूमोपघाताद्**=मुखनासारन्ध्रप्रविष्टधूमसंघर्षात्, रजसः= धूलेः, 'रसत' इति पाठे तु—अनिलोर्ध्वप्रेरितादामरसादित्यर्थः। **भोजनस्य**= भुक्तान्नस्य, **विमार्गगत्वात्**=स्थानान्तराश्रयणात्, शीघ्रभोजनकरणहेतोः। **वेगावरोधात्**=मलमूत्रक्षवथूनां वेगविधारणात्, **उदानानुगतः**=कण्ठस्थवायु-सहचरितः, सदोषः, **प्राणः**=हृदयदेशवर्ती, पवनः, **वक्त्रात्**=मुखात्, सहसा, **निरेति**=निर्गच्छति, सः, **मनीषिभिः**=विपश्चिद्भिः, कास इति, **प्रदिष्टः**= स्मृतः, कसति शिरः कण्ठादूर्ध्वं गच्छति वायुः स कासः, कसनात् कासः, कासनं वा कास इति व्युत्पत्तेः॥ १-२॥

संख्या—**पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः।**
**क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम्॥ ३॥**

संख्यामाह—**पञ्चेति**। वातादिभिः पञ्च कासाः स्मृताः, उपेक्षिताः सन्तो-बलिनश्चोत्तरोत्तरं भवन्ति, **क्षयाय च**=धातुक्षयाय च, जायन्ते। अत्र संख्येयनिर्दे-शादेव पञ्चत्वे लब्धे पञ्चेति पुनः कथनाज्जराकासस्य दोषजेष्वेवान्तर्भाविनाधि-क्यनिरासः॥ ३॥

पूर्वरूपं—**पूर्वरूपं भवेत्तेषां शूकपूर्णगलास्यता।**
**कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते॥ ४॥**

पूर्वरूपमाह—**पूर्वरूप**मित्यादि। **तेषां**=कासानां, **पूर्वरूपं भवेत्**=प्राग्रूपं भवेत्, **शूकपूर्णगलास्यता**=शूकपूर्णसदृशकण्ठत्वं, कण्ठे, **कण्डूः**=खर्जूः, तथा **भोज्यानां**=भक्षणीयानाम्, **अवरोधः**=अरोचकश्च, जायत इति॥४॥

वातकासः—

**हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः।**
**प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव॥ ५॥**

वातिकमाह—**हृदि**त्यादि। **समीरणेन**=वायुना, **क्षामाननः**=शुष्क-मुखः, **प्रसक्तवेगः**=सततकासवेगपीडितः, **शुष्कं**=श्लेष्मादिनिष्ठीवनवर्जितं, कासति॥ ५॥

पित्तकासः—

**उरोहविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषाऽऽर्त्तः।**
**पित्तेन पीतानि वमेत्कटूनि कासेत्सपाण्डुः परिदह्यमानः॥ ६॥**

**( विदाहि द्रव्यमुद्गारमम्लं कुर्यात्तथा तृषाम् ।**
**हृदि दाहञ्च जनयेत् पाकं गच्छति तच्चिरात् ॥ )**

आभिमुख्येन स्यन्दितुं शीलं यस्य तत्तदभिष्यन्दि ।

**( पैच्छिल्याद् गौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः ।**
**धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि ॥ )**

विष्टभ्य पाकं गच्छति यत्तद् **विष्टम्भि**, यथा–चणकादि । **व्यायामकर्म**=धनुराकर्षणादिव्यापारः, **अपतर्पणम्**=उपवासः, एतैः कारणैः, हिक्का श्वासश्च कासश्च समुपजायत—इति । नन्वेषां हिक्काऽऽदीनां समानहेतुचिकित्सितत्वेन कासस्य प्रकरणान्तरे लेखोऽसङ्गत इति चेन्न दोषभेदेन कासस्य भेदात् । कासाः पृथक् त्रयः । हिक्काश्वासौ तु श्लेष्मानिलात्मकावेवेति भेदः ॥ १–२ ॥

हिक्कासम्प्राप्तिः—

**मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् ।**
**स घोषवानाशु हिनस्त्यसून् यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥३॥**

हिक्कानां निर्वचनं स्वरूपञ्च निर्दिशति—**मुहुर्मुहु**रिति । **वायुः**=उदानानुगतः प्राणः, **सस्वनः**=सशब्दः, यकृत्प्लिहान्त्राणि, **मुखात्**=मुखमानीय ( ल्यब्लोपे पञ्चमीति ), **घोषवान्**=शब्दयुक्तः, सः, पवनः, यतः, **आशु**=शीघ्रम् , **असून्**=प्राणान् , हिनस्ति ततो हिक्केति, बुधैः, **अभिधीयते**=कथ्यते । ( पृषोदरादित्वात्साधुः ) हिगिति कृत्वा कायति शब्दायति इति वा हिक्कानिरुक्तिः ॥ ३ ॥

हिक्का संख्या— **अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा**
**वायुः कफेनानुगतः पञ्च हिक्काः करोति हि ॥ ४ ॥**

हिक्का-पूर्वरूपं— **कण्ठोरसोर्गुरुत्वं च वदनस्य कषायता ।**
**हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च ॥ ५ ॥**

अन्नजा— **पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः ।**
**हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ॥ ६ ॥**

यमला— **चिरेण यमलैर्वेगैर्या हिक्का सम्प्रवर्तते ।**
**कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्दिशेत् ॥ ७ ॥**

क्षुद्रिका— **प्रकृष्टकालैर्या वेगैर्मन्दैः समभिवर्तते ।**
**क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधाविता ॥ ८ ॥**

गम्भीरा— नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता॥ ९॥
महाहिक्का–मर्माण्युत्पीडयन्तीव सततं या प्रवर्त्तते।
महाहिक्केति सा ज्ञेया सर्वगात्रविकम्पिनी॥ १०॥

असाध्यरूपं—

आयम्यते हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं नाम्यते यस्य नित्यम्।
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ ११
अन्यच्च— अतिसंचितदोषस्य भक्तच्छेदकृशस्य च।
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः॥
आसां या सा समुत्पन्ना हिक्का हन्त्याशु जीवितम्॥१२॥

हिक्काया असाध्यलक्षणमाह—आयम्यत इत्यादिना। हिक्कतो=हिक्का-रोगाक्रान्तस्य, यस्य=नरस्य, देहः, आयम्यते=विस्तार्यते इव, दृष्टिश्चोर्ध्वं, नाम्यते=प्राप्यते, अन्ये तु नाम्यते=आकुञ्च्यते, देह इति सम्बन्ध इति वदन्ति। क्षौति=छिक्कति, तौ द्वौ वर्जयेत्, अन्त्यौ च द्वौ गम्भीरामहतीभ्यामभ्यर्दितौ वर्जयेत्, भक्तच्छेदकृशस्य=भोजनत्यागदुर्बलस्य॥ ११-१२॥

अन्यच्च— यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता॥ १३॥
अक्षीणश्चाप्यदीनश्च स्थिरधात्विन्द्रियश्च यः।
तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा॥१४॥
श्वासरोग- (यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते।
निदानम्—तैरेव कारणैः श्वासो घोरो भवति देहिनाम्)॥ १५॥

यमिकाया असाध्यत्वमाह—यमिकेति। प्रलापार्तिमोहादिसमन्विता हन्ति। यः, क्षीणो=बलवान्, अदीनश्च=प्रसन्नमनाः, स्थिराणि धात्वादीनि यस्य स तथाभूतोऽपि च यस्तस्य साधयितुं शक्याऽन्यथा हन्ति॥ १३-१५॥

श्वाससंख्या–महोर्ध्वच्छिन्नतमकक्षुद्रभेदस्तु पञ्चधा।
भिद्यते स महाव्याधिः श्वास एको विशेषतः॥ १६॥

श्वासानाह—महोर्ध्वेति। एकः स महाव्याधिः श्वासः श्वसनत्वसाधर्म्यादेक एव हेतुलिङ्गभेदेन पञ्चधा भिद्यते। महेति। १–महाश्वासः २–ऊर्ध्वश्वासः, ३–छिन्नश्वासः, ४–तमकश्वासः, ५–क्षुद्रश्वास इति॥ १६॥

तत्र दोषोल्बणता—

(वाताधिको भवेत् क्षुद्रस्तमकस्तु कफोद्भवः।

**कफवाताधिकश्चैव संसृष्टश्छिन्नसंज्ञकः ।**
**श्वासो मारुतसंसृष्टो महानूर्ध्वस्ततो मतः ) ॥१७॥**

तत्पूर्वरूपं-**प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च ।**
**आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च ॥ १८ ॥**

तत्सम्प्राप्तिः-**यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः**
**विष्वग् व्रजति संरुद्धस्तदा श्वासान् करोति सः ॥१९॥**

सम्प्राप्तिमाह—**यदे**त्यादि । यदा **कफपूर्वकः** = श्लेष्मपूर्वकः—कफः पूर्वं प्रधानं यस्य स तथेति विग्रहः । **मारुतः** = पवनः, **स्रोतांसि**=प्राणादिवहानि, संरुध्य, **विष्वक्** = सर्वतः, **व्रजति**=गच्छति, तदा श्वासान् करोति ॥ १९ ॥

महाश्वासः-**उद्धूयमानवातो यः शब्दवद् दुःखितो नरः ।**
**उच्चैः श्वसिति संरुद्धो मत्तर्षभ इवानिशम् ॥ २० ॥**
**प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः ।**
**विवृताक्ष्याननो बद्धमूत्रवर्चा विशीर्णवाक् ॥ २१ ॥**
**दीनः प्रश्वसितं चास्य दूराद्विज्ञायते भृशम् ।**
**महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥ २२ ॥**

महाश्वासलक्षणमाह—**उद्धूयमाने**ति । उत् = ऊर्ध्वं, **धूयमानो**=नीयमानो वातो यस्य स तथा । **मत्तर्षभ इव** = प्रमत्तबलीवर्द इव, **अनिशं**= संततं, **प्रनष्टज्ञानविज्ञानः** = ज्ञानञ्च विज्ञानञ्च ज्ञानविज्ञाने प्रनष्टे ज्ञानविज्ञाने यस्य स तथा । **ज्ञानं** = शास्त्रं, **विज्ञानं** = तदर्थावबोधः, **विशीर्णवाक्** = भाषणाक्षमः, **दीनः** = क्लान्तचित्तः, **महाश्वासोपसृष्टः**=महाश्वासरोगाक्रान्तः, **क्षिप्रं** = शीघ्रं, **विपद्यते**=म्रियते ॥ २०–२२ ॥

ऊर्ध्वश्वासः-**ऊर्ध्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः ॥**
**श्लेष्मावृतमुखस्रोतः क्रुद्धगन्धवहार्दितः ॥ २३ ॥**
**ऊर्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः ।**
**प्रमुह्यन्वेदनाऽऽर्तश्च शुष्कास्योऽरतिपीडितः ॥ २४ ॥**

ऊर्ध्वश्वासे निःश्वासागमने हेतुः—

**ऊर्ध्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते ।**
**मुह्यतस्ताम्यतश्चोर्ध्वं श्वासस्तस्यैव हन्त्यसून् ॥ २५ ॥**

ऊर्ध्वश्वासलक्षणमाह—**ऊर्ध्वे**ति । **न च प्रत्याहरत्यधः**=श्वासं नीचैर्मार्गेण न दीर्घकालं करोति । **श्लेष्मावृतमुखस्रोताः**—श्लेष्मणा, आवृतं मुखं

स्रोतांसि च यस्य स तथा । **क्रुद्धगन्धवहार्दितः** = प्रकुपितवातपीडितः, **विभ्रान्ताक्षः** = चलितनेत्रः, **शुष्कास्यो** = धवलमुखः, ताम्यतो = ग्लायतः, मुह्यतश्च, **असून्** = प्राणान् , हन्ति ॥ २३-२५ ॥

छिन्नश्वासः-**यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः ।**

**न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुगर्दितः ॥ २६ ॥**

**आनाहस्वेदमूर्च्छाऽऽर्त्तो दह्यमानेन वस्तिना ।**

**विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः ॥ २७ ॥**

**विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः ।**

**छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून् ॥२८॥**

छिन्नश्वासलक्षणमाह—**यस्त्वि**त्यादि । **सविच्छेदम्** = अवकाशं कृत्वा, **सर्वप्राणेन** = यावद्बलम् , **मर्मच्छेदरुगर्दितः** = हृदयविदारकपीडोपेतः, **विप्लुताक्षः**=सास्रनेत्रः, रक्तैकलोचनत्वं तु व्याधिमाहात्म्यान्न तु दोषसम्पर्कात् , दोषात्तु द्वयोरपि स्यादिति भावः। **विचेताः** = विभ्रान्तचित्तः, **परिशुष्कास्यः**= शुष्कमुखमण्डलः, शेषस्तु सुबोधः ॥ २६-२८ ॥

तमकश्वासः—**प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते ।**

**ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च ॥ २९ ॥**

**करोति पीनसं तेन रुद्धो घुर्घुरकं तथा ।**

**अतीव तीव्रवेगं च श्वासं प्राणप्रपीडकम् ॥ ३० ॥**

**प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते ।**

**प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः ॥ ३१ ॥**

**श्लेष्मण्यमुच्यमाने तु भृशं भवति दुःखितः ।**

**तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखम् ॥ ३२ ॥**

**तथाऽस्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम् ।**

**न चापि लभते निद्रां शयानः श्वासपीडितः ॥ ३३ ॥**

**पार्श्वं तस्यावगृह्णाति शयानस्य समीरणः ।**

**आसीनो लभते सौख्यमुष्णं चैवाभिनन्दति ॥ ३४ ॥**

**उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान् ।**

**विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते ॥ ३५ ॥**

तमकश्वासलक्षणमाह—**प्रतिलोममि**त्यादि । यदा वायुर्ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च प्रतिलोमं ( यथा स्यात्तथा ) स्रोतांसि प्रतिपद्यते

तदा, **तेन**=श्लेष्मणा, **रुद्धः**=आक्रान्तो वायुः, **पीनसं**=प्रतिश्यायं घुर्घुरकं करोति, **प्राणप्रपीडकं**=हृदयविदारकं श्वासं च करोति, तस्यैव च श्लेष्मणः, **विमोक्षान्ते**=विसर्गान्ते, **मुहूर्त्तं**=क्षणमात्रं, सुखं लभते, **समीरणः**=वायुः पार्श्वे ( कर्मपदम् ) **अवगृह्णाति**=अर्दयति । उच्छ्रिते=उच्छूने, अक्षिणी यस्य स तथा **उच्छ्रिताक्षः**, ललाटेन स्विद्यता ( उपलक्षणे तृतीया ) **अवधम्यते**=चाल्यते ॥ २९–३५ ॥

**मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते ।**

**स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः ॥३६॥**

प्रतमकलक्षणम्–**ज्वरमूर्च्छापरीतस्य विद्यात्प्रतमकं तु तम् ॥ ३७ ॥**

तस्यैवान्यो हेतुः **उदावर्त्तरजोऽजीर्णक्लिन्नकायनिरोधजः ।**

लक्षणं च— **तमसा वर्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति ।**

**मज्जतस्तमसीवास्य विद्यात्सन्तमकं तु तम् ॥ ३८ ॥**

प्रतमकमाह—**ज्वरे**ति । ज्वरादिपरीतस्य तं तमकं प्रतमकमिति विद्यात् । उदावर्त्तो रोगः, **रजो**=रेणुः, **अजीर्णम्**=अपक्वता, **क्लिन्नं**=विदग्धं, **काये**=शरीरे, **निरोधो**–वेगानाम् । तमसा वर्धतेऽत्यर्थं शीतैर्द्रव्यैः प्रशाम्यति, **तमसि**=अन्धकारे, मज्जतस्तस्य, **तं**=प्रतमकं, सन्तमकं विद्यात् ॥ ३७–३८ ॥

क्षुद्रश्वासः—**रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन् ।**

**क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥ ३९ ॥**

**हिनस्ति न स गात्राणि न च दुःखो यथेतरे ।**

**न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥ ४० ॥**

**नेन्द्रियाणां व्यथां नापि काञ्चिदापादयेद्रुजम् ।**

**स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः ॥ ४१ ॥**

क्षुद्रश्वासमाह—**रूक्षे**ति । **रूक्षायासोद्भवः**=रूक्षपदार्थभोजनात्परिश्रमाच्चोत्पन्नः, क्षुद्रो वातः कोष्ठे, **उदीरयन्**=ऊर्ध्वं गच्छन्, **अत्यर्थम्**, **अङ्गप्रबाधकः**=शरीरक्लेशको, न भवति । स क्षुद्रो **न दुःखः** ( दुःखयतीति दुःखः ) क्लेशप्रदो न भवति, भोजनपानानाम्, **उचितां**=नैसर्गिकीं, गतिं, **न निरुणद्धि**=नावृणोति ॥ ३९–४१ ॥

साध्यासाध्यता— **क्षुद्रः साध्यो मतस्तेषां तमकः कृच्छ्र उच्यते ।**

**त्रयः श्वासा न सिध्यन्ति, तमको दुर्बलस्य च ॥ ४२ ॥**

श्वासहिक्कयोः कामं प्राणहरा रोगा बहवो न तु ते तथा ।
भयङ्करता— यथा श्वासश्च हिक्का च हरतः प्राणमाशु च ॥ ४३ ॥

**इति श्रीमाधवकरविरचिते माधवनिदाने द्वादशं हिक्का-श्वास-निदानं समाप्तम् ॥ १२ ॥**

श्वासानां साध्यासाध्यत्वमाह—**क्षुद्र** इति । तेषां श्वासानां मध्ये क्षुद्रः साध्यः, तमकश्च कृच्छ्र उच्यते त्रयः श्वासा महोर्ध्वच्छिन्नाः, न सिध्यन्ति । दुर्बलस्य तमकश्च न सिध्यतीति ॥ ४२–४३ ॥

इति सुधायां हिक्काश्वासनिदानम् ।

## अथ त्रयोदशं स्वरभेद-निदानम् ॥ १३ ॥

तस्यहेतुः स- **अत्युच्चभाषणविषाध्ययनाभिघात-**
म्प्राप्तिश्च—**सन्दूषणैः प्रकुपिताः पवनादयस्तु ।**
**स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां-**
**हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ १ ॥**
तत्संख्या—**वातादिभिः पृथक् सर्वैर्मेदसा च क्षयेण च ॥ २ ॥**

श्वासरोगे प्राणादिदुष्टिसम्भवात्स्वरभेदोत्पत्तिरिति श्वासानन्तरं स्वरभेदमाह—**अत्युच्चे**ति । **अत्युच्चभाषणम्** = उच्चैः स्वरेण व्याख्यानं, विषं तु सर्वगात्रप्रकोपणं प्रसिद्धमेव, **अध्ययनम्** = उच्चैः स्वरेण वेदपाठादि, **अभिघातो** = दण्डादिना घातः कण्ठादिदेशे, एतैः कारणैः, **प्रकुपिताः**=वृद्धिं गताः, पवनादयो दोषाः स्वरवहेषु स्रोतःसु चतुर्षु, **प्रतिष्ठां**=वृद्धिं, गताः सन्तः स्वरं हन्युः । स स्वरभेदः षड्विधः पृथग् वातादिभिस्त्रयः । **सर्वैः**=सन्निपातेन चैकः, मेदसा चैकः, क्षयेण चैकः, एवं षड्विधः । वातपित्तकफसन्निपातक्षयमेदोजभेदात् ॥ १–२ ॥

वातजपित्तज- **वातेन कृष्णनयनाननमूत्रवर्चा-**
स्वरभेदलक्षणम्—**भिन्नं शनैर्वदति गर्दभवत् खरं च ।**
**पित्तेन पीतनयनाननमूत्रवर्चा-**
**ब्रूयाद्गलेन स च दाहसमन्वितेन ॥ ३ ॥**
कफजत्रिदोषज—**ब्रूयात्कफेन सततं कफरुद्धकण्ठः-**
स्वरभेदयो- **स्वल्पं शनैर्वदति चापि दिवा विशेषात् ।**

लक्षणम्— **सर्वात्मके भवति सर्वविकारसंपत्**
**तं चाप्यसाध्यमृषयः स्वरभेदमाहुः ॥ ४ ॥**

वातिकमाह—**वातेनेति**। कृष्णानि नयनाननमूत्रवर्चांसि यस्य स तथा, गर्दभवद्, **भिन्नं**=विकृतं, **खरं**=निष्ठुरं, च स्वरं वदति। पैत्तिकमाह-**पित्तेनेति**। पीतानि नयनाननमूत्रवर्चांसि यस्य स तथा। दाहसमन्वितेन गलेन च ब्रूयात्। श्लैष्मिकमाह—**ब्रूयादिति**। कफेन, **सततम्**=अविरतं, कफेन रुद्धः कण्ठो यस्य स तथा। **स्वल्पं**=मन्दं, **शनैः**=विलम्बितं, वदति। **दिवा**=दिने, **विशेषाद्**=आधिक्येन, वदतीति भावः। सान्निपातिकमाह—**सर्वात्मक** इति। **सर्वात्मके**=त्रिदोषजे, **सर्वविकारसम्पत्**=निखिलवातादि स्वरभेदलिङ्गयोगः, तत्रापि स्वरभेदमृषयोऽसाध्यमाहुः॥ ३-४॥

क्षतजमेदोज-**धूप्येत वाक् क्षयकृते क्षयमाप्नुयाच्च**
योर्लक्षणम्-**वागेष चापि हतवाक् परिवर्जनीयः॥**
**अन्तर्गतस्वरमलक्ष्यपदं चिरेण**
**मेदोऽन्वयाद्वदति दिग्धगलस्तृषाऽऽर्त्तः॥ ५॥**

क्षयजमाह—**धूप्येतेति**। **क्षयकृते**=धातुक्षयजायमाने, स्वरभेदे, वाक्=वाणी, **धूप्येत**=सधूमेव निर्गच्छन्ती वेदनयाऽनुभूयते, **एष** स्वरभेदो यदा, **हतवाक्**=वचनाक्षमो, भवति तदा परिवर्जनीयो वैद्यैरिति शेषः। मेदोजमाह—**अन्तर्गतेति**। अन्तर्गतः स्वरो यस्मिंस्तदन्तर्गतस्वरं, क्रियाविशेषणमिदम्। **अलक्ष्यपदम्**=अविस्पष्टाक्षरं, वदति, **दिग्धगलः**=कफेन मेदसा वा लिप्तगलः, तृषाऽऽर्त्तश्च मेदोरुद्धस्रोतस्त्वात्। भवतीति शेषः॥ ५॥

असाध्यः—**क्षीणस्य वृद्धस्य कृशस्य वाऽपि चिरोत्थितो यश्च सहोपजातः।**
**मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति॥६॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने स्वरभेद-निदानं समाप्तम्॥१३॥**

असाध्यत्वमाह—**क्षीणस्येति**। **क्षीणस्य**=गलितमांसस्य, **वृद्धस्य**=गतवयसः, **कृशस्य**=दुर्बलस्य, **चिरोत्थितः**=बहुकालीनः, **सहोपजातः**=जन्मनैवोत्पन्नः, **मेदस्विनः**=अतिस्थूलस्य, **सर्वसमुद्भवश्च**=त्रिदोषजश्च, यः स्वरामयः सः, **न सिद्धिमेति**=न प्रशाम्यति॥ ६॥

इति सुधायां स्वरभेदनिदानम्॥

## अथ चतुर्दशमरोचक-निदानम् ॥ १४ ॥

हेतुः—**वातादिभिः शोकभयातिलोभक्रोधर्मनोघ्नाशनरूपगन्धैः ।
अरोचकाः स्युः ..................॥ १ ॥**

अरोचकमाह—**वातादिभि**रिति । वातादिभिर्दोषैः–तथा शोकादिक्रोधान्तैर्हेतुभिः, **मनोघ्नाः**=अप्रियाः, अशनरूपगन्धास्तैर्वा अरोचकाः स्युः ॥ १ ॥

वातपित्तकफजा मुखरसाः—

**...............परिहृष्टदन्तः-कषायवक्त्रश्च मतोऽनिलेन ।
कट्वम्लमुष्णं विरसं च पूति पित्तेन विद्याल्लवणं च वक्त्रम् ।
माधुर्यपैच्छिल्यगुरुत्वशैत्यविबद्धसंबद्धयुतं कफेन ॥ २ ॥**

वातादिपृथग्लक्षणान्याह—**परिहृष्टे**त्यादिना । **अनिलेन**=वातिकारोचकेन, **परिहृष्टदन्तः**—अम्लभक्षणेनेव, कषायवक्त्रश्च भवति । पित्तेन कट्वम्लमुष्णं, **विरसं**=गतस्वादं, **पूति**=दुर्गन्धं, च विद्यात् । कफेन, **वक्त्रम्**=आननं, लवणं विदग्धकफस्य लवणरसत्वात् । **विबद्धसम्बद्धयुतं**=विबद्धं च तत्सम्बद्धयुतञ्चेति विग्रहः । विबद्धं बद्धमिवाशनासामर्थ्यात्, सम्बद्धयुतं श्लेष्मणा इति शेषः । कफलिप्तमित्यर्थः ( भावे क्तप्रत्ययः ) ॥ २ ॥

दोषरूपाणि—

**हृच्छूलपीडनयुतं पवनेन, पित्तात्तृड्दाहचोषबहुलं, सकफप्रसेकम् ।
श्लेष्मात्मकं, बहुरुजं बहुभिश्च विद्याद्वैगुण्यमोहजडताभिरथापरं च ॥३॥**

दोषभेदेन मुखविकृतिमभिधायान्यदेशविकारमप्याह—**पवनेन**—वातोत्पन्नमरोचकम्, हृच्छूलपीडनयुतं भवेत् । पित्तादुत्पन्नं–तृड्दाहचोषबहुलं **चोषः**=चूषणवद्वेदनोपलब्धिः । श्लेष्मात्मकन्तु—कफप्रसेकादियुतम् । बहुभिर्दोषैर्जातम्, **बहुरुजं**=वातादिपीडोपेतम्, **अपरम्**=आगन्तुजम्, वैगुण्यादिभिरुपलक्षितं भवति । ( उपलक्षणे तृतीया ) **वैगुण्यं**=चित्तविकलता, **मोहो**=मनोविभ्रमः, **जडता**=आलस्यम्, अत्रारोचकशब्देन भक्तद्वेषाभक्तच्छन्दयोरपि संग्रहः । अन्यत्र तु पृथक्त्वेन लक्षणावगमः । तथाहि—'**प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्न स्वदते मुहुः । अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु ॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वाऽपि भोजनम् । द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ कुपितस्य भयार्तस्य अभिचारहतस्य च । यस्य नान्ने भवेच्छ्रद्धा सोऽभक्तच्छन्द उच्यते**, इति ॥ ३ ॥

आगन्तुजत्रिदोषजयोर्लक्षणम्—

**अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात् ।**
**स्वाभाविकं चास्यमथारुचिश्च, त्रिदोषजे नैकरसं भवेत्तु ॥ ४ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुर्दश-**
**मरोचक-निदानं समाप्तम् ॥ १४ ॥**

शोकादिसमुत्पन्नेऽरोचके-**आस्यं**=मुखं, **स्वाभाविकं**=नैसर्गिकं, भवेन्न तु वातादिवत्कषायत्वादियुतम् , त्रिदोषजे, **नैकरसं**=बहुरसम् ॥ ४ ॥

इति सुधायामरोचकनिदानम् ॥ १४ ॥

---

## अथ पञ्चदशं छर्दि-निदानम् ॥ १५ ॥

तत्संख्या—**दुष्टैर्दोषैः पृथक् सर्वैर्बीभत्सालोचनादिभिः ।**
**छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥ १ ॥**

कारणम्—**अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति ।**
**अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः ॥ २ ॥**
**श्रमाद् भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।**
**नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः ॥**
**बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् ॥ ३ ॥**

छर्दिनिरुक्तिः—**छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।**
**निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः ॥ ४ ॥**

छर्द्यामप्यरुचेः सम्भवाद् अरोचकानन्तरं छर्दिनिदानमाह—**दुष्टै**रित्यादि । पृथक् सर्वैर्वा दोषैः, **दुष्टैः**=प्रकुपितैः, **बीभत्सालोचनादिभिः**=बीभत्सानाम्=अत्यर्थं कुथितमांसादीनाम् , आलोचनादिभिः=दर्शनघ्राणादिभिः, पञ्चविधाश्छर्दयो जायन्ते। अतिद्रवादिपदार्थैरतिसेवितैः, **असात्म्यैः**=अहितपदार्थैः, भुक्तैः, **आपन्नसत्त्वायाः**=गुर्विण्याः, **नार्याः**=स्त्रियाः, अतिद्रुतम्=अतिशीघ्रम् , **अश्नतो**=भुञ्जानस्य, बलात्, **उत्क्लेशितः**=प्रेरितः, दोषः, **वक्त्रं**=मुखं, प्रधावितः सन् , **अङ्गभञ्जनैः**=गात्रकम्पनैर्वेगैः, **अर्दयन्**=पीडयन् , **आननं**=मुखं छादयति, तस्माच्छर्दिर्निरुच्यते वैद्यैरिति शेषः ॥ १-४ ॥

पूर्वरूपं—**हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः ।**
**द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥ ५ ॥**

पूर्वरूपमाह—हृल्लासेति । हृल्लासः = उपस्थितवमनत्वम् , प्रसेको—मुखस्य, लवणो व्याधिमाहात्म्यात् , श्लेष्मणो विदाहाद्वा, तनुः = तरलोऽल्पमात्रो वा ॥ ५ ॥

वातजा—हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायम् ॥ ६ ॥
कृच्छ्रेण चाल्पं महता च वेगेनार्तोऽनिलाच्छर्दयतीह दुःखम् ॥ ७ ॥

वातिकीमाह—हृत्पार्श्वपीडाऽऽदितोदान्तैरुपलक्षितः, उद्गारशब्दप्रबलं = प्रकृष्टसशब्दोद्गारयुक्तं, विच्छिन्नं = सान्तरवेगं, कृष्णं, तनुकं = तरलं, दुःखं यथा स्यात्तथा, महता वेगेन = प्रचण्डरयेण, कृच्छ्रेण = अत्यधिकपरिश्रमेण, स्वल्पं, छर्दयति = वमति ॥ ६–७ ॥

पित्तजा—मूर्च्छापिपासामुखशोषमूर्धताल्वक्षिसन्तापतमोभ्रमार्तः ।
पीतं भृशोष्णं हरितं सतिक्तं धूम्रं च पित्तेन वमेत्सदाहम् ॥ ८ ॥

पैत्तिकीमाह—मूर्च्छेत्यादिना । मूर्च्छा = संज्ञानाशः, तमः = अन्धकारावलोकनमिव प्रतीतिः, भ्रमः = चक्रारूढस्येव, एतैरुपसर्गकदम्बैः, आर्तः = पीडितः, सदाहं = दाहयुक्तं, धूम्रं = कृष्णलोहितवर्णं, वमेत् = छर्दयेत् ॥ ८ ॥

कफजा—तन्द्राऽऽस्यमाधुर्यकफप्रसेकसन्तोषनिद्राऽरुचिगौरवार्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्धं सरोमहर्षोऽल्परुजं वमेत्तु ॥ ९ ॥

श्लैष्मिकीमाह—तन्द्रेत्यादि । तन्द्राऽऽदिगौरवान्तैरुपद्रवैः, आर्तः = पीडितः, सरोमहर्षः = रोमाञ्चयुक्तः, स्वादु = मधुरं, विशुद्धम् = अतिधवलम् , अल्परुजं = स्वल्पवेदनोपपन्नं, वमेत् = छर्दयेत् ॥ ९ ॥

सर्वजा—शूलाविपाकारुचिदाहतृष्णा-श्वासप्रमोहप्रबला प्रसक्तम् ।
छर्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥ १० ॥

सान्निपातिकीमाह—शूलेत्यादिना । शूलादिप्रमोहान्तैरुपद्रवैः, प्रबला = बलवती, प्रसक्तं = निरन्तरं, त्रिदोषात् = दोषत्रयसन्निपातात् ॥ १० ॥

असाध्यं छर्दिरोगिणमाह—

विट्स्वेदमूत्राम्बुवहानि वायुः स्रोतांसि संरुध्य यदोर्ध्वमेति ।
उत्सन्नदोषस्य समाचितं तं दोषं समुद्धूय नरस्य कोष्ठात् ॥ ११ ॥
विण्मूत्रयोस्तत्समगन्धवर्णं तृट्श्वासहिक्काऽर्तियुतं प्रसक्तम् ।
प्रच्छर्दयेद् दुष्टमिहातिवेगात्तयाऽर्दितश्चाशु विनाशमेति ॥ १२ ॥

आसाध्यामाह—विडित्यादिना । वायुः = अनिलः, विट्स्वेदादिवहानि

स्रोतांसि, अवरुध्य, यदा, **ऊर्ध्वमेति**=ऊर्ध्वं गच्छति, तदा, **उत्सन्नदोषस्य**= उद्गतदोषस्य, **समाचितम्**=एकत्रितं, दोषं कोष्ठात्, **समुद्धूय**=ऊर्ध्वं कृत्वा, **प्रसक्तं**=निरन्तरं, **विण्मूत्रयोः**=मलमूत्रयोः, समगन्धवर्णं तृट्श्वासादियुक्तं छर्दयेत् ॥ ११-१२ ॥

आगन्तुजां छर्दिमाह—**बीभत्सजा दौर्हृदजाऽऽमजा च**

**ह्यसात्म्यजा च क्रिमिजा च या हि ।**

**सा पञ्चमी तां च विभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ ॥ १३ ॥**

आगन्तुजामाह—**बीभत्सेति** । **बीभत्सजा**=कुथितमांसपूयादिदर्शनजा, **दौर्हृदजा**=गुर्विणीवाञ्छितालाभजा, **असात्म्यजा**=अपथ्यभोजनप्रादुर्भूता, **दोषोच्छ्रयेण**=वातादिप्राबल्येन, **आदौ**=वातादिलक्षणे, **विभावयेत्**=जानीयात् ॥ १३ ॥

क्रिमिजा—**शूलहृल्लासबहुला क्रिमिजा च विशेषतः ।**

**क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १४ ॥**

पुनरसाध्यां छर्दिमाह—

**क्षीणस्य या छर्दिरतिप्रसक्ता सोपद्रवा शोणितपूययुक्ता ।**

**सचन्द्रिकां तां प्रवदेदसाध्यां, साध्यां चिकित्सेन्निरुपद्रवां च ॥ १५ ॥**

असाध्यामाह—**क्षीणस्येति** । **क्षीणस्य**=हीनशक्तिकस्य, **सोपद्रवा**= कासाद्युपद्रवसंयुता ॥ १५ ॥

इति सुधायां छर्दिरोगनिदानम् ॥ १५ ॥

छर्दिरोगोपद्रवाः—(**कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्यमेव च ।**

**हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥ १६ ॥**

छर्दिपूर्वरूपम्—

**ताल्वोष्ठकण्ठास्यविशोषदाह-सन्तापमोहभ्रमविप्रलापाः ।**

**पूर्वाणि रूपाणि भवन्ति तासामुत्पत्तिकाले तु विशेषतो हि) ॥ १७ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने छर्दिनिदानं समाप्तम् ॥ १५ ॥**

## अथ षोडशं तृष्णानिदानम् ॥ १६ ॥

तस्य हेतुः सम्प्राप्तिश्च—**भयश्रमाभ्यां बलसंक्षयाद्वा ह्यूर्ध्वं चितं पित्तविवर्धनैश्च ।**

**पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम् ।**

**स्रोतस्स्वपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः ॥ १ ॥**

तत्संख्या—**तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथा ह्यामसमुद्भवा च ।**
**भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु ॥ २ ॥**

छर्दिरोगोपद्रवभूतायास्तृष्णायाश्छर्देरनन्तरं प्रसङ्गस्तत आह—**भयेत्यादि** । एभिः कारणैः पित्तविवर्धनैः कट्वम्लोष्णादिभिः, **चितं**=सञ्चितं, **तालुप्रपन्नं**=क्लोमादि प्राप्तं सत्, **अपां वाहिषु**=जलवहेषु स्रोतस्सु, **दूषितेषु**=भ्रष्टेषु, (**औष्ण्यादामाद् भयात्पाना—दतिशुष्कान्नसेवनात् । अम्बुवाहीनि दूष्यन्ति तृष्णायाश्चातिपीडनादिति**) । तृट्=पिपासा, **जन्तोः**=नरस्य, **सम्भवति**=उत्पद्यते ॥ १ ॥

वातजा—**क्षामास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि ।**
**स्रोतोनिरोधो विरसं च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति॥३॥**

वातजामाह—**क्षामास्यतेति** । **मारुतसम्भवायां**=वातजायां तृष्णायाम्, **क्षामास्यता**=दीनाननत्वम्, **तोदो**=व्यथा, स्रोतसामुदकवहानामवरोधः, **वक्त्रं**=मुखं च, **विरसं**=गतस्वादम् ॥ ३ ॥

पित्तजा—**मूर्च्छाऽन्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः ।**
**शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिदूयनं च॥४॥**

पित्तजामाह—**मूर्च्छेत्यादिना** । **पित्तात्मिकायां**=पित्तजनितायां तृष्णायाम्, मूर्च्छाऽऽदयो जायन्ते, **प्रततः**=प्रवृद्धः, शोषस्तृष्णा, **परिदूयनम्**=सन्तापः॥४॥

कफजा—**वाष्पावरोधात्कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा तु ।**
**निद्रा गुरुत्वं मधुरास्यता च तृष्णाऽर्दितः शुष्यति चातिमात्रम्**

श्लेष्मजामाह—**वाष्पेत्यादि** । **वाष्पाणां**=मुखनेत्रनासाजलानाम्, **अवरोधात्**=निग्रहात्, कफेन स्वकारणकुपितेन, **अग्नौ संवृते सति**=मन्दीभूते सति, तृष्णा भवेत्, **बलासेन तु**=श्लेष्मणाऽपि तथा भवेत् । **मधुरास्यता**=मुखमाधुर्यं, **शुष्यति**=कृशत्वं गच्छति ॥ ५ ॥

क्षतजा—**क्षतस्य रुक्शोणितनिर्गमाभ्यां-**
**तृष्णा चतुर्थी क्षतजा मता तु ॥ ६ ॥**

क्षयजा—**रसक्षयाद्या क्षयसम्भवा सा तयाऽभिभूतश्च निशादिनेषु ॥**
**पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ।**
**रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत्॥७॥**

क्षयजामाह—**रसक्षयादित्यादि** । रसस्य क्षयाज्जाता या सा क्षयसम्भवा, **तया**=तृष्णया, **निशादिनेषु**=रात्रिन्दिवम्, अम्भो=जलं, **पेपीयते**=पुनः-

पुनरतिशयेन पिबति, तथाऽपि सुखं न याति। यद्यपि विशेषजलपानं तृष्णामात्र-व्यापि तथाऽप्यत्र विशेषत इति ध्येयम् ॥ ७ ॥

आमजा-त्रिदोषलिङ्गाऽऽमसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री ॥
भक्तजा-स्निग्धं तथाऽम्लं लवणं च भुक्तं गुर्वन्नमेवाशु तृषां करोति ॥८॥

कष्टसाध्या-दीनस्वरः प्रताम्यन् दीनः संशुष्कवक्त्रगलतालुः।
भवति खलु योपसर्गात्तृष्णा सा शोषिणी कष्टा ॥ ९ ॥

उपसर्गजामाह—**दीने**त्यादि। या तृष्णा, **उपसर्गात्**=उपद्रवात्, रोगादिति यावत्। सा शोषिणी कष्टा च विज्ञेया, तया, **दीनस्वरः**=क्षामवचनः, **प्रताम्यन्**=मुह्यन्, संशुष्कवक्त्रगलतालुश्च भवति ॥ ९ ॥

असाध्यास्ताः-ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम्।
सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रयुक्तानाम् ॥
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः ॥ १० ॥
(क्षीणं विचित्तं बधिरं तृषाऽऽर्त्तं विवर्जयेन्निर्गतजिह्वमाशु)११॥

इति श्रीमाधवकरविरचिते माधवनिदाने षोडशं तृष्णानिदानं समाप्तम् ॥ १६ ॥

असाध्यलक्षणमाह—ज्वरेत्यादि। **सर्वाः**=निखिलदोषजाः, **अतिप्रसक्ताः**=अतिशयेन वृद्धाः, **रोगकृशाणां**=व्याधिदुर्बलानाम्, **वमिप्रयुक्तानां** छर्दिनिमित्तानाम्, **घोरोपद्रवयुक्ताः**=मुखशोषाद्युपद्रवसंयुताः ॥ १० ॥

इति सुधायां तृष्णानिदानम् ॥

## अथ सप्तदशं मूर्च्छा-भ्रम-निद्रा-तन्द्रा-संन्यास-निदानम् ॥ १७ ॥

मूर्च्छाहेतुः-क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः ॥ १ ॥

मूर्च्छासम्प्राप्तिः—करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ २ ॥
संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ३ ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्त्तिता ॥ ४ ॥

मूर्च्छासंख्या—**वातादिभिः शोणितेन मद्येन च विषेण च ।**
**षट्स्वप्येतासु पित्तं तु प्रभुत्वेनावतिष्ठते ॥ ५ ॥**

**तृषितो मोहमाप्नोति**—इति वचनात् तृष्णायामपि मोहसम्भवात् तृष्णाऽनन्तरम् मूर्च्छानिदानमाह—**क्षीणस्येति** । **क्षीणस्य**=कृशस्य, **बहुदोषस्य**=दोषसङ्घातयुक्तस्य, **हीनसत्त्वस्य**=सत्त्वगुणशून्यस्य, वा पुंसो वेगाघातादिभिः कारणैः, **दोषाः**=वातादयः, यदा **करणायतनेषु**=इन्द्रियाद्यधिष्ठानेषु, **बाह्येषु**=चक्षुरादिषु, **आभ्यन्तरेषु**=मनोवहेषु स्रोतस्सु च निविशन्ते तदा **मानवाः**=मर्त्याः, **मूर्च्छन्ति**=अचैतन्यं यान्ति, **सुखदुःखव्यपोहकृत्**=सुखदुःखादिविनाशकृत् , **तमः**=तमोगुणोऽज्ञानकारणम् , **अभ्युपैति**=बर्द्धते, **मोहो मूर्च्छेति** पर्यायाभिधानम् । **सा**=मूर्च्छा, **षड्विधा**=वातादिभिस्तिस्रः, रक्तेन चैका, मद्येन चैका, विषेण चैका, **एवं षट्** , एतासु मूर्च्छासु पित्तं **प्रभुत्वेन**=प्राधान्येन, व्यापकत्वेनेति यावत् । तेन सर्वत्रानिलजादावपि पित्तसम्बन्धः ॥ १–५ ॥

मूर्च्छापूर्वरूपं–**हृत्पीडा जृम्भणं ग्लानिः संज्ञादौर्बल्यमेव च ।**
**सर्वासां पूर्वरूपाणि यथास्वं च विभावयेत् ॥ ६ ॥**

पूर्वरूपमाह—**हृत्पीडे**त्यादि । **संज्ञादौर्बल्यं**=सम्यग्ज्ञानाभावः, **यथास्वं**=यथादोषं, **विभावयेत्**=जानीयात् ॥ ६ ॥

वातमूर्च्छा–**नीलं वा यदि वा कृष्णमाकाशमथवाऽरुणम् ।**
लक्षणम्—**पश्यंस्तमः प्रविशति शीघ्रं च प्रतिबुध्यते ॥ ७ ॥**
**वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च ।**
**कार्श्यं श्यावारुणच्छाया मूर्च्छाये वातसम्भवे ॥ ८ ॥**

वातजामाह—**नील**मित्यादि । **वातसम्भवे**=अनिलजे, **मूर्च्छाये**=मूर्च्छारोगे, एतानि लक्षणानि भवन्ति । **नीलं**=स्निग्धकृष्णं, **कृष्णं**=रूक्षकृष्णम् , **अरुणम्**=ईषल्लोहितवर्णं शीघ्रं प्रतिबुध्यते वायोराशुकारित्वात् । श्यावारुणा **छाया**=कान्तिः, शरीरस्य ॥ ७–८ ॥

पित्तमूर्च्छा- **रक्तं हरितवर्णं वा वियत्पीतमथापि वा ।**
लक्षणम्— **पश्यंस्तमः प्रविशति सस्वेदश्च प्रबुध्यते ॥ ९ ॥**
**सपिपासः ससन्तापो रक्तपीताकुलेक्षणः ।**
**संभिन्नवर्चाः पीताभो मूर्च्छाये पित्तसम्भवे ॥ १० ॥**

पित्तजामाह—**रक्तमि**त्यादि। **वियद्**=आकाशं, रक्तहरिदादिवर्णं पश्यति, **सस्वेदश्च**=सघर्मश्च, **प्रबुध्यते**=ससंज्ञो भवति, **संभिन्नवर्चाः**=सृष्टपुरीषः ॥ ९-१० ॥

कफमूर्च्छा- **मेघसङ्काशमाकाशमावृतं वा तमोघनः।**

लक्षणम्— **पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥ ११ ॥**

**गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा।**

**सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे ॥ १२ ॥**

कफजामाह—**मेघे**त्यादि। **मेघसङ्काशम्**=अभ्रसदृशम्, **तमोघनैः**=अन्धकारमेघैः, **आवृतं**=छन्नं, **प्रसेकः**=आस्यस्रावः, **हृल्लासः**=उपस्थितवमनत्वमिव ॥ ११-१२ ॥

त्रिदोषमूर्च्छा-**सर्वाकृतिः सन्निपातादपस्मार इवागतः।**

लक्षणम्— **स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥ १३ ॥**

सान्निपातिकीमाह—**सर्वे**त्यादि। सर्वेषां वातादीनामाकृतिर्लक्षणं यत्र सा **सर्वाकृतिः, बीभत्सचेष्टितैर्विना**=फेनवमनदन्तघटनाक्षिवैकृतादिकं विना, अपस्मार इव **जन्तुं**=नरं, पातयति। यथाऽपस्मारी महताऽभिघातेन पतति चिरेण प्रतिबुध्यते, तथा फेनवामित्वहस्तपादादिविक्षेपणमधिकमपस्मारादाविति भेदः॥१३॥

रक्तजमूर्च्छा- **पृथिव्यापस्तमोरूपं रक्तगन्धस्तदन्वयः।**

हेतुः— **तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥ १४ ॥**

तत्रान्यमतं- **द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ॥ १५ ॥**

रक्तजामाह—**पृथिव्याप** इत्यादिना। पृथिव्यापः, **तमोरूपं**=तमोबहुलं, **तदन्वयः**=तत्सम्बन्धः, पृथिवीजलमय इति यावत्। **द्रव्यस्वभावः**=रक्तस्यायं स्वभावः=प्रकृतिः, यद्रक्तं दृष्ट्वा, **अभिमुह्यति**=मूर्च्छति, इत्येके॥१४-१५॥

विषमद्यमूर्च्छा-**गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।**

लक्षणम्— **त एव तस्मात्ताभ्यां तु मोहौ स्यातां यथेरितौ ॥ १६ ॥**

विषमद्यजे गुणान् प्राह—**गुणा** इत्यादि। विषमद्ययोर्गुणास्तीव्रतरत्वेन स्थिताः **"लघु रूक्षमाशु विशदं व्यवायि तीक्ष्णं विकाशि सूक्ष्मञ्च। उष्णमनिर्देश्यरसं दशगुणमुक्तं विषं तज्ज्ञैः"** इति। **त एव**=लघुत्वादयो गुणाः, **यथेरितौ**=यथाऽभिहितौ, विषजो मोहो न स्वयं निवर्तते विषस्याविपाकित्वात्, मद्यजस्तु—मद्यपरिणामादेव स्वयं शाम्यतीति परस्परं भेदः। प्रभावविशेषात्॥ १६ ॥

रक्तमद्य- मूर्च्छारूपं **स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ।**
**मद्येन विलपञ्छेते नष्टविभ्रान्तमानसः ।**
**गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् ॥ १७ ॥**

रक्तजादिमूर्च्छात्रयस्य लक्षणान्याह—**स्तब्धाङ्ग** इत्यादि । **असृजा**=रक्तेन, मूर्च्छितो नरः, **स्तब्धे**=निश्चले अङ्गदृष्टी यस्य स तथा । **गूढोच्छ्वासः**=अविस्पष्टनिःश्वासः, **मद्यतः**=मद्यपानेन, **नष्टविभ्रान्तमानसः**=नष्टं विभ्रान्तं च मानसं=चित्तं यस्य स तथा, **जरां**=पक्वताम् ॥ १७ ॥

विषमूर्च्छा- रूपं— **वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते ।**
**वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ॥ १८ ॥**

**विषमूर्च्छिते**=विषभक्षणजायमाने मूर्च्छाये, **वेपथुः**=कम्पः, **यथास्वं विषलक्षणैः**=सौश्रुतकल्पस्थानोपवर्णितैः ॥ १८ ॥

मूर्च्छाभेदाः—**मूर्च्छा पित्ततमःप्राया, रजःपित्तानिलाद् भ्रमः ।**
**तमोवातकफात्तन्द्रा, निद्रा श्लेष्मतमोभवा ॥ १९ ॥**

चैतन्यनाशत्वाविशेषेऽपि मूर्च्छाऽऽदीनां भेदं दर्शयति—**मूर्च्छे**त्यादि । **तमोवातकफा**दित्येकवचनन्तु समाहारद्वन्द्वादिति बोध्यम् ॥ १९ ॥

भ्रमरोगः—**( चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्वदा ।**
**भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः ) ॥ २० ॥**

निद्रारोगलक्षणम्—**( यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः ।**
**विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ) ॥ २१ ॥**

तन्द्रारोगलक्षणम्—**इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः ।**
**निद्राऽऽर्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत् ॥ २२ ॥**

तन्द्रालक्षणमाह—**इन्द्रियार्थेष्वि**ति । **इन्द्रियार्थेषु**=शब्दस्पर्शादिषु, **असंवित्तिः**=ज्ञानशून्यता, निद्राऽऽर्त्तस्येव, **यस्य**=पुरुषस्य, **ईहा**=चेष्टा, शेषं सुगमम् । निद्रा हि विप्लुतमनसः सर्वेन्द्रियाणां स्वविषयनिवृत्तिः । यदुक्तं **चरके**-पतञ्जलिना—**यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः** ॥ इति । **भ्रमलक्षणन्तु**—चक्रारूढस्येव भ्रमन्निखिलपदार्थावभासः ॥ २२ ॥

क्लमलक्षणम्—**( योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः ।**
**क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ) ॥ २३ ॥**

मूर्च्छासंन्या-दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम् ।
सभेदः—स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्विना ॥ २४ ॥

संन्यासस्य मूर्च्छाऽऽदिभ्यो भेदं विवक्षुराह—दोषेष्विति । संन्यास औषधैर्विना नोपशाम्यति, मूर्च्छाऽऽदयस्तु स्वयमेवोपशाम्यन्तीति भेदः ॥ २४ ॥

संन्यासरूपं—वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥ २५ ॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः ।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥ २६ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने सप्तदशं मूर्च्छा-भ्रम-निद्रा-तन्द्रा-संन्यास-निदानं समाप्तम् ॥ १७ ॥

संन्यासलक्षणमाह—वागित्यादि। प्राणायतनं=हृदयम्, आश्रिताः, अतिबलाः=अधिकप्रवृद्धाः, मलाः=दोषाः, अबलं=दुर्बलं, जन्तुं=मानवं, संन्यस्यन्ति=मोहयन्ति, सः, ना=मनुष्यः, संन्याससंन्यस्तः=संन्यासरोगाक्रान्तः, काष्ठीभूतः=निर्व्यापारत्वेन, अकाष्ठ एव काष्ठवद्भूतः, अत एव मृतोपमः=गतासुकल्पः, सद्यःफलां=सूचीव्यधनकेशोत्पाटनशिम्बीफलघर्षणादिकां क्रियां मुक्त्वा प्राणैः, वियुज्यते=म्रियते, अन्यथा, स्वस्थो भवति ॥ २५-२६ ॥

इति सुधायां मूर्च्छाऽऽदिरोगनिदानम् ।

## अथाष्टादशं पानात्यय-परमद-पानाजीर्ण-पान-विभ्रम-निदानम् ॥ १८ ॥

मदात्ययहेतुः-ये विषस्य गुणाः प्रोक्तास्तेऽपि मद्ये प्रतिष्ठिताः ।
तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः ॥ १ ॥

मूर्च्छाया विषमद्याभ्यामपि जन्यत्वसम्भवान्मूर्च्छाऽनन्तरं मद्यविकाराम् मदात्ययादीनाह—य इत्यादि । मिथ्योपयुक्तेन=अयथाविधिपीतेन, तेन=मद्येन, उग्रो=भयङ्करः, मदात्ययः=मदेन अत्ययो=विनाशो मदात्ययः, भवति ॥१॥

मद्यस्वभावः-किन्तु मद्यं स्वभावेन यथवान्नं तथा स्मृतम् ॥ २ ॥
तत्कुयोगसु-अयुक्तियुक्तं रोगाय युक्तियुक्तं यथाऽमृतम् ।
योगफलं—प्राणाः प्राणभृतामन्नं तदयुक्त्या हिनस्त्यसून् ।
विषं प्राणहरं तच्च युक्तियुक्तं रसायनम् ॥ ३ ॥

ननु मद्यस्य विषसमानगुणकारितया विषवन्मद्यमपि नोपादेयमित्यत आह—**किन्त्वित्**यादि । **मद्यं**=सुरा, यथैवान्नं तथा स्मृतम् , **अयुक्तियुक्तम्**=अयथाविधिसेवितं, रोगाय, **युक्तियुक्तं**=शास्त्रानुकूलं, यथाऽमृतम् , अत्रैवोदाहरणमाह—**प्राणा** इति । **प्राणभृतां**=जीवधारिणाम् , अन्नं प्राणाः, अयुक्तियुक्तं तदेवान्नं सेवितं विषूचिकाऽऽदिरोगैः, **असून्**=प्राणान् , हिनस्ति । विषं स्वभावतः प्राणहरम् , युक्तियुक्तं तदेव विषं रसायनं भवति ॥ २–३ ॥

विधिनोपयु- **विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।**
क्तस्य मद्यस्य **प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम् ॥ ४ ॥**
गुणाः— **स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम् ।**
**भवेदायुःप्रकर्षाय बलायोपचयाय च ॥ ५ ॥**
**काम्यता मनसस्तुष्टिस्तेजो विक्रम एव च ।**
**विधिवत्सेव्यमाने तु मद्ये संनिहिता गुणाः ॥ ६ ॥**

मद्यस्य यथाविधिसेवितस्य फलमाह—**विधिने**त्यादि । **यः**=पुरुषः, **काले**=नित्यगे चावस्थिके च, **विधिना**=शास्त्रानुकूलेन, **मात्रया**=अग्निबलानुरूपेण हितैरन्नैः, **यथाबलं**=यथासामर्थ्यं, **प्रहृष्टः**=प्रसन्नः सन् , **मद्यं**=सुरां, पिबेत् तस्यामृतोपमं मद्यं स्यात् । **आयुःप्रकर्षाय**=जीवनवृद्धये, **बलाय**=शक्त्युपचयाय, उपचयापचयस्थूलतोत्पादनाय । **काम्यता**=कमनीयमूर्त्तिता, **मनसस्तुष्टिः**=चित्तसन्तोषः, **तेजः**=उत्साहः, **विक्रमः**=पराक्रमः, **विधिवत्**=शास्त्रानुकूलम् , **सेविते**=पीते, **मद्ये सन्निहिताः**=मद्यवर्त्तिनो गुणाः सन्ति ॥४–६॥

प्रथममदमाह-**बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्धनश्च ।**
**संपाठगीतस्वरवर्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि ॥ ७॥**

त्रिविधस्य मदात्ययस्य क्रमेण लक्षणान्याह—**बुद्धी**त्यादिना। प्रथमो मदः, **बुद्धिस्मृतिप्रीतिकरः**=बुद्धिरनुभवः—स्मृतिरनुभवाहितसंस्कारजन्यं ज्ञानं, प्रीतिरनुरागः, पानान्नादिषु **रतिवर्धनः**=अनुरागोत्पादकः, **संपाठः**=सम्यक् पाठः, **अतिरम्यः**=रमणीयतरः ॥ ७ ॥

मध्यममदमाह-**अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाऽऽकृतिरप्रशान्तः ।**
**आलस्यनिद्राऽभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥८॥**

द्वितीयमदमाह—**अव्यक्ते**त्यादि । **मध्येन**=द्वितीयेन, मदेन मत्तः, बुद्धिश्च स्मृतिश्च वाक् च विचेष्टा च बुद्धिस्मृतिवाग्विचेष्टाः, अव्यक्ता बुद्धिस्मृतिवाग्विचेष्टा यस्य स तथाभूतः, विरुद्धा चेष्टा विचेष्टा, लीला चाकृतिश्च लीलाऽऽकृती

उन्मत्तस्य लीलाऽऽकृतिभ्यां सह वर्त्तते इति **सोन्मत्तलीलाऽऽकृतिः।** **अप्रशान्तः**=प्रचण्डः॥ ८॥

तृतीयमदमाह— **गच्छेदगम्यान्न गुरूंश्च मन्येत् खादेदभक्ष्याणि च नष्टसंज्ञः।**
**ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः ९**

तृतीयमदमाह—**गच्छेदि**त्यादि। तृतीये मदे-**अगम्यान्**=गुरुदारादीन्, **अभक्ष्याणि**=विष्ठाऽऽदीनि, **गुह्यानि**=रहस्यानि, **अस्वतन्त्रः**=परतन्त्रः, मदाधीन इति यावत्॥ ९॥

चतुर्थमदमाह— **चतुर्थे तु मदे मूढो भग्नदार्विव निष्क्रियः।**
**कार्याकार्यविभागाज्ञो मृतादप्यपरो मृतः॥ १०॥**
**को मदं तादृशं गच्छेदुन्मादमिव चापरम्।**
**बहुदोषमिवामूढः कान्तारं स्ववशः कृती॥ ११॥**

चतुर्थमदमाह—**चतुर्थ** इत्यादि। चतुर्थे मदे नरो **मूढः**=अज्ञानी, **भग्नदारु इव**=क्षतवृक्ष इव, **निष्क्रियो**=निर्व्यापारः, **कार्याकार्यविभागाज्ञः**= कर्त्तव्याकर्त्तव्यविवेकशून्यः, कः **कृती**=कुशलः, **बहुदोषं**=नानाहिंस्रजन्तुयुक्तं, **कान्तारं**=वनमिव, अपरमुन्मादमिव च तादृशं पिबेत्, न कोऽपि विवेकीत्यर्थः॥ १०-११॥

मदात्ययादि-हेतुः— **निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्।**
**आपादयेत्कष्टतमान्विकारानापादयेच्चापि शरीरभेदम्॥१२॥**

अविधिपीतमद्यस्य विकारान्तरकारित्वमाह—**निर्भक्त**मित्यादि। **निर्भक्तम्**=अन्नहीनम्, **एकान्ततः**=अनुक्षणं, **कष्टतमान्**=कायक्लेशकरान्, विकारान् **शरीरभेदं**=कलेवरविनाशम्, **आपादयेत्**=संजनयेत्॥ १२॥

**क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन।**
**व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि॥१३॥**
**अत्यम्बुभक्ष्यावततोदरेण साजीर्णभुक्तेन तथाऽबलेन।**
**उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान्॥**

अन्नोपहितमद्यसेवनेऽपि नानाकारणकदम्बाद्रोगान्तरोत्पत्तिस्तदाह—**क्रुद्धेने**त्यादि। **बुभुक्षितेन**=क्षुधितेन, **अत्यम्बुभक्ष्यावततोदरेण**=अत्यम्बुभक्ष्याभ्यामवततं व्याप्तमुदरं यस्य स तेन। **उष्णाभितप्तेन**=वह्निघर्मादिसन्तप्तेन १३-१४

नामनिर्देशः—**पानात्ययं परमदं पानाजीर्णमथापि वा।**
**पानविभ्रममुग्रं च तेषां वक्ष्यामि लक्षणम्॥ १५॥**

मद्यजन्यविकाराणां नामानि दर्शयति—**पानात्यय**मित्यादिना ॥ १५ ॥

वातप्रायमदात्ययः— **हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।**
**विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥ १६ ॥**

पित्तप्रायमदात्ययः— **तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।**
**विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥ १७ ॥**

कफप्रायमदात्ययः— **छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।**
**विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥ १८ ॥**

त्रिदोषजमदात्ययः—**ज्ञेयस्त्रिदोषजश्चापि सर्वलिङ्गैर्मदात्ययः ॥ १९ ॥**

तेषां लक्षणानि दोषभेदेन विवृणोति—हिक्केत्यादिना ॥ १६–१९ ॥

परमदलक्षणं-**श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च**
**विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।**
**लिङ्गं परस्य च मदस्य वदन्ति तज्ज्ञा-**
**स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥ २० ॥**

परमदमाह—**श्लेष्मोच्छ्रय** इत्यादि । **श्लेष्मोच्छ्रयो**-घ्राणस्रावादिभिर्ज्ञेयः, **विरसास्यता**=आस्यवैरस्यं, **विण्मूत्रसक्तिः**=मलमूत्रावरोधः, **सन्धिषु भेदः**—सन्धिस्थानेषु भङ्गवत् पीडोपलब्धिः ॥ २० ॥

पानाजीर्णंपान-**आध्मानमुग्रमथ चोद्गिरणं विदाहः**
विभ्रमरूपं—**पानेऽजरां समुपगच्छति लक्षणानि ।**
**हृद्गात्रतोदकफसंस्रवकण्ठधूमा-**
**मूर्च्छावमिज्वरशिरोरुजनप्रदाहाः ॥**
**द्वेषः सुराऽन्नविकृतेष्वपि तेषु तेषु**
**तं पानविभ्रममुशन्त्यखिलेन धीराः ॥ २१ ॥**

पानाजीर्णमाह—**आध्मान**मित्यादि । **उद्गिरणं**=वमनम् , **अजराम्**=अपक्वतां, समुपगच्छति सति, सप्तम्यन्तं पदम्। पानविभ्रममाह—**हृदि**त्यादि । **कफसंस्रवः**=श्लेष्मनिर्गमः, **कण्ठधूमः**=कण्ठाद् धूमोद्गमनवद्व्यथा, **शिरोरुजनं**=मस्तकपीडा, **अखिलेन**=समग्रेण, **उशन्ति**=इच्छन्ति । ( **वश-कान्तौ** धातुः ) कान्तिरिहेच्छा ॥ २१ ॥

असाध्यरूपं-**हीनोत्तरौष्ठमतिशीतममन्ददाहं-**
**तैलप्रभास्यमपि पानहतं त्यजेत्तु ॥**

**जिह्वौष्ठदन्तमसितं त्वथवाऽपि नीलं**
**पीते च यस्य नयने रुधिरप्रभे वा ॥ २२ ॥**

असाध्यलक्षणमाह—**हीनेत्यादि**। **हीनोत्तरौष्ठं**=लम्बमानोपरितनौष्ठम्, **अमन्ददाहं**=प्रचण्डदाहपरिपीडितं, **तैलप्रभास्यं**=तैलाक्तमुखमिव, **रुधिरप्रभे**=रक्तवर्णे ॥ २२ ॥

इति सुधायां पानात्ययपरमदपानाजीर्णपानविभ्रमनिदानम्।

उपद्रवाः— **हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः**
**कासभ्रमावपि च पानहतं भजन्ते ॥ २३ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने पानात्यय-परमद-पानाजीर्ण-पानविभ्रम-निदानं समाप्तम् ॥ १८ ॥**

## अथैकोनविंशं दाह-निदानम् ॥ १९ ॥

मद्यजदाहः— **त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्च्छितः।**
**दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥ १ ॥**

मदात्ययेऽपि दाहोपलब्धेर्मदात्ययानन्तरं दाहप्रसङ्गस्तत्तद आह—**त्वचमित्यादि**। सः, **पानोष्मा**=सुरापानजन्योष्णता, पित्तरक्ताभिमूर्च्छितः सन्—**घोरं**=भयङ्करं दाहं प्रकुरुते तत्र **पित्तवत्**=पित्तघ्नं भेषजं, कुर्यादिति शेषः ॥ १ ॥

रक्तजदाहः—**कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवम्।**
**स उष्यते तृष्यते च ताम्राभस्ताम्रलोचनः ॥**
**लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते ॥ २ ॥**

पित्तजदाहः—**पित्तज्वरसमः पित्तात्स चाप्यस्य विधिः स्मृतः ॥ ३ ॥**

तृष्णारोधज-दाहः— **तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्धतम्।**
**स बाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः ॥**
**संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य वेपते ॥ ४ ॥**

रक्तपूर्णकोष्ठज—**असृजः पूर्णकोष्ठस्य दाहोऽन्यः स्यात्सुदुस्तरः ॥ ५ ॥**

धातुक्षयज-दाहौ— **धातुक्षयोक्तो यो दाहस्तेन मूर्च्छातृडर्दितः**
**क्षामस्वरः क्रियाहीनः स सीदेद् भृशपीडितः ॥ ६ ॥**

मर्माभिघातज-दाहः— **(क्षतजोऽनश्नतश्चान्नं शोचतो वाऽप्यनेकधा।**
**तेनान्तर्दह्यतेऽत्यर्थं तृष्णामूर्च्छाप्रलापवान्) ॥ ७ ॥**

तदसाध्यरूपं-**सर्वं एव च वर्ज्याः स्युः शीतगात्रस्य देहिनः ॥ ८ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने एकोनविंशं दाहनिदानं समाप्तम् ॥ १९ ॥**

असाध्यत्वमाह—**मर्माभिघाते**त्यादि । **मर्माभिघातजः**=मर्माणि हृदयादीनि तेषामभिघाताज्जनितः, स सप्तमो दाहोऽसाध्यः । मद्यजः **प्रथमः**, रक्तजो **द्वितीयः**, पैत्तिक**स्तृतीयः**, तृष्णाऽवरोधजश्**चतुर्थः**, असृजः पूर्णकोष्ठस्येति **पञ्चमः**, धातुक्षयजः **षष्ठः**, मर्माभिघातजः **सप्तम** इति । क्षतजमपि के चिदाचक्षते तेऽन्यथा गणयन्ति ॥ ८ ॥

इति सुधायां दाहनिदानम् ।

## अथ विंशमुन्माद-निदानम् ॥ २० ॥

उन्मादनि- **मदयन्त्युद्गता दोषा यस्मादुन्मार्गमागताः ।**
रुक्तिः— **मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः ॥ १ ॥**

मदात्यये-उन्मादमिव चापरमित्यादिवर्णनाद् मदात्ययानन्तरमुन्मादारम्भः । निरुक्तिमाह—**मदयन्ती**त्यादि । यस्माद् , **उन्मार्गं**=विमार्गम् , आगता दोषाः, **मदयन्ति**=मनोविभ्रमं विदधति, तस्मान्मानसोऽयं व्याधिरुन्माद इति **कीर्त्तितः**=भणितः ॥ १ ॥

तत्संख्या—**एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।**
**मानसेन च दुःखेन स च पञ्चविधो मतः ॥ २ ॥**

मदरोगः—**विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ।**
**स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च ॥ ३ ॥**

कारणं—**विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् ।**
**उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टाः ॥ ४ ॥**

सामान्यनिदानमाह—**विरुद्धे**त्यादि । **विरुद्धं**=क्षीरमत्स्यादि, **दुष्टं**=विषसम्पृक्तम् , अन्नं, देवादीनां **प्रधर्षणं**=पराभवः, **भयहर्षपूर्वः**=भयं हर्षो वा, उभयं वा पूर्वं यस्य स तथा । विषमा**श्चेष्टाः**=अङ्गन्यासादयः ॥ ४ ॥

सम्प्राप्तिः—**तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य ।**
**स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः ॥५॥**

सम्प्राप्तिमाह—**तैरि**त्यादि । **तैः**=पूर्वोक्तैर्निदानैः, **अल्पसत्त्वस्य**=

स्वल्पसत्त्वगुणस्याल्पमनसो वा, **मलाः**=वातादयः, बुद्धेर्निवासं हृदयं प्रदूष्य मनोवहानि स्रोतांसि, **अधिष्ठाय**=अधिश्रित्य, नरस्य, **चेतो**=मनः, **आशु**=झटिति, प्रमोहयन्ति ॥ ५ ॥

सामान्यरूपं- **धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च ।**
**अबद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ६**

सामान्यरूपमाह— **धीविभ्रम** इत्यादि **धीविभ्रमः**=भ्रान्तज्ञानत्वम्, **सत्त्वपरिप्लवः**=चित्तचाञ्चल्यम्, **अधीरता**=कातरता, **अबद्धवाक्त्वम्**=अप्रासङ्गिकवचनत्वं, सामान्यं लिङ्गम्। लिङ्ग्यते बोध्यतेऽनेनेति लिङ्गं तेन पूर्वरूपरूपयोरुभयोरपि संग्रहः ॥ ६ ॥

वातज- **रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः ।**
हेतुः— **चिन्ताऽऽदिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम् ७**
वातज- **अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि ।**
रूपम्— **पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलं चानिलजस्य रूपम् ॥ ८ ॥**

वातजमाह— **रूक्षे**त्यादि । रूक्षेत्यादिकारणैरतिवृद्धः, **अनिलो**=वायुः, चिन्ताऽऽदिदुष्टं हृदयं **प्रदूष्य**=दूषयित्वा, **बुद्धिं**=ज्ञानं, **स्मृतिं**=स्मरणशक्तिं च, **उपहन्ति**=विनाशयति, **अस्थानहास्यं**=कारणमनपेक्ष्य हासः, **अङ्गविक्षेपणम्**=हस्तपादादिविरुद्धचेष्टा, जीर्णे आहारे बलं व्याधेर्भवतीति॥७-८॥

पित्तज- **अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम् ।**
हेतुः— **उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात् ॥ ९ ॥**
पित्तज- **अमर्षसंरम्भविनग्नभावाः सन्तर्जनातिद्रवणौष्ण्यरोषाः ।**
रूपम्— **प्रच्छायशीतान्नजलाभिलाषः पीता च भाः पित्तकृतस्य लिङ्गम् १०**

पित्तजमाह— **अजीर्णे**त्यादि । अजीर्णादिहेतुभिः, **चितम्**=एकसमुदितम्, **उदीर्णवेगं**=प्रचण्डवेगम्, अत्युग्रं यथा स्यात्तथोन्मादयति, **अनात्मकस्य**=अजितात्मनः, **पूर्ववत्**=अनिलजवत्, चिन्तानिवासं हृदयं प्रदूष्येति । **अमर्षसंरम्भविनग्नभावाः**=अमर्षोऽसहिष्णुता, संरम्भः=आरभटी, विनग्नभावः=दिगम्बरत्वम्, **अतिद्रवणं**=पलायनम्, **रोषः**=क्रोधः, प्रच्छाये शीतान्नजलयोः, **अभिलाषः**=उत्सुकता, पीता भाः=दीप्तिः शरीरस्य ॥ ९-१० ॥

कफज- **सम्पूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्मणि सम्प्रदुष्टः ।**
हेतुः— **बुद्धिं स्मृतिं चाप्युपहत्य चित्तं प्रमोहयन् सञ्जनयेद्विकारम् ॥ ११ ॥**

कफज- रूपं— **वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियताऽतिनिद्रा ।
छर्दिश्च लाला च बलं च भुक्ते
नखादिशौक्ल्यं च कफात्मके स्यात् ॥ १२ ॥**

कफजमाह—**सम्पूरणैरि**त्यादि । **मन्दविचेष्टितस्य**=परिश्रमशून्यस्य, **सम्पूरणैः**=भोजनैः, **सोष्मा**=सपित्तः, कफः, **मर्मणि**=हृदये, दुष्टः सन् बुद्धिं स्मृतिं चापि, **उपहत्य**=विनाश्य, **चित्तं**=मनः, प्रमोहयन् **विकारम्**=उन्मादं, सञ्जनयेत् । **वाक्चेष्टितं मन्दं**=मन्दा वाणी चेष्टितं च मन्दम्, **नारीविविक्तप्रियता**=नारीप्रियता विविक्तप्रियता=एकान्तप्रियता '**विविक्तौ पूतविजनावि**'त्यमरः । **भुक्ते**=भोजने कृते, बलं व्याधेरिति शेषः ॥११-१२॥

त्रिदोषज- हेतुरूपे- **यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स च हेतुभिः स्यात् ।
सर्वाणि रूपाणि बिभर्त्ति तादृग्विरुद्धभैषज्यविधिर्विवर्ज्यः १३**

सान्निपातिकमाह—**सर्वाणि रूपाणि**=वातादिलक्षणानि, **विरुद्धभैषज्यविधिः**=विरुद्धो भैषज्यविधिर्यस्य स तथा, त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका क्रिया कार्या सा च परस्परविरोधिनी, त्रिदोषहरं तु किञ्चिदेव द्रव्यमिति १३

भयशोकका- मजोन्माद- लक्षणानि- **चौरैर्नरेन्द्रपुरुषैररिभिस्तथाऽन्यै-
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतमो मनसो विकारः ॥
चित्रं ब्रवीति च मनोऽनुगतं विसञ्ज्ञो-
गायत्यथो हसति रोदिति चापि मूढः ॥ १४ ॥**

शोकादिजमाह—**वित्रासितस्य**=उद्विग्नस्य, **गाढम्**=अत्यर्थं, **क्षते**=उपहते, प्रियया **रिरंसोः**=रन्तुमिच्छोः, **मनोऽनुगतं**=सुगुप्तमपि रहस्यं, **ब्रवीति**=प्रकाशयति, **विसंज्ञो**=विरुद्धज्ञानः, अत एव मूढः ॥ १४ ॥

विषजलक्ष- णम्— **रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः ।
श्यावाननो विषकृतेऽथ भवेद्विसंज्ञः ॥ १५ ॥**

विषजमाह—**रक्तेक्षण** इत्यादि । **विषकृते**=विषजोन्मादे, **हतबलेन्द्रियभाः**=हतं बलमिन्द्रियाणि भाश्च यस्य स तथा, **विसंज्ञः**=अचेतनः ॥१५॥

असाध्य- रूपम्- **अवाञ्ची वाऽप्युदञ्ची वा क्षीणमांसबलो नरः ।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति ॥ १६ ॥**

असाध्यलक्षणमाह—**अवाञ्ची**त्यादि । **अवाञ्ची**=नताननः, **उदञ्ची**=

ऊर्ध्वमुखः, **जागरूकः**=जागरणशीलः ॥ १६ ॥

भूतज— **अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादिभिर्यः ।**
लक्षणम् **उन्मादकालोऽनियतश्च यस्य भूतोत्थमुन्मादमुदाहरन्तम् ॥१७॥**

भौतिकोन्मादलक्षणमाह—**अमर्त्येति** । वाक् च विक्रमश्च वीर्यञ्च चेष्टा च वाग्विक्रमवीर्यचेष्टाः, अमर्त्याः=अमनुष्याः, वाग्विक्रमवीर्यचेष्टा यस्य स तथा । **ज्ञानं**=शास्त्रज्ञानं, **विज्ञानं**=तदर्थावबोधः ॥ १७ ॥

देवग्रहजुष्टलक्षणम्—

**संतुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रो ह्यवितथसंस्कृतप्रभाषी ।**
**तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः ॥ १८ ॥**

देवजुष्टमाह—**सन्तुष्ट** इत्यादि । **अतिदिव्यमाल्यगन्धः**=अत्यर्थं दिव्यमाल्यमिव गन्धो यस्येति विग्रहः । **निस्तन्द्रः**=निद्रारहितः, **ब्रह्मण्यो**=विप्रानुरक्तः ॥ १८ ॥

असुरजुष्टलक्षणम्—

**संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः ।**
**सन्तुष्टो न भवति चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः ॥१९॥**

देवशत्रुजुष्टमाह—**संस्वेदी**त्यादि । **जिह्माक्षो**=जिह्मे कुटिले अक्षिणी नेत्रे यस्य स तथा ॥ १९ ॥

गन्धर्वजुष्टलक्षणम्—

**हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः ।**
**नृत्यन्वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः ॥२०॥**

गन्धर्वाविष्टमाह—**हृष्टे**त्यादि । **पुलिनं**=तोयसंत्यक्तं तटं, **'तोयोज्झितं तु पुलिनमि'**त्यमरः । **वनान्तरं**=वनमध्यम् , **स्वाचारः**=प्रशस्यचरित्रः ॥२०॥

यक्षग्रहजुष्टलक्षणम्—

**ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः ।**
**तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः॥२१॥**

यक्षाविष्टमाह—**ताम्राक्षे**त्यादि । **ताम्राक्षो**=लोहितनयनः, प्रियं तनु रक्तं च वस्त्रं धर्तुं शीलं यस्य स तथा । **द्रुतगतिः**=शीघ्राटनः ॥ २१ ॥

पितृग्रहजुष्टलक्षणम्—

**प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्रः ।**
**मांसेप्सुस्तिलगुडपायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिजुष्टः ॥ २२ ॥**

पितृग्रहजुष्टमाह—**प्रेतानामित्यादि** । **प्रेतानां**=मृतपितॄणां, **संस्तरेषु**=कुशपत्रादिरचितास्तरणेषु, **अपसव्यवस्त्रः**=दक्षिणस्कन्धधृतोत्तरीयः, '**अपसव्यं तु दक्षिणमि**'त्यमरः । **तद्भक्तः**=पितृभक्तः ॥ २२ ॥

सर्पग्रहजुष्टलक्षणम्—

**यस्तूर्व्यां प्रसरति सर्पवत्कदा चित् सृक्कण्यौ विलिहति जिह्वया तथैव ।**
**क्रोधालुर्गुडमधुदुग्धपायसेप्सुर्ज्ञातव्यो भवति भुजङ्गमेन जुष्टः ॥ २३ ॥**

नागाविष्टमाह—**यस्त्वित्यादि** । **भुजङ्गमेन जुष्टः**=सर्पग्रहाक्रान्तः, **उर्व्यां**=पृथिव्यां, **सर्पवत्**—उरसेति भावः । **सृक्कण्यौ**=ओष्ठप्रान्तौ, '**प्रान्तावोष्ठस्य सृक्कणी**'त्यमरः ॥ २३ ॥

राक्षसजुष्टलक्षणम्—

**मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।**
**क्रोधालुर्विपुलबलो निशाविहारी शौचद्विड् भवति स राक्षसैर्गृहीतः॥२४॥**

राक्षसाविष्टमाह—**मांसेत्यादि** । **निर्लज्जो**=निस्त्रपः, **क्रोधालुः**=कोपनः, **विपुलबलः**=महाविक्रमशाली, **निशाविहारी**=रात्रिञ्चरः, **शौचद्विट्**=पवित्रताद्वेषी ॥ २४ ॥

पिशाचजुष्टलक्षणम्—

**उद्धस्तः कृशपरुषोऽचिरप्रलापी दुर्गन्धो भृशमशुचिस्तथाऽतिलोलः ।**
**बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः ॥२५॥**

पिशाचाविष्टमाह—**उद्धस्त** इत्यादि । **उद्धस्तः**=ऊर्ध्वबाहुः, **अचिरप्रलापी**=किञ्चित्प्रलपनस्वभावः, **अतिलोलः**=निखिलान्नपानादिषु लोलुपः, **बह्वाशी**=बहुभक्षकः, **विजनवनान्तरोपसेवी**—विजनं=शून्यस्थानं, वनान्तरं=वनमध्यम् , **व्याचेष्टन्**=विरुद्धमाचरन् ॥ २५ ॥

असाध्यभूतोन्मादिलक्षणम्—

**स्थूलाक्षो द्रुतमटनः स फेनलेही निद्रालुः पतति च कम्पते च यो हि ।**
**यश्चाद्रिद्विरदनगादिविच्युतः स्यात् सोऽसाध्यो भवति तथा त्रयोदशाब्दे॥**

असाध्यमाह—**स्थूलाक्ष** इत्यादि । **स्थूलाक्षः**=स्थूले विवृते अक्षिणी यस्य स तथा, **द्रुतमटनः**=शीघ्रगमनस्वभावः, **अद्रिः**=पर्वतः, **द्विरदो**=हस्ती, **नगो**=वृक्षः, **विच्युतः**=पतितः, सन् , तथा **त्रयोदशाब्दे**=त्रयोदशे वर्षे (उन्मादस्वभावात्) अपरमप्यसाध्यलक्षणमन्यत्र वर्णितं यथा—**मेढ्रप्रवृत्तः** क्ष-

तजः सास्राक्षः स्रुतनासिकः। रूक्षजिह्वः पूतिगर्भो हतवागतिदुर्बलः ॥ इत्यादि ॥ २६ ॥

ग्रहावेश- देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
कालाः- गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥ २७ ॥
पित्र्याः कृष्णक्षये हिंस्युः पञ्चम्यामपि चोरगाः ।
रक्षांसि रात्रौ पैशाचाश्चतुर्दश्यां विशन्ति हि ॥ २८ ॥

देवादीनां ग्रहणकालमाह—**देवग्रहा** इत्यादि। देवग्रहाः **पौर्णमास्यां**=पूर्णिमातिथौ, असुराः **सन्ध्ययोः**=सायंप्रातः, गन्धर्वा अष्टम्यां तिथौ, प्रायो-ग्रहणादन्यत्रापीति। यक्षाः **प्रतिपदि**=प्रतिपदायां तिथौ, **पित्र्याः**=पितृग्रहाः, **कृष्णपक्षे**=अमावस्यायाम्, **उरगाः**=सर्पग्रहाः पञ्चम्याम्, रक्षांसि रात्रौ, पिशाचाश्चतुर्दश्यां विशन्ति ॥ २७–२८ ॥

ग्रहावेशप्रकारः—

दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्करार्चिश्च यथा देहं च देहधृक् ॥ २९ ॥
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणः ।
प्रविश्याशु शरीरं हि पीडां कुर्वन्ति दुःसहाम् ॥ ३० ॥

ग्रहाणां प्रभावः—

(तपांसि तीव्राणि तथैव दानं व्रतानि धर्मो नियमश्च सत्यम् ।
गुणास्तथाऽष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावम् ३१

ग्रहाणां पुम्भिः स्वयमसंबन्धः—

न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् क्वचिदाविशन्ति ।
ये त्वाविशन्तीति वदन्ति मोहात् ते भूतविद्याविषयादपोह्याः ॥३२॥

ग्रहभृत्यानां पुंस्वावेशः—

तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः ।
असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तथाऽऽविशन्ति)॥३३॥

**इति श्रीमाधवकरविरचिते-माधवनिदाने विंशमुन्माद-निदानं समाप्तम् ॥ २० ॥**

विशन्तो ग्रहाः कुतो न लक्ष्यन्त इत्यत आह—**दर्पणादीनि**त्यादि। **छाया**=प्रतिकृतिः, दर्पणादीन्, शीतोष्णं प्राणिनः, **भास्करार्चिः**=सूर्यकि-

रणः, **स्वमणि** = सूर्यकान्तमणिम्, **देहभृक्** = आत्मा, यथा—देहं विशन्ति न दृश्यन्ते तथा **शरीरिणः** = प्राणिनो, विशन्तो ग्रहा न दृश्यन्त इति ।

इति सुधायामुन्मादनिदानम् ।

## अथैकविंशमपस्मार-निदानम् ॥ २१ ॥

हेतुः— **(चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः ।**
**कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते) ॥ १ ॥**

( सुश्रुतोक्तमपस्मारनिदानम्—

**मिथ्यायोगेन्द्रियार्थानां कर्मणामतिसेवनात् ।**
**विरुद्धमलिनाहारविहारकुपितैर्मलैः ॥ १ ॥**
**वेगनिग्रहशीलानामहिताशुचिभोजिनाम् ।**
**रजस्तमोऽभिभूतानां गच्छतां वा रजस्वलाम् ॥ २ ॥**
**तथा कामभयोद्वेग-क्रोधशोकादिभिर्भृशम् ।**
**चेतसोऽभिभवैः पुंसामपस्मारोऽभिजायते) ॥ ३ ॥**

सामान्यलिङ्गं संख्यां चाह—

**तमः प्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः ।**
**अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥ २ ॥**

मनोदुष्टिसाधर्म्यात्समानचिकित्सितत्वाच्चोन्मादानन्तरमपस्मारारम्भः । सामान्यलक्षणमाह—**तम** इत्यादि । **दोषोद्रेकहतस्मृतेः** = दोषाणां वातादीनामुद्रेकेण वृद्धया हृता विनष्टा स्मृतिर्यस्य तस्य । **तमःप्रवेशः**=अन्धकारप्रवेशः, **संरम्भो**=नेत्रविकृतिः, हस्तपादादिकम्पनं च, **चतुर्विधः**=वातपित्तकफसंन्निपातभेदात् ॥ २ ॥

पूर्वरूपं- **हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता ।**
**निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ ॥ ३ ॥**

पूर्वरूपमाह—**हृत्कम्प** इत्यादि । **शून्यता**—हृदयस्य, **मूर्च्छा**=मनोमोहः, **प्रमूढता** = इन्द्रियमोहः, **तस्मिन्** = अपस्मारे, **भविष्यति** = उत्पत्स्यमाने सति ॥ ३ ॥

वातजरूपं—**कम्पते प्रदशेद्दन्तान् फेनोद्वामी श्वसित्यपि ।**
**परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥ ४ ॥**

वातिकमाह—**कम्पत** इत्यादि । **अनिलात्**=वाताद्, दन्तान्प्रदर्शेत्, **श्वसिति**=खरश्वासो भवति, परुषादिरूपाणि च पश्यति ॥ ४ ॥

पित्तजरूपं—**पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शकः ।**
**सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिकः ॥ ५ ॥**

पैत्तिकमाह—**पीते**त्यादि । **सतृष्णोष्णानलव्याप्तलोकदर्शी**=तृष्णया सहितः सतृष्णः स चासावु ष्णश्चेति तथा अनलव्याप्तं लोकं पश्यतीत्यनलव्याप्तलोकदर्शी सतृष्णोष्णश्चासा वनलव्याप्तलोकदर्शी चेति तथाभूतः ॥ ५ ॥

कफजरूपं—**शुक्लफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः ।**
**पश्येच्छुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात् ॥ ६ ॥**

श्लैष्मिकमाह—**शुक्ले**त्यादि । **शीतहृष्टाङ्गजः**=शीतेन रोमाञ्चयुक्तः, **चिरात्**=विलम्बेन, मुच्यते रोगादिति शेषः ॥ ६ ॥

त्रिदोषजरूपं **सर्वैरेतः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः ।**
असाध्यरूपं—**अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥ ७ ॥**
**प्रस्फुरन्तं सुबहुशः क्षीणं प्रचलितभ्रुवम् ।**
**नेत्राभ्यां च विकुर्वाणमपस्मारो विनाशयेत् ॥ ८ ॥**

असाध्यलक्षणमाह—**प्रस्फुरन्त**मित्यादि । **प्रस्फुरन्तं**=वेपमानम्, प्रचलितभ्रुवं नेत्राभ्यां **विकुर्वाणं**=विकृतिमासादयन्तम्, **क्षीणं**=शक्तिहीनम्॥८॥

वेगकालाः—**पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः ।**
**अपस्माराय कुर्वन्ति वेगं किञ्चिदथान्तरम् ॥ ९ ॥**

अपस्मारप्रकोपकालमाह—**पक्षाद्वे**त्यादि । कुपिताः, **मलाः**=वातपित्तकफाः, पक्षाद्वातिकः, द्वादशाहात्पैत्तिकः, मासाच्छ्लैष्मिकः, **किञ्चिदथान्तरम्**=उक्तकालादर्वागपि, दोषोच्छ्रायवशाद् वेगं कुर्वन्ति ॥ ९ ॥

सदाऽवेगे **देवे वर्षत्यपि यथा भूमौ बीजानि कानि चित् ।**
हेतुः— **शरदि प्रतिरोहन्ति तथा व्याधिसमुच्छ्रयाः ॥ १० ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने एकविंशमपस्मार-निदानं समाप्तम् ॥ २१ ॥**

ननु वेगं कृत्वाऽपस्मारारम्भको दोषः सर्वदा वेगारम्भको न भवति, निवर्त्तते तत्कस्माद्धेतोरित्यत आह—**देवे वर्षती**त्यादि । कानि चिद् बीजानि न सर्वाणि, **देवे**=पर्जन्ये, वर्षत्यपि सति **शरदि**=कालविशेष एव **प्रतिरोहन्ति**=

अङ्कुरीभवन्ति ( न सर्वदा ) तथा **व्याधिसमुच्छ्रयाः**=रोगसमुदायाः, अपि समयविशेषमासाद्यैवोत्पद्यन्ते ॥ १० ॥

इति सुधायामपस्मारनिदानम् ।

---

## अथ द्वाविंशं वातव्याधि-निदानम् ॥ २२ ॥

कारणं—**रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः ।**
**विषमादुपचाराच्च दोषासृक्स्रावणादपि ॥ १ ॥**
**लङ्घनप्लवनात्यध्वव्यायामादिविचेष्टितैः ।**
**धातूनां सङ्क्षयाच्चिन्ताशोकरोगातिकर्षणात् ॥ २ ॥**
**वेगसन्धारणादामादभिघातादभोजनात् ।**
**मर्माबाधाद्गजोष्ट्राश्वशीघ्रयानापतंसनात् ॥ ३ ॥**
सम्प्राप्तिः—**देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली ।**
**करोति विविधान् व्याधीन् सर्वाङ्गैकाङ्गसंश्रयान् ॥ ४ ॥**

वातव्याधिविकाराणामपस्मारवद्वेगसम्पादकत्वादपस्मारानन्तरं वातव्याध्यारम्भः । तस्य सम्प्राप्तिपूर्वकं निदानमाह—**रूक्षे**त्यादि । रूक्षेत्यादिभिः कारणकदम्बैः कुपितो बली वायुः, रिक्तानि स्रोतांसि पूरयित्वा सर्वाङ्गैकाङ्गसंश्रयान् व्याधीन् करोतीत्यन्वयः । **व्यवायो**=मैथुनम् , **विषमादुपचाराद्**=देशकालादिविरुद्धासात्म्याचारात्, **दोषासृक्स्रावणाद्**=दोषाणां=वातादीनाम् , **असृजो**=रक्तस्य चातिनिःसरणात् , **आमाद्**=आमरसात् , **अपतंसनाद्**=गजादिशीघ्रयानपतनात् । ननु कोऽयं वातव्याधिर्नाम—वातश्चासौ व्याधिर्वातव्याधिरथवा वातजो व्याधिर्वातव्याधिरिति न प्रथमः स्वस्थेष्वप्यतिप्रसक्तेः, न द्वितीयोऽपि ज्वरादिरोगेषु तत्सम्भवात् तस्माद् वातोत्पन्नोऽसाधारणो व्याधिर्वातव्याधिरिति तेनोक्तस्थले दोषाभावः ॥ १–४ ॥

पूर्वरूपम्-**अव्यक्तं लक्षणं तेषां पूर्वरूपमिति स्मृतम् ।**
**आत्मरूपं तु यद्व्यक्तमपायो लघुता पुनः ॥ ५ ॥**

**पूर्वरूपमाह—अव्यक्त**मित्यादि । **तेषां**=वातविकाराणाम् , **अव्यक्तम्**=अविस्पष्टं, लक्षणं पूर्वरूपं स्मृतम् । यद् **व्यक्तं**=स्पष्टं तदा, **आत्मरूपम्**=वातव्याधेः स्वरूपम् ॥ ५ ॥

वातप्रकोपेण सङ्कोचः पर्वणां स्तम्भो भङ्गोऽस्थ्नां पर्वणामपि ।
संभवन्तो रोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः ॥ ६ ॥
रोगाः— खाञ्ज्यपाङ्गुल्यकुब्जत्वं शोथोऽङ्गानामनिद्रता ।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता ॥ ७ ॥
शिरोनासाऽक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम् ।
भेदस्तोदोऽतिराक्षेपो मुहुश्चायास एव च ॥ ८ ॥
एवंविधानि रूपाणि करोति कुपितोऽनिलः ।
हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत् ॥ ९ ॥

कुपितस्य वायोर्नानाविधानि कार्याणि वर्णयति—**सङ्कोच** इत्यादिना । पर्वणां संकोचः स्तम्भोऽपि पर्वणामेव । **शिरोग्रहः**=मस्तकपीडा, **खाञ्ज्यं**=खञ्जता, **पाङ्गुल्यं**=पङ्गुता, **स्पन्दनं**=गात्रकम्पनम्, **सुप्तता**=स्पर्शहानिः, **हुण्डनम्**=अन्तः प्रवेशो वक्रता वा । हेतुविशेषाद्रोगकृद्, यथा—श्लेष्मावृतो मन्यास्तम्भकारी । स्थानविशेषाद्रोगकृद् यथा—पक्वाशयस्थोऽन्त्रकूजादि ॥६–९॥

कोष्ठवायु- तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः ।
रोगः— ब्रध्नहृद्रोगगुल्मार्शःपार्श्वशूलं च मारुते ॥ १० ॥

तत्तत्स्थानविशेषाधिष्ठितानां वातानां लक्षणान्याह—**तत्रे**त्यादिना । **मूत्रवर्चसोः**=मूत्रमलयोः, **निग्रहः**=अवरोधः ॥ १० ॥

सर्वाङ्गवात-सर्वाङ्गकुपिते वाते गात्रस्फुरणभञ्जनम् ।
रोगः— वेदनाभिः परीताश्च स्फुटन्तीवास्य सन्धयः ॥ ११ ॥
गुदवात- ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः ।
रोगः— जङ्घोरुत्रिकपात्पृष्ठरोगशोषौ गुदे स्थिते ॥ १२ ॥
आमाशय- रुक् पार्श्वोदरहृन्नाभेस्तृष्णोद्गारविषूचिकाः ।
वातरोगः—कासः कण्ठास्यशोषश्च श्वासश्चामाशयस्थिते ॥ १३ ॥

**स्फुरणं**=कम्पनं, **भञ्जनं**=पीडा । **परीता**=व्याप्ता ॥ ११–१३ ॥

पक्वाशयवा-पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च ।
तरोगः— कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ १४ ॥

**त्रिकवेदनां**=शिरोग्रीवासन्धिस्त्रिकम्, तत्र वेदनां=पीडाम् ॥ १४ ॥

इन्द्रियवातरोगः—श्रोत्रादिष्विन्द्रियवधं कुर्याद् दुष्टसमीरणः ॥ १५ ॥
त्वग्गतवात-त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते ।
रोगः— आतन्यते सरागा च पर्वरुक् त्वग्गतेऽनिले ॥ १६ ॥

**इन्द्रियवधं**=करणासामर्थ्यम् , **समीरणो**=वायुः ॥ १५-१६ ॥

रक्तगतवातः-**रुजस्तीव्राः ससन्तापा ववर्ण्यं कृशताऽरुचिः ।**
**गात्रे चारुंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले ॥ १७ ॥**

मांसमेदोगत-**गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा ।**
वातः— **सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले ॥ १८ ॥**

अस्थिमज्ज- **भेदोऽस्थिपर्वणां सन्धिशूलं मांसबलक्षयः ।**
वातः— **अस्वप्नः सतता रुक् च मज्जास्थिकुपितेऽनिले ॥ १९ ॥**

**अरूंषि**=व्रणाः । **असृग्गते**=रक्तप्राप्ते ॥ १७-१९ ॥

शुक्रगतवातः—**क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा ।**
**विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः ॥ २० ॥**

**शुक्रं मुञ्चति**=वीर्यं पातयति ॥ २० ॥

सिरागतवातरागः—**कुर्यात्सिरागतः शूलं सिराऽऽकुञ्चनपूरणम् ॥ २१ ॥**

**सिऽऽराकुञ्चनपूरणम्**=सिराया आकुञ्चनं=संकोचः पूरणं=स्थूलता २१

स्नायुगतवात-**स बाह्याभ्यन्तरायामं खल्लीं कौब्ज्यमथापि वा ।**
रोगः— **सर्वाङ्गैकाङ्गरोगांश्च कुर्यात्स्नायुगतोऽनिलः ॥ २२ ॥**

खल्लीं=वातव्याधिविशेषम् ॥ २२ ॥

सन्धिगतवातरोगः—**हन्ति सन्धिगतः सन्धीन् शूलाटोपौ करोति च ॥२३॥**

**( प्राणोदानौ समानश्च व्यानश्चापान।एव च ।**
**स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् ॥ )**

पित्तकफावृतानां क्रमेणप्राणादिवायूनां लक्षणानि—

**प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते ।**
**दौर्बल्यं सदनं तन्द्रा वैरस्यं च कफावृते ॥**
**उदाने पित्तयुक्ते तु दाहो मूर्च्छा भ्रमः क्लमः ।**
**अस्वेदहर्षौ मन्दोऽग्निः शीतता च कफावृते ॥**
**स्वेददाहौष्ण्यमूर्च्छाः स्युः समाने पित्तसंवृते ।**
**कफेन सक्ते विण्मूत्रे गात्रहर्षश्च जायते ॥ २४ ॥**
**अपाने पित्तयुक्ते तु दाहौष्ण्यं रक्तमूत्रता ।**
**अधः काये गुरुत्वं च शीतता च कफावृते ॥ २५ ॥**
**व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः ।**
**स्तम्भनो दण्डकश्चापि शूलशोथौ कफावृते ॥ २६ ॥**

पित्तकफावृतानां प्राणादिपञ्चविधानां पवनानां लक्षणान्याह—**प्राण** इत्यादिना । **वरस्यं**—मुखस्य स्वादाभावः, **विण्मूत्रे सक्ते** मूत्रवर्चसोरवरोधः, **दण्डकः**—लगुडवत्स्तम्भः ॥ २४–२६ ॥

## अथ वाग्भटोक्तं द्वाविंशतिविधं वायोरावरणम्—

वायोरावरणं चातो बहुभेदं प्रचक्षते । लिङ्गं **पित्तावृते** दाहस्तृष्णा शूलं भ्रमस्तमः ॥ १ ॥ कट्वम्लैश्चाम्ललवणैर्विदाहः शीतकामिता । शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम् ॥ २ ॥ लङ्घनायासरूक्षोष्ण—कामिता च **कफावृते** । **रक्तावृते** सदाहार्त्तिस्त्वङ्मांसान्तरयोर्भृशम् ॥ ३ ॥ भवेत् सरागः श्वयथुर्जायन्ते मण्डलानि च । **मांसेन** कठिनः शोफो विवर्णः पिडिकास्तथा ॥ ४ ॥ हर्षः पिपीलिकानां च सञ्चार इव जायते । चलः स्निग्धो मृदुः शीतः शोफो गात्रेष्वरोचकः ॥ ५ ॥ आढ्यवात इति ज्ञेयः स कृच्छ्रो **मेदसाऽऽवृते** । स्पर्शम**स्थ्यावृते**ऽत्युष्णं पीडनं चाभिनन्दति ॥ ६ ॥ सूच्येव तुद्यतेऽत्यर्थमङ्गं सीदति शूल्यते । **मज्जावृते** विनमनं जृम्भणं परिवेष्टनम् ॥ ७ ॥ शूलं च पीड्यमानेन पाणिभ्यां लभते सुखम् । **शुक्रावृते**ऽतिवेगो वा न वा निष्फलताऽपि वा ॥ ८ ॥ भुक्ते कुक्षौ रुजा जीर्णे शाम्यत्य**न्नावृते**ऽनिले । मूत्राप्रवृत्तिराध्मानं बस्तौ **मूत्रावृते** भवेत् ॥९ ॥ **विडावृते** विबन्धोऽधः स्वस्थाने परिकृन्तति । व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः ॥ १० ॥ शकृत्पीडितमन्नेन दुःखं शुष्कं चिरात् सृजेत् । **सर्वधात्वावृते** वायौ श्रोणीवङ्क्षणपृष्ठरुक् ॥ ११ ॥ विलोमो मारुतोऽस्वस्थं हृदयं पीड्यतेऽति च । भ्रमो मूर्च्छा रुजा दाहः **पित्तेन** प्राण **आवृते** ॥ १२ ॥ विदग्धेऽन्ने च वमन**मुदाने**ऽपि भ्रमादयः । दाहोऽन्तररुजा भ्रंशो दाहो **व्यानेन** सर्वगः ॥ १३ ॥ क्लमोऽङ्गचेष्टासङ्गश्च संतापः सहवेदनः । **समान**ऊष्मोपहतिरतिस्वेदोऽरतिः सतृट् ॥ १४ ॥ दाहश्च स्या**दपाने** तु मले हारिद्रवर्णता । रुजोऽतिवृद्धिस्तापश्च योनिमेहनपायुषु ॥ १५ ॥ **श्लेष्मणा त्वावृते प्राणे** सादस्तन्द्राऽरुचिर्वमिः । ष्ठीवनक्षवथूद्गारनिश्वासोच्छ्वाससंग्रहः ॥१६॥ **उदाने** गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः । बलवर्णप्रणाशश्च **व्याने** पर्वास्थिवाग्ग्रहः ॥ १७ ॥ गुरुताऽङ्गेषु सर्वेषु स्खलितं च गतौ भृशम् । **समाने**ऽतिहिमाङ्गत्वमस्वेदो मन्दवह्निता ॥ १८ ॥ **अपाने** सकफं मूत्रशकृतः स्यात्प्रवर्त्तनम् । इति द्वाविंशतिविधं वायोरावरणं विदुः ॥ १९ ॥ प्राणादयस्तथाऽन्योन्यमावृण्वन्ति यथाक्रमम् । सर्वेऽपि विंशतिविधं विद्यादावरणं च तत् ॥ २० ॥ निश्वासो-

च्छ्वाससंबाधः प्रतिश्यायः शिरोग्रहः । हृद्रोगो मुखशोषश्च **प्राणेनोदान आवृते** ॥ २१ ॥ **उदानेनावृते प्राणे** वर्णौजोबलसंक्षयः । दिशाऽनया च विभजेत्सर्वमावरणं भिषक् ॥ २२ ॥

इति द्वाविंशतिविधं वायोरावरणं समाप्तम् । )

आक्षेपकः—**यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः ।**
**तदाऽऽक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः ॥**
**मुहुर्मुहुश्चाक्षेपणादाक्षेपक इति स्मृतः ॥ २७ ॥**

आक्षेपकलक्षणमाह—यदेत्यादि । देहम् **आक्षिपति**=सञ्चालयति । निरुक्तिमाह—मुहुर्मुहुराक्षेपणादाक्षेपक इति ॥ २७ ॥

अपतन्त्रकः—**क्रुद्धः स्वैः कोपनर्वायुः स्थानादूर्ध्वं प्रपद्यते ॥ २८ ॥**
**पीडयन् हृदयं गत्वा शिरःशङ्खौ च पीडयन् ।**
**धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा ॥ २९ ॥**
**स कृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः ।**
**कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः ॥ ३० ॥**

अपतानकः—**दृष्टिं संस्तभ्य संज्ञां च हत्वा कण्ठेन कूजति ।**
**हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ॥**
**वायुना दारुणं प्राहुरेके तदपतानकम् ॥ ३१ ॥**

अपतन्त्रकापतानकावाह—क्रुद्ध इत्यादिना । **स्थानात्**=पक्वाशयाद्, **ऊर्ध्वं**=हृदयम्, **स्तब्धाक्षः**=स्तब्धनेत्रः, **निमीलकः**=निमीलितनेत्रः, वायुना ( कर्त्रा ) हृदि मुक्ते स्वास्थ्यं वृते=आवृते, हृदये मोहं याति॥२८–३१॥

दण्डापतानकः—**कफान्वितो भृशं वायुस्तास्वेव यदि तिष्ठति ।**
**दण्डवत्स्तम्भयेद् देहं स तु दण्डापतानकः ॥ ३२ ॥**

धनुःस्तम्भः—**धनुस्तुल्यं नमेद्यस्तु स धनुःस्तम्भसंज्ञकः ॥ ३३ ॥**

आभ्यन्तरायामः—**अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः ।**
**स्नायुप्रतानमनिलो यदाऽऽक्षिपति वेगवान् ॥ ३४ ॥**
**विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन् ।**
**अभ्यन्तरं धनुरिव यदा नमति मानवम् ॥**
**तदाऽस्याभ्यन्तरायामं कुरुते मारुतो बली ॥ ३५ ॥**

बाह्यायामः—**बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च ।**
**तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ॥ ३६ ॥**

आभ्यन्तरायामबहिरायामयोर्विशेषलक्षणमाह—अङ्गुलीत्यादि । **स्नायुप्रतानं**=स्नायुजालं, स्नायुपदं शिराकण्डरयोरप्युपलक्षणम्, तेन सिराकण्डरयोरपि संग्रहः । **आभ्यन्तरायामं**=क्रोडे नतम्, **बाह्यायामं**=पृष्ठे नतम्, अत्रैव कुब्जस्यान्तर्भावः ॥ ३२–३६ ॥

अभिघातजा-**कफपित्तान्वितो वायुर्वायुरेव च केवलः ।**
क्षेपः— **कुर्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ॥ ३७ ॥**

तदसाध्यरूपं **गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ।**
**अभिघातनिमित्तश्च न सिध्यत्यपतानकः ॥ ३८ ॥**

असाध्यत्वमाह—**गर्भपातनिमित्तः**=आकालिकगर्भपातहेतुकः, **शोणितस्य**=रक्तस्य, चातिस्रवाज्जातः, **अभिघातनिमित्तः**=काष्ठलोष्ठादिप्रहारहेतुकः, अपतानको न सिद्ध्यतीति ॥ ३७–३८ ॥

पक्षाघातः—**गृहीत्वाऽर्धं तनोर्वायुः सिराः स्नायूर्विशोष्य च ।**
**पक्षमन्यतरं हन्ति सन्धिबन्धान्विमोक्षयन् ॥ ३९ ॥**
**कृत्स्नोऽर्धकायस्तस्य स्यादकर्मण्यो विचेतनः ।**
**एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः ॥ ४० ॥**

पक्षवधमाह—**गृहीत्वेत्यादि** । वायुः, **तनोः**=शरीरस्य, अर्धं गृहीत्वा सिराः स्नायूर्वा विशोष्य सन्धिबन्धान् **विमोक्षयन्**=श्लथीकुर्वन्, **अन्यतरं**=वामं दक्षिणं वा पक्षं हन्ति, **कृत्स्नोऽर्धकायः**=सकलार्धदेहः, **तस्य**=रोगिणः, **अकर्मण्यः**=निष्क्रियः, **विचेतनः**=निःसंज्ञश्च भवति, तमेकाङ्गरोगं वदन्ति केचिद्, अन्ये पक्षवधं, **विदुः**=आमनन्ति ॥ ३९–४० ॥

उभयपक्षाघातः-**सर्वाङ्गरोगस्तद्वच्च सर्वकायाश्रितेऽनिले ॥ ४१ ॥**
तत्रापरदोष-**दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ।**
सम्बन्धः—**शैत्यशोथगुरुत्वानि तस्मिन्नेव कफान्विते ॥ ४२ ॥**
तत्साध्या-**शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।**
साध्ये—**साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम् ॥ ४३ ॥**

पित्तसमन्विते दाहादयः कफसमन्विते शैत्यादयो भवन्ति । पक्षवधस्य साध्यासाध्यलक्षणमाह-**शुद्धेत्यादिना** । **शुद्धवातहतं**=केवलानिलारब्धं, **कृच्छ्रसाध्यतमम्**, **अन्येन**=कफेन पित्तेन वा, संसृष्टमसाध्यम् ॥ ४२–४३ ॥

( गर्भिणीसूतिकाबालवृद्धक्षोणेष्वसृक्स्रुते ।
पक्षाघातं परिहरेद् वेदनारहितो यदि ) ॥ ४४ ॥

अर्दितरोगः—उच्चर्व्याहरतोऽत्यर्थं खादतः कठिनानि वा ।
हसतो जृम्भतो वाऽपि भाराद्विषमशायिनः ॥ ४५ ॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः ।
अर्दयत्यनिलो वक्त्रमर्दितं जनयत्यतः ॥ ४६ ॥
वक्रीभवति वक्त्रार्धं ग्रीवा चाप्यपवर्तते ।
शिरश्चलति वाक्सङ्गो नेत्रादीनां च वैकृतम् ॥
ग्रीवाचिबुकदन्तानां तस्मिन्पार्श्वे च वेदना ॥ ४७ ॥

अर्दितमाह—**उच्चैरित्यादिना**। अत्यर्थम्, **उच्चैर्व्याहरतः**=उच्चस्वरेण भाषमाणस्य, कठिनानि द्रव्याणि खादतः, **भाराद्**=गुरुपदार्थोद्वहनात्, **विषमशायिनः**=उच्चावचभूमिशयानस्य, पुंसः शिरोनासाऽऽदिस्थानसंस्थितः पवनः, **वक्त्रम्**=मुखम्, **अर्दयति**=पीडयति, तेन वक्त्रार्धं वक्रीभवति, **ग्रीवा**=शिरोधराऽपि, **अपवर्तते**=वक्रीभवति, शेषं सुबोधम् ॥ ४५–४७ ॥

( यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलम् ।
वायुरूर्ध्वं त्वचि स्वापस्तोदो मन्याहनुग्रहः ) ॥ ४८ ॥
तमर्दितमिति प्राहुर्व्याधिं व्याधिविचक्षणाः ॥ ४९ ॥

तदसाध्यता-क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः ।
न सिध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य च ॥ ५० ॥

अर्दितस्यासाध्यलक्षणमाह—**क्षीणस्येत्यादि**। **प्रसक्ताव्यक्तभाषिणः**=प्रसक्तम्=अप्रवृत्तम्, अव्यक्तं=प्रपीडिताक्षरं भाषितुं शीलं यस्य स तथा। **त्रिवर्षम्**=अतीताब्दत्रयम्, **त्रयाणां**=मुखनासाचक्षुषाञ्च **वर्षः**=स्रवणं यत्र तत्तथेति वा। **वेपनस्य**=कम्पयुक्तशरीरस्य ॥ ५० ॥

स्वास्थ्यरूपं-गते वेगे भवेत्स्वास्थ्यं सर्वेष्वाक्षेपकादिषु ॥ ५१ ॥

हनुग्रह-—जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः ।
कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम् ॥ ५२ ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुग्रहः स तेन स्यात्कृच्छ्राच्चर्वणभाषणम् ॥ ५३ ॥

हनुग्रहमाह—**जिह्वेत्यादि**। **हनुमूलस्थः**=कपोलमूलाधिष्ठितः, **स्रंसयि-**

**त्वा**=शिथिलयित्वा, **विवृतास्यत्वं**=प्रसारिताननत्वं, **संवृतास्यतां**=सङ्कुचिताननत्वम् ॥ ५२-५३ ॥

मन्यास्तम्भः-**दिवास्वप्नासमस्थानविवृतोर्ध्वनिरीक्षणैः ।**

**मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणाऽऽवृतः ॥ ५४ ॥**

मन्यास्तम्भमाह—**दिवे**त्यादि । **असमस्थानम्**=उच्चावचप्रदेशः, **विवृतोर्ध्वनिरीक्षणः**=विष्फारितनयनावलोकनैः ॥ ५४ ॥

जिह्वास्तम्भः-**वाग्वाहिनीसिरासंस्थो जिह्वां स्तम्भयतेऽनिलः ।**

**जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ॥ ५५ ॥**

जिह्वास्तम्भमाह—**वागि**त्यादि । **वाग्वाहिनीसिरासंस्थः**=शब्दवाहिनीसिराऽधिष्ठितः, **अनीशता**=असमर्थत्वम् ॥ ५५ ॥

सिराग्रहः—**रक्तमाश्रित्य पवनः कुर्यान्मूर्धधराः सिराः ।**

**रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्यात् सिराग्रहः ॥ ५६ ॥**

सिराग्रहमाह-**रक्त**मित्यादि । **मूर्धधराः**=शिरोधराः, ग्रीवागता इति यावत् ५६

गृध्रसी—**स्फिक्पूर्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात् ।**

**गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः ॥**

**वाताद्वातकफात्तन्द्रा गौरवारोचकान्विता ॥ ५७ ॥**

गृध्रसीमाह—**स्फिक्पूर्वे**त्यादि । वाताद् गृध्रसी स्फिक्पूर्वा स्तम्भरुक्तोदैः क्रमात् कट्यादिकं गृह्णाति, मुहुः **स्पन्दते**=कम्पते च । स्फिक् पूर्वा=प्रथमतः स्तम्भरुजाऽऽदिभिर्यस्याः सा **स्फिक्पूर्वे**ति ॥ ५७ ॥

**( वातजायां भवेत्तोदो देहस्यापि प्रवक्रता ।**

**जानुकट्यूरुसन्धीनां स्फुरणं स्तब्धता भृशम् ॥ ५८ ॥**

**वातश्लेष्मोद्भवायां तु निमित्तं वह्निमार्दवम् ।**

**तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च ) ॥ ५९ ॥**

विश्वाची—**तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः ।**

**बाह्वोः कर्मक्षयकरी विश्वाची चेति सोच्यते ॥ ६० ॥**

विश्वाचीमाह—**तल**मित्यादि । **तलं**=हस्तोर्ध्वप्रदेशः, **बाहुपृष्ठतः**=बाह्वोः पृष्ठं बाहुपृष्ठं ततः, **बाह्वोः कर्मक्षयकरी**=बाह्वोरित्यत्र द्वित्वं नियमाविवक्षितम्, एकबाहावपि तत्सम्भवात् ॥ ६० ॥

क्रोष्टुकशीर्षः-**वातशोणितजः शोथो जानुमध्ये महारुजः ।**

**ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत् ॥ ६१ ॥**

क्रोष्टुकशीर्षमाह—**वातेत्यादि। क्रोष्टुकशीर्षवत्**=जम्बुकमस्तकवत् , स्थूलः शोथो वातरक्तजः क्रोष्टुकशीर्षाभिधानः ॥ ६१ ॥

खञ्जः पङ्गुश्च—**वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा ।**
**खञ्जस्तदा भवेज्जन्तुः, पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥ ६२ ॥**

खञ्जमाह—**वायुरित्यादि । सक्थ्नः**=जङ्घायाः, **कण्डरां**=स्थूलसिराम् , **आक्षिपेद्**=ईषत्क्षिपेत् , यदा खञ्जः,द्वयोः सक्थ्नोर्वधात् पङ्गुः ॥ ६२ ॥

कलायखञ्जः—**प्रक्रामन्वेपते यस्तु खञ्जन्निव च गच्छति ।**
**कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ॥ ६३ ॥**

खञ्जविशेषमाह—**प्रक्रामन्नित्यादि । प्रकामन्**=गमनमारभमाणः, **मुक्तसन्धिप्रबन्धनं**=शिथिलीकृतसन्धिबन्धनम् ॥ ६३ ॥

वातकण्टकः—**रुक् पादे विषमन्यस्ते श्रमाद्वा जायते यदा ।**
**वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ॥ ६४ ॥**

पाददाहः—**पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः ।**
**विशेषतश्चङ्क्रमतः पाददाहं तमादिशेत् ॥ ६५ ॥**

पादहर्षः—**हृष्येते चरणौ यस्य भवेतां चापि सुप्तकौ ।**
**पादहर्षः स विज्ञेयः कफवातप्रकोपतः ॥ ६६ ॥**

अंसशोषोऽव-**अंसदेशस्थितो वायुः शोषयेदंसबन्धनम् ।**
बाहुकश्च—**सिराश्चाकुञ्च्य तत्रस्थो जनयेदवबाहुकम् ॥ ६७ ॥**

मूकमिन्मिन-**आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ।**
गद्गदाः—**नरान्करोत्यक्रियकान्मूकमिन्मिनगद्गदान् ॥ ६८ ॥**

मूकादीनाह—**आवृत्येत्यादि । अक्रियकान्**=शब्दव्यापारासमर्थान् , **मूकमिन्मिनगद्गदान्**—मूकः=अवचनः , मिन्मिनः=सानुनासिकसर्ववचनः, गद्गदः=लुप्तपदव्यञ्जनाभिधायी ॥ ६८ ॥

तूनीरोगः—**अधो या वेदना याति वर्चोमूत्राशयोत्थिता ।**
**भिन्दतीव गुदोपस्थं सा तूनी नाम नामतः ॥ ६९ ॥**

तूनीमाह—**अध इत्यादि ।** या वेदना अधो=गुदोपस्थं, **वर्चोमूत्राशयोत्थिता**=पक्वाशयोत्पन्ना सती याति गुदोपस्थं **भिन्दतीव**=भेदं कुर्वतीव, सा नामतस्तूनीति कथ्यते ॥ ६९ ॥

प्रतितूनी—**गुदोपस्थोत्थिता या तु प्रतिलोमं प्रधाविता ।**
**वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते ॥ ७० ॥**

प्रतितूनीमाह—**गुदे**त्यादि । या **प्रतिलोमम्**=ऊर्ध्वं **वेगैः**=वातकृतोद्गमैः, पक्काशयं याति सा प्रतितूनीति ॥ ७० ॥

आध्मानरोगः—**साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् ।**
**आध्मानमिति तं विद्याद्घोरं वातनिरोधजम् ॥ ७१ ॥**

आध्मानमाह—**साटोप**त्यादि । आटोपेन सह वर्त्तत इति **साटोपम्** । **आध्मातं**=पवनपरिपूर्णचर्मपुटकस्थानीयम् , **घोरं**=कष्टप्रदम् ॥ ७१ ॥

प्रत्याध्मान-**विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।**
रोगः—**प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलम् ॥ ७२ ॥**

प्रत्याध्मानमाह—आमाशयोत्थितं, **तदेव**=आध्मानमेव, **विमुक्तपार्श्वहृदयं**=विमुक्तं पार्श्वहृदयं येन तत्तथा, **कफव्याकुलितानिलं**=श्लेष्मावृतपवनम् ॥ ७२ ॥

वाताष्ठीला—**नाभेरधस्तात्संजातः संचारी यदि वाऽचलः ।**
**अष्ठीलावद्घनो ग्रन्थिरूर्ध्वमायत उन्नतः ।**
**वाताष्ठीलां विजानीयाद्बहिर्मार्गावरोधिनीम् ॥ ७३ ॥**

अष्ठीलामाह—**नाभेरि**त्यादि । नाभेः, **अधस्तात्**=अधोभागे, **संचारी**=चलः, अचलो वा **अष्ठीलावत्**=अष्ठीला उत्तरापथे वर्तुलः पाषाणविशेषः, वर्तुला कर्मकारस्य लौहपात्री वा, **बहिर्मार्गावरोधिनीं**=मलमूत्रानिलावरोधिनीम् ॥ ७३ ॥

प्रत्यष्ठीला—**एतामेव रुजोपेतां वातविण्मूत्ररोधिनीम् ।**
**प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थिताम् ॥ ७४ ॥**

मूत्रावरोधः—**मारुतेऽनुगुणे वस्तौ मूत्रं सम्यक् प्रवर्त्तते ।**
**विकारा विविधाश्चात्र प्रतिलोमे भवन्ति हि ॥ ७५ ॥**

कम्पवातः ख-**सर्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः ।**
ल्लीरोगश्च—**खल्ली तु पादजङ्घोरुकरमूलावमोटनी ॥ ७६ ॥**

ऊर्ध्ववातः—**अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन वा ।**
**करोत्युद्गारबाहुल्यमूर्ध्ववातः स उच्यते ॥ ७७ ॥**

अनुक्तवातरो-**स्थाननामानुरूपैश्च लिङ्गैः शेषान्विनिर्दिशेत् ।**
गविवेकः—**सर्वेष्वेतेषु संसर्गं पित्ताद्यैरुपलक्षयेत् ॥ ७८ ॥**

साध्यासाध्य-**हनुस्तम्भार्दिताक्षेपपक्षाघातापतानकाः ।**
विवेकः—**कालेन महताऽऽव्यानां यत्नात्सिध्यन्ति वा न वा ॥ ७९ ॥**

साध्यदशा—**नरान् बलवतस्त्वेतान् साधयेन्निरुपद्रवान्** ॥ ८० ॥
तदसाध्यदशा-**विसर्पदाहरुक्सङ्गमूर्च्छारुऽरुच्यग्निमार्दवैः ।**
**क्षीणमांसबलं वाता घ्नन्ति पक्षवधादयः** ॥ ८१ ॥
पुनश्च—**शूनं सुप्तत्वचं भग्नं कम्पाऽऽमाननिपीडितम् ।**
**रुजाऽऽर्त्तिमन्तं च नरं वातव्याधिर्विनाशयेत्** ॥ ८२ ॥

वातोपद्रवानाह—**विसर्पे**त्यादि । **वाताः**=पवनविकाराः, पक्षवधादयो-विसर्पादिभिः क्षीणबलमांसं घ्नन्ति । **शूनं**=शोथोपेतं, **सुप्तत्वचं**=स्पर्शान-भिज्ञ त्वचं, **भग्नं**=भग्नास्थिमन्तं, **रुजाऽऽर्त्तिमन्तं**=वेदनाऽतिशयोपेतम् ८१–८२

प्रकृतिस्थवा-**अव्याहतगतिर्यस्य स्थानस्थः प्रकृतिस्थितः ।**
तद्रूपम्—**वायुः स्यात्सोऽधिकं जीवेद्वीतरोगः समाः शतम्** ॥ ८३ ॥

**इति श्रीमाधवकरविरचिते माधवनिदाने द्वाविंशं वातव्याधि-निदानं समाप्तम् ॥ २२ ॥**

प्रकृतिस्थस्य पञ्चविधस्यानिलस्य लिङ्गं कार्यं चाह—**अव्याहते**त्यादि । **यस्य**=पुरुषस्य, **अव्याहतगतिः**=अप्रतिहतमार्गः, **स्थानस्थः**=स्वाश्र-यस्थः, **प्रकृतिस्थितः**=स्वाभाविकः, नातिवद्धो नातिक्षीणः, स्यात्स पुरुषोऽ-धिकं **वीतरोगः**=नीरोगः, सन् शतं **समाः**=वर्षाणि, जीवेत । पञ्चदिनाधिकं सविंशं वर्षशतं मनुष्याणां जीवनम्—यथाह, वराहः-"**समाःषष्टिर्द्विघ्ना मनु-जकरिणां पञ्च च निशा**" इत्यादि ॥ ८२ ॥

इति सुधायां वातव्याधिनिदानम् ।

## अथ त्रयोविंशं वातरक्त-निदानम् ॥ २३ ॥

कारणं—**लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।**
**क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः** ॥ १ ॥
**कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः ।**
**दध्यारनालसौवीरशुक्ततक्रसुराऽऽसवैः** ॥
**विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः** ॥ २ ॥
**प्रायशः सुकुमाराणां मिथ्याऽऽहारविहारिणाम् ।**
**स्थूलानां सुखिनां चापि कुप्यते वातशोणितम्** ॥ ३ ॥

वातव्याधिविशेषं वातरक्तमाह—**लवणे**त्यादि । लवणाम्लादिभोजनैस्तथा क्लिन्नशुष्कादिपदार्थोपसेवनैस्तथा कुलत्थादिभिर्दध्यारनालादिभिर्विरुद्धाध्यशना-

दिभिर्वा प्रायशः **सुकुमाराणां**=सुकुमारप्रकृतिकानां पुंसां मिथ्याऽऽहारविहारिणां स्थूलानां सुखिनां वा वातशोणितं कुप्यतीत्यन्वयः। **पिण्याकः**=तिलकल्कः, **निष्पावः**=शिम्बिः, **पललं**=मांसम्, **सुरा**=पैष्टी, **आसवः**= मद्यम्, **विरुद्धाशनं**=क्षीरमत्स्यादि, **अध्यशनं**=भुक्तस्योपरिभुक्तम्, ननु रक्तगतवातस्य वातव्याधावेव **'रुजस्तीव्राः ससन्ताप'** इत्यादिवर्णनात् पुनस्तदभिधानमसङ्गतमिति चेदत्रोच्यते-वातरक्तं हि दुष्टेन वा तेन दुष्टेन रक्तेन च विशिष्टसम्प्राप्तिकं विकारान्तरमेव, रक्तगतवाते तु वात एव दुष्टो रक्तमदुष्टमिति भेदः ॥ १-३ ॥

संप्राप्तिः— **हस्त्यश्वोष्ट्रै र्गच्छतश्चाश्नतश्च विदाह्यन्नं स विदाहोऽशनस्य ।**
**कृत्स्नं रक्तं विदहत्याशु तच्च स्रस्तं दुष्टं पादयोश्चीयते तु ॥४॥**
**तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम् ॥५॥**

सम्प्राप्तिमाह-**हस्त्यश्वे**ति । हस्त्यादिभिर्गच्छतो विदाह्यन्नम्, **अश्नतः**= भुञ्जानस्य, वा पुंसः सोऽशनस्य विदाहः, **कृत्स्नं**=समग्रं, रक्तं विदहति तच्च रक्तं पादयोः, **चीयते**=एकत्रीभवति, इति **तेन**=स्वकारणकुपितेन वायुना **संपृक्तं**=सम्बद्धं, तद्वातरक्तमित्युच्यते, **तत्प्राबल्यात्**=वातप्राबल्यात् ॥४-५॥

**( स्पर्शोद्विग्नौ तोदभेदप्रशोषस्वापोपेतौ वातरक्तेन पादौ ।**
**पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोफौ मृदू च ।६॥**
**कण्डूमन्तौ श्वेतशीतौ सशोफौ पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ।**
**सर्वैर्दुष्टे शोणिते चापि दोषाः स्वं स्वं रूपं पादयोर्दर्शयन्ति) ॥७॥**

पूर्वरूपं— **स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् ।**
**सन्धिशैथिल्यमालस्यं सदनं पिडकोद्गमः ॥ ८ ॥**
**जानुजङ्घोरुकट्यंस-हस्तपादाङ्गसन्धिषु ।**
**निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥ ९ ॥**
**कण्डूः सन्धिषु रुग्भूत्वा भूत्वा नश्यति चासकृत् ।**
**वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम् ॥ १० ॥**

पूर्वरूपमाह—**स्वेदे**त्यादि । **स्वेदः**=घर्मनिर्गमः, अत्यर्थं भवति न वा भवतीति व्याधिमाहात्म्याद् बोद्धव्यम् । **निस्तोदः**=व्यथा, **सुप्तिः**=स्पर्शहानिः, **असकृत्**=पुनः पुनः ॥ ६-१० ॥

वाताधिकवातरक्त— **वातेऽधिकेऽधिकं तत्र शूलस्फुरणभञ्जनम् ।**
लक्षणम् **शोथस्य रौक्ष्यं कृष्णत्वं श्यावता वृद्धिहानयः ॥ ११ ॥**

**धमन्यङ्गुलिसन्धीनां संकोचोऽङ्गग्रहोऽतिरुक् ।**
**शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥ १२ ॥**

वातादिदोषान्तरसंसृष्टस्य वातरक्तस्य लक्षणमाह—**वात** इत्यादिना । शीतद्वेषः, अनुपशयः=शीतेन रोगवृद्धिः, वेपथुः=कम्पः ॥ ११–१२ ॥

रक्ताधिकवातरक्तं—**रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमचिमायते ।**
**स्निग्धरूक्षः शमं नैति कण्डूक्लेदसमन्वितः ॥ १३ ॥**

पित्ताधिकवातरक्तं–**पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा ।**
**स्पर्शासहत्वं रुग्रागः शोथः पाको भृशोष्मता ॥ १४ ॥**

कफाधिकं द्वित्रिदोषजं वातरक्तं—

**कफे स्तैमित्यगुरुता-सुप्तिस्निग्धत्वशीतताः ।**
**कण्डूर्मन्दा च रुग्, द्वन्द्वं सर्वलिङ्गं च संकरात् ॥ १५ ॥**

**चिमचिमायते**=चिमचिमो वेदनाविशेषः **स्तैमित्यम्**=आर्द्रपटावगुण्ठितत्वमिव ॥ १३–१५ ॥

तत्प्रसारप्रकारः—**पादयोर्मूलमास्थाय कदा चिद्धस्तयोरपि ।**
**आखोर्विषमिव क्रुद्धं तद् देहमुपसर्पति ॥ १६ ॥**

पादयोर्जातस्य हस्तादिदेहसम्भवमाह—**पादयो**रित्यादि । **आखोः**=मूषकस्य विषमिव **तद्**=वातरक्तं, **देहं**=हस्तादिदेहम्, **उपसर्पति**=गच्छति ॥ १६ ॥

असाध्यं याप्यं च—**आजानुस्फुटितं यच्च प्रभिन्नं प्रस्रुतं च यत् ।**
**उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥**
**वातरक्तमसाध्यं स्याद्याप्यं संवत्सरोत्थितम् ॥ १७ ॥**

असाध्यलक्षणमाह—**आजान्वि**त्यादि । **आजानु**=जानुपर्यन्तगतम्, **स्फुटितं**=दलितत्वक्, **प्रभिन्नं**=विदीर्णत्वक्, **उपद्रवैः**=प्राणक्षयादिभिरस्वप्नादिभिर्वा, **जुष्टं**सेवितम् ॥ १७ ॥

उपद्रवाः—**अस्वप्नारोचकश्वास-मांसकोथशिरोग्रहाः ॥ १८ ॥**
**संमूर्च्छामदरुक्तृष्णाज्वरमोहप्रवेपकाः ।**
**हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ॥ १९ ॥**
**अङ्गुलीवक्रतास्फोटदाहमर्मग्रहार्बुदाः ।**
**एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वाऽपि यत् ॥ २० ॥**

साध्यासाध्यत्वम्— **अकृत्स्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ।**
**एकदोषानुगं साध्यं नवं, याप्यं द्विदोषजम् ।**

**त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥ २१ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने वातरक्तनिदानं समाप्तम् ॥२३॥**

पुनरसाध्यत्वासाध्यत्वमाह–**अकृत्स्नोपद्रवं**=निखिलोपद्रववर्जितं याप्यम्, **निरुपद्रवम्**=उपद्रवरहितं, साध्यम्, **एकदोषानुगं**=दोषैकसम्बद्धं, नवं वा साध्यमेव, **द्विदोषजं**=दोषद्वयसंसृष्टं, याप्यम्, त्रिदोषजमुपद्रवादिसंयुत-मसाध्यम् ॥ २१ ॥

इति सुधायां वातरक्तनिदानम्।

## अथ चतुर्विंशमूरुस्तम्भ-निदानम् ॥ २४ ॥

कारणं—**शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः ।**
**जीर्णाजीर्णे तथाऽऽयाससंक्षोभस्वप्नजागरैः ॥ १ ॥**

सम्प्राप्तिः—**सश्लेष्ममेदःपवनः साममत्यर्थसञ्चितम् ।**
**अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते ॥ २ ॥**
**सक्थ्यस्थिनी प्रपूर्यान्तः श्लेष्मणा स्तिमितेन च ।**
**तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ ॥ ३ ॥**

तत्स्वरूपं—**परकीयाविव गुरू स्यातामतिभृशव्यथौ ।**
**ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्द्यरुचिज्वरैः ॥ ४ ॥**
**संयुक्तौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः ।**
**तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥ ५ ॥**

ऊरुस्तम्भस्य निदानपूर्विकां सम्प्राप्तिमाह—**शीतेत्यादि** । शीतोष्णादिभिः **सश्लेष्ममेदःपवनः**=सश्लेष्ममेदश्चासौ पवनश्चेति विग्रहः, अत्यर्थसंचितं सामम्, **इतरं दोषं**=पित्तम्, **अभिभूय**=विजित्य, ऊरू चेत् प्रतिपद्यते तदोरू स्तभ्नाति तेनोरू स्तब्धौ शीतौ परकीयाविव ध्यानाङ्गमर्दादिसंयुक्तौ वा स्याताम् । तमूरुस्तम्भमाहुराचार्याः । अपरे चाचार्या आढ्यवातं तमाचक्षते॥१-५॥

पूर्वरूपं—**प्राग्रूपं तस्य निद्राऽतिध्यानं स्तिमितता ज्वरः ।**
**रोमहर्षोऽरुचिश्छर्दिर्जङ्घोर्वोः सदनं तथा ॥ ६ ॥**

अनुपशयः—**वातशङ्किभिरज्ञानात्तस्य स्यात्स्नेहनात्पुनः ।**
**पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा ॥ ७ ॥**
**जङ्घोरुग्लानिरत्यर्थं शश्वच्चादाहवेदने ।**
**पादं च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च ॥ ८ ॥**

**संस्थाने पीडने गत्यां चालने चाप्यनीश्वरः ।**
**अन्यस्यैव हि संभग्नावूरू पादौ च मन्यते ॥ ९ ॥**

अनुपशयमाह—**वातेत्यादि । वातशङ्किभिः**=वातस्य सुप्तिसंकोचकम्पादिलिङ्गदर्शनात्तच्छङ्काऽऽक्रान्तैः, **अज्ञानाद्**=वातरोगोऽयमितिभ्रमात्, **तस्य**=वातरक्तस्य, **स्नेहनात्**= तैलादिमर्दनरूपकार्यसम्पादनात्, **पादयोः सदन**मित्यादिलक्षणानि भवन्ति ॥ ६-९ ॥

साध्यासा- **यदा दाहार्तितोदार्तो वेपनः पुरुषो भवेत् ।**
ध्यता— **ऊरुस्तम्भस्तदा हन्यात्साधयेदन्यथा नवम् ॥ १० ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुर्विंशमूरुस्तम्भ-निदानं-समाप्तम् ॥ २४ ॥**

तदोरुस्तम्भो हन्यात्, पुरुषमिति शेषः । **अन्यथा**=दाहादिलक्षणानाक्रान्तं, **नवं**=नवीनं, **साधयेत्**=चिकित्सेदित्यर्थः ॥ १० ॥

इति सुधायामूरुस्तम्भनिदानम् ।

---

## अथ पञ्चविंशमामवात-निदानम् ॥ २५ ॥

कारणं स- **विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च ।**
म्प्राप्तिश्च— **स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा ॥ १ ॥**
**वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति ।**
**तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते ॥ २ ॥**
**वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः ।**
**स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः ॥ ३ ॥**
**जनयत्याशु दौर्बल्यं गौरवं हृदयस्य च ।**
**व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः ॥ ४ ॥**
**युगपत्कुपितावन्तस्त्रिकसन्धिप्रवेशकौ ।**
**स्तब्धं वा कुरुतो गात्रमामवातः स उच्यते ॥ ५ ॥**

ऊरुस्तम्भे सामवातवर्णनात्तदनन्तरमामवातमाह—**विरुद्धेत्यादि । विरुद्धाहारचेष्टस्य**=विरुद्ध आहारः=क्षीरमत्स्यादि, विरुद्धा चेष्टा च=अजीर्णे व्यायामादि, **श्लेष्मस्थानम्**=आमाशयोरःशिरःकण्ठसन्धिस्थानं, **सोऽन्नजो-रसः**=आमः, स्रोतांसि, **अभिष्यन्दयति**=आर्द्रीकरोति—अतिपिच्छिलत्वात् ।

आमलक्षणं बहुविधं वदन्ति तन्त्रकाराः । तथाहि—**ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् । दुष्टमामाशयगतं रसमामं प्रचक्षते ॥ आमाशयस्थः कायाग्नेर्दौर्बल्याद्विपाचितः । आद्य आहारधातुर्यः स आम इति कीर्त्तितः ॥ अविपक्कमसंयुक्तं दुर्गन्धं बहु पिच्छिलम् । सदनं सर्वगात्राणामाम इत्यभिधीयते ॥ आहारस्य रसः शेषो यो न पक्कोऽग्निलाघवात् । स मूलं सर्वरोगाणामाम इत्यभिधीयते ॥ आममन्नरसं केचित् केचित्तु मलसंचयम् । प्रथमां दोषदुष्टिं च केचिदामं प्रचक्षते"**॥इत्यादि ॥ १–५ ॥

सामान्यरूपम्—**अङ्गमर्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः ।**
**अपाकः शूनताऽङ्गानामामवातस्य लक्षणम् ॥ ६ ॥**

विशेषरूपं—**स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् ।**
**हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु ॥ ७ ॥**
**करोति सरुजं शोथं यत्र दोषः प्रपद्यते ।**
**स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥ ८ ॥**

अतिवृद्धामवातलक्षणमाह—स इत्यादिना । **वृश्चिकैः**=कीटविशेषैः **व्याविद्धः**=दष्ट इव, ॥ ७–८ ॥

उपद्रवाः—**जनयेत्सोऽग्निदौर्बल्यं प्रसेकारुचिगौरवम् ।**
**उत्साहहानिं वैरस्यं दाहं च बहुमूत्रताम् ॥ ९ ॥**
**कुक्षौ कठिनतां शूलं तथा निद्राविपर्ययम् ।**
**तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्रहं विड्विबद्धताम् ।**
**जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान् ॥ १० ॥**

**कुक्षौ कठिनताम्**=उदरकाठिन्यं, **निद्राविपर्ययं**=दिवास्वापो रात्रिजागरणम्, **जाड्यम्**=अकर्मण्यम्, अन्यान्, **उपद्रवान्**= संकोचादीन्, जनयेत् ॥ ९–१० ॥

इति सुधायामामवातनिदानम् ।

दोषानुबन्ध-**पित्तात्सदाहरागं च, सशूलं पवनानुगम् ।**
रूपं— **स्तिमितं गुरुकण्डूं च कफदुष्टं तमादिशेत् ॥ ११ ॥**
साध्यासा- **एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते ।**
ध्यता— **सर्वदेहचरः शोथः स कृच्छ्रः सान्निपातिकः ॥ १२ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चविंशमामवातनिदानं समाप्तम् ॥ २५ ॥**

## अथ षड्विंशं शूल-परिणामशूलान्नद्रवशूलनिदानम् ॥२६॥

संख्या—**दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।**
**सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥ १ ॥**

आमवातेऽपि शूलसम्भवात्तदनन्तरं शूलनिदानमाह—**दोषैरि**त्यादि । शूलः, **अष्टधा**=अष्टविधः, दोषैः पृथक् त्रयः—वातिकः, पैत्तिकः, श्लैष्मिकः, **समस्तेन**=सन्निपातेन चैकः सान्निपातिकः, **आमेन** चैकः—आमजः, द्वन्द्वेन दोषेण च त्रयो वातपैत्तिक इत्यादि, एवमष्टविधः । सर्वेष्वेतेषु शूलेषु **पवनः**=वायुः, **प्रभुः**=प्रधानं, कर्त्तेति यावत् ।

अस्य शूलस्य प्रागुत्पत्तिस्तन्त्रकारैर्वर्णिता, तथाहि—

**'अनङ्गनाशाय हरस्त्रिशूलं मुमोच कोपान्मकरध्वजश्च ।**
**तमापतन्तं सहसा निरीक्ष्य भयार्दितो विष्णुतनुं प्रविष्टः ॥**
**स विष्णुहुङ्कारविमोहितात्मा पपात भूमौ प्रथितः स शूलः ।**
**स पञ्चभूतानुगतं शरीरं प्रदूषयत्यस्य हि पूर्वसृष्टिः' ॥**

इति । शूलजनकत्वेनैव शूलसंज्ञेति । सुश्रुतोऽप्यस्य निरुक्तिमाह—

**'शङ्कुस्फोटनवत्तस्य यस्मात्तीव्रा हि वेदना ।**
**शूलासक्तस्य भवति तस्माच्छूलमिहोच्यते'** इति ॥ १ ॥

वातशूलस्य कारणलक्षणे—

**व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।**
**कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् ॥ २ ॥**
**कषायतिक्तातिविरूढजान्नविरूढवल्लूरकशुष्कशाकात् ।**
**विट्शुक्रमूत्रानिलवेगरोधाच्छोकोपवासादतिहास्यभाष्यात् ॥३॥**
**वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पार्श्वपृष्ठत्रिकबस्तिदेशे ।**
**जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् ॥ ४ ॥**
**मुहुर्मुहुश्चोपशमप्रकोपी विड्वातसंस्तम्भनतोदभेदैः ।**
**संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥५॥**

वातिकमाह—**व्यायामे**त्यादि । **कलायः**='मटर' इति ख्यातः । **आढकी**=तुवरी । **कोरदूषः**=कोद्रवः । **अभिघातः**=दण्डादिनिपातः । **घनागमे**=वर्षाकाले । **गाढम्**=अत्यर्थम् ॥ २–५ ॥

पित्तशूलस्य कारणलक्षणे—

**क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः ।**
**कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ॥ ६ ॥**

**ग्राम्यातियोगाद्दशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम् ।**
**तृण्मोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमचोषयुक्तम् ॥७॥**
**मध्यन्दिने कुप्यति चार्धरात्रे विदाहकाले जलदात्यये च ।**
**शीते च शीतः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च ॥८॥**

कफशूलस्य हेतुरूपे—

**आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलशष्कुलीभिः ।**
**अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ॥९॥**
**हृल्लासकाससदनारुचिसंप्रसेकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वैः ।**
**भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रं सूर्योदयेऽथ शिशिरे कुसुमागमे च १०**

पैत्तिकमाह—**क्षारे**त्यादि। **पिण्याकः**=तिलकल्कः। **आयासः**=परिश्रमः। **रविप्रतापः**=आतपः। **ग्राम्यातियोगः**=मैथुनाधिक्यम्। **जलदात्यये**=शरदि। श्लैष्मिकमाह—**आनूपे**त्यादि। **आनूपं**=जलप्रायदेशीयशूकरादिमांसम् ( 'जलप्रायमनूपं स्यादि'त्यमरः )। **बलासजनकैः**=कफकारकैः। **कुसुमागमे**=वसन्ते ॥ ६–१० ॥

त्रिदोषशूलं- **सर्वेषु दोषेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम् ।**
**सुकष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः ॥११॥**

आमशूलम्—**आटोपहृल्लासवमीगुरुत्वस्तैमित्यकानाहकफप्रसेकैः ।**
**कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति ॥१२॥**

द्विदोषजशूल- **बस्तौ हृत्पार्श्वपृष्ठेषु स शूलः कफवातिकः ।**
चिह्नानि- **कुक्षौ हृन्नाभिमध्येषु स शूलः कफपैत्तिकः ॥**
**दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः ॥ १३ ॥**

साध्यासा- **एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ।**
ध्यरूपम्- **सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥ १४ ॥**

साध्यासाध्यत्वादिलक्षणमाह—**एकदोषोत्थितः**=दोषैकसम्बद्धः। **सर्वदोषोत्थितः**=त्रिदोषजः। **घोरः**=भयङ्करः। **भूर्युपद्रवः**=प्राज्योपद्रवान्वितः, उपद्रवा यथा—**वेदना च तृषा मूर्च्छाध्मानाहो गौरवारुची। कासः श्वासश्च हिक्का च शूलस्योपद्रवाः स्मृताः**। इति ॥ १४ ॥

परिणामशूलं—**स्वैर्निदानैः प्रकुपितो वायुः सन्निहितस्तदा ।**
**कफपित्ते समावृत्य शूलकारी भवेद्बली ॥ १५ ॥**

**भुक्ते जीर्यति यच्छूलं तदेव परिणामजम् ।**

**तस्य लक्षणमप्येतत्समासेनाभिधीयते ॥ १६ ॥**

परिणामशूलमाह—**भुक्ते**=भोजनान्ते, **जीर्यति**=पच्यमाने, अन्ने यच्छूलं तत्परिणामजं जानीयात् ॥ १६ ॥

वातिकम्—**आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।**

**स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥ १७ ॥**

पैत्तिकं—**तृष्णादाहारतिस्वेदं कट्वम्ललवणोत्तरम् ।**

**शूलं शीतशमप्रायं पैत्तिकं लक्षयेद् बुधः ॥ १८ ॥**

कफात्मकं-**छर्दिहृल्लाससंमोहं स्वल्परुग्दीर्घसन्तति ।**

**कटुतिक्तोपशान्तं च तच्च ज्ञेयं कफात्मकम् ॥ १९ ॥**

द्वन्द्वत्रिदोष **संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् ।**

रूपं— **त्रिदोषजमसाध्यं तु क्षीणमांसबलानलम् ॥ २० ॥**

तस्य वातादिभेदेन लक्षणमाह—**आध्मानेत्यादि । आटोपः**=गुडगुडा-शब्द उदरे । **विण्मूत्रविबन्धः**=मूत्रपुरीषयोरवरोधः । **दीर्घसन्तति**=चिर-कालानुबन्धि । **क्षीणमांसबलानलम्**=क्षीणा मांसबलानला यत्र तत्त-थोक्तम् ॥ १९-२० ॥

इति सुधायां शूलादिनिदानम् ॥

अन्नद्रवशूलं-**जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते ॥ २१ ॥**

**पथ्यापथ्यप्रयोगेण भोजनाभोजनेन च ।**

**न शर्म याति नियमात्सोऽन्नद्रव उदाहृतः ॥ २२ ॥**

**( अन्नद्रवाख्यशूलेषु न तावत्स्वास्थ्यमश्नुते ।**

**वान्तमात्रे जरत्पित्ते शूलमाशु व्यपोहति ) ॥ २३ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने षड्विंशं शूल-परिणाम-शूला-न्नद्रवशूल-निदानं समाप्तम् ॥ २६ ॥**

## अथ सप्तविंशमुदावर्त्तानाह-निदानम् ॥ २७ ॥

उदावर्त्त- **वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः ।**

हेतवः— **क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भवः ॥ १ ॥**

उदावर्त्तेऽपि शूलसम्भवाच्छूलानन्तरमुदावर्त्तमाह—**वातेत्यादि । अत्र**=

नेत्रजलम्। **क्षवः**=छिक्का। इन्द्रियपदं शुक्रबोधकम्। **क्षुत्**=क्षुधा, एतेषां **धृत्या**=विधारणेन ॥ १ ॥

अपानोदा- **वातमूत्रपुरीषाणां सङ्गो ध्मानं क्लमो रुजा।**
वर्त्तरूपं— **जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात्॥ २ ॥**

वातनिग्रहजमाह—**वातेत्यादि**। वातपदेनापानवायोर्ग्रहणम्। **सङ्गः**=अवरोधः। **जठरे**=उदरे ॥ २ ॥

पुरीषोदाव- **आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः।**
र्त्तरूपम्—**पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥३॥**

पुरीषावरोधजमाह—**आटोपेत्यादि**। **आटोपः**=गुडगुडाशब्दः। **परिकर्त्तिका**=पायौ परिकर्त्तनवद् व्यथा। **ऊर्ध्ववातः**=उद्गाराधिक्यम्। **आस्यात्**=मुखात्। **निरेति**=निर्गच्छति ॥ ३ ॥

मूत्रोदावर्त्त-**बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा।**
रूपम्—**विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ ४ ॥**

मूत्रावरोधजमाह—**बस्तीत्यादि**। **मेहनम्**=शिश्नम्। **आनाहः**=पूर्णता॥४॥

जृम्भोदावर्त्तस्य रूपम्—

**मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात्पवनात्मकाः स्युः।**
**तथाऽक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः ॥५॥**

जृम्भाघातजमाह—**मन्येत्यादि**। **वदनामयाः**=मुखरोगाः, **तीव्राः**=दारुणाः॥५॥

अश्रूदावर्त्तस्य रूपम्—

**आनन्दजं वाऽप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि।**
**शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥ ६ ॥**

छिक्कोदावर्त्त-**मन्यास्तम्भः शिरःशूलमर्दितार्धावभेदकौ।**
रूपम्— **इन्द्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात्॥ ७ ॥**

उद्गारोदावर्त्तस्य रूपं—

**कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवाऽप्रवृत्तिः।**
**उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः ॥८॥**

वमनोदावर्त्त-**कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः।**
रूपं— **कुष्ठवीसर्पहृल्लासाश्छर्दिनिग्रहजा गदाः ॥ ९ ॥**

शुक्रोदावर्त्तस्य**मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनिग्रहश्च।**
रूपं— **शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकारा विहते च शुक्रे ॥१०॥**

क्षुत्तृडुदावर्त्त-तन्द्राऽङ्गमर्दावरुचिः श्रमश्च क्षुधाऽभिघातात्कृशता च दृष्टेः ।
यो रूपं— कण्ठास्यशोषः श्रवणावरोधस्तृष्णाविघाताद्धृदये व्यथा च ११

श्वासनिद्रोदावर्त्तयो रूपं—

श्रान्तस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवाऽपि गुल्मः ।
जृम्भाऽङ्गमर्दोऽक्षिशिरोऽर्त्तिजाड्यं निद्राऽभिघातादथवाऽपि तन्द्रा १२
कोष्ठवातोदा- वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
वर्त्तरूपं— भोजनैः कुपितः सद्य उदावर्त्तं करोति हि ॥ १३ ॥
वातमूत्रपुरीषासृक्कफमेदोवहानि वै ।
स्रोतांस्युदावर्त्तयति पुरीषं चातिवर्त्तयेत् ॥ १४ ॥
ततो हृद्वस्तिशूलार्त्तो हृल्लासारतिपीडितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण लभते नरः ॥ १५ ॥
श्वासकासप्रतिश्यायदाहमोहतृषाज्वरान् ।
वमिहिक्काशिरोरोगमनःश्रवणविभ्रमान् ।
बहूनन्यांश्च लभते विकारान्वातकोपजान् ॥ १६ ॥

वेगावरोधजानुदावर्तानुक्त्वा दोषजान् बिभणिषुराह—**वायु**रित्यादि । **कोष्ठानुगः**=समस्तोदरमध्यचरः, पवनो रूक्षादिभोजनैः प्रकुपितः स्रोतांसि, **उदावर्त्तयति**=आच्छादयति । **पुरीषं**=मलम्, **अतिवर्त्तयेत्**=शोषयेत् । **मनो विभ्रमः**=भ्रान्तचित्तता (स्थाणौ पुरुषप्रतीतिः) । **श्रवणविभ्रमः**=विपरीतशब्दश्रवणम् ॥ १३–१६ ॥

आनाहरोगनिदानम्—

आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ॥ १७ ॥

आमाशयजानाहरूपं—

तस्मिन् भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ।
आमाशये शूलमथो गुरुत्वं हृत्स्तम्भ उद्गारविघातनं च ॥ १८ ॥

आनाहमाह—**आम**मित्यादि । **शकृत्**—पुरीषम् । **प्रतिश्यायः**=पीनसः । **उद्गारविघातनम्**=उद्गारावरोधः ॥ १७–१८ ॥

इति सुधायामुदावर्त्तानाहनिदानम् ॥

पक्वाशयजानाहरूपं—

**स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा शकृतश्च छर्दिः।**
**शोथश्च पक्वाशयजे भवन्ति तथाऽलसोक्तानि च लक्षणानि ॥१९॥**

असाध्योदावर्त्तलक्षणं—

**(तृष्णाऽर्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम्।**
**शकृद्वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत्) ॥ २० ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने-सप्तविंशमुदावर्त्तानाहनिदानं समाप्तम् ॥ २७ ॥**

## अथाष्टाविंशं गुल्म-निदानम् ॥ २८ ॥

गुल्मसंप्राप्तिः-**दुष्टा वातादयोऽत्यर्थं मिथ्याऽऽहारविहारतः।**
तत्संख्या—**कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ १ ॥**
तत्स्थानानि-**तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिबस्तयः ॥ २ ॥**

आनाहस्य गुल्मेऽपि सम्भवादानाहानन्तरं गुल्ममाह—**दुष्टा** इत्यादि। मिथ्याऽऽहारविहारतोऽत्यर्थं दुष्टा वातादयो दोषाः, **कोष्ठान्तः**=कोष्ठमध्ये, **ग्रन्थिरूपिणं**=गोलाकारम्, **पञ्चधा**=पञ्चप्रकारं, गुल्मं कुर्वन्ति। **तस्य**=गुल्मस्य, पञ्चविधं स्थानं पार्श्वादयः, बोध्यमिति ॥ १–२ ॥

तत्स्वरूपं—**हृन्नाभ्योरन्तरे ग्रन्थिः संचारी यदि वाऽचलः।**
**वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः ॥ ३ ॥**

गुल्मस्य सामान्यरूपमाह—**हृदि**त्यादि। नाभिशब्देन बस्तेर्ग्रहणम् भवति लक्षणया। **वृत्तो**=वर्त्तुलः। **चयापचयवान्**=वृद्धिह्रासयुक्तः,ग्रन्थिर्गुल्म इति ॥३॥

संख्या—**स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः।**
**पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ ४ ॥**

पञ्चविधत्वं विवृणोति—**व्यस्तै**रित्यादिना। **व्यस्तैर्दोषैः**=यथा वातिकः, पैत्तिकः, श्लैष्मिक इति, समस्तैर्दोषैः, **उच्छ्रितः**=वृद्धैः, सान्निपातिक एकः, एवं पुरुषाणां चत्वारो गुल्माः, सम्भवन्ति। रक्तेन च, **अपरः**=रक्तगुल्मसंज्ञकः, स्त्रीणामेव स भवति। यथाऽऽह—**स रौधिरः स्त्रीभव एव गुल्म** इति। अत्र रक्तपदेनार्त्तवस्य ग्रहणं न तु धातुरूपरक्तस्य, धातुरूपरक्तगुल्मस्य स्त्रीपुरुषसाधारण्येन सम्भवात्। तथा चोक्तं-‘**स्त्रीणामार्त्तवजो गुल्मो न पुंसामुपजायते। अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसां च जायते**’ इति ॥ ४ ॥

पूर्वरूपम्—उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोप आध्मानमपक्तिशक्तिरासन्नगुल्मस्य वदन्ति चिह्नम्॥५॥

पूर्वरूपमाह—उद्गारेत्यादि । पुरीषबन्धः=गाढविट्कता, आटोपः=अत्र रुजापूर्वकः क्षोभः । अपक्तिशक्तिः=मन्दाग्नित्वम् । आसन्नगुल्मस्य=झटितिजायमानगुल्मस्य ॥ ५ ॥

सामान्य- अरुचिः कृच्छ्रविण्मूत्रवातताऽन्त्रविकूजनम् ।
रूपम्— आनाहश्चोर्ध्ववातत्वं सर्वगुल्मेषु लक्षयेत् ॥ ६ ॥

वातगुल्मस्य रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च ।
हेतुलक्षणे—शोकोऽभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः॥७॥
यः स्थानसंस्थानरुजाविकल्पं विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरं च हृत्कुक्षिपार्श्वांसशिरोरुजं च ॥८॥
करोति जीर्णे त्वधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च ।
वातात्स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥९॥

वातिकमाह—रूक्षेत्यादि । विषमातिमात्रमन्नपानस्य विशेषणम् । अतिमलक्षयः=विरेचनातियोगजः । स्थानसंस्थानरुजां विकल्पः=विकल्पशब्दः स्थानादिभिः प्रत्येकमन्वेति । स्थानविकल्पो यथा—कदाचिन्नाभौ कदा चित्पार्श्वयोः । संस्थानविकल्पो यथा—कदा चिदल्पो महान् वा कदा चिद्, रुजाविकल्पो यथा—कदा चिदल्पा कदा चिन्महती तोदभेदाद्यनेकरूपा वा । नोपशेते=न सुखमनुभवति ॥ ७–९ ॥

पित्तगुल्मस्य कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवाः ।
हेतुलक्षणे—आमाभिघातो रुधिरं च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम् १०
ज्वरः पिपासा वदनाङ्गरागः शूलं महज्जीर्यति भोजने च ।
स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम् ११

पैत्तिकमाह—कट्वित्यादि । हुताशसेवा=वह्निसेवनम् । जीर्यति=सप्तम्यन्तपदमिदं भोजन इत्यस्य विशेषणम् ॥ १०–११ ॥

कफगुल्मस्य शीतं गुरु स्निग्धमचेष्टनं च सम्पूरणं प्रस्वपनं दिवा च ।
हेतुलक्षणे—गुल्मस्य हेतुः कफसम्भवस्य सर्वस्तु दृष्टो निचयात्मकस्य॥१२॥
स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि ।
शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य१३

श्लैष्मिकमाह—**शीत**मित्यादि । **अचेष्टनम्**=निर्व्यापारता । **निचयात्मकस्य**=सान्निपातिकस्य, **हृल्लासः**=उपस्थितवमनत्वम् ॥ १२-१३ ॥

औषधकल्पनार्थं द्वन्द्वदोषविवेकः—

**निमित्तरूपाण्युपलभ्य गुल्मे द्विदोषजे दोषबलाबलं च ।**
**व्यामिश्रलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ॥ १४ ॥**

त्रिदोषगुल्मस्य लक्षणम—

**महारुजं दाहपरीतमश्मवद्घनोन्नतं शीघ्रविदाहि दारुणम् ।**
**मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥१५॥**

असाध्यत्वमाह—**महारुज**मित्यादि । **महारुजं**=पीडाऽतिशयोपेतं, **दाहपरीतं**=दाहव्याप्तसकलकलेवरम् , **अश्मवद्घनोन्नतं**=पाषाणवत्कठिनोन्नतम् ।१५।

रक्तगुल्मस्य हेतुलक्षणे—

**नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा ।**
**वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम् ।**
**पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणं चाप्यपरं निबोध ॥ १६ ॥**
**यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्सशूलः समगर्भलिङ्गः ।**
**स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः ॥१७॥**

रक्तगुल्ममाह—**नवे**त्यादि । **नवप्रसूता**=अचिरोत्पन्नसन्ताना, नारी या **ऋतौ**=पुष्पसमये, **अहितभोजना**=अपथ्यभोजना, या च, **आमगर्भं**=नवममासादर्वाक् प्रसूते, तस्या वायू रक्तं परिगृह्य गुल्मं जनयति । पैत्तिकगुल्मसमानलक्षणश्च स भवति । सः, **पिण्डित एव**=समुदित एव, स्पन्दते, **नाङ्गैः**=अवयवैर्न किञ्चिच्चलति । **समगर्भलिङ्गः**=गर्भाकृतितुल्यलक्षणः । आर्त्तवादर्शनमुखस्रवणचूचुककृष्णत्वादिगर्भलक्षणसम्पन्न इति यावत् । '**मासे व्यतीते दशमे चिकित्स्यः**, व्याधिप्रभावात् तावतैव समयेन तस्य सुखसाध्यत्वाद्, यथा चोक्तमन्यत्र—**रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणमिति** ॥ १६-१७ ॥

असाध्यरूपं—**संचितः क्रमतो गुल्मो महावास्तुपरिग्रहः ।**
**कृतमूलः सिरानद्धो यदा कूर्म इवोत्थितः ॥ १८ ॥**
**दौर्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः ।**
**तृष्णातन्द्राप्रतिश्यायैर्युज्यते स न सिध्यति ॥ १९ ॥**

पुनश्च— **गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम् ।**
**हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥ २० ॥**

पुनश्च—श्वासः शूलं पिपासाऽन्नविद्वेषो ग्रन्थिमूढता।
जायते दुर्बलत्वं च गुल्मिनो मरणाय वै॥ २१॥

इति श्रीमाधवकरविरचिते माधवनिदानेऽष्टाविंशं
गुल्मनिदानं समाप्तम्॥ २८॥

अपरमप्यस्यासाध्यलक्षणान्याह—सञ्चित इत्यादिना। क्रमतः सञ्चितः=एकत्रस्थितः, चिकित्सोपेक्षणाद् वृद्धिंगत इति यावत्। महावास्तुपरिग्रहः=सकलोदरव्याप्तः, कृतमूलः=धात्वादिकृताश्रयः। सिरानद्धः=सिराजालव्याप्तः। ननु विद्रधिः पच्यते गुल्मस्तु न पच्यते निराश्रयत्वात्, तथा च सुश्रुतः-न निबन्धोऽस्ति गुल्मस्य विद्रधिः सनिबन्धनः। गुल्मस्तिष्ठति दोषे स्वे विद्रधिर्मांसशोणिते॥ 'विद्रधिः पच्यते तस्माद् गुल्मः क्वापि न पच्यत' इति। चरके तु-'विदाहशूलसंक्षोभस्वप्ननाशारतिज्वरैः। विदह्यमानं जानीयाद् गुल्मं तमुपनाहयेत्'। इति प्रतिपादितमस्ति, तस्माद् गुल्मः पच्यत एवेति, तत्र कः सिद्धान्त इति चेदत्रोच्यते—गुल्मो न पच्यते निराश्रयत्वाद्, यदा तु हेतुवशान्मांसाद्याश्रयमधितिष्ठति तदा पच्यमानो विदाहहेतुकं विद्रधित्वमाप्नोति। तथा चोक्तं-स वै शीघ्रविदाहित्वाद् विद्रधीत्यभिधीयत इति॥१८-२१॥

इति सुधायां गुल्मनिदानम्॥

## अथैकोनत्रिंशं हृद्रोग-निदानम्॥ २९॥

हेतुः— अत्युष्णगुर्वन्नकषायतिक्तश्रमाभिघाताध्यशनप्रसङ्गैः।
सञ्चिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः॥ १॥

सम्प्राप्तिः—दूषयित्वा रसं दोषा विगुणा हृदयं गताः।
हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते॥ २॥

वातजहृद्रोगः-आयम्यते मारुतजे हृदयं तुद्यते तथा।
निर्मथ्यते दीर्यते च स्फोटयते पाटयतेऽपि च॥ ३॥

पित्तजहृद्रोगः— तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदयक्लमः।
धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च॥ ४॥

कफजहृद्रोगः-गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्दवम्।
माधुर्यमपि चास्यस्य बलासावतते हृदि॥ ५॥

श्लैष्मिकमाह—**गौरवमित्यादि**। **बलासावतते**=बलासः=कफस्तेनावतते=व्याप्ते। **आस्यस्य**=मुखस्य॥ ५॥

त्रिदोषक्रिमि- **विद्यात्त्रिदोषं त्वपि सर्वलिङ्गं-**
जौ हृद्रोगौ- **तीव्रार्त्तितोदं क्रिमिजं सकण्डुम्॥ ६॥**

**उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः।**
**अरुचिः श्यावनेत्रत्वं शोथश्च क्रिमिजे भवेत्॥ ७॥**

त्रिदोषजमाह—**विद्यादित्यादि**। त्रिदोषं तु हृद्रोगं **सर्वलिङ्गं**=वातादिनिखिललक्षणोपेतं, विद्यात्। क्रिमिजं तीव्रार्त्तितोदं सकण्डूं विद्यात्। तथोत्क्लेदादयः शोथान्ता उपद्रवाश्च तत्र भवन्ति॥ ६-७॥

इति सुधायां हृद्रोगनिदानम्।

क्रिमीणामुत्प- **(मर्मैकदेशं संक्लेदं रसश्चाप्युपगच्छति।**
त्तिबीजम्— **संक्लेदात्क्रिमयश्चास्य भवन्त्युपहतात्मनः) ॥ ८॥**
उपद्रवाः— **क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः।**
**क्रिमिजे क्रिमिजातीनां श्लैष्मिकाणां च ये मताः॥ ९॥**

**इति श्रीमाधवकरविरचिते माधवनिदान एकोनत्रिंशं हृद्रोगनिदानं समाप्तम्॥ २९॥**

---

## अथ त्रिंशं मूत्रकृच्छ्र-निदानम्॥ ३०॥

हेतुसं- **व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनित्यद्रुतपृष्ठयानात्।**
ख्ये— **आनूपमांसाध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणां तथाऽष्टौ॥१॥**

हृदयगतविकारानभिधाय बस्तिगतानाह—**व्यायामेत्यादि**। व्यायामाद्यजीर्णान्तात्कारणकदम्बादष्टौ मूत्रकृच्छ्राणि स्युः॥ १॥

सम्प्राप्तिः— **पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य बस्तौ।**
**मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह कृच्छ्रात्॥२॥**

अष्टविधत्वं विवृणोति—**पृथगित्यादिना**। पृथक् **मलाः**=दोषाः, अथवा सर्वे स्वैर्निदानैः कुपिताः, **बस्तौ**=मूत्राशये, कोपमुपेत्य मूत्रस्य मार्गं परिपीडयन्ति तदा कृच्छ्रान्मूत्रयतीत्यन्वयः। पृथग्दोषैस्त्रीणि सन्निपातेन चैकं शल्यजपुरीषजशुक्रजाश्मरीजानीत्येकैकानि, एवमष्टौ मूत्रकृच्छ्राणि भवन्ति॥ २॥

वातज-पित्तजे मूत्रकृच्छ्रे—

तीव्रार्त्तिरुग्वङ्क्षणबस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात् ।
पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ॥ ३ ॥

मूत्रकृच्छ्रस्य वातादिभेदेन लिङ्गान्याह—तीव्रेत्यादि । वङ्क्षणः = ऊरुमेहनसन्धिस्थानम् ॥ ३ ॥

कफजं-सन्निपातजं च मूत्रकृच्छ्रम्—

बस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे ।
सर्वाणि रूपाणि तु सन्निपाताद्भवन्ति तत्कृच्छ्रतमं हि कृच्छ्रम् ॥ ४ ॥

सलिङ्गस्य=शिश्नसहितस्य ॥ ४ ॥

शल्याघातजं मूत्रकृच्छ्रम्—मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाऽऽघाताज्जायते भृशदारुणम् ॥
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्दिशेत् ॥ ५ ॥

पुरीषाघातजं मूत्रकृच्छ्रं—शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः ।
आध्मानं वातशूलं च मूत्रसङ्गं करोति च ॥ ६ ॥

शकृतः = पुरीषस्य, प्रतीघाताद् = धारणात् ॥ ५–६ ॥

अश्मरीहेतुजम्—अश्मरीहेतु तत्पूर्वं मूत्रकृच्छ्रमुदाहरेत् ॥ ७ ॥

शुक्रहेतुजं- शुक्रे दोषैरुपहते मूत्रमार्गे विधाविते ।
सशुक्रं मूत्रयेत्कृच्छ्राद्बस्तिमेहनशूलवान् ॥ ८ ॥

अश्मरीहेतु = अश्मरीनिमित्तं, तत्पूर्वम् = अश्मरीपूर्वं, मूत्रकृच्छ्रम्, उदाहरेत् = कथयेत् ॥ ७ ॥

शर्कराऽश्मर्योरैक्यं—अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ॥ ९ ॥

अश्मरीशर्करयोः समानत्वमवान्तरभेदं चाह—अश्मरीत्यादि । अश्मरी शर्करा चैते तुल्यसम्भवलक्षणे = तुल्यः सम्भवः = उत्पत्तिहेतुर्लक्षणं=लिङ्गं च ययोस्ते तथा ॥ ९ ॥

शर्करावैशेष्यं—विशेषणं शर्करायाः शृणु कीर्त्तयतो मम ।
पच्यमानाऽश्मरी पित्ताच्छोष्यमाणा च वायुना ।
विमुक्तकफसन्धाना क्षरन्ती शर्करा मता ॥ १० ॥

उपद्रवाः—हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रं च दारुणम् ॥ ११ ॥

**मूत्रवेगनिरस्ताभिः प्रशमं याति वेदना ।**
**यावदस्याः पुनर्नैति गुडिका स्रोतसो मुखम् ॥ १२ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने त्रिंशं मूत्रकृच्छ्र-**
**निदानं समाप्तम् ॥ ३० ॥**

**विशेषणं**=विशेषं, शर्करायाः शृणु—तथाहि—पित्तात्पच्यमाना वायुना शोष्यमाणा चात एव **विमुक्तकफसन्धाना**=विमुक्तं कफसन्धानं यया सा विच्युतकफसंश्लेषा, वस्तितः चरन्ती सती शर्करा **मता**=कथिता ॥ १०–१२ ॥

इति सुधायां मूत्रकृच्छ्रनिदानम् ।

## अथैकत्रिंशं मूत्राघात-निदानम् ॥ ३१ ॥

मूत्राघात- संख्या- **जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश ।**
**प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकाऽऽदयः ॥ १ ॥**

मूत्रविकारसामान्यान्मूत्रकृच्छ्रानन्तरं मूत्राघातमाह—**जायन्त** इत्यादि । मूत्रकृच्छ्रे कृच्छ्रत्वमधिकं विबन्धश्चेषदिति, मूत्राघाते तु बलवान् विबन्धः कृच्छ्रत्वमल्पमिति परस्परं भेदः ॥ १ ॥

वातकुण्डलिकालक्षणं- **रौक्ष्याद्वेगविघाताद्वा वायुर्बस्तौ सवेदनः ।**
**मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ॥ २ ॥**
**मूत्रमल्पाल्पमथवा सरुजं सम्प्रवर्त्तते ।**
**वातकुण्डलिकां तां तु व्याधिं विद्यात्सुदारुणम् ॥ ३ ॥**

अष्ठीला-लक्षणम्— **आध्मापयन्बस्तिगुदं रुद्ध्वा वायुश्चलोन्नताम् ।**
**कुर्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम् ॥ ४ ॥**

वातबस्तिः— **वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः ।**
**निरुणद्धि मुखं तस्य बस्तेर्बस्तिगतोऽनिलः ॥ ५ ॥**
**मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीडितः ।**
**वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः ॥ ६ ॥**

मूत्रातीत-लक्षणं— **चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते ।**
**मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥ ७ ॥**

मूत्रजठर-लक्षणं— **मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः ।**
**अपानः कुपितो वायुरुदरं पूरयेद् भृशम् ॥ ८ ॥**

नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम् ।
तन्मूत्रजठरं विद्यादधोबस्तिनिरोधनम् ॥ ९ ॥

मूत्रोत्सङ्ग- बस्तौ वाऽप्यथवा नाले मणौ वा यस्य देहिनः ।
लक्षणं— मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥ १० ॥
स्रवेच्छनैरल्पमल्पं सरुजं वाऽथ नीरुजम् ।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥ ११ ॥

मूत्रक्षय- रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ ।
लक्षणं— मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् ॥ १२ ॥

मूत्रग्रन्थि-अन्तर्बस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् ॥
लक्षणम्—अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥ १३ ॥

मूत्रग्रन्थिमाह—अन्तरित्यादि । अन्तर्बस्तिमुखे = मूत्राशयमुखाभ्यन्तरे वृत्तः = वर्त्तुलाकृतिः, अश्मरीतुल्या रुग् = वेदना यत्र स तथाभूतः=सहसा ग्रन्थिर्यत्र भवेदसौ मूत्रग्रन्थिरुच्यते ।

ननु स्थानवेदनाहेतूनां समानत्वादश्मर्या सह मूत्रग्रन्थेः को विशेष इति चेदत्रोच्यते—अश्मर्यां पित्तादिकं सर्वं संहन्यतेऽत्र मूत्रग्रन्थौ तु रक्तमेवेति विशेषः। अपरमपि विशेषज्ञानञ्चाश्मरीपूर्वरूपे वर्णितस्य मूत्रे बस्तसगन्धत्वादेर्भावाभावाभ्यां बोधनीयम् ॥ १३ ॥

तन्त्रान्तरे मूत्रग्र- (रक्तं वातकफाद् दुष्टं बस्तिद्वारे सुदारुणम् ।
न्थिलक्षणं तु—ग्रन्थिं कुर्यात् स कृच्छ्रेण सृजेन्मूत्रं तदावृतम् ॥
अश्मरीसमशूलं तं रक्तग्रन्थिं प्रचक्षते) ॥

मूत्रशुक्र- मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् ।
लक्षणम्— स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते ।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥ १४ ॥

उष्णवात- व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलान्वितम् ।
लक्षणं— बस्तिं मेढ्रं गुदं चैव प्रदहेत्स्रावयेदधः ॥ १५ ॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ।
कृच्छ्रात्पुनः पुनर्जन्तोरुष्णवातं ब्रुवन्ति तत् ॥ १६ ॥

मूत्रसाद- पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् ।
लक्षणम्—कृच्छ्रान्मूत्रं तदा पीतं श्वेतं रक्तं घनं सृजेत् ॥ १७ ॥

सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्तु तत् ।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ॥ १८ ॥

विड्विघात-रूक्षदुर्बलयोर्वातेनोदावृतं शकृद्यदा ॥ १९ ॥
लक्षणं—मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः ।
विड्गन्धं मूत्रयेत्कृच्छ्राद्विड्विघातं विनिर्दिशेत् ॥ २० ॥

बस्तिकुण्डल-द्रुताध्वलङ्घनायासैरभिघातात्प्रपीडनात् ।
लक्षणं— स्वस्थानाद्बस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् ॥ २१ ॥
शूलस्पन्दनदाहार्त्तो बिन्दुं बिन्दुं स्रवत्यपि ।
पीडितस्तु सृजेद्धारां संस्तम्भोद्वेष्टनार्त्तिमान् ।
बस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ॥ २२ ॥

वाताधिक्यरूपं-पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ॥ २३ ॥

बस्तिकुण्डलमाह—द्रुतेत्यादि । उद्वृत्तः=स्वस्थानादूर्ध्वं गतः, स्थूलो-स्तिर्गर्भवत पार्श्वे तिष्ठति । अबुद्धिभिर्दुर्निवारम्, एतेन कृच्छ्रसाध्यत्वं दर्शितम् ॥ २१-२३ ॥

इति सुधायां मूत्राघातनिदानम् ।

पित्तकफ- तस्मिन्पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
सम्बद्धयो रूपं—श्लेष्मणा गौरवं शोथः स्निग्धं मूत्रं घनं सितम् ॥२४॥
साध्यासाध्यत्वं-श्लेष्मरुद्धबिलो बस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तबिलः साध्यो न तु यः कुण्डलीकृतः ॥ २५ ॥
कुण्डलीभूतरूपं—स्याद्बस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च ॥२६॥

इति श्रीमाधवकरविरचिते माधवनिदान एकत्रिंशं मूत्राघात-निदानं समाप्तम् ॥ ३१ ॥

## अथ द्वात्रिंशमश्मरी-निदानम् ॥ ३२ ॥

संख्या—वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजाऽपरा ।
प्रायः श्लेष्माश्रयाः सर्वा अश्मर्यः स्युर्यमोपमाः ॥ १ ॥

मूत्रावरोधसाधर्म्यान्मूत्राघातादनन्तरमश्मरीमाह—वातेत्यादि । वातादिभिस्तिस्रोऽश्मर्यो भवन्ति चतुर्थी शुक्रजा च भवत्येका । सर्वाः प्रायः श्लेष्माश्रयाः=कफप्रधानाः, शुक्रजां विना, तत्र शुक्रस्यैव प्रधानकारणत्वात् । यमोपमाः=सद्यःप्राणहराः ॥ १ ॥

अश्मरीस· विशोषयेद्बस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा ।
म्प्राप्तिः—यदा तदाऽश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः॥२॥
पूर्वरूपं—नैकदोषाश्रयाः सर्वा अथासां पूर्वलक्षणम् ।
बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक् ॥
मूत्रे बस्तसगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ॥ ३ ॥

पूर्वरूपमाह—नैकेत्यादि । तदासन्नदेशेषु=बस्तिसमीपदेशेषु, परितः= समन्ततः, मूत्रे बस्तसगन्धत्वं – छागसमगन्धत्वम् ॥ ३ ॥

सामान्यरूपं—सामान्यलिङ्गं रुङ्नाभिसेवनीबस्तिमूर्धसु ॥ ४ ॥
तद्भावाभाव·विशीर्णधारं मूत्रं स्यात्तया मार्गे निरोधिते ।
यो रूपं—तद्व्यपायात्सुखं मेहेदच्छं गोमेदकोपमम् ॥ ५ ॥

सामान्यलक्षणमाह—सामान्येत्यादि । विशीर्णधारं=विच्छिन्नधारं, तद्व्यपायात्=मूत्रमार्गादश्मर्या अपगमात्, गोमेदकोपमं – गोमेदको – लोहितमणिस्तद्वद् वर्णम् ॥ ४–५ ॥

संक्षोभायासकार्यं—तत्संक्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत् ॥ ६ ॥

सास्रं=सरक्तम् ॥ ६ ॥

वातिकाश्मरी·तत्र वाताद् भृशं चार्त्तो दन्तान् खादति वेपते ।
लक्षणं— गृह्णाति मेहनं नाभिं पीडयत्यनिशं क्वणन् ॥ ७ ॥
सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः ।
श्यावारुणाऽश्मरी चास्य स्याच्चिता कण्टकैरिव ॥ ८ ॥
पैत्तिकाश्मरी·पित्तेन दह्यते बस्तिः पच्यमान इवोष्मवान् ।
लक्षणं— भल्लातकास्थिसंस्थाना रक्तपीताऽसिताश्मरी ॥ ९ ।
कफजाश्मरी·बस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ।
लक्षणं— अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवा सिता ॥ १० ॥

दोषजास्तु बालानामेव भवन्ति—

एता भवन्ति बालानां तेषामेव च भूयसा ॥ ११ ॥

त्रिदोषजामाह—एता इत्यादि । एतास्त्रिदोषजाः, बालानां – बालकानां भवन्ति ॥ ११ ॥

सुखसाध्याश्च ताः—आश्रयोपचयाल्पत्वाद् ग्रहणाहरणे सुखाः ॥ १२ ॥

आश्रयोपचयाल्पत्वात् – आश्रयो=बस्तिस्थानम्, उपचयः – स्थूलता, तयोरल्पत्वाद्द्दाल्पत्वादिति भावः । तस्मात्तथा । अत एव ग्रहणाहरणे सुखाः,

**ग्रहणम्**—अङ्गुलीभ्यां धारणम्, **आहरणञ्च**—शस्त्रादिना पाटनपूर्वकमाकर्षणम् ॥ १२ ॥

शुक्राश्मरी तु—**शुक्राश्मरी तु महतां जायते शुक्रधारणात् ।**

महतामेव **स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ।**

**शोषयत्युपसंगृह्य शुक्रं तच्छुक्रमश्मरी ॥**

**बस्तिरुङ्मूत्रकृच्छ्रत्वमुष्कश्वयथुकारिणी ॥**

**तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥ १३ ॥**

अश्मर्येवावस्थाभेदेन शर्करारूपं प्राप्नोति तदाह—**अश्मर्येवेति**। चकारात् सिकताऽपि भवतीति भावः ॥ १३ ॥

शर्कराया लक्षणं संप्राप्तिश्च—

**पीडिते त्ववकाशेऽस्मिन्नश्मर्येव च शर्करा ।**

**अणुशो वायुना भिन्ना सा तस्मिन्ननुलोमगे ॥ १४ ॥**

अश्मरीशर्क-**निरेति सहसा मूत्रे प्रतिलोमे निरुध्यते ।**

रोपद्रवा— **मूत्रस्रोतः प्रवृत्ता सा सक्ता कुर्यादुपद्रवान् ॥ १५ ॥**

कथमश्मरी शर्करा भवतीति तदाह—**अणुश** इत्यादि। **अणुशः**=अल्पशः, वायुना**भिन्ना**—विदीर्णा, **तस्मिन्**=वायौ, अनुलोमगे सति मूत्रेण सह **निरेति**=निर्गच्छति ॥ १४–१५ ॥

**दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिम् ।**

**पाण्डुत्वमुष्णवातं च तृष्णां हृत्पीडनं वमिम् ॥ १६ ॥**

असाध्यरूपं-**प्रशूननाभिवृषणं बद्धमूत्रं रुजाऽऽतुरम् ।**

**अश्मरी क्षपयत्याशु सिकता शर्कराऽऽन्विता ॥ १७ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने द्वात्रिंशमश्मरीनिदानं समाप्तम् ॥ ३२ ॥**

**पूर्वार्द्धं समाप्तम् ।**

**असाध्यलक्षणमाह—प्रशूनेत्यादि । वृषणः—अण्डकोषः । रुजाऽऽतुरं—**वेदनायुक्तं, **क्षपयति**—मारयति ॥ १७ ॥

इति सुधायामश्मरीनिदानम् ॥

अथ सुधोपेते माधवनिदाने

# उत्तरार्द्धम् ।

---

## अथ त्रयस्त्रिंशं प्रमेह-प्रमेहपिडका-निदानम् ॥ ३३ ॥

प्रमेहहेतुः—**आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि ।**
**नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वम् ॥ १ ॥**

बस्तिगतविकारसाधर्म्यादश्मर्यनन्तरं प्रमेहमाह—**आस्यासुखमि**त्यादि । **आस्यासुखम्**=आस्या "गद्दा" इति लोके, तस्याः सुखं तत्रोपविष्टस्य निर्व्यापारत्वम् । **ग्राम्यौदकानूपरसाः**=ग्राम्याः=छागादयः, औदकाः=मत्स्यादयः, आनूपाः=महिषादयः, तेषां रसाः=मांसरसाः । सर्वं **कफकृत्**=श्लेष्मवृद्धिकरं निखिलं वस्तु प्रमेहहेतुरस्तीति शेषः ॥ १ ॥

कफपित्तमेह-**मेदश्च मांसं च शरीरजं च क्लेदं कफो बस्तिगतः प्रदूष्य ।**
योः सम्प्राप्तिः—**करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ॥२॥**

वातमेहसं- **क्षीणेषु दोषेष्ववकृष्य धातून्**
प्राप्तिः— **सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥ ३ ॥**

पृथग्दोषसंख्या साध्ययाप्यासाध्यविवेकश्च—

**साध्याः कफोत्था दश, पित्तजाः षड् याप्या, न साध्यः पवनाच्चतुष्कः ।**
**समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथाक्रमं ते ॥ ४ ॥**

कफपित्तवातजादिमेहानां क्रमतः सम्प्राप्तिं दर्शयति—**मेद** इत्यादिना । **बस्तिगतः**=मूत्राशयस्थः, कफो मेदोमांसादिकं प्रदूष्य श्लैष्मिकान् मेहान् करोति । एवं पित्तं तानेव मेदोमांसादीन् प्रदूष्य **समुदीर्णं**=परिवृद्धं, सत् पैत्तिकान् मेहान् विदधाति । अनिलश्च **क्षीणेषु**=दुर्बलेषु दोषेषु धातून्, **अवकृष्य**=मूत्राशयमार्गमानीय, मेहान् कुरुते, तत्र यथाक्रमं **कफोत्थाः**=दश साध्याः । **पित्तजाः** षड् याप्याः पवनाच्चतुष्को न साध्यः । साध्ययाप्यप्रत्याख्येयत्वे क्रमतो हेतूनुदाहरन्ति—**समक्रियत्वा**दित्यादिना । **समक्रियत्वात्**=कफस्य दोषस्य दूष्यस्य च मेदोमांसादेः समानत्वात् कटुतिक्तादिक्रियायाः । **विषमक्रियत्वा**दिति—पित्तस्य दूष्यस्य मेदोमांसादेश्च परस्परं विपरीतक्रिय-

त्वात्—पित्तहरं मधुरादि मेदोजनकं, मेदःक्षपणं च कटुकादि पित्तजनकमिति क्रियावैषम्यम्। **महात्ययत्वादिति**। मज्जादिगम्भीरधात्वपकर्षणेन बहुव्यापत्तिकरत्वात्॥ २-४॥

दोषदूष्य- **कफः सपित्तः पवनश्च दोषा, मेदोऽस्रशुक्राम्बुवसालसीकाः।**
विवेकः—**मज्जा रसौजः पिशितं च दूष्याः प्रमेहिणां विंशतिरेव मेहाः** ५

दोषदूष्यसंग्रहमाह—**कफ** इत्यादिना। सपित्तः कफः पवनश्चेति त्रयो दोषाः। मेदःप्रभृतयः पिशितान्ता दश दूष्याः, एभ्यो विंशतिर्मेहा जायन्ते। **अस्रं**=रक्तम्, **वसा**=मांसस्नेहः, लसीका=उदकविशेषः, **रसौजः**=अत्र रसश्चौजश्चेति द्वन्द्वः। **पिशितं**=मांसम्॥ ५॥

पूर्वरूपं— **दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः।**
**दाहश्चिक्कणता देहे तृड् स्वाद्वास्यं च जायते॥ ६॥**

पूर्वरूपमाह—**दन्तादीनामि**त्यादि। आदिपदेन नेत्रकर्णादीनामपि संग्रहः। **पाणिपादयोः**=करचरणयोः, दाहः, देहे चिक्कणता मेदोदुष्टेः। **स्वाद्वास्यं**=मुखमाधुर्यम्॥ ६॥

सामान्यरूपं **सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता।**
भेदकल्पना च **दोषदूष्याविशेषेऽपि तत्संयोगविशेषतः॥**
**मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते॥ ७॥**

सामान्यलिङ्गमाह—**सामान्य**मिति। **प्रभूताविलमूत्रता**=प्रभूतमूत्रत्वं दूष्यद्रवधातुसम्बन्धात्। आविलमूत्रत्वं-दोषदूष्यसम्बन्धात्। **दोषदूष्याविशेषेऽपि**=दोषाः=वातादयः, दूष्याः=मेदःप्रभृतयस्तेषामविशेषेऽपि=सामान्येऽपि, **तत्संयोगविशेषतः**=तेषां दोषदूष्यादीनामुत्कर्षापकर्षकृतसंयोगभेदात्, **मूत्रवर्णादिभेदेन**=मूत्रादिवर्णभेदं दृष्ट्वा समानानां हेतूनां भेदो मेहेषु **कल्प्यते**=विधीयते। यथा मृद्भाजनानां मृदादिकारणकदम्बस्याभेदेऽपि कुलालादिसंयोगभेदादुदञ्चनादिप्रपञ्चभेदस्तथेति॥ ७॥

उदकमेहः—**अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम्।**
**मेहत्युदकमेहेन किंचिदाविलपिच्छिलम्॥ ८॥**

श्लेष्मणः श्वेतादिभिर्दशविधैर्गुणैर्व्यस्तैः समस्तैश्च योगादुदकमेहादिकालमेहान्ता दश मेहाः श्लैष्मिका जायन्ते तानेव विवृणोति—**अच्छमित्यादिना**। **आविलं**=घनम्॥ ८॥

इक्षुमेहः—इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रमेहः—सान्द्रीभवेत् पर्युषितं सान्द्रमेहेन मेहति ।
सुरामेहः—सुरामेही सुरातुल्यमुपर्यच्छमधो घनम् ॥ ९ ॥
पिष्टमेह-शुक्र-संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितम् ।
मेहौ—शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ॥ १० ॥
सिकतामेह मूर्त्ताणून् सिकतामेही सिकतारूपिणो मलान् ।
शीतमेहौ—शीतमेही सुबहुशो मधुरं भृशशीतलम् ॥ ११ ॥

मूर्त्तान् = कठिनान्, अणून् = सूक्ष्मान्, सिकतारूपिणः = बालुकासदृशान्, उक्तं च क चित्तन्त्रे पद्यरूपेणैतस्य दशविधस्य विवरणम्—शीताच्छशीतैरुदकप्रमेहः स्यादिक्षुवाही मधुराच्छशीतात् । पित्तोत्कटः स्वच्छगुणात् सुराऽऽख्यो मूर्त्ताणुयुक्तः सिकताप्रमेहः ॥ मन्देन मूत्रेण शनैः प्रमेहो गुरोर्विदग्धाल्लवणप्रमेहः । पिष्टप्रमेहः खलु शुक्रमार्गात् समस्तसान्द्रेण तु सान्द्रमेहः ॥ स्निग्धेन शुक्रेण च शुक्रमेहः स्यात् फेनमेहो गुरुशुक्लयोगात् । इत्येभिरंशैः कफदोषजातैर्नृणां प्रमेहा दश सम्भवन्ति ॥ इति ॥ ११ ॥

शनैर्मेहला—शनः शनः शनैर्मेही मन्दं मन्दं प्रमेहति ।
लामेहौ—लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥ १२ ॥
क्षारमेह-नी—गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ।
ल-कालमेहाः—नीलमेहेन नीलाभं, कालमेही मसीनिभम् ॥ १३ ॥

क्षारनीलादिषड्विधैः पित्तगुणैः क्षारमेहादयः षट् प्रमेहा जायन्ते तान् गन्धवर्णरसस्पर्शैरित्यादिना दर्शयति—गन्धेत्यादि । क्षारतोयवत् = क्षारजलवत्, नीलाभं = चाषपत्रवर्णम्, मसीनिभं = कृष्णवर्णं, मसी'स्याही' इति लोके प्रसिद्धः ॥ १३ ॥

हारिद्रमाञ्जि-हारिद्रमेही कटुकं हरिद्रासंनिभं दहत् ।
ष्ठरक्तमेहाः—विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥ १४ ॥

विस्रम् = आमगन्धि ॥ १४ ॥

वसामेही—वसामेही वसामिश्रं वसाऽऽभं मूत्रयेन्मुहुः ॥ १५ ॥

वातेन च यथाक्रमं वसामज्जौजोलसीकाभिर्यथाक्रमं वसामेहादयो जायन्ते ता-

नाह—वसेत्यादि। वसा = मांसस्नेहः, वसामिश्रं = वसासंयुक्तं, वसाऽऽभं = वसासदृशम् ॥ १५ ॥

मज्जामेहः-मज्जाऽऽभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः।
क्षौद्रमेहौ-कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद् बुधः ॥ १६ ॥
हस्तिमेहः—हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम्।
सलसीकं विबद्धं च हस्तिमेही प्रमेहति ॥ १७ ॥

हस्तिमेही, मत्तः = मदान्धः, हस्ती = गजः, इव, अजस्रं = निरन्तरं, वेगविवर्जितं = वेगशून्यं, सलसीकं=लसीकया समेतं, विबद्धं = पिण्डीभूतम्, इव प्रमेहति ॥ १७ ॥

कफमेहोपद्रवाः-अविपाकोऽरुचिश्छर्दिर्निद्रा कासः सपीनसः।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥ १८ ॥

कफजादिमेहानामुपद्रवानाह—अविपाक इत्यादिना। अविपाकोऽन्नाजाम। सपीनसः = प्रतिश्याययुक्तः ॥ १८ ॥

पित्तमेहोपद्रवाः—बस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः।
दाहतृष्णाऽम्लिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥ १९ ॥

बस्तिमेहनयोः = मूत्राशयशिश्नयोः। अम्लिका = अम्लोद्गारः। विड्भेदः=पुरीषप्रवृत्तिः ॥ १९ ॥

वातमेहोपद्रवाः—वातजानामुदावर्त्तः कम्प-हृद्ग्रह-लोलताः।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते ॥ २० ॥

लोलता=सर्वरसाशिता ॥ २० ॥

असाध्यरूपं-यथोक्तोपद्रवाविष्टमतिप्रस्नुतमेव च।
पिडकापीडितं गाढः प्रमेहो हन्ति मानवम् ॥ २१ ॥

मधुमेहिनो वीर्येण जातस्यासाध्यता—

जातः प्रमेही मधुमेहिनो वा न साध्य उक्तः स हि बीजदोषात् ॥२२॥

असाध्यत्वमाह—जात इत्यादि। जातः प्रमेही=जन्मनैव यः प्रमेही, मधुमेहिनो वा जातः=उत्पन्नः, हि यो बीजदोषात्=शरीरारम्भकपितृशुक्रदोषात् स न साध्यः ॥ २२ ॥

सर्वेऽपि कुलजा रोगा असाध्या भवन्ति—

ये चापि केचित्कुलजा विकारा भवन्ति तांस्तान्प्रवदन्त्यसाध्यान्॥२३॥

ये चापि केचित्=कुष्ठादयो विकाराः, कुलजाः=वंशपरम्परोद्भवाः, भवन्ति तानप्यसाध्यान् वदन्ति ॥ २३ ॥

मधुमेहत्व-**सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।**
हेतुः—**मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥ २४ ॥**

उपेक्षया कफजादिप्रमेहाणां मधुमेहत्वं प्रदर्शयन्नाह—**सर्व** इत्यादिना । सर्व एव प्रमेहाः, **अप्रतिकारिणः**=चिकित्सितमकुर्वतः, कालेन समयमासाद्य, मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति ॥ २४ ॥

मधुमेहरूपं-**मधुमेहे मधुसमं जायते स किल द्विधा ।**
**क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ॥ २५ ॥**
**आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।**
**क्षणात्क्षीणः क्षणात्पूर्णो भजते कृच्छ्रसाध्यताम् ॥**
**मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।**
**सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः ॥ २६ ॥**

मधुमेहे **मधुसमं**=क्षौद्रतुल्यं मूत्रं जायते । स च मधुमेहो हि द्विधा सम्भवति, एकस्तु धातुक्षयात्क्रुद्धे वायौ जायते, द्वितीयो हि दोषावृतपथे । **आवृतो दोषलिङ्गानि**, येन पित्तादिनाऽऽवृतस्तस्य लिङ्गानि दर्शयति सः, **अनिमित्तम्**=अकस्मात्, क्षणात् क्षीणः क्षणात् पूर्णो वा भवन् कृच्छ्रसाध्यतां भजत इति ।

मधुमेहशब्दप्रवृत्तौ निमित्तं दर्शयति—**मधुरं यच्चेति** । **यद्**=यस्मात् कारणात्, मेहेषु मध्विव प्रायो मधुरं मेहति, अतः, **तनोः**=शरीरस्य, माधुर्याच्च मधुमेहाख्यां सर्वे लभन्त इति ॥ २५–२६ ॥

प्रमेहपिडकाया नामानि स्थानं संख्या च—

**शराविका कच्छपिका जालिनी विनताऽलजी ।**
**मसूरिका सर्षपिका पुत्रिणी सविदारिका ॥ २७ ॥**
**विद्रधिश्चेति पिडकाः प्रमेहोपेक्षया दश ।**
**सन्धिमर्मसु जायन्ते मांसलेषु च धामसु ॥ २८ ॥**

उपेक्षया शराविकाऽऽदयो दश पिडका जायन्ते, ता विवृणोति—**शराविकेत्यादि** । प्रमेहोपेक्षया दश पिडका जायन्ते। केचिच्च नव पिडकाः सन्तीति भाषन्ते कुलत्थिकाग्रहणात् तत्र मसूरिकाया एव भेदग्रहणान्न विरोधः । चरके तु सप्त पिडका यद्यपि वर्णितास्तथाऽप्युत्तरत्र तथाऽन्याः पिडकाः सन्तीति वर्णनादन्यासामपि सम्भवः सूचित एवेति नात्र प्रतिक्करणतेति ज्ञेयम् ॥ २७–२८ ॥

शराविका-अन्तोन्नता तु तद्रूपा निम्नमध्या शराविका ।
सर्षपिका—गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी ॥ २९ ॥

सर्वासां पिडकानामाकृतिमाह-अन्तोन्नतेत्यादिना । तद्रूपा=शरावरूपा २९

कच्छपिका सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः ।
जालिनी च-जालिनी तीव्रदाहा तु मांसजालसमावृता ॥ ३० ॥

कूर्मसंस्थाना=कच्छपाकृतिः ॥ ३० ॥

विनता—अवगाढरुजाक्लेदा पृष्ठे वाऽप्युदरेऽपि वा ।
महती पिडका नीला विनता नाम सा स्मृता ॥ ३१ ॥
पुत्रिणी- महत्यल्पाचिता ज्ञेया पिडका चापि पुत्रिणी ।
मसूरिका—मसूराकृतिसंस्थाना विज्ञेया तु मसूरिका ॥ ३२ ॥
अलजी रक्ता सिता स्फोटचिता दारुणा त्वलजी भवेत् ।
विदारिका-विदारीकन्दवद्वृत्ता कठिना च विदारिका ॥
विद्रधिका—विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा ॥ ३३ ॥

विद्रधेर्लक्षणैर्युक्तेतिवर्णनाद् विद्रधेर्विद्रधिकाया भेदः सिद्धो भवति ॥३३॥

पिडकोत्पत्ति ये यन्मयाः स्मृता मेहास्तेषामेतास्तदात्मिकाः ॥
हेतुनिर्देशः—विना प्रमेहमप्येता जायन्ते दुष्टमेदसः ।
तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहः ॥ ३५ ॥

पिडकानामारम्भहेतून्दर्शयति–य इत्यादिना । ये मेहाः, यन्मयाः=यद्दोषारब्धाः, तेषां=मेहानां, पिडका अप्येताः, तदात्मिकाः=तद्दोषमय्यः, भवन्तीति शेषः । एताः पिडकाः प्रमेहं विनाऽपि दुष्टमेदसः पुरुषस्य जायन्ते, एताः पिडकास्तावद्, लक्ष्यन्तेन=न प्रत्यक्षीभवन्ति, यावद्, वास्तुपरिग्रहः=वास्त्वधिष्ठानं न भवतीति ॥ ३४–३५ ॥

असाध्याः—गुदे हृदि शिरस्यंसे पृष्ठे मर्मसु चोत्थिताः ।
सोपद्रवा दुर्बलाग्नेः पिडकाः परिवर्जयेत् ॥ ३६ ॥
पिडकोपद्रवा-(तृट्कासमांससङ्कोच–मोहहिक्कामदज्वराः ।
स्तु चरके—विसर्पमर्मसंरोधाः पिडकानामुपद्रवाः ॥ ३७ ॥
प्रमेहमुक्तल-प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
क्षणम्— विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते) ॥ ३८ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने त्रयस्त्रिंशं प्रमेह-प्रमेह-पिडका-निदानं समाप्तम् ॥ ३३ ॥

असाध्यपिडकालक्षणमाह—गुद इत्यादि। अंसे=बाहुमूले। सोपद्रवाः= तृट्कासाद्युपद्रवयुक्ताः। 'तृट्कासमांससङ्कोचमोहहिक्कामदज्वराः। विसर्पमर्मसंरोधाः पिडकानामुपद्रवाः'। पिडकाः प्रायेणाधोदेशेष्वेव सम्भवन्ति दोषदूष्याणामधःप्रसरणस्वभावात् (रसादीनां च दौर्बल्यान्नोर्ध्वमुत्तिष्ठन्ति प्रमेहिणां दोषाः) इति चरकवचनाच्च। केचिदामनन्ति नारीणां न प्रमेहो भवति तासां प्रतिमासं रजःसंशुद्धेर्दोषाणां शरीरस्य च वैमल्यादिति, तन्न, स्त्रीष्वपि प्रमेहदर्शनात्। रजःसंशुद्धिद्वारा रोगान्तरासद्भावस्यैव निरूपणीयत्वाच्च॥ ३६॥

इति सुधायां प्रमेहप्रमेहपिडकानिदानम्।

---

## अथ चतुस्त्रिंशं मेदो-रोग निदानम्॥ ३४॥

मेदसो हेतुः—अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः।
मधुरोऽन्नरसः प्रायः स्नेहान्मेदः प्रवर्द्धयेत्॥ १॥
सम्प्राप्तिः—मेदसाऽऽवृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः।
मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु॥ २॥
क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः॥ ३॥

अव्यायामेत्यादि। मधुरोऽन्नरसोऽव्यायामादिसेविनः पुरुषस्य स्नेहाद् मेदः प्रवर्धयेद्, मेदसाऽऽवृतमार्गत्वाद्, अन्ये=अस्थादयः, धातवो न पुष्यन्ति। अतो मेदः, चीयते=एकत्रीभवति। तस्मात् पुरुषस्सर्वकर्मस्वसक्तो भवति, क्षुद्रश्वासादिरोगाक्रान्तश्च जायते॥ १-३॥

तत्रोदरवृद्धि-मेदस्तु सर्वभूतानामुदरेष्वस्थिषु स्थितम्।
हेतुः— अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्॥ ४॥

सर्वभूतानां=निखिलप्राणिनाम्, उदरे, अण्वस्थिसंस्थितं=सूक्ष्मास्थिसम्पृक्तं, मेदो भवति। अत एव मेदस्विन उदर एव प्रायो वृद्धिर्भवति॥ ४॥

क्षुधावृद्धिहेतुः-मेदसाऽऽवृतमार्गत्वाद्वायुः कोष्ठे विशेषतः।
चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि॥ ५॥
तस्मात् स शीघ्रं जरयत्याहारमभिकाङ्क्षति।
विकारांश्चाप्नुते घोरान् कांश्चित् कालव्यतिक्रमात्॥ ६॥

**एतावुपद्रवकरौ विशेषादग्निमारुतौ ।**
**एतौ तु दहतः स्थूलं वनदावो वनं यथा ॥ ७ ॥**

असाध्य- **मेदस्यतीव संवृद्धे सहसैवानिलादयः ।**
स्थितिः— **विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥ ८ ॥**

अतिस्थूल- **मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः ।**
रूपम्— **अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥ ९ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुस्त्रिंशं मेदोनिदानं-समाप्तम् ॥ ३४ ॥**

अतिस्थूलमाह—**मेद** इत्यादि। **चलस्फिगुदरस्तनः**=चलत् स्फिगुदरस्तनं यस्य स तथाभूतः। **अयथोपचयोत्साहः**=अयथावन्मांसोपचय उत्साहश्च यस्य स तथा ॥ ९ ॥

इति सुधायां मेदोरोगनिदानम्।

## अथ पञ्चत्रिंशमुदर-निदानम् ॥ ३५ ॥

हेतुः— **रोगाः सर्वेऽपि मन्देऽग्नौ सुतरामुदराणि च ।**
**अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसंचयात् ॥ १ ॥**

अग्नौ मन्दे सति प्रायः सर्वे रोगा जायन्ते। **उदराणि**=उदरस्थरोगाः उदरशब्दो हि उदरस्थपरस्तात्स्थ्याल्लक्षणया। **सुतरामजीर्णादिभिर्मलसञ्चयाद्वा** जायन्ते। **मलाः**=दोषाः, पुरीषादयश्च ॥ १ ॥

सम्प्राप्तिः—**रुद्ध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः ।**
**प्राणाग्न्यपानान् सन्दूष्य जनयन्त्युदरं नृणाम् ॥ २ ॥**

सम्प्राप्तिमाह—**रुद्ध्वेति । सञ्चिताः**=एकत्रस्थिताः, दोषाः स्वेदाम्बुवहानि स्रोतांसि रुद्ध्वा प्राणाग्न्यपानान् सन्दूष्य नृणामुदरं जनयन्तीत्यन्वयः ॥२॥

सामान्य- **आध्मानं गमनेऽशक्तिर्दौर्बल्यं दुर्बलाग्निता ।**
रूपम्—**शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ॥**
**दाहस्तन्द्रा च सर्वेषु जठरेषु भवन्ति हि ॥ ३ ॥**

सामान्यरूपमाह—**आध्मान**मित्यादि। **वातपुरीषयोः सङ्गः**=मलमूत्रयोरवरोधः। **सदनं**=ग्लानिः ॥ ३ ॥

संख्या—**पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।**
**सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ॥ ४ ॥**

अष्टावुदराणि सम्भवन्ति।तदाह—**पृथगि**त्यादिना । १–वातोदरः, २–पित्तोदरः, ३–कफोदरः, ४–सान्निपातिकोदरः, ५–प्लीहोदरः, ६–बद्धोदरः, ७–क्षतोदरः, ८–जलोदर, एवमष्टा वुदराणि । प्लीहोदरादीनि यद्यपि दोषजान्येव तथाऽपि हेतुलिङ्गचिकित्साभेदात्पृथग्वर्णितानि ॥ ४ ॥

वातोदर-**तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु ।**
लक्षणं—**कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम् ॥ ५ ॥**
**शुष्ककासोऽङ्गमर्दोऽधोगुरुता मलसंग्रहः ॥ ६ ॥**
**श्यावारुणत्वगादित्वमकस्माद् वृद्धिह्रासवत् ।**
**सतोदभेदमुदरं तनुकृष्णसिराततम् ॥ ७ ॥**
**आध्मातदृतिवच्छब्दमाहतं प्रकरोति च ।**
**वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतो गतिः ॥ ८ ॥**

वातोदरमाह—**तत्रे**त्यादि । **मलसंग्रहः**=पुरीषाप्रवृत्तिः । **अकस्माद्वृद्धिह्रासवत्**=अनियतोपचयापचयवान्, **आध्मातदृतिवद्**=अनिलपूर्णचर्मपुटकवत् ॥ ५–८ ॥

पित्तोदर- **पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता ।**
रूपं— **भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् ॥ ९ ॥**
**पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते ।**
**धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते ॥ १० ॥**

पैत्तिकमाह–**पित्तोदरे**त्यादि । **पीतताम्रसिरानद्धं**=पीतताम्राभिः सिराभिरानद्धं=व्याप्तम् , **सोष्म**=ऊष्मणा=दाहेन सह वर्त्तमानं सोष्म, **क्षिप्रपाकं**=शीघ्रपाकम् ॥ ९–१० ॥

कफोदर- **श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम् ।**
रूपं— **निद्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ॥ ११ ॥**
**उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।**
**चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरम् ॥ १२ ॥**

त्रिदोषजस्य दूष्योदरस्य वा हेतुलक्षणे—

**स्त्रियोऽन्नपानं नखलोममूत्रविडार्त्तवैर्युक्तमसाधुवृत्ताः ।**
**यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ॥ १३ ॥**
**तेनाशु रक्तं कुपिताश्च दोषाः कुर्युः सुघोरं जठरं त्रिलिङ्गम् ।**
**तच्छीतवाते भृशदुर्दिने च विशेषतः कुप्यति दह्यते च ॥ १४ ॥**

**स चातुरो मुह्यति हि प्रसक्तं, पाण्डुः कृशः शुष्यति तृष्णया च ।**
**दूष्योदरं कीर्त्तितमेतदेव······॥ १९ ॥**

सन्निपातोदरमाह—**स्त्रिय** इत्यादि। स्त्रीपदं विचारशून्यसाधारणबोधकम्। **असाधुवृत्ताः**=दुश्चरित्राः, स्त्रियः, **यस्मै**=पुरुषाय, नखलोमादियुक्तमन्नपानं गरांश्च, **गरः**=कृत्रिमं विषं, **प्रयच्छन्ति**=ददति, तस्य पुरुषस्य, **दुष्टाम्बु**=दूषितजलं, **दूषीविषं**=वक्ष्यमाणम्, एतयोरन्यतरस्य सेवनाद्वा। यदुक्तं **दूषीविष**लक्षणं—**जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति** । इति ॥ **आशु**=झटिति, कुपितं रक्तं कुपिता दोषाश्च त्रिलिङ्गं, **सुघोरं**=सुदारुणं, **जठरम्**=उदररोगं, कुर्युः। एतदेव रक्तं दूष्यं दूषयित्वा यथा भवति तथा दूष्योदरमिति कथ्यते ॥ १३-१५ ॥

प्लीहोदरस्य······· **प्लीहोदरं कीर्त्तयतो निबोध ।**

हेतुलक्षणे—**विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च ।**
**प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ प्लीहोत्थमेतज्जठरं वदन्ति॥१६॥**

प्लीहोदरमाह—**प्लीहे**त्यादि। **विदाह्यभिष्यन्दिरतस्य**=विदाहिपदार्थाभिष्यन्दिपदार्थभोजनशीलस्य ॥ १६ ॥

**तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र ।**
**मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः॥१७॥**

यकृद्दाल्युदरं—

**सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं तदेव ॥१८॥**

**सव्यान्यपार्श्वे**=सव्यं=वामं तदन्यपार्श्वे=दक्षिणपार्श्वे। यकृद्दाल्युदरमाह—यकृद्दोषैर्दलयति=भेदयतीति **यकृद्दाल्युदरम्** ॥ १८ ॥

तत्र वातादि-**उदावर्त्तरुजाऽऽनाहैर्मोहतृड्दहनज्वरैः ।**
विवेकः— **गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात् ॥ १९ ॥**

दोषसम्बन्धमाह—**उदावर्त्ते**त्यादि । उदावर्त्तादिलक्षणचयैः क्रमतस्त्रीन् **मलान्**=वातपित्तकफान्, विद्यादिति ॥ १९ ॥

बद्धगुदोदरस्य लक्षणं—

**यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा पिहितं यथावत् ।**
**सञ्चीयते तस्य मलः सदोषः शनैः शनैः संकरवच्च नाड्याम् ॥२०॥**

निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् ।
हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति ॥ २१ ॥

बद्धगुदमाह—यस्यान्त्रमन्नैरित्यादि । उपलेपिभिः=पिच्छिलैः, अन्नैः, वालाश्मभिः = स्वल्पप्रस्थरखण्डैः, पिहितम् = आच्छादितं, निबद्धमिति यावत् । बद्धगुदमिति गुदस्य बद्धत्वाद्बद्धगुदम् ॥ २०–२१ ॥

परिस्राव्युदरः क्षतोदरो वा—

शल्यं तथाऽन्नोपहितं तदन्त्रं भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात्स्रुतोऽन्त्रात्सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः ॥२२॥
नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यते दाल्यति चातिमात्रम् ।
एतत्परिस्राव्युदरं प्रदिष्टम् ………………॥ २३ ॥

क्षतोदरमाह—शल्यमित्यादि । अन्नोपहितम् = अन्नसंयुक्तं, भुक्तम् , आगतं = पक्वाशयाद् विलोमेनागतम् , अन्यथा वा = जृम्भणात्यशनाभ्यां वा । सलिलप्रकाशः = जलोपमः । दाल्यति = विदीर्यते ॥ २२–२३ ॥

जलोदरः–…………दकोदरं कीर्तयतो निबोध ॥

यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि ॥२४॥
स्नेहोपलिप्तेष्वथवाऽपि तेषु दकोदरं पूर्ववदभ्युपैति ।
स्निग्धं महत्तत्परिवृत्तनाभि समाततं पूर्णमिवाम्बुना च ।
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत्॥२५॥

दकोदरमाह—यः स्नेहपीतेत्यादि । स्नेहपीतः=घृतादिद्रव्यं पीतवान्, मनुष्यः, अनुवासितः = कृतानुवासनबस्तिकः, निरूढः = कृतकषायबस्तिकः, तद्वहानि=उदकवहानि, स्रोतांसि दूष्यन्ति । यथा दृतिः=बस्तिश्चर्मपुटको वा, क्षुभ्यति-अन्तर्जलचलमिव धत्ते कम्पते च शब्दायते=गुडगुडायते वा॥२४–२५॥

कष्टसाध्यता–जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम् ॥२६॥

अजातोदकस्योदरस्य लक्षणम्—

( अशोथमरुणाभासं सशब्दं नातिभारिकम् ॥
सदा गुडगुडायन्तं सिराजालगवाक्षितम् ॥ १ ॥
नाभिं विष्टभ्य पायौ तु वेगं कृत्वा प्रणश्यति ।
हृद्वङ्क्षणकटीनाभिगुदप्रत्येकशूलिनः ॥ २ ॥

कर्कशं सृजतो वातं नातिमन्दे च पावके ।
लालया विरसे चास्ये मूत्रेऽल्पे संहते विशि ।
अजातोदकमित्येतैर्युक्तं विज्ञाय लक्षणैः ) ॥ ३ ॥

असाध्यता—पक्षाद्बद्धगुदं तूर्ध्वं सर्वं जातोदकं तथा ।
प्रायो भवत्यभावाय छिद्रान्त्रं चोदरं नृणाम् ॥ २७ ॥

असाध्योदरी—शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ।
बलशोणितमांसाग्निपरिक्षीणं च वर्जयेत् ॥
पार्श्वभङ्गान्नविद्वेषशोथातीसारपीडितम् ।
विरिक्तं चाप्युदरिणं पूर्यमाणं विवर्जयेत् ॥ २८ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चत्रिंश-
मुदर-निदानं समाप्तम् ॥ ३५ ॥

उदररोगासाध्यलक्षणान्याह—**शूनाक्षमि**त्यादि । **शूनाक्षं**=शूने शोथयुक्ते अक्षिणी यस्य तम् । **कुटिलोपस्थं**=वक्रमेहनम्, **उपक्लिन्नतनुत्वचम्**= उपक्लिन्ना तन्वी च त्वग्यस्य तम् । **उदरिणम्**=उदररोगाक्रान्तम्, **विवर्जयेद्**= न चिकित्सेत् ॥ २८ ॥

इति सुधायामुदरनिदानम् ॥

## अथ षट्त्रिंशं शोथ-निदानम् ॥ ३६ ॥

सम्प्राप्तिः—रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिः सिराः ।
नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयम् ॥
उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥ १ ॥

संख्या—सर्वं हेतुविशेषस्तु रूपभेदान्नवात्मकम् ।
दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि ॥ २ ॥

सम्प्राप्तिमाह—**रक्तेत्यादि** । दुष्टो वायुः, दुष्टान् रक्तादीन् बहिः सिरा· नीत्वा, **तैः**=रक्तादिभिः, रुद्धगतिः, त्वङ्मांससंश्रयं, **संहतं**=घनम्, **उत्सेधम्**= उच्छ्रायं कुर्यादिति । **अतः**=अस्मात्, **निचयात्**= सन्निपातात्, सर्वं तं शोथमाहुः ॥ १–२ ॥

पूर्वरूपं—तत्पूर्वरूपं दवथुः सिराऽऽयामोऽङ्गगौरवम् ॥ ३ ॥

पूर्वरूपमाह—**तदित्यादि** । **दवथुः**=उपतापः ॥ ३ ॥

निजशोथस्य शुद्ध्यामयाभुक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा।
कारणं—दध्याममृच्छाकविरोधिदुष्टगरोपसृष्टान्ननिषेवणं च ॥ ४ ॥
अर्शांस्यचेष्टा न च देहशुद्धिर्मर्मोपघातो विषमा प्रसूतिः।
मिथ्योपचारः प्रतिकर्मणां च निजस्य हेतुः श्वयथोः प्रदिष्टः ॥५॥
सामान्य-सगौरवं स्यादनवस्थितत्वं सोत्सेधमूष्माऽथ सिरातनुत्वम्।
रूपं— सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥६॥
वातशोथः—चलस्तनुत्वक् परुषोऽरुणोऽसितः-
सुषुप्तिहर्षार्तियुतोऽनिमित्ततः।
प्रशाम्यति प्रोन्नमति प्रपीडितो-
दिवाबली च श्वयथुः समीरणात् ॥ ७ ॥
पित्तशोथः—मृदुः सगन्धोऽसितपीतरागवान् भ्रमज्वरस्वेदतृषामदान्वितः।
य उष्यते स्पर्शरुगक्षिरागकृत् स पित्तशोथो भृशदाहपाकवान् ८
कफ- गुरुः स्थिरः पाण्डुररोचकान्वितः प्रसेकनिद्रावमिवह्निमान्द्यकृत्।
शोथः—स कृच्छ्रजन्मप्रशमो निपीडितो न चोन्नमेद्रात्रिबली कफात्मकः ९
द्वन्द्वज-त्रि- निदानाकृतिसंसर्गाच्छ्वयथुः स्याद् द्विदोषजः।
दोषजौ— सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः ॥ १० ॥
आगन्तुजः—अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजः ॥ ११ ॥
रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ॥ १२ ॥
विषजः—विषजः सविषप्राणिपरिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि ॥ १३ ॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात्।
विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात् ॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः ॥ १४ ॥

विषजशोथमाह—विषज इत्यादि। सविषप्राणिनां परिसर्पणात्=चलनात्, मूत्रणाच्च, तेषामेव दंष्ट्रानखाद्याघातात्, अविषप्राणिनामपि विण्मूत्रादियुक्तवस्त्रसंस्पर्शात्। गरयोगावचूर्णनात्—गरं=संयोगजं विषं तस्य देहे लेपनात्। चलः=प्रसरणशीलः, अवलम्बी—अधोगमनस्वभावः ॥ १०–१४ ॥

ऊर्ध्वशोथहेतुः—दोषाः श्वयथुमूर्ध्वं हि कुर्वन्त्यामाशयस्थिताः ॥ १५ ॥

मध्याधःसर्वदे· पक्वाशयस्था मध्ये तु वर्चःस्थानगतास्त्वधः ।

हृशोथहेतुः— कृत्स्नदेहमनुप्राप्ताः कुर्युः सर्वसरं तथा ॥ १६ ॥

कृच्छ्रादिभेदः—यो मध्यदेशे श्वयथुः स कष्टः सर्वगश्च यः ।

अर्धाङ्गेऽरिष्टभूतः स्याद्यश्चोर्ध्वं परिसर्पति ॥ १७ ॥

श्वासः पिपासा च्छर्दिश्च दौर्बल्यं ज्वर एव च ।

यस्य चान्ने रुचिर्नास्ति श्वयथुं तं विवर्जयेत् ॥ १८ ॥

असाध्यः—अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।

पुरुषं हन्ति, नारीं च मुखजो, गुह्यजो द्वयम् ॥ १९ ॥

असाध्यलक्षणान्याह— **यो मध्यदेश** इत्यादिना । **अनन्योपद्रवकृतः**—अन्यस्योपद्रवा अन्योपद्रवास्तद्विपरीताः=अनन्योपद्रवाः, शोथस्यैवोपद्रवा इति यावत् । तैः कृतः, पादसमुत्थितः शोफः पुरुषं हन्ति मुखजः शोफो नारीं हन्ति गुह्यजः शोथो द्वयं=पुरुषं नारीं वा हन्ति । **छर्दिस्तृष्णाऽरुचिः श्वासो ज्वरोऽतीसार एव च । सप्तकोऽयं सदौर्बल्यः शोथोपद्रवसंग्रहः** ॥ १७-१९ ॥

इति सुधायां शोथनिदानम् ।

साध्यासा- नवोऽनुपद्रवः शोथः साध्योऽसाध्यः पुरेरितः ।

ध्यौ— विवर्जयेत्कुक्ष्युदराश्रितं च तथा गले मर्मणि संश्रितं च ।

स्थूलः खरश्चापि भवेद्विवर्ज्यो यश्चापि बालस्थविराबलानाम् २०

शोथोप- (श्वासः पिपासा दौर्बल्यं ज्वरश्छर्दिररोचकः ।

द्रवाः— हिक्काऽतीसारकासाश्च शोथिनं क्षपयन्ति हि) ॥ २१ ॥

इति श्रीमाधवकरविरचिते-माधवनिदाने षट्त्रिंशं शोथ-निदानं समाप्तम् ॥ ३६ ॥

---

## अथ सप्तत्रिंशं वृद्धि-निदानम् ॥ ३७ ॥

सम्प्राप्तिः—क्रुद्धोऽनूर्ध्वगतिर्वायुः शोथशूलकरश्चरन् ।

मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ॥

प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ॥ १ ॥

संख्या—दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः ॥ २ ॥

सम्प्राप्तिमाह—**क्रुद्धोऽनूर्ध्वगति**रित्यादिना । **अनूर्ध्वगतिः**=अधोगतिः, वायुः, **मुष्कौ**=अण्डकोषौ, प्राप्य **वङ्क्षणतः**=मेढ्रजङ्घासन्धेः, **फलकोषाभिवाहि**·

नीर्धमनीः, प्रपीड्य=सन्दूष्य, फलकोषयोर्वृद्धिं करोतीत्यन्वयः । सवृद्धिर्गदः, सप्तधा=त्रिभिर्दोषैस्त्रयः, अस्रेण चैकः, मेदसा चैकः, अन्त्रेण चैकः, एवं सप्त १-२

मूत्रान्त्रवृद्ध्योर्विवेकः—

मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ॥ ३ ॥

वातवृद्धिः-वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ॥ ४ ॥

पित्तवृद्धिः-पक्वोदुम्बरसंकाशः पित्ताद्दाहोष्मपाकवान् ॥ ५ ॥

कफवृद्धिः-कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक् ॥ ६ ॥

रक्तवृद्धिः-कृष्णास्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ॥ ७ ॥

मेदोवृद्धिः-कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ॥ ८ ॥

मूत्रवृद्धिः-मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ् मृदुः ॥
मूत्रकृच्छ्रमधः स्याच्च चालयन् फलकोषयोः ॥ ९ ॥

अन्त्रवृद्धिः-वातकोपिभिराहारैः शीततोयावगाहनैः ।
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः ॥
क्षोभणैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा ॥
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।
कुर्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ॥
उपेक्ष्यमाणस्य च मुष्कवृद्धिमाध्मानरुक्स्तम्भवतीं स वायुः ।
प्रपीडितोऽन्तः स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ॥
अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः ॥ १० ॥

तन्त्रान्तरे ब्र·(अत्यभिष्यन्दिगुर्वन्नसेवनान्निचयं गतः ।
ध्ननिदानम्-करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥ ११ ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत् ) ॥ १२ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने सप्तत्रिंशं वृद्धिनिदानं समाप्तम् ॥ ३७ ॥

अन्त्रवृद्धिमाह—वातकोपिभिरित्यादि । वातकोपिभिः=रूक्षादिभिराहारैः, शीततोयावगाहनैः=शीतजलावगाहनैः, धारणम्—उपस्थितस्य वेगस्य, ईरणम्=अप्राप्तवेगस्य, अन्यैश्च=बलवद्विग्रहादिधनुराकर्षणादिकठिनव्यापारैः, पवनः=वायुः, विगुणीकृत्य=संकुचीकृत्य, यदा स्वनिवेशात्=स्वस्था-

नात्, अधो नयेत्=प्रापयेत्, तदा वङ्क्षणसन्धिस्थः सन् ग्रन्थ्याभं=ग्रन्थिरूपिणं, श्वयथुं करोति ॥ १० ॥

इति सुधायां वृद्धिनिदानम् ॥

## अथाष्टात्रिंशं गलगण्ड-गण्डमालाऽपची-ग्रन्थ्य-र्बुदनिदानम् ३८

गलगण्डरूपं-निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले ।
महान्वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥ १ ॥

सामान्यलिङ्गमाह—निबद्ध इत्यादि । निबद्धः=अनुबन्धवान्, मुष्कवद्=अण्डकोषवत्, गले लम्बते तं गलगण्डम्, आदिशेत्=जानीयात् ॥ १ ॥

गलगण्डसम्प्राप्तिः—

वातः कफश्चापि गले प्रदुष्टो मन्ये च संश्रित्य तथैव मेदः ।
कुर्वन्ति गण्डं क्रमतः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ॥ २ ॥

सम्प्राप्तिमाह—वातः कफो मेदो वा गलगण्डहेतवो न पित्तम्, व्याधिस्वभावात्। पैत्तिको न भवतीति । क्रमतः=शनैः शनैः, स्वलिङ्गैः, निबद्धः श्वयथुरित्यादिगलगण्डलिङ्गैः समन्वितम् ॥ २ ॥

वातजगलगण्डः—

तोदान्वितः कृष्णसिराऽवनद्धः श्यावोऽरुणो वा पवनात्मकस्तु ।
पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात्कदा चित् ॥
वरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः ॥३॥

वातजमाह—तोदेत्यादि । चिरवृद्धिरिति व्याधिप्रभावात्, अपाकः=पाकवर्जितः, यदृच्छया=कारणाप्रतिनियमेन कदा चित्=न सर्वदा, पाकम्, इयाद्=गच्छेत् ॥ ३ ॥

कफजगलगण्डः—

स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतो महांश्चापि कफात्मकस्तु ॥४॥
चिराभिवृद्धिं भजते चिराद्वा प्रपच्यते मन्दरुजः कदा चित् ।
माधुर्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रलेपः ॥ ५ ॥

मेदोभवगलगण्डः—

स्निग्धो गुरुः पाण्डुरनिष्टगन्धो मेदोभवः कण्डुयुतोऽल्परुक् च ।
प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ॥
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेऽनुशब्दं कुरुते च नित्यम् ॥६॥

मेदोजमाह—**स्निग्ध** इत्यादि। **देहानुरूपक्षयवृद्धियुक्तः**=शरीरानुकूल-ह्रासोपचयवान्, देहक्षये क्षयं, देहवृद्धौ च वृद्धिं यातीत्यर्थः॥ ४–६॥

असाध्यगलगण्डः—

**कृच्छ्राच्छ्वसन्तं मृदुसर्वगात्रं संवत्सरातीतमरोचकार्त्तम्।**
**क्षीणं च वैद्यो गलगण्डयुक्तं भिन्नस्वरं चापि विवर्जयेत्तु॥७॥**

गण्डमाला:—

**कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु।**
**मेदःकफाभ्यां चिरमन्दपाकः स्याद्गण्डमाला बहुभिश्च गण्डः॥८॥**

गण्डमालामाह—**कर्कन्ध्वि**त्यादि। **कर्कन्धुः**=क्षुद्रबदरम्, **कोलं**=बृहद् बदरं, **मेदःकफाभ्यां**–प्राधान्येन मेदःकफौ वर्णितौ वातादिसम्बन्धोऽप्यत्र द्रष्टव्यः॥ ७–८॥

अपची-**ते ग्रन्थयः केचिदवाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये।**
**कालानुबन्धं चिरमादधाति सवापचीति प्रवदन्ति तज्ज्ञाः॥९॥**

अपचीमाह—**ते ग्रन्थय** इत्यादिना। **ते**=गण्डमालाऽऽरम्भकदोषदूष्य-जनिता ये ग्रन्थयस्ते, **अवाप्तपाकाः**=प्राप्तपाकाः, स्रवन्ति केचित्, केचिन्न-श्यन्ति, भवन्ति च केचित्तदाऽपचीति भण्यते। अपरापरोपचीयमानतयाऽपचीति कथ्यते॥ ९॥

साध्यासाध्यत्वं—

**साध्याः स्मृताः पीनसपार्श्वशूलकासज्वरच्छर्दियुतास्त्वसाध्याः॥१०**

ग्रन्थिः-**वातादयो मांसमसृक् प्रदुष्टाः संदूष्य मेदश्च तथा सिराश्च।**
**वृत्तोन्नतं विग्रथितं च शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः॥११॥**

ग्रन्थिमाह—**वातादय** इत्यादि। **वृत्तोन्नतं**=वृत्तं=वर्त्तुलम्, उन्नतम्=उच्छूनं, **विग्रथितं**=कठिनं, विग्रथितत्वादेव ग्रन्थिरिति संज्ञा॥ ११॥

वातज **आयम्यते वृश्च्यति तुद्यते च प्रत्यस्यते मथ्यति भिद्यते च।**
ग्रन्थिः-**कृष्णो मृदुर्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम्॥१२॥**

अनिलग्रन्थिमाह—**आयम्यत** इत्यादि। **आयम्यते**=आकृष्य विस्तार्यते। **वृश्चयति**=छिनत्ति, **प्रत्यस्यते**=क्षिप्यते, **मथ्यति**=आलोडयति॥ १२॥

पित्तज-**दन्दह्यते धूप्यति वृश्च्यते च पापच्यते प्रज्वलतीव चापि।**
ग्रन्थिः **रक्तः सपीतोऽप्यथवाऽपि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रम्॥१३॥**
कफज-**शीतोऽविवर्णोऽल्परुजोऽतिकण्डूः पाषाणवत् संहननोपपन्नः।**
ग्रन्थिः-**चिराभिवृद्धश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनं च पूयम्॥ १४॥**

पित्तजमाह—**दन्दह्यते**=अतिशयेन दहति। **धूप्यति**=धूमायत इव, **पापच्यते**=भृशं पचति, **प्रज्वलतीव**=ज्वलन्भस्मीभवतीव। श्लेष्मजमाह—**पाषाणवत्**=प्रस्तरवत्, **संहननोपपन्नः**=कठिनः॥ १३–१४॥

मेदोज-**शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान् कण्डुयुतोऽरुजश्च।**
ग्रन्थिः **मेदःकृतो गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमं तु मेदः॥१५॥**

मेदोजमाह—शरीरेत्यादि। **शरीरवृद्धिक्षयवृद्धिहानिः**=शरीरस्य वृद्धिक्षयाभ्यां वृद्धिहानी यस्य स तथा। शरीरवृद्धौ यस्य वृद्धिः शरीरहानौ यस्य हानिरित्यर्थः। **पिण्याकसर्पिःप्रतिमं**=पिण्याकः=तिलकल्कः, सर्पिः=घृतम्॥ १५॥

सिराज-**व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु सिराप्रतानम्।**
ग्रन्थिः-**सङ्कुच्य संपिण्ड्य विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशुवृत्तम्॥१६॥**

कष्टसाध्योऽसाध्यश्च ग्रन्थिः—

**ग्रन्थिः सिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात् सरुजश्चलश्च।**
**स चारुजश्चाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्जनीयः॥ १७॥**

अर्बुद-**गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य।**
रोगः-**वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकम्॥ १८॥**
**कुर्वन्ति मांसोच्छ्रयमत्यगाधं तदर्बुदं शास्त्रविदो वदन्ति।**
**वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा॥**
**तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि सदा भवन्ति॥१९॥**

अर्बुदमाह—**गात्रप्रदेश** इत्यादिना। **क्वचिदेव**=अनियतदेशे, **संमूर्च्छिताः**=प्रवृद्धा दोषाः, मांसमसृक् प्रदूष्य, **वृत्तं**=वर्त्तुलम्। **अत्यगाधं**=दूरानुप्रविष्टम्, **मांसोच्छ्रयं**=मांसपिण्डं, कुर्वन्ति तदर्बुदं वदन्ति शास्त्रविदः॥ १८–१९॥

रक्तजार्बुदः-**दोषः प्रदुष्टो रुधिरं सिराश्च सङ्कुच्य सम्पिण्ड्य ततस्त्वपाकम्।**
**सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशुवृद्धम्॥२०॥**
**करोत्यजस्रं रुधिरप्रवृत्तिमसाध्यमेतद्रुधिरात्मकं तु।**
**रक्तक्षयोपद्रवपीडितत्वात् पाण्डुर्भवेदर्बुदपीडितस्तु॥२१॥**

मांसार्बुदः—**मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथम्।**
**अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यम्॥२२॥**
**प्रदुष्टमांसस्य नरस्य गाढमेतद्भवेन्मांसपरायणस्य।**
**मांसार्बुदं त्वेतदसाध्यमुक्तम्** ........

मांसार्बुदमाह—अश्मोपमं=पाषाणवत्कठिनम्, अप्रचाल्यं=स्थिरं, मांसपरायणस्य=मांसाशिनः, एतन्मांसार्बुदमसाध्यं जायत इति ॥ २३ ॥

तस्यासाध्यतालक्षणं—

**साध्येष्वपीमानि तु वर्जयेच्च ॥ २३ ॥**

**संप्रस्रुतं मर्मणि यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यम् ॥२४॥**

अध्यर्बुदः— **यज्जायतेऽन्यत्खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः ।**

**यद् द्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यम् ॥२५॥**

अर्बुदस्यापाके हेतुः—

**न पाकमायान्ति कफाधिकत्वान्मेदोबहुत्वाच्च विशेषतस्तु ।**

**दोषस्थिरत्वाद् ग्रथनाच्च तेषां सर्वार्बुदान्येव निसर्गतस्तु ॥२६॥**

**इति श्रीमाधवकरविरचिते माधवनिदानेऽष्टत्रिंशं गलगण्ड-गण्डमालाऽपची-ग्रन्थ्यर्बुद-निदानं समाप्तम् ॥ ३८ ॥**

अर्बुदानां पाकाभावे युक्तिमाह—न पाकमित्यादिना । सर्वाण्यप्यर्बुदानि पित्तरक्तजान्यपि कफाधिकत्वान्मेदोबहुत्वाद्दोषस्थिरत्वाच्च न पाकमायान्ति ॥२६॥

इति सुधायां गलगण्ड–गण्डमाला–ऽपची–ग्रन्थ्यर्बुदनिदानम् ।

## अथैकोनचत्वारिंशं श्लीपद-निदानम् ॥ ३९ ॥

सामान्यलक्षणं—

**यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण ।**

**तच्छ्लीपदं स्यात् करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः ॥१॥**

उत्सेधसाधर्म्यादर्बुदेन सह कफसम्बन्धाव्यभिचारे साम्याच्चार्बुदाद्यनन्तरं श्लीपदमाह—य इत्यादि । क्रमेण=शनैः शनैः, पादगतः शोथः श्लीपदं स्यात् । केचिच्च करकर्णनेत्रादिष्वपि श्लीपदमाहुः । तन्मते निरुपाधिरेवेयं संज्ञा । अन्ये तु शिलावत्पदं श्लीपदमाहुः ॥ १ ॥

वातजं—**वातजं कृष्णरूक्षं च स्फुटितं तीव्रवेदनम् ।**

**अनिमित्तरुजं तस्य बहुशो ज्वर एव च ॥ २ ॥**

पित्तजं- **पित्तजं पीतसंकाशं दाहज्वरयुतं मृदु ।**

कफजं च—**श्लैष्मिकं स्निग्धवर्णं च श्वेतं पाण्डुगुरुस्थिरम् ॥ ३ ॥**

असाध्य- **वल्मीकमिव संजातं कण्टकैरुपचीयते ।**

रूपं— **अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः ॥ ४ ॥**

असाध्यत्वमाह—वल्मीकमिवेत्यादि। वल्मीकं=कृमिशैलं, तदिव, कण्टकरुपचीयते=कण्टकवन्मांसाङ्कुरैर्व्याप्यते, अब्दात्मकं=संवत्सरातीतम् ॥ ४ ॥

इति सुधायां श्लीपदनिदानम् ॥

तत्र कफ- त्रीण्यप्येतानि जानीयाच्छ्लीपदानि कफोच्छ्रयात्।
प्राधान्यं— गुरुत्वं च महत्त्वं च यस्मान्नास्ति कफं विना ॥ ५ ॥
उत्पत्तिदेशाः—पुराणोदकभूयिष्ठाः सर्वर्तुषु च शीतलाः।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥ ६ ॥

पुनरप्यसाध्यरूपं—

यच्छ्लेष्मलाहारविहारजातं पुंसः प्रकृत्याऽपि कफात्मकस्य।
सास्रावमत्युन्नतसर्वलिङ्गं सकण्डुरं श्लेष्मयुतं विवर्ज्यम् ॥ ७ ॥

इति श्रीमाधवकरविरचिते माधवनिदान एकोनचत्वारिंशं श्लीपदनिदानं समाप्तम् ॥ ३९ ॥

---

## अथ चत्वारिंशं विद्रधि-निदानम् ॥ ४२ ॥

संप्राप्तिः—त्वग्रक्तमांसमेदांसि संदूष्यास्थिसमाश्रिताः।
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम् ॥ १ ॥
स्वरूपं—महामूलं रुजावन्तं वृत्तं वाऽप्यथवाऽऽयतम्।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥ २ ॥

सम्प्राप्तिमाह—त्वग्रक्तेत्यादि। अस्थिसमाश्रिताः, भृशमुच्छ्रिताः=अत्यर्थं प्रकुपिताः, घोरं=दारुणं, महामूलं=सुजर्ड, वृत्तं=वर्त्तुलम्, आयतं=विशालं, स विद्रधिरिति ख्यातः—इति शब्देन निरुपाधिसंकेतमात्रेयं संज्ञेति बोधयति। चरके तु—"स वै शीघ्रविदाहित्वाद् विद्रधीत्यभिधीयत" इति१-२

संख्या—पृथग् दोषः समस्तैश्च क्षतेनाप्यसृजा तथा।
षण्णामपि हि तेषां तु लक्षणं सम्प्रवक्ष्यते ॥ ३ ॥
वातजविद्रधिः-कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः।
चित्रोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः ॥ ४ ॥
पित्तजः—पक्वोदुम्बरसंकाशः श्यावो वा ज्वरदाहवान्।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ॥ ५ ॥

कफजः—शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधिः कफसम्भवः ॥ ६ ॥
आस्राववर्णं—तनुपीतसिताश्चषामास्रावाः क्रमतः स्मृताः ॥ ७ ॥
त्रिदोषजः—नानावर्णरुजास्रावो घाटालो विषमो महान् ।
विषमं पच्यते चापि विद्रधिः सान्निपातिकः ॥ ८ ॥

सान्निपातिकमाह—नानेत्यादि । नानावर्णरुजास्रावः=नाना=अनेकविधाः, वर्णाः=कृष्णपीतादयः, रुजाः=तोदादयः, आस्रावाः, तनुपीतसिताश्च यस्य स तथाभूतः । घाटालः=घाटा अस्यास्तीति घाटालः=अत्युन्नताग्रः ॥३–८॥

क्षतजः—तैस्तैर्भावैरभिहते क्षते वाऽपथ्यकारिणः ।
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ॥ ९ ॥
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
आगन्तुर्विद्रधिर्ह्येष पित्तविद्रधिलक्षणः ॥ १० ॥

आगन्तुमाह—तैस्तैरित्यादि । तैस्तैर्भावैः=काष्ठलोष्ठप्रस्तरादिभिः, अभिहते=क्षते वा, अपथ्यकारिणो वायुना विसृतः=प्रेरितः, क्षतोष्मा सरक्तं पित्तम्, ईरयेत्=सञ्चालयेत् ॥ ९–१० ॥

रक्तजः—कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाकरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ॥ ११ ॥
अन्तर्विद्रधिः—पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम् ।
वल्मीकवत् समुन्नद्धमन्तः कुर्वन्ति विद्रधिम् ॥ १२ ॥
अन्तःस्थानानि—गुदे बस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा ।
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाऽप्यथ ॥१३॥
तेषामुक्तानि लिङ्गानि बाह्यविद्रधिलक्षणैः ।
अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः ॥ १४ ॥

गुद–बस्ति–नाभि–कुक्षिजातानां रूपाणि—

गुदे वातनिरोधश्च, बस्तौ कृच्छ्राल्पमूत्रता ।
नाभ्यां हिक्का तथाऽऽटोपः, कुक्षौ मारुतकोपनम् ॥ १५ ॥

वङ्क्षणवृक्कप्लीहजानां रूपाणि—

कटीपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ ।
वृक्कयोः पार्श्वसंकोचः प्लीह्न्युच्छ्वासावरोधनम् ॥ १६ ॥

हृदययकृत्क्लोमजानां रूपाणि स्रावनिर्गममार्गश्च—

**सर्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते ।**
**श्वासो यकृति हिक्का च, क्लोम्नि पेपीयते पयः ॥**
**नाभेरुपरिजाः पक्का यान्त्यूर्ध्वमितरे त्वधः ॥ १७ ॥**

साध्यासाध्यत्वम्— **अधः स्रुतेषु जीवेत्तु स्रुतेषूर्ध्वं न जीवति ।**
**हृन्नाभिबस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः ॥**
**जीवेत् कदा चित् पुरुषो नेतरेषु कदा चन ।**
**साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः ॥ १८ ॥**

आमपक्वज्ञानम्—**आमपक्वविदग्धत्वं तेषां शोथवदादिशेत् ॥ १९ ॥**

असाध्यरोगी—**आध्मातं बद्धनिष्यन्दं छर्दिहिक्कातृषाऽन्वितम् ।**
**रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम् ॥ २० ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चत्वारिंशं विद्रधिनिदानं समाप्तम् ॥ ४० ॥**

साध्यासाध्यत्वादिकमाह—**अधःस्रुतेष्विति** । अधःस्रुतेषु सत्सु जीवेत्, ऊर्ध्वं स्रुतेषु न जीवति । हृन्नाभिबस्तिवर्ज्या ये विद्रधयस्तेषु बाह्यतो भिन्नेषु पुरुषः कदा चिज्जीवेत्, इतरेषु हृदयादिजेषु विद्रधिषु भिन्नेषु कदा चन न जीवेत् । **बद्धनिष्यन्दं**=बद्धमूत्रम् ॥ ११-२० ॥

इति सुधायां विद्रधिनिदानम् ।

---

## अथैकचत्वारिंशं व्रणशोथ-निदानम् ॥ ४१ ॥

व्रणपूर्वरूपम्—**एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणम् ॥ १ ॥**

तत्संख्या—**षड्विधः स्यात् पृथक्सर्वरक्तागन्तुनिमित्तजः ।**
**शोथाः षडेते विज्ञेयाः प्रागुक्तैः शोथलक्षणैः ॥ २ ॥**

एषां शोथरोगाद्विशेषो वातादिभेदात्पाकभेदश्च—

**विशेषः कथ्यते चैषां पक्वापक्वादिनिश्चये ।**
**विषमं पच्यते वातात् पित्तोत्थश्चाचिरात्किचरम् ।**
**कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवः ॥ ३ ॥**

विशेषमाह—**एषां**=शोथानां, **पक्वापक्वादिनिश्चये**-आदिना पच्यमानस्यापि संग्रहः ॥ १-३ ॥

आमशोथ- मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता।
रूपं— मन्दवेदनता चैतच्छोथानामामलक्षणम्॥ ४॥
पच्यमानशो- दह्यते दहनेनेव क्षारेणेव च पच्यते।
थरूपं— पिपीलिकागणेनेव दश्यते छिद्यते तथा॥ ५॥
भिद्यते चैव शस्त्रेण दण्डेनेव च ताड्यते।
पीड्यते पाणिनेवान्तः सूचीभिरिव तुद्यते॥ ६॥
सोषाचोषो विवर्णः स्यादङ्गुल्येवावघट्ट्यते।
आसने शयने स्थाने शान्तिं वृश्चिकविद्धवत्॥ ७॥
न गच्छेदाततः शोथो भवेदाध्मातबस्तिवत्।
ज्वरस्तृष्णाऽरुचिश्चैव पच्यमानस्य लक्षणम्॥ ८॥

पच्यमानलक्षणमाह—**दह्यत** इत्यादि। **दहनेन**=वह्निना, **पाणिना**=हस्तेन, **सोषाचोषः**=उषा=दाहः, चूष्यत इव चोषो=वेदनाविशेषः, ताभ्यां सह वर्त्तमानः, **आध्मातबस्तिवत्**=प्रफुल्लमूत्राशयवदाततः, भवेत्॥ ४–८॥

पक्वशोथरूपं-वेदनोपशमः शोथोऽलोहितोऽल्पो न चोन्नतः।
प्रादुर्भावो वलीनां च तोदः कण्डुर्मुहुर्मुहुः॥ ९॥
उपद्रवाणां प्रशमो निम्नता स्फुटनं त्वचाम्।
बस्ताविवाम्बुसञ्चारः स्याच्छोथेऽङ्गुलिपीडिते॥ १०॥
पूयस्य पीडयत्येकमन्तमन्ते च पीडिते।
भक्ताकाङ्क्षा भवेच्चैतच्छोथानां पक्वलक्षणम्॥ ११॥

पक्वलक्षणमाह—**वेदनोपशम** इत्यादि। बलीनां=चर्मणां, **प्रादुर्भावः**=सङ्कोचः। **त्वचां स्फुटनं**=त्वगवदरणम्, **एकं**=देशम्, अन्ते च पीडिते बस्तौ यथा, **अम्बुसञ्चारः**=जलचलनं, तथा शोथेऽङ्गुलिनिपीडिते पूयस्य सञ्चारः, **भक्ताकाङ्क्षा**=भोजनेच्छा च यत्र भवेदेतत्पक्वानां शोथानां लक्षणम्॥ ९–११॥

व्रणपाके त्रिदोषविद्यमानता—

नर्तेऽनिलाद्रुक्, न विना च पित्तं पाकः, कफं चापि विना न पूयः।
तस्माद्धि सर्वान् परिपाककाले पचन्ति शोथांस्त्रय एव दोषाः॥ १२॥
शोथादनिर्गत-कक्षं समासाद्य यथैव वह्निर्वाय्वीरितः संदहति प्रसह्य।
पूयस्य कार्यं-तथैव पूयो ह्यविनिःसृतो हि मांसं सिराः स्नायु च खादतीह १३

पूयस्यानिःसारणे दोषमाह—**कक्षमित्यादि**। यथा—**वाय्वीरितः**=पवन-

प्रेरितः, वह्निः, कक्षं=तृणपुञ्जम् ,आसाद्य, प्रसह्य=हठाद् , दहति तथैवाविनिःसृतो हि पूयः, मांसं सिराः स्नायु च खादति ॥ १२-१३ ॥

इति सुधायां व्रणशोथनिदानम् ।

आमपक्वाऽज्ञाने श्वपचत्वं—

यश्छिनत्त्याममज्ञानाद्यो वा पक्वमुपेक्षते ।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ ॥ १४ ॥

तज्ज्ञाने वै· आमं विदह्यमानं च सम्यक् पक्वं च यो भिषक् ।
वत्वम्—जानीयात् स भवेद्वैद्यः शेषास्तस्करवृत्तयः ॥ १५ ॥

इति श्रीमाधवकरविरचिते माधवनिदान एकचत्वारिंशं व्रणशोथनिदानं समाप्तम् ॥ ४१ ॥

## अथ द्विचत्वारिंशं शारीरव्रण-निदानम् ॥ ४२ ॥

व्रणभेदः—द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः ।
दोषराद्यस्तयोरन्यः शस्त्रादिक्षतसम्भवः ॥ १ ॥

व्रणनिदानमाह—द्विधेत्यादि । शारीरागन्तुभेदतो हि व्रणो द्विधा विज्ञेयः ( वृणोतीति व्रणः ) तथा च सुश्रुतः—वृणोति यस्माद्रूढेऽपि व्रणवस्तु न नश्यति । आदेहधारणाज्जन्तोर्व्रणस्तस्मान्निरुच्यते । इति । आद्यः= शारीरः, अन्यः=आगन्तुः ॥ १ ॥

वातजव्रणः—स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुरति श्यावो व्रणो मारुतसम्भवः ॥ २ ॥

पित्तजः—तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणः ।
व्रणं पित्तकृतं विद्याद्गन्धः स्रावैश्च पूतिकैः ॥ ३ ॥

कफजः—बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ॥ ४ ॥

रक्तजद्वन्द्वजत्रिदोषजाः—

रक्तो रक्तस्रुती रक्ताद् , द्विस्त्रिजः स्यात्तदन्वयैः ॥ ५ ॥

सुखसाध्यः त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः ।
कष्टसाध्यः—धीमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः ॥ ६ ॥

साध्यत्वं—गुणैरन्यतमैर्हीनस्ततः कृच्छ्रो व्रणः स्मृतः ।
सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो भूर्युपद्रवः ॥ ७ ॥

दुष्टव्रणरूपं–**पूतिः पूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः।**
**दुष्टो व्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः॥ ८॥**

दुष्टव्रणलिङ्गमाह—पूतिरित्यादि। **पूयातिदुष्टासृक्स्रावी**=पूयेन सह दुष्टं रक्तं स्रवतीति तथा, **उत्सङ्गी**=कोटरवान्। **चिरस्थितिः**=दीर्घकालव्यायी २–८

शुद्धव्रणरूपं–**जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः।**
**सुव्यवस्थो निरास्रावः शुद्धो व्रण इति स्मृतः॥ ९॥**

शुद्धव्रणलिङ्गमाह—जिह्वेत्यादि। **जिह्वातलाभः**=जिह्वातलस्य आभा इवाभा यस्य स तथाभूतः। **सुव्यवस्थः**=उत्सन्नोत्सङ्गित्ववर्जितः। **निरास्रावः**=स्रावरहितः॥ ९॥

रुह्यमाणरूपं–**कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः।**
**स्थिरा पिडकावन्तो रोहतीति तमादिशेत्॥ १०॥**

रोहद्व्रणलिङ्गमाह—कपोतेत्यादि। **कपोतवर्णप्रतिमाः**=पारावतवर्णतुल्याः, पाण्डुधूसरा इति यावत्॥ १०॥

सम्यग्रूढरूपं–**रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्।**
**त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्॥ ११॥**

कष्टसाध्याः–**कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम्।**
**व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः।**
**वसां मेदोऽथ मज्जानं मस्तुलुङ्गं च यः स्रवेत्॥ १२॥**

आगन्तुजः साध्यो दोषजोऽसाध्यश्च—
**आगन्तुजो व्रणः सिद्ध्येन्न सिद्ध्येद्दोषसंभवः॥ १३॥**

मुमूर्षुव्रणाः–**मद्यागुर्वाज्यसुमनःपद्मचन्दनचम्पकैः।**
**सगन्धा दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः॥ १४॥**

त्याज्या व्रणाः— **ये च मर्मस्वसम्भूता भवन्त्यत्यर्थवेदनाः।**
**दह्यन्ते चान्तरत्यर्थं बहिःशीताश्च ये व्रणाः।**
**दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः॥ १५॥**
**प्राणमांसक्षयश्वासकासारोचकपीडिताः।**
**प्रवृद्धपूयरुधिरा व्रणा येषां च मर्मसु॥ १६॥**
**क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः।**
**वर्जयेदपि तान् वैद्यः संरक्षन्नात्मनो यशः॥ १७॥**

व्रणे आयासा-(व्रणे श्वयथुरायासात् स च रागश्च जागरात् ।
दीनां प्रभावः-तौ च रुक् च दिवास्वापात् ताश्च मृत्युश्च मैथुनात् )॥ १८ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने द्विचत्वारिंशं शारीरव्रणनिदानं समाप्तम् ॥ ४२ ॥

रूढव्रणलिङ्गमाह—रूढेत्यादि । रूढवर्त्मानं=रूढं वर्त्म=व्रणमार्गो यस्य तं तथोक्तम् , अशूनं=शोथशून्यम् , विनिर्दिशेत्=विद्यात् ॥ ११ ॥

इति सुधायां शारीरव्रणनिदानम् ।

## अथ त्रिचत्वारिंशं सद्योव्रण-निदानम् । ॥ ४३ ॥

कारणं— नानाधारमुखैः शस्त्रैर्नानास्थाननिपातितः ।
भवन्ति नानाऽऽकृतयो व्रणास्तांस्तान्निबोध मे ॥ १ ॥

अथागन्तुव्रणमाह—नानेत्यादि । नानाधारमुखैः=नाना=बहुविधा धारा मुखानि च येषां तानि तथा । नानास्थाननिपातितैः=बहुप्रदेशप्रयुक्तैः, नानाऽऽकृतयः=बहुरूपाः, व्रणा भवन्ति तान् व्रणान् निबोध=जानीहि ॥ १ ॥

षड् भेदाः—छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ।
घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् ॥ २ ॥

छिन्नरूपं—तिर्यक् छिन्न ऋजुर्वाऽपि यो व्रणस्त्वायतो भवेत् ।
गात्रस्य पातनं तच्च छिन्नमित्यभिधीयते ॥ ३ ॥

भिन्नलक्षणं-शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हतः ।
यत किंचित् प्रस्रवेत्तद्धि भिन्नलक्षणमुच्यते ॥ ४ ॥

कोष्ठलक्षणं-स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥ ५ ॥

छिन्नादिषट्कमाह—छिन्नेत्यादि । प्रत्येकं छिन्नादिलक्षणमाह-तिर्यगित्यादिना । कोष्ठलक्षणमाह—स्थानेत्यादि । आमाग्निपक्वानां मूत्रस्य रुधिरस्य च स्थानानि=( आमाशयः ) ( पक्वाशयः ) ( अग्न्याशयः ) (मूत्राशयः) (रक्ताशयः), हृत्=हृदयम् , उण्डुकः=रुधिरमलसम्भूतोऽन्त्रदेशे व्यवस्थितः, मलाधानमिति । फुप्फुसः=रक्ताधारो वामभागे हृदयस्य तिष्ठति । एतत्समुदायः कोष्ठ इत्यभिधीयते, अन्यैरिति शेषः ॥ ५ ॥

भिन्नकोष्ठरूपं-तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते ।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ॥ ६ ॥
मूर्च्छा श्वासस्तृषाऽऽध्मानमभक्तच्छन्द एव च ।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता ॥ ७ ॥
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च ।
हृच्छूलं पार्श्वयोश्चापि विशेषं चात्र मे शृणु ॥ ८ ॥

आमाशयस्थे आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि ।
रक्ते— आध्मानमतिमात्रं च शूलं च भृशदारुणम् ॥ ९ ॥

पक्वाशयस्थे पक्वाशयगते चापि रुजा गौरवमेव च ।
रक्ते— अधः काये विशेषेण शीतता च भवेदिह ॥ १० ॥

विद्धलक्षणं-सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना ।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत् ॥ ११ ॥

क्षतलक्षणं-नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम् ।
विषमं व्रणमङ्गे यत्तत् क्षतं त्वभिधीयते ॥ १२ ॥

पिच्चितरूपं-प्रहारपीडनाभ्यां तु यदङ्गं पृथुतां गतम् ।
सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम् ॥ १३ ॥

घृष्टलक्षणं-घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम् ।
उषास्रावान्वितं तच्च घृष्टमित्यभिधीयते ॥ १४ ॥

सशल्यव्रण-श्यावं सशोथं पिडकाचितं च मुहुर्मुहुः शोणितवाहिनं च ।
लक्षणं— मृदून्नतं बुद्बुदतुल्यमांसं व्रणं सशल्यं सरुजं वदन्ति ॥ १५ ॥

कोष्ठप्राप्तश- त्वचोऽतीत्य सिराऽऽदीनि भित्त्वा वा परिहृत्य वा ।
ल्यं— कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुक्तानुपद्रवान् ॥ १६ ॥

असाध्यं—तत्रान्तर्लोहितं पाण्डुशीतपादकराननम् ।
शीतोच्छ्वासं रक्तनेत्रमानद्धं च विवर्जयेत् ॥ १७ ॥

मर्मक्षतस्य भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च ।
लक्षणम्-स्रस्ताङ्गता मूर्च्छनमूर्ध्ववातस्तीव्रा रुजा वातकृताश्च तास्ताः १८
मांसोदकाभं रुधिरं च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव ।
दशार्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम् १९

मांसादिपञ्चसु मर्मसु क्षतेषु सामान्यलक्षणमाह—भ्रम इत्यादि । विचेष्टनं = विरुद्धव्यापारता, स्रस्ताङ्गता = गात्रशैथिल्यम्, सर्वेन्द्रियार्थोपरमः =

सर्वेषामिन्द्रियाणाम्, अर्थेषु=स्वविषयेषु रूपादिषु, उपरमः=स्तत्तद्विषयाग्राहित्वं, दशार्धसङ्ख्येषु=पञ्चसु ॥ ६-१९ ॥

सिरासु विद्धक्षतयोर्लक्षणं—

सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत् क्षतजश्च वायुः ।
करोति रोगान् विविधान् यथोक्तान् सिरासु विद्धास्वथवा क्षतासु॥२०॥

स्नायुविद्धस्य लक्षणं— कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजश्च ।
चिराद् व्रणो रोहति यस्य चापि तं स्नायुविद्धं पुरुषं व्यवस्येत्२१

चलाचलसन्धि-क्षतलक्षणं— शोषाभिवृद्धिस्तुमुला रुजश्च बलक्षयः सर्वत एव शोथः ।
क्षतेषु सन्धिष्वचलाचलेषु स्यात् सर्वकर्मोपरमश्च लिङ्गम्॥२२॥

अस्थिविद्धस्य लक्षणं—

सर्वास्ववस्थासु च नति शान्तिं घोरा रुजो यस्य निशादिनेषु ।
भिषग्विपश्चिद्विदितार्थसूत्रस्तमस्थिविद्धं पुरुषं व्यवस्येत् ॥ २३ ॥

मर्ममांसमर्मक्षतयोर्लक्षणं—

यथास्वमेतानि विभावयेच्च लिङ्गानि मर्मस्वभिताडितेषु ।
पाण्डुर्विवर्णः स्पृशितं न वेत्ति यो मांसमर्मण्यभिपीडितः स्यात् ॥२४॥

व्रणानामुपद्रवाः— विसर्पः पक्षघातश्च सिरास्तम्भोऽपतानकः ।
मोहोन्मादव्रणरुजो ज्वरस्तृष्णा हनुग्रहः ॥ २५ ॥
कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः ।
षोडशोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ॥ २६ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने त्रिचत्वारिंशं सद्योव्रणनिदानं समाप्तम् ॥ ४३ ॥

सर्वव्रणानामुपद्रवानाह—विसर्पेत्यादि । सवेपथुः=सकम्पः ॥ २०-२६ ॥

इति सुधायामागन्तुनिदानम् ।

# अथ चतुश्चत्वारिंशं भग्न-निदानम् ॥ ४४ ॥

द्विविधं भग्नं-भग्नं समासाद् द्विविधं हुताश !
काण्डे च सन्धौ च हि तत्र सन्धौ ॥ १ ॥

सन्धिभग्नप्रकाराः—

उत्पिष्टविश्लिष्टविवर्त्तितं च तिर्यग्गतं क्षिप्तमधश्च षट् च॥२॥

सन्धिभग्नस्य सामान्यं लिङ्गम्—

**प्रसारणाकुञ्चनवर्त्तनोग्रा रुक् स्पर्शविद्वेषणमेतदुक्तम् ।**
**सामान्यतः सन्धिगतस्य लिङ्गम्.........॥ ३ ॥**

भग्ननिदानमाह—**भग्नेत्यादि** । **हे हुताश !**=हे अग्निवेश !, **समासात्**=संक्षेपतः, भग्नं द्विविधं—काण्डे भग्नं सन्धौ भग्नं च, तत्र—उत्पिष्टेत्यादि षड्विधं भग्नं भवति । सन्धिभग्नस्य सामान्यलिङ्गमाह—प्रसारणादिषूग्रा **रुक्**=पीडा, **स्पर्शविद्वेषणं**=स्पर्शराहित्यं च ॥ १–३ ॥

उत्पिष्टादि-लिङ्गम्— .........**उत्पिष्टसन्धेः श्वयथुः समन्ताद् ,**
**विशेषतो रात्रिभवा रुजा च ।**
**विश्लिष्टजे तौ च रुजा च नित्यम् ॥**
**विवर्त्तिते पार्श्वरुजश्च तीव्रास्तिर्यग्गते तीव्ररुजा भवन्ति ॥**
**क्षिप्तेऽतिशूलं विषमत्वमस्थ्नोः**
**क्षिप्ते त्वधो रुग् विघटश्च सन्धेः ॥ ४ ॥**

उत्पिष्टादिषट्कलिङ्गमाह—**उत्पिष्टसन्धेरित्यादि** ॥ ४ ॥

काण्डभग्न-प्रकाराः— **काण्डे त्वतः कर्कटकाश्वकर्णविचूर्णितं पिच्चितमस्थिछल्लिका।**
**काण्डेषु भग्नं ह्यतिपातितं च मज्जागतं च स्फुटितं च वक्रम् ।**
**छिन्नं द्विधा द्वादशधाऽपि काण्डे .........॥ ५ ॥**

अतः परं काण्डभग्नमाह—**काण्ड इत्यादिना** ॥ ५ ॥

काण्डभग्न-रूपं— .........**स्रस्ताङ्गता शोथरुजाऽतिवृद्धिः ॥**
**संपीड्यमाने भवतीह शब्दः स्पर्शासहं स्पन्दनतोदशूलाः ।**
**सर्वास्ववस्थासु न शर्मलाभो-**
**भग्नस्य काण्डे खलु चिह्नमेतत् ॥ ६ ॥**

भग्नस्य विविधत्वं— **भग्नं तु काण्डे बहुधा प्रयाति**
**समासतो नामभिरेव तुल्यम् ॥ ७ ॥**

काण्डे भग्नस्य कष्टसाध्यतारूपम्—

**अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च ।**
**उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥ ८ ॥**

काण्डे भग्नस्यासाध्यत्वम्—

**भिन्नं कपालं कट्यां तु सन्धिमुक्तं तथा च्युतम् ।**
**जघनं प्रतिपिष्टं च वर्जयेद्धि विचक्षणः ॥ ९ ॥**

**असंश्लिष्टकपालं च ललाटे चूर्णितं च यत् ।**
**भग्नं स्तनान्तरे पृष्ठे शङ्खे मूर्ध्नि च वर्जयेत् ॥ १० ॥**

सर्वेषामनवधानतोऽसाध्यत्वं—

**सम्यक् सन्धितमप्यस्थि दुर्निक्षेपनिबन्धनात् ।**
**संक्षोभाद्वाऽपि यद्गच्छेद्विक्रियां तच्च वर्जयेद् ॥११॥**

भग्नानामन्य· **तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि च ।**
देशाः— **कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥ १२ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुश्चत्वारिंशं भग्न-निदानं समाप्तम् ॥ ४४ ॥**

अस्थिविशेषेण भग्नविशेषमाह—**तरुणे**त्यादि । अस्थीनि पञ्चविधानि भवन्ति तरुणनलककपालवलयरुचकभेदात् । तत्र तरुणानि-**नम्यन्ते**=कुटिलानि भवन्ति । नलकसंज्ञकानि-भिद्यन्ते । कपालानि **विभज्यन्ते**=विदीर्यन्ते । रुचकसंज्ञकानि-**स्फुटन्ति**=स्फुटितानि भवन्ति । रुचकानि चेति चकाराद् वलयान्यपि स्फुटितानि भवन्तीति बोध्यम् ॥ १२ ॥

इति सुधायां भग्ननिदानम् ।

---

## अथ पञ्चचत्वारिंशं नाडीव्रणनिदानम् ॥ ४५ ॥

तद्धेतुप्रसारौ—

**यः शोथमाममतिपक्वमुपेक्षतेऽज्ञो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः ।**
**अभ्यन्तरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः स पूयः॥१**

भग्नोपेक्षया नाडीव्रणस्यापि सम्भवेन भग्नानन्तरं नाडीमाह—**यः शोथ**· इत्यादि । यः यो **अज्ञः**=मूर्खः, **आमम्**=अपक्वम्, अतिपक्वं वा शोथम्, **उपेक्षते**=न चिकित्सति, यो वा, **असाधुवृत्तः**=अहिताहाराचारः, **प्रचुरपूयं**=पूयबहुलं, व्रणं वा, उपेक्षते तस्य पुंसः, **ततः**=उपेक्षणदोषात्, सः पूयः, पूर्वविहितानि स्थानानि प्रविदार्याभ्यन्तरं प्रविशतीति ॥ १ ॥

नाडीशब्द- **तस्यातिमात्रगमनाद्गतिरिष्यते तु**
निरुक्तिः— **नाडीव यद्वहति तेन मता तु नाडी ॥ २ ॥**

नाडीरोगस्य निर्वचनमाह—**नाडीवे**ति । नाडीवान्तःशुषिरनलइव वहति तेन नाडी मता ॥ २ ॥

तत्संख्या—दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
सम्मूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ॥ ३ ॥

वातपित्तकफ-तत्रानिलात् परुषसूक्ष्ममुखी सशूला
जा नाड्यः—फेनानुविद्धमधिकं स्रवति क्षपासु ।
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्णमहःसु चापि ॥
ज्ञेया कफाद्बहुघनार्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा ॥ ४ ॥

त्रिदोषजा- दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा-
नाडी- यस्यां भवन्त्यभिहितानि च लक्षणानि ।
तामादिशेत्पवनपित्तकफप्रकोपात्
घोरामसुक्षयकरीमिव कालरात्रिम् ॥ ५ ॥

शल्यजा— नष्टं कथञ्चिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ।
सा फेनिलं मथितमुष्णमसृग्विमिश्रं
स्रावं करोति सहसा सरुजा च नित्यम् ॥ ६ ॥

असाध्यत्वादि-नाडी त्रिदोषप्रभवा न सिध्ये-
च्छेषाश्चतस्रः खलु यत्नसाध्याः ॥ ७ ॥

**इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चचत्वारिंशं नाडीव्रण निदानं समाप्तम् ॥ ४५ ॥**

त्रिदोषजां नाडीमाह—दाहेत्यादि । **यस्यां**=नाड्यां, पवनादिप्रकोपाद्, दाहादिवक्त्रशोषान्ता उपद्रवाः, **अभिहितानि**=पूर्ववर्णितानि वातजादिनाडीकथितानि च लक्षणानि भवन्ति, तां **घोरां**=दारुणाम्, **असुक्षयकरीं**=प्राणक्षयकरीं, **कालरात्रिमिव**=यमभगिनीमिव, **आदिशेत्**=विद्यात् ॥ ५ ॥

इति सुधायां नाडीव्रणनिदानम् ।

## अथ षट्चत्वारिंशं भगन्दर-निदानम् ॥ ४६ ॥

सामान्यरूप- गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडकाऽर्तिकृत् ।
भिन्ना, भगन्दरो ज्ञेयः स च पञ्चविधो मतः ॥ १ ॥

नाडीविशेषत्वाद् भगन्दरमाह—**गुदस्येति**। **गुदस्य**=पायोः, पार्श्वतोद्व्यङ्गुले क्षेत्रे, **अर्त्तिकृत्**=वेदनाकारिणी, पिडका **भिन्ना**=स्रवन्ती, सती भगन्दर इति ज्ञेयः। भगशब्दो गुदबस्तिदेशयोरप्युपलक्षकः, भगस्य दारणाद् भगन्दर इति संज्ञा। तथा च भोजः-**भगं परिसमन्ताच्च गुदं बस्तिं तथैव च। भगवद्दारयेद् यस्मात्तस्माज्ज्ञेयो भगन्दरः**)। इति॥ १॥

पूर्वरूपं—( **कटीकपालनिस्तोददाहकण्डूरुजाऽऽदयः।**
**भवन्ति पूर्वरूपाणि भविष्यति भगन्दरे** )॥ २॥

शतपोनकः ( वातजः )—

**कषायरूक्षैस्त्वतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम्।**
**उपेक्षणात् पाकमुपैति दारुणं रुजा च भिन्नाऽरुणफेनवाहिनी॥**
**तत्रागमो मूत्रपुरीषरेतसां व्रणरनेकैः शतपोनकं वदेत्॥ ३॥**

भगन्दरविशेषं शतपोनकमाह—**कषायेत्यादि**। कषायादिभोजनैः प्रकुपितोऽनिलः, **अपानदेशे**=**पायुभागे**, यां पिडकां करोति, उपेक्षणात् सा **दारुणं**=भयङ्करं, पाकम्, **उपैति**=गच्छति, सा **भिन्ना**=विदीर्णा, रुजा=वेदनाऽन्विता, रुजाशब्द अर्श आद्यजन्तः। **अरुणफेनवाहिनी**=रक्तवर्णफेनस्राविणी, तत्र मूत्रादीनामागमश्च भवति। **अनेकैर्व्रणैः शतपोनकं** तं वदेत् शतपोनकः ( चालिनीति लोके ) अनेकैर्व्रणैरित्यत्रोपलक्षणे तृतीया॥ २-३॥

उष्ट्रशिरोधरः ( पित्तजः )—

**प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिडकां गुदाश्रिताम्।**
**तदाऽऽशुपाकाऽहिमपूतिवाहिनीं भगन्दरं तूष्ट्रशिरोधरं वदेत्॥ ४॥**

उष्ट्रग्रीवमाह—**प्रकोपणैरित्यादि**। **प्रकोपणैः**=पित्तप्रकोपजनकैः, **अहिमपूतिवाहिनीम्**=अशिशिरदुर्गन्धस्राविणीम्, उष्ट्रशिरोधरमिति पिडकावस्थागतगलवक्रत्वेन क्रमेलकाकारत्वं, तेष्वोष्ट्रग्रीवेति संज्ञा॥ ४॥

परिस्रावी **कण्डूयनो घनस्रावी कठिनो मन्दवेदनः।**
(कफजः)—**श्वेतावभासः कफजः परिस्रावी भगन्दरः॥ ५॥**

शम्बूकावर्त्तः-**बहुवर्णरुजास्रावा पिडका गोस्तनोपमा।**
**शम्बूकावर्त्तवन्नाडी शम्बूकावर्त्तको मतः॥ ६॥**

शम्बूकावर्त्तमाह—**बहुवर्णेत्यादि**। पूर्णनद्याः शम्बूकावर्त्तवदावर्त्तनं वेदना दोषगतिविशेषाद् भवतीति **शम्बूकावर्त्तः**॥ ६॥

उन्मार्गी ( क्षतजः )—

क्षताद्गतिः पायुगता विवर्धते ह्युपेक्षणात् स्युः क्रिमयो विदार्यते।
प्रकुर्वते मार्गमनेकधामुखैर्व्रणैस्तदुन्मार्गिभगन्दरं वदेत्॥ ७॥

कष्टसाध्या· घोराः साधयितुं दुःखाः सर्व एव भगन्दराः।
साध्यत्वं·—तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः॥ ८॥
असाध्य· वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च
भगन्दरी—भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरम्॥ ९॥

इति श्रीमाधवकरविरचिते माधवनिदाने षट्चत्वारिंशं भगन्दर-निदानं समाप्तम्॥ ४६॥

उन्मार्गिभगन्दरमाह—क्षतादित्यादि। अनेकधामुखैः = नानामुखैः। उन्मार्गेण=क्रिमिजनितोन्मार्गेण पुरीषादिगमनादुन्मार्गिसंज्ञा बोध्या॥ ७॥

इति सुधायां भगन्दरनिदानम्।

## अथ सप्तचत्वारिंशमुपदंश-निदानम्॥ ४७॥

उपदंशकारणं हस्ताभिघातान्नखदन्तपाताद्धावनाद्त्यतिसेवनाद्वा।
योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः॥१॥

हस्ताभिघाताद् = हस्तमैथुनकरणात्। नखदन्तपातात्=कलहादिप्रसङ्गेन कामशास्त्रोक्तपद्धत्या वा। अधावनात्=अप्रक्षालनात्। रत्यतिसेवनाद् = मैथुनाधिक्यात्। योनिप्रदोषात्=योनिरोगाक्रान्तागमनात्। विविधापचारैः=एवंविधैः, शिश्ने=मेढ्रे, पञ्चोपदंशा भवन्ति॥ १॥

वातज–पित्तज–रक्तज–कफजाः—

सतोदभेदैः स्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत् पवनोपदंशम्।
पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन, रक्तात् विशितावभासैः॥ २॥
स्फोटैः सकृष्णैः रुधिरं स्रवन्तं रक्तात्मकं पित्तसमानलिङ्गम्।
सकण्डुरैः शोथयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः कफेन॥ ३॥

त्रिदोषजः स नानाविधस्रावरुजोपपन्नमसाध्यमाहुस्त्रिमलोपदंशम्।
चासाध्याश्च—विशीर्णमांसं क्रिमिभिः प्रजग्धं मुष्कावशेषं परिवर्जयेच्च॥४॥
उपेक्षाफलं—सञ्जातमात्रे न करोति मूढः क्रियां नरो यो विषये प्रसक्तः।
कालेन शोथक्रिमिदाहपाकैर्विशीर्णशिश्नो म्रियते स तेन॥५॥

लिङ्गवर्त्तिः अङ्कुरैरिव सङ्घातैरुपर्युपरि संस्थितैः ।
(लिङ्गार्शो वा)-क्रमेण जायते वर्त्तिस्ताम्रचूडशिखोपमा ॥ ६ ॥
कोषस्याभ्यन्तरे सन्धौ सर्वसन्धिगताऽपि वा ।
( सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा । )
लिङ्गवर्त्तिरभिख्याता लिङ्गार्श इति चापरे ॥ ७ ॥

सुश्रुते क्व चित् स्त्रीणामप्युपदंशः पठ्यते यथा—

(मेढ्रसन्धौ व्रणाः के चित् के चित् सर्वाश्रयास्तथा ।
कुलत्थाकृतयः के चित् के चित् पद्मदलोपमा ॥ ८ ॥
रुजादाहार्त्तिबहुलाः कृष्णास्तोदसमन्विताः ।
शीघ्रं के चिद् विसर्पन्ति शनैः के चित्तथाऽपरे ॥
स्त्रीणां पुंसां च जायन्त उपदंशाः सुदारुणाः) ॥ ९ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने सप्तचत्वारिंशमुपदंश-निदानं समाप्तम् ॥ ४८ ॥

एकस्थानत्वेन लिङ्गवर्त्तिमाह—अङ्कुरैरित्यादि । अङ्कुरैः = मांसप्ररोहैः, **ताम्रचूडशिखोपमा** = कुक्कुटचूडानुकारिणी, **सन्धौ** = लिङ्गरन्ध्रसन्धौ, वर्त्ति-र्जायतेऽतो लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति वा संज्ञाऽन्तरं भजति ॥ २—७ ॥

इति सुधायामुपदंशनिदानम् ।

## अथाष्टचत्वारिंशं शूकदोष-निदानम् ॥ ४८ ॥

कारणं **अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः ।**
संख्या च—**व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः ॥ १ ॥**

शूकदोषनिदानमाह—**अक्रमादि**त्यादि । **अक्रमात्** = क्रममनादृत्य (ल्य-ब्लोपे पञ्चमी ) **शेफसः** = मेढ्रस्य वृद्धिं यः, **मूढधीः**=निर्बुद्धिः, अभिवाञ्छति तस्य दश चाष्टौ **शूकजाः** = शूकदोषनिमित्ता व्याधयो जायन्त इति । शूको = हि जलशूको विषप्राणिविशेषः । तथा वात्स्यायनादिकामशास्त्रादिप्रणेतृप्रतिपा-दितो लिङ्गवृद्धिकरो योगः शूक उच्यते । यथा—**भल्लातकास्थिजलशूकमथा-ब्जपत्र—मन्तर्विदह्य मतिमान् सह सैन्धवेन । एतद् विरूढबृहतीफल-तोयपिष्ट—मालेपनं महिषविड्विमलीकृतेऽङ्गे । स्थूलं महत्तरतुरङ्गम-तुल्यमाशु—शेफं करोत्यभिमतं नहि संशयोऽस्ति ॥ १ ॥**

सर्षपिका—गौरसर्षपसंस्थाना शूकदुर्भग्नहेतुका ।
पिडिका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा ॥ २ ॥
अष्ठीलिका· कठिना विषमैर्भुग्नैर्वायुनाऽष्ठीलिका भवेत् ।
ग्रथितं च—शूकैर्यत् पूरितं शश्वद् ग्रथितं नाम तत् कफात् ॥ ३ ॥
कुम्भिका· कुम्भिका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ।
ऽलजी च—तुल्यजां त्वलजीं विद्याद्यथाप्रोक्तां विचक्षणः ॥ ४ ॥
मृदितं संमूढ-मृदितं पीडितं यच्च संरब्धं वातकोपतः ।
पिडिका च-पाणिभ्यां भृशसंमूढे संमूढपिडका भवेत् ॥ ५ ॥
अधिमन्थः—दीर्घा बह्वयश्च पिडका दीर्यन्ते मध्यतस्तु याः ।
सोऽधिमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत् ॥ ६ ॥
पुष्करिका—पिडका पिडकाव्याप्ता पित्तशोणितसम्भवा ।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिका तु सा ॥ ७ ॥
स्पर्शहानि-स्पर्शहानिं तु जनयेच्छोणितं शूकदूषितम् ।
उत्तमा च-मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा तु या ॥
व्याधिरेषोत्तमा नाम शूकाजीर्णनिमित्तजा ॥ ८ ॥
शतपोनक· छिद्रैरणुमुखैर्लिङ्गं चितं यस्य समन्ततः ।
त्वक्पाकश्च-वातशोणितजो व्याधिः स ज्ञेयः शतपोनकः । ॥ ९ ॥
वातपित्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहकृत् ॥ १० ॥
शोणितार्बुदः·कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम् ।
यस्य वास्तुरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम् ॥ ११ ॥
मांसार्बुदः-मांसदोषेण जानीयादर्बुदं मांससम्भवम् ।
मांसपाकः—शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः ।
विद्यात्तं मांसपाकं तु सर्वदोषकृतं भिषक् ॥ १२ ॥
विद्रधिः—विद्रधिं सन्निपातेन यथोक्तमिति निर्दिशेत् ॥ १३ ॥
तिलकालकाः·कृष्णानि चित्राण्यथवा शुक्लानि सविषाणि वा ।
पातितानि पचन्त्याशु मेढ्रं निरवशेषतः ॥ १४ ॥
कालानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः ।
सन्निपातसमुत्थांस्तु तान् विद्यात्तिलकालकान् ॥ १५ ॥

असाध्य- **तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ।**
शूकाः— **विद्रधिश्च न सिद्ध्यन्ति ये च स्युस्तिलकालकाः ॥ १६ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदानेऽष्टचत्वारिंशं शूक-दोषनिदानं समाप्तम् ॥ ४८ ॥**

दोषविशेषेण सर्षपिकाऽऽद्यस्तिलकालकान्ता अष्टादश शूकदोषभेदा वर्णितास्तेष्वसाध्यानाह— **तत्रे**त्यादिना । **तत्र** = शूकदोषेषु, मांसार्बुदो—मांसपाकः—विद्रधिस्तिलकालकाः, एते न सिद्ध्यन्ति ॥ २–१६ ॥

इति सुधायां शूकदोषनिदानम् ।

## अथैकोनपञ्चाशत्तमं कुष्ठ-निदानम् ॥ ४९ ॥

कुष्ठानां हेतु- **विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।**
सम्प्राप्ती— **भजतामागतां छर्दिं वेगांश्चान्यान् प्रतिघ्नताम् ॥ १ ॥**
**व्यायाममतिसन्तापमतिभुक्त्वा निषेविणाम् ।**
**घर्मश्रमभयार्तानां द्रुतं शीताम्बुसेविनाम् ॥ २ ॥**
**अजीर्णाध्यशिनां चैव पञ्चकर्मापचारिणाम् ।**
**नवान्नदधिमत्स्यातिलवणाम्लनिषेविणाम् ॥ ३ ॥**
**माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम् ।**
**व्यवायं चाप्यजीर्णेऽन्ने निद्रां च भजतां दिवा ॥**
**विप्रान् गुरून् धर्षयतां पापं कर्म च कुर्वताम् ॥ ४ ॥**

अष्टादशत्वसंख्यासाधर्म्याच्छूकदोषानन्तरं कुष्ठनिदानमाह— **विरोधीनी**त्यादि । **विरोधीनि—अन्नपानानि** = क्षीरमत्स्यादीनि, द्रवस्निग्धगुरूणि च द्रव्याणि **भजताम्** = अश्नताम् , **आगताम्**=उपस्थितां, **छर्दिं**=वमिं, तथाऽन्यान् **वेगान्**—मूत्रपुरीषादीनां, प्रतिघ्नताम् । घर्मश्रमभयार्त्तानां **द्रुतं**=झटिति, **शीताम्बुसेविनां** = शीतलजलपायिनां, **पञ्चकर्मापचारिणां** = वमनविरेचननस्यनिरूहणानुवासनानि पञ्चकर्माणि कृत्वाऽपथ्यशीलिनाम् । **नवान्नदधिमत्स्यानि** = अतिशब्दो नवान्नादिभिः प्रत्येकमन्वेति । विप्रान् गुरून् **धर्षयतां** = तिरस्कुर्वतां, **पापं कर्म च कुर्वतां** = गोब्राह्मणवधभ्रूणहत्याऽऽदि महापापकारिणाम् ॥ १–४ ॥

तद्दोषदूष्य **वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।**
गणः— **दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥ ५ ॥**

संख्या—**अतः कुष्ठानि जायन्ते सप्त चैकादशैव च ॥ ६ ॥**

त्रयो वातादयो दुष्टाः, **त्वग् रक्तं** = त्वक् च रक्तं चेति समाहारः, मांसमम्बु दूषयन्ति स वातादिसप्तकः कुष्ठानां द्रव्यसंग्रहः—अत. सप्त एकादशैव च कुष्ठानि जायन्त इति । ननु—"**रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो-मलाः । विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः**" इति वचनात् कुष्ठविसर्पयोः समानसामग्रीजन्यत्वादुभयोः को भेदः ? इति चेदत्रोच्यते—कुष्ठं चिरक्रियैः स्थिरैरप्रबलरक्तपित्तैर्दोषैरुत्पद्यते विसर्पस्त्वचिरविसर्पणशीलैः प्रबलरक्तपित्तैरिति परस्परं भेदः ॥ ५–६ ॥

**कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः ।**
**सर्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः ॥ ७ ॥**

कुष्ठानां त्रिदोषजत्वेऽपि दोषोल्वणभेदेन भेदमाकल्प्य सप्तधात्वमाह—**पृथग्** = वातादिभिस्त्रयः, **द्वन्द्वै**–स्त्रयः । **समागतैः**=सन्निपातैः, एकः, एवं सप्तत्वं जायते । **व्यपदेशोऽधिकत्वतः**—यस्य दोषस्य यच्च प्राबल्यं तेनैव तस्य निर्देश इति भावः ॥ ७ ॥

पूर्वरूपम्– **अतिश्लक्ष्णखरस्पर्शस्वेदास्वेदविवर्णताः ।**
**दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिर्भ्रमः ॥ ८ ॥**
**व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।**
**रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽतिकोपनम् ॥**
**रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम् ॥ ९ ॥**

पूर्वरूपमाह—**अतिश्लक्ष्णेत्यादि** । **स्वापः** = स्पर्शहानिः । **निमित्तेऽल्पेऽतिकोपनं** = स्वल्पेऽपि कारणेऽधिकप्रकोपः । **रोमहर्षः**=रोमाञ्चः । **अग्रजं** = पूर्वरूपम् ॥ ८–९ ॥

सप्तमहाकुष्ठानि तत्र वातजं कापालकुष्ठं—

**कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।**
**कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ॥ १० ॥**

औदुम्बरकुष्ठं (पित्तजं)– **रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम् ।**
**उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेत् ॥ ११ ॥**

मण्डलकुष्ठं (कफजं)— **श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् ।**
**कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ॥ १२ ॥**

ऋष्यजिह्वं- कर्कशं रक्तपर्यन्तमन्तःश्यावं सवेदनम् ।
(वातपैत्तिकं)यहष्यजिह्वसंस्थानमृष्यजिह्वं तदुच्यते ॥ १३ ॥
पुण्डरीकं (वा-सश्वेतं रक्तपर्यन्तं पुण्डरीकदलोपमम् ।
तश्लैष्मिकं)-सोत्सेधं च सरागं च पुण्डरीकं तदुच्यते ॥ १४ ॥
सिध्मं (पित्त-श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
कफजं)- प्रायश्चोरसि तत् सिध्ममलाबुकुसुमोपमम् ॥ १५ ॥
काकणं यत्काकणन्तिकावर्णं सपाकं तीव्रवेदनम् ।
(त्रिदोषजं)-त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिद्ध्यति ॥ १६ ॥

सप्तमहाकुष्ठानां सलक्षणानि नामान्याह—कृष्णारुणेत्यादि । कापालम्[1], औदुम्बरं[2], मण्डलम्[3], ऋष्यजिह्वं[4], पुण्डरीकं[5], सिध्मं[6], काकणमिति[7] सप्तमहाकुष्ठानि । तत्र काकणमसाध्यम् ॥ १०-१६ ॥

एकादशक्षुद्रकुष्ठानि—

एककुष्ठम्-अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ॥ १७ ॥
चर्मकुष्ठं- तदेककुष्ठं, चर्माख्यं बहलं हस्तिचर्मवत् ।
किटिभं च—श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम् ॥ १८ ॥
वैपादिकम्- वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ।
लसकं च—कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ॥ १९ ॥
दद्रुकुष्ठं च-सकण्डूरागपिडकं दद्रुमण्डलमुद्गतम् ।
मंदलं च—रक्तं सशूलं कण्डूमत् सस्फोटं यद्दलत्यपि ।
तच्चर्मदलमाख्यातं संस्पर्शासहमुच्यते ॥ २० ॥

पामाकुष्ठं कच्छूकुष्ठं च—

सूक्ष्मा बह्वयः पिडकाः स्राववत्यः पामेत्युक्ताः कण्डुमत्यः सदाहाः ।
सैव स्फोटस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छुरुग्रा स्फिचोश्च ॥ २१ ॥

स्फोटः शतारुश्च—

स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ।
रक्तं श्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणम् ॥ २२ ॥
विचर्चिका—सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिका ॥ २३ ॥

एकादशक्षुद्रकुष्ठान्याह—अस्वेदनमित्यादि । एककुष्ठं[1], चर्माख्यं[2], किटिभं[3], वैपादिकम्[4], अलसकं[5], दद्रुकुष्ठं[6], चर्मदलं[7], पामा[8], कच्छूः[9], शतारुः[10], विचर्चिके[11]-

स्येकादश क्षुद्रकुष्ठानि । विपादिकाविचर्चिकयोः स्थानभेदाद् भेदः—"पाण्योर्विचर्चिका ज्ञेया पादे ज्ञेया विपादिके'ति, अतो न संख्याऽतिरेकः १७-२३

कुष्ठे वातपित्तकफद्वन्द्वत्रिदोषचिह्नानि—

खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम् ।
पित्तात्प्रकुथितं दाहरागस्रावान्वितं मतम् ।
कफात्क्लेदि घनं स्निग्धं सकण्डूशैत्यगौरवम् ।
द्विलिङ्गं द्वन्द्वजं कुष्ठं, त्रिलिङ्गं सान्निपातिकम् ॥ २४ ॥

त्वक्स्थकुष्ठं त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यं च जायते ॥ २५ ॥

रक्तस्थं च—त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम् ।
कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते ॥ २६ ॥

मांसस्थं—बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः ।
तोदः स्फोटः स्थिरत्वं च कुष्ठे मांससमाश्रिते ॥ २७ ॥

सप्तधातुगतस्य कुष्ठस्य लक्षणं क्रमेणाह—त्वक्स्थ इत्यादि ॥ २४-२७ ॥

मेदःस्थं—कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम् ।
मेदस्थानगते लिङ्गं प्रागुक्तानि तथैव च ॥ २८ ॥

अस्थिमज्जस्थं-नासाभङ्गोऽक्षिरागश्च क्षतेषु क्रिमिसम्भवः ।
स्वरोपघातश्च भवेदस्थिमज्जसमाश्रिते ॥ २९ ॥

जन्मकुष्ठितं-दम्पत्योः कुष्ठबाहुल्याद् दुष्टशोणितशुक्रयोः ।
यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितम् ॥ ३० ॥

कुष्ठस्य साध्यासाध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत् ।
याप्यादिभेदाः-मेदसि द्वन्द्वजं याप्यं, वर्ज्यं मज्जास्थिसंश्रितम् ॥ ३१ ॥
क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम् ।
प्रभिन्नं प्रस्रुताङ्गं च रक्तनेत्रं हतस्वरम् ।
पञ्चकर्मगुणातीतं कुष्ठं हन्तीह मानवम् ॥ ३२ ॥

असाध्यमाह—क्रिमितृड्दाहेत्यादि । पञ्चकर्मगुणातीतं—पूर्वरूपक्रियया सह रसादिधातूनां चतुर्णां क्रियाकलापाः पञ्चकर्माणि तेषां गुणाः=वीर्याणि, तान्यतीतो यः स तथाभूतः, अस्थिमज्जगत इत्यर्थः ॥ २८-३२ ॥

दोषविवेकः-वातेन कुष्ठं कापालं पित्तेनौदुम्बरं कफात् ॥ ३३ ॥
मण्डलाख्यं, विचर्ची च ऋष्याख्यं वातपित्तजम् ।
चर्मककुष्ठं किटिभं सिध्मालसविपादिकाः ॥ ३४ ॥

वातश्लेष्मोद्भवाः, श्लेष्मपित्ताद्दद्रुशतारुषी ।
पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा ॥ ३५ ॥
सर्वैः स्यात्काकणं, पूर्वत्रिकं दद्रु सकाकणम् ।
पुण्डरीकर्ष्यजिह्वे च महाकुष्ठानि सप्त तु ॥ ३६ ॥
श्वित्रं किलासं च- **कुष्ठैकसम्भवं श्वित्रं किलासं वाऽरुणं भवेत् ।**
**निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥ ३७ ॥**

किलासमाह—**कुष्ठैकसम्भव**मित्यादि । कुष्ठेन सह एकः समानो विरुद्धाशनादि सम्भवो निदानं यस्य तत्तथा । अन्यत्र चरकादौ तु हेतुविशेषोऽप्यस्य वर्ण्यते यथा—**वचांस्यतथ्यानि कृतघ्नभावो निन्दा गुरूणां गुरुधर्षणं च । पापक्रिया पूर्वकृतञ्च कर्म हेतुः किलासस्य विरोधि चान्नम् ॥** इत्यादि ॥ ३३–३७ ॥

वातादिभेदेन किलास-लक्षणानि— **वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।**
**सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥ ३८ ॥**
**सकण्डुरं क्रमाद्रक्तमांसमेदःसु चादिशेत् ।**
**वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥ ३९ ॥**
साध्यासाध्यश्वित्रम्- **अशुक्लरोमाबहुलमसंश्लिष्टमथो नवम् ।**
**अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा ॥ ४० ॥**
असाध्यं किलासं— **गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम् ।**
**वर्जनीयं विशेषेण किलासं सिद्धिमिच्छता ॥ ४१ ॥**
संक्रामक-रोगाः— **प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात् ।**
**एकशय्याऽऽसनाच्चैव वस्त्रमाल्यानुलेपनात् ॥ ४२ ॥**
**कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च ।**
**औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम् ॥ ४३ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने एकोनपञ्चाशत्तमं कुष्ठ-निदानं समाप्तम् ॥ ४९ ।**

कुष्ठस्य संसर्गजप्रसङ्गेन निखिलानेव संसर्गजान् रोगानाह—**प्रसङ्गादि**त्यादि । **प्रसङ्गो** = मैथुनं, तत्कृताद्, गात्रसंस्पर्शात् । **निःश्वासात्** = मुखमारुतात्, **शोषो** = यक्ष्मा, **औपसर्गिकरोगाः** = मसूरिकाप्रभृतयः, नरान्तरं **संक्रामन्ति** = आविशन्ति ॥ ३८–४३ ॥

इति सुधायां कुष्ठनिदानम् ।

## अथ पञ्चाशत्तमं शीतपित्तोदर्दकोठनिदानम् ॥ ५० ॥

हेतुसम्प्राप्ती-शीतमारुतसंस्पर्शात्प्रदुष्टौ कफमारुतौ ।
पित्तेन सह सम्भूय बहिरन्तर्विसर्पतः ॥ १ ॥

निदानमाह—शीतमारुतेत्यादि । सम्भूय = एकत्रीभूय, बहिरन्तः = बहिः—त्वचि, अन्तः—रक्तादौ, विसर्पतः = प्रसरतः ॥ १ ॥

पूर्वरूपं—पिपासाऽरुचिहृल्लासदेहसादाङ्गगौरवम् ।
रक्तलोचनता तेषां पूर्वरूपस्य लक्षणम् ॥ २ ॥

पूर्वरूपमाह—पिपासेत्यादि । रक्तलोचनता=व्याधेर्माहात्म्यात् । तेषां= शीतपित्तोदर्दकोठानाम् । पूर्वरूपस्य लक्षणं = स्वरूपम् ॥ २ ॥

उदर्दलक्षणं-वरटीदष्टसंस्थानः शोथः संजायते बहिः ।
सकण्डूस्तोदबहुलश्छर्दिज्वरविदाहवान् ॥ ३ ॥
उदर्दमिति तं विद्याच्छीतपित्तमथापरे ।
वाताधिकं शीतपित्तमुदर्दस्तु कफाधिकः ॥ ४ ॥

उदर्दस्य सोत्सङ्गैश्च सरागैश्च कण्डूमद्भिश्च मण्डलैः ।
लक्षणान्तरं-शैशिरः कफजो व्याधिरुदर्द इति कीर्त्तितः ॥ ५ ॥

कोठमाह—असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते ॥ ६ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चाशत्तमं शीतपित्तोदर्दकोठ-निदानं समाप्तम् ॥ ५० ॥

शीतपित्तोदर्दयोर्विशेषमाह-वाताधिकं शीतपित्तं कफाधिक उदर्द इति॥३-६॥

इति सुधायां शीतपित्तोदर्दकोठनिदानम् ।

## अथैकपञ्चाशत्तमम्लपित्त-निदानम् ॥ ५१ ॥

हेतुः- विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धम् ।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ॥ १ ॥

निदानपूर्वकमम्लपित्तरूपं बिभणिषुराह—विरुद्धेत्यादि । विरुद्धं=क्षीर-मत्स्यादि, दुष्टं=कुथितमन्नं, पित्तप्रकोपिपानं=सुराऽऽदिकम् , अन्नं = माषादिकम् , एवमादिभुजो जनस्य स्वहेतूपचितं = स्वकारणकदम्बैः सञ्चयमागतं,

पित्तं **विदग्धं**=प्रकुपितम्, अभूदिति शेषः। तदम्लपित्तं **सन्तः**=विद्वांसः, **प्रवदन्ति**=आचक्षते। अत्र पित्तं प्रधानतयाऽवतिष्ठते वातश्लेष्माणौ चात्रानुगौ भवतः॥ १॥

सामान्य- **अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः।**
रूपम्—**हृत्कण्ठदाहारुचिभिश्चाम्लपित्तं वदेद्भिषक्॥ २॥**

अधोगाम्ल- **तृड्दाहमूर्च्छाभ्रममोहकारि प्रयात्यधो वा विविधप्रकारम्।**
पित्तलक्षणं-**हृल्लासकोठानलसादहर्षस्वेदाङ्गपीतत्वकरं कदा चित्॥३॥**

ऊर्ध्वगाधोगभेदेनाम्लपित्तं द्विविधं तत्र तावदधोगमाह—**तृड्दाहे**त्यादि। **मूर्च्छा**=अचैतन्यं, **मोहो**=विपरीतज्ञानम्, अधो वेति वाशब्द ऊर्ध्वगत्वमभिव्यनक्ति। **विविधप्रकारं**=हरितपीतकृष्णादिवर्णम्। **कदा चित्**=न सर्वदा॥२-३॥

ऊर्ध्वगाम्ल- **वान्तं हरित्पीतकनीलकृष्णमारक्तरक्ताभमतीव चाम्लम्।**
पित्तरूपं—**मांसोदकाभं त्वतिपिच्छिलाच्छं श्लेष्मानुजातं विविधं रसेन॥**
**भुक्ते विदग्धे त्वथवाऽप्यभुक्ते करोति तिक्ताम्लवमिं कदा चित्।**
**उद्गारमेवंविधमेव कण्ठहृत्कुक्षिदाहं शिरसो रुजं च॥ ५॥**
**करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तम्।**
**जनयति कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयम्॥ ॥**

ऊर्ध्वगतिमाह—**वान्त**मित्यादि। **आरक्तम्**=अल्परक्तं, **मांसोदकाभं**=मांसधावनतोयाभं, **रसेन**=कटुतिक्तादिना, **विविधं**=नैकरूपं, **वान्तं**=वमिं, करोति। **भुक्ते**=अन्ने, **विदग्धे**=असम्यक् परिणते, अथवाऽप्यभुक्ते, वा कदाचित् तिक्ताम्लवमिं करोति। करोतिशब्दः सर्वत्र सम्बद्ध्यते एवंविधं तिक्ताम्लमेवोद्गारं करोति, कण्ठादिदाहं **शिरसः**=मस्तकस्य, **रुजं**=पीडां, च करोति। कण्ड्वादिनिचितगात्रं रोगचयं च करोति। कण्ड्वादिनिचितगात्रं च रोगचयं—चेति द्वन्द्वः॥ ४-६॥

साध्यत्वादि-**रोगोऽयमम्लपित्ताख्यो यत्नात् संसाध्यते नवः।**
**चिरोत्थितो भवेद्याप्यः, कृच्छ्रसाध्यः स कस्य चित्॥ ७॥**

दोषसम्बन्धः-**सानिलं सानिलकफं सकफं तच्च लक्षयेत्।**
**दोषलिङ्गेन मतिमान् भिषङ्मोहकरं हि तत्॥ ८॥**

यातिकरूपं-**कम्पप्रलापमूर्च्छाचिमिचिमिगात्रावसादशूलानि।**
**तमसो दर्शनविभ्रमविमोहहर्षाण्यनिलकोपात्॥ ९॥**

श्लैष्मिकरूपं-कफनिष्ठीवनगौरवजडताऽरुचिशीतसादवमिलेपाः।
दहनबलसादकण्डूनिद्राश्चिह्नं कफानुगते ॥ १० ॥
वातकफरूपम्-उभयमिदमेव चिह्नं मारुतकफसंभवे भवत्यम्ले ॥ ११ ॥
कफपित्तरूपम्-( तिक्ताम्लकटुकोद्गारहृत्कुक्षिकण्ठदाहकृत् ) ॥
भ्रमो मूर्च्छाऽरुचिश्छर्दिरालस्यं च शिरोरुजा।
प्रसेको मुखमाधुर्यं श्लेष्मपित्तस्य लक्षणम् ॥ १२ ॥

इति श्रीमाधवकरविरचिते माधवनिदान एकपञ्चाशत्तममम्लपित्त-निदानं समाप्तम् ॥ ५१ ॥

दोषान्तरसंसर्गं वक्तुकाम आह—**सानिलमित्यादि**। **मतिमान्**=बुद्धिमान्, वैद्यः सानिलं सकफं सानिलकफं **तद्**=अम्लपित्तं, **दोषलिङ्गेन**=वातादिदोषलक्षणेन **लक्षयेद्**=जानीयात्, **हि**=यतः, **तद्**=अम्लपित्तं, **भिषङ्मोहकरं**=वैद्यभ्रान्तिजनकम्। ऊर्ध्वाधः प्रवर्त्तमानत्वेन छर्यतीसाराभ्यां सकाशाद् भेदस्य दुर्ज्ञेयतया भिषङ्मोहजनकत्वम् ॥ ७–८ ॥

इति सुधायामम्लपित्तनिदानम्।

## अथ द्विपञ्चाशत्तमं विसर्प-निदानम् ॥ ५२ ॥

हेतुसंख्ये—लवणाम्लकटूष्णादिसंसेवादोषकोपतः।
विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात् ॥ १ ॥

निदानमाह—**लवणेत्यादि**। लवणाम्लादिभिर्विसर्पः सप्तधा भवति। निरुक्तिमाह—**सर्वतः परिसर्पणादिति**। **सर्वतः परिसर्पणात्परिसर्पः**=विविधं सर्पणाद् विसर्पः। यदुक्तं चरके—"**विविधं सर्पति यतो विसर्पस्तेन स स्मृतः। परिसर्पोऽथवा नाम्ना सर्वतः परिसर्पणात्** ॥ इति ॥ १ ॥

विसर्पभेदाः-पृथक् त्रयस्त्रिभिश्चैको विसर्पो द्वन्द्वजास्त्रयः।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः ॥ २ ॥
चत्वार एते, वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः।
आग्नेयो वातपित्ताभ्यां, ग्रन्थ्याख्यः कफवातजः।
यस्तु कर्दमको घोरः स पित्तकफसंभवः ॥ ३ ॥

संख्यामाह—**पृथगित्यादि**। वातिकः पैत्तिकः श्लैष्मिकस्त्रयः। सान्निपातिक एकः, द्वन्द्वजास्त्रय एवं सप्तधा भवति ॥ २–३ ॥

दूष्यं दोषाश्च-**रक्तं लसीका त्वङ् मांसं दूष्यं, दोषास्त्रयो मलाः ।**
**विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्त धातवः ॥ ४ ॥**

दोषदूष्यसंग्रहमाह-**रक्तमित्यादि** । **रक्तं**-शोणितं, **लसीका**=जलं, **त्वक्**=रसः, मांसम्, एतानि दूष्याणि । **त्रयो मलाः**=वातादयो दोषाः । **सप्त धातवः**=रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि, हेतवो विसर्पोत्पत्तौ, भवन्तीति शेषः । विसर्पो हि क्व चिदन्तर्जबहिर्जभेदेनापि वर्णितस्तथा हि—**मर्मोपघातात् संमोहादयनानां विघट्टनात् । तृष्णाऽतियोगाद् वेगानां विषमञ्च प्रवर्त्तनात् ॥ विद्याद् विसर्पमन्तर्जमाशु चाग्निबलक्षयात् । अतो विपर्ययाद् बाह्यमन्यद् विद्यात्स्वलक्षणैः** । इति ॥ ४ ॥

वातिकः— **तत्र वाताद् स वीसर्पो वातज्वरसमव्यथः ।**
**शोथस्फुरणनिस्तोदभेदायासार्त्तिहर्षवान् ॥ ५ ॥**
पैत्तिकः— **पित्ताद्द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥ ६ ॥**
कफजः— **कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक् ।**
त्रिदोषजः- **सन्निपातसमुत्थश्च सर्वलिङ्गसमन्वितः ॥ ७ ॥**

द्वन्द्वजा विसर्पाः—

तत्राग्नि- **वातपित्ताज्ज्वरच्छर्दिमूर्च्छाऽतीसारतृड्भ्रमैः ।**
विसर्पः—**ग्रन्थिभेदाग्निसदनतमकारोचकैर्युतः ॥ ८ ॥**
**करोति सर्वमङ्गं च दीप्ताङ्गारावकीर्णवत् ।**
**यं यं देशं विसर्पश्च विसर्पति भवेत् स सः ॥ ९ ॥**
**शान्ताङ्गारा सितो नीलो रक्तो वाऽऽशु च चीयते ।**
**अग्निदग्ध इव स्फोटः शीघ्रगत्वाद् द्रुतं स च ॥ १० ॥**
**मर्मानुसारी वीसर्पः स्याद्वातोऽतिबलस्ततः ।**
**व्यथतेऽङ्गं हरेत् संज्ञां निद्रां च श्वासमीरयेत् ॥ ११ ॥**
**हिक्कां च स गतोऽवस्थामीदृशीं लभते न ना ।**
**क्व चिच्छर्मारतिग्रस्तो भूमिशय्याऽऽसनादिषु ॥ १२ ॥**
**चेष्टमानस्ततः क्लिष्टो मनोदेहप्रमोहवान् ।**
**दुष्प्रबोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ॥ १३ ॥**

अग्निविसर्पमाह—**वातपित्तादित्यादि** । अयं हि वातपित्तजो ज्वरादिभिर्युतश्च भवति, सर्वमङ्गं **दीप्ताङ्गारावकीर्णवत्**=प्रज्वलिताङ्गारावच्छन्नवत्,

करोति । दुष्प्रबोधोऽश्नुते निद्रां=दुःखेन प्रबोधो = जागरणं यस्य स तथा भूतः सन् निद्रामश्नुते=( मरणरूपां निद्रां प्राप्नोतीत्यर्थः ) ॥ ८–१३ ॥

ग्रन्थिविसर्पः–कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्नायुमांसगम् ॥ १४ ॥
दूषयित्वा तु दीर्घाणुवृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां सरक्तां तीव्ररुग्ज्वराम् ॥ १५ ॥
श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाऽङ्गभङ्गाग्निसदनैर्युताम् ॥
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः ॥ १६ ॥

कर्दमविसर्पः–कफपित्ताज्ज्वरः स्तम्भो निद्रा तन्द्रा शिरोरुजा ।
अङ्गावसादविक्षेपौ प्रलेपारोचकभ्रमाः ॥ १७ ॥
मूर्च्छाऽग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवम् ।
आमोपवेशनं लेपः स्रोतसां स च सर्पति ॥ १८ ॥
प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् ।
पिडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः ॥ १९ ॥
स्निग्धोऽसितो मेचकाभो मलिनः शोथवान् गुरुः ।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्यते ॥ २० ॥
पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः ।
शवगन्धी च वीसर्पः कर्दमाख्यमुशन्ति तम् ॥ २१ ॥

क्षतविसर्पः–बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ॥ २२ ॥
वीसर्पं मारुतः कुर्यात्कुलत्थसदृशैश्चितम् ।
स्फोटः शोथज्वररुजादाहाढ्यं श्यावशोणितम् ॥ २३ ॥

उपद्रवाः— ज्वरातिसारौ वमथुस्त्वङ्मांसदरणं क्लमः ।
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ॥ २४ ॥

सर्वेषां विसर्पाणामुपद्रवानाह—ज्वरेत्यादि । ज्वरातिसारौ–वमथुः=छर्दिः, त्वङ्मांसदरणं = चर्ममांसस्फोटनं, क्लमः = ग्लानिः, अरोचकाविपाकौ चेति विसर्पाणामुपद्रवाः ॥ १४–२४ ॥

साध्यत्वादि–सिद्ध्यन्ति वातकफपित्तकृता विसर्पाः
सर्वात्मकः क्षतकृतश्च न सिद्धिमेति ।

**पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः**
**कृच्छ्राश्च मर्मसु भवन्ति हि सर्व एव ॥ २५ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने द्विपञ्चाशत्तमं विसर्प-निदानं समाप्तम् ॥ ५२ ॥**

साध्यत्वादिकमाह—**सिद्ध्यन्ती**त्यादि । वातादिकृता विसर्पाः सिद्ध्यन्ति। **सर्वात्मकः**—सान्निपातिकः, क्षतजश्च न सिद्धिम् , **एति**=गच्छति, पित्तात्मकोऽञ्जनवपुश्च, अग्निविसर्पाख्यो न साध्यः । मर्मसु जाताः सर्व एव वीसर्पाः कृच्छ्रसाध्या भवन्ति ॥ २५ ॥

इति सुधायां विसर्पनिदानम् ।

---

## अथ त्रिपञ्चाशत्तमं विस्फोटनिदानम् ॥ ५३ ॥

हेतुः— **कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च ।**
**तथर्तुदोषेण विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु ॥ १ ॥**

तत्सम्प्राप्तिः— **त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च ।**
**घोरान् कुर्वन्ति विस्फोटान् सर्वाञ् ज्वरपुरःसरान् ॥ २ ॥**

कट्वम्लादिभिर्हेतुभिस्तथा, ऋतुदोषेण—ऋतुविपर्ययेण च पवनादयो दोषाः कुप्यन्ति । **ते**—दोषाः, त्वचमाश्रित्य रक्तादीनि प्रदूष्य च **घोरान्**—दारुणान्, ज्वरपुरःसरान् सर्वान् विस्फोटान् कुर्वन्ति ॥ १-२ ॥

तत्स्वरूपम्— **अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः ।**
**क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः ॥ ३ ॥**

वातजः— **शिरोरुक् शूलभूयिष्ठं ज्वरस्तृट् पर्वभेदनम् ।**
**सकृष्णवर्णता चेति वातविस्फोटलक्षणम् ॥ ४ ॥**

पित्तजः— **ज्वरदाहरुजास्रावपाकतृष्णाभिरन्वितम् ।**
**पित्तलोहितवर्णं च पित्तविस्फोटलक्षणम् ॥ ५ ॥**

कफजः— **छर्द्यरोचकजाड्यानि कण्डूकाठिन्यपाण्डुताः ।**
**अवेदनश्चिरात्पाकी स विस्फोटः कफात्मकः ॥ ६ ॥**

द्वन्द्वजाः— **वातपित्तकृतो यस्तु कुरुते तीव्रवेदनाम् ।**
**कण्डूस्तैमित्यगुरुभिर्जानीयात्कफवातिकम् ।**
**कण्डूर्दाहो ज्वरश्छर्दिरेतैस्तु कफपैत्तिकः ॥ ७ ॥**

त्रिदोषजः— मध्ये निम्नोन्नतोऽन्ते च कठिनोऽल्पप्रपाकवान् ॥ ८ ॥
दाहरागतृषामोहच्छर्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यः स्यात्त्रिदोषजः ॥ ९ ॥

रक्तजाः ( असाध्याः )—

रक्ता रक्तसमुत्थाना गुञ्जाविद्रुमसन्निभाः ।
वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना ।
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि ॥ १० ॥

साध्यत्वादि— एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ।
सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥ ११ ॥

**इति श्रीमाधवकरविरचिते माधवनिदाने विस्फोट-निदानं समाप्तम् ॥५३॥**

सान्निपातिकमाह—**मध्य** इत्यादि । मध्ये निम्नोऽन्ते चोन्नतः, दाहादिसमन्वितो वा यस्त्रिदोषजः सोऽसाध्यः ॥ ३–९ ॥

इति सुधायां विस्फोटनिदानम् ।

## अथ चतुष्पञ्चाशत्तमं मसूरिका-निदानम् ॥ ५४ ॥

हेतुसंप्राप्ती— कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः ।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥ १ ॥
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः ।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ।
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः ॥ २ ॥

प्रायेण विस्फोटनिदानसाम्याद् विस्फोटानन्तरं मसूरिकानिदानम् । **क्रूरग्रहेक्षणात्**=क्रूरग्रहाः=शनैश्चरादयस्तेषामीक्षणाद्=दृष्टिपातात् । **देशे**=जनपदे, **समुद्धताः**=वृद्धिमापन्नाः, दोषा अस्मिन् शरीरे दुष्टरक्तेन सङ्गताः सन्तः पिडका जनयन्ति, मसूराकृतिसंस्थानत्वान्मसूरिकेति नामनिर्देशः ॥१–२॥

पूर्वरूपं— तासां पूर्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ।
त्वचि शोथः सवैवर्ण्यो नेत्ररागश्च जायते ॥ ३ ॥

वातमसूरिकाः स्फोटाः श्यावारुणा रूक्षास्तीव्रवेदनयाऽन्विताः ।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः ॥ ४ ॥
सन्ध्यस्थिपर्वणां भेदः कासः कम्पोऽरतिः क्लमः ।
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता ॥ ५ ॥

पित्तमसूरिकाः रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः ।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः ॥ ६ ॥
विड्भेदश्चाङ्गमर्दश्च दाहस्तृष्णाऽरुचिस्तथा ।
मुखपाकोऽक्षिरागश्च ज्वरस्तीव्रः सुदारुणः ॥ ७ ॥

रक्तमसूरी— रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः ॥ ८ ॥

कफमसूरिकाः कफप्रसेकः स्तैमित्यं शिरोरुग् गात्रगौरवम् ।
हृल्लासः सारुचिर्निद्रा तन्द्राऽऽलस्यसमन्विताः ॥ ९ ॥
श्वेताः स्निग्धा भृशं स्थूलाः कण्डूरा मन्दवेदनाः ।
मसूरिकाः कफोत्थाश्च चिरपाकाः प्रकीर्त्तिताः ॥ १० ॥

त्रिदोषम- नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः ।
सूरिकाः— चिरपाकाः प्रतिस्रावाः प्रभूताः सर्वदोषजाः ॥ ११ ॥
कण्ठरोधारुचिस्तम्भप्रलापारतिसंयुताः ।
दुश्चिकित्स्याः समुद्दिष्टाः पिडकाश्चर्मसंज्ञिताः ॥ १२ ॥

सान्निपातिकलक्षणमाह — **नीला** इत्यादि । **नीलाः**=पचाषवर्णप्रतिमाः । **चिपिटवर्णाः**=पृथुकाकाराः । **कण्ठरोधः**=कण्ठग्रहः । **प्रलापः**=असंबद्धभाषणम् ॥ ११-१२ ॥

रोमान्तिकाः-रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः ।
कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्विकाः ॥ १३ ॥

त्वक्स्थम- तोयबुद्बुदसङ्काशास्त्वग्गतास्तु मसूरिकाः ।
सूरिकाः— स्वल्पदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च ॥ १४ ॥

रसादिसप्तधातुगतानां मसूरिकाणां लक्षणानि प्रविवक्षुराह—**तोयबुद्बुदे**त्यादि । **तोदबुद्बुदसंकाशाः**=जलबुद्बुदसमानाः । **त्वग्गताः**=रसगताः । शेषं सुगमम् ॥ १४ ॥

रक्तस्थाः— रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः ।
साध्या नात्यर्थदुष्टाश्च भिन्ना रक्तं स्रवन्ति च ॥१५॥

मांसस्थाः— मांसस्थाः कठिनाः स्निग्धाश्चिरपाका घनत्वचः ।
गात्रशूलतृषाकण्डूज्वरारतिसमन्विताः ॥ १६ ॥

मेदःस्थाः—मेदोजा मण्डलाकारा मृदवः किञ्चिदुन्नताः ।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ॥ १७ ॥

मज्जस्थाः—संमोहारतिसंतापाः कश्चिदाभ्यो विनिस्तरेत् ।
क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः ॥ १८ ॥

मज्जोत्था भृशसम्मोहवेदनाऽरतिसंयुताः ।
छिन्दन्ति मर्मधामानि प्राणानाशु हरन्ति हि ॥ १९ ॥
भ्रमरेणेव विद्धानि कुर्वन्त्यस्थीनि सर्वतः ।
पक्वाभाः पिडकाः स्निग्धाः सूक्ष्माश्चात्यर्थवेदनाः ॥२०॥
स्तैमित्यारतिसम्मोहदाहोन्मादसमन्विताः ।
शुक्रजायां मसूर्यां तु लक्षणानि भवन्ति हि ॥ २१ ॥
निर्दिष्टं केवलं चिह्नं दृश्यते न तु जीवितम् ।
दोषमिश्रास्तु सप्तैता द्रष्टव्या दोषलक्षणैः ॥ २२ ॥
त्वग्गता रक्तजाश्चैव पित्तजाः श्लेष्मजास्तथा ।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः ॥ २३ ॥
वातजा वातपित्तोत्थाः श्लेष्मवातकृताश्च याः ।
कृच्छ्रसाध्यतमास्तस्माद्यत्नादेता उपाचरेत् ॥ २४ ॥
असाध्याः सन्निपातोत्थास्तासां वक्ष्यामि लक्षणम् ।
प्रवालसदृशाः काश्चित् काश्चिज्जम्बूफलोपमाः ॥ २५ ॥
लोहजालसमाः काश्चिदतसीफलसन्निभाः ।
आसां बहुविधा वर्णा जायन्ते दोषभेदतः ॥ २६ ॥
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ॥

असाध्यानां वर्णानाह—**प्रवाले**त्यादि । **प्रवालसदृशाः**=विद्रुमसन्निभाः । **लोहजालसमाः**=कृष्णवर्णाः । **अतसीफलसन्निभाः**=उमाफलवर्णसदृशाः । **दोषभेदतः**=वातादिभेदतः, नानावर्णाः, **आसां**=मसूरिकाणां, जायन्ते॥२५-२६॥

सर्वमसूरिकाया आवस्थिकं लिङ्गमाह—

कासो हिक्का प्रमेहश्च ज्वरस्तीव्रः सुदारुणः ।
प्रलापश्चारतिर्मूर्च्छा तृष्णा दाहोऽतिघूर्णता ॥ २७ ॥
मुखेन प्रस्रवेद्रक्तं तथा घ्राणेन चक्षुषा ।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यत्यर्थवेदनम् ॥ २८ ॥
मसूरिकाऽभिभूतस्य यस्यैतानि भिषग्वरः ।
लक्षणानि च दृश्यन्ते न दद्यादत्र भेषजम् ॥ २९ ॥
मसूरिकाऽभिभूतो यो भृशं घ्राणेन निःश्वसेत् ।
स भृशं त्यजति प्राणांस्तृषार्तो वायुदूषितः ॥ ३० ॥

**मसूरिकाऽन्ते शोथः स्यात् कूर्परे मणिबन्धके ।**
**तथांऽसफलके चापि दुश्चिकित्स्यः सुदारुणः ॥ ३१ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने चतुष्पञ्चाशत्तमं मसूरिका-निदानं समाप्तम् ॥ ५४ ॥**

निखिलमसूरिकाणामावस्थिकं लक्षणमाह—**कास** इत्यादि । **मसूरिकाऽभिभूतस्य**=मसूरिकारोगाक्रान्तस्य, यस्य, **एतानि**=कासादीनि लक्षणानि दृश्यन्ते तत्र भेषजं न दद्याद् दुःसाध्यत्वादित्यर्थः । उपद्रवानाह—कूर्परे मणिबन्धकेंऽसफलके वा शोथः, **दुश्चिकित्स्यः**=असाध्य इत्यर्थः ॥ २७–३१ ॥

इति सुधायां मसूरिकानिदानम् ॥

## अथ पञ्चपञ्चाशत्तमं क्षुद्ररोग-निदानम् ॥ ५५ ॥

अजगल्लिका—**स्निग्धाः सवर्णा ग्रथिता नीरुजा मुद्गसन्निभाः ।**
**कफवातोत्थिता ज्ञेया बालानामजगल्लिकाः ॥ १ ॥**

क्षुद्ररोगाणां मसूरिकोत्पादकत्वान्मसूरिकाऽनन्तरं क्षुद्ररोगास्तिलकालकप्रभृतयः । यद्वा—क्षुद्रास्तीक्ष्णा रोगा अग्निरोहिणीप्रभृतयः । अथवा क्षुद्राणां बालानां रोगाः क्षुद्ररोगा इति केचित् । चतुश्चत्वारिंशत् क्षुद्ररोगा अजगल्लिकाऽऽद्यो भवन्ति, क्रमेण तानाह—**स्निग्धा** इत्यादिना ॥ १ ॥

यवप्रख्या—**यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।**
**पिडका कफवाताभ्यां यवप्रख्येति सोच्यते ॥ २ ॥**

अन्त्रालजी-**घनामवक्त्रां पिडकामुन्नतां परिमण्डलाम् ।**
**अन्त्रालजीमल्पपूयां तां विद्यात्कफवातजाम् ॥ ३ ॥**

विवृता—**विवृतास्यां महादाहां पक्वोदुम्बरसन्निभाम् ।**
**विवृतामिति तां विद्यात्पित्तोत्थां परिमण्डलाम् ॥४॥**

कच्छपिका—**ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमाः ।**
**कफानिलाभ्यां पिडका ज्ञेयाः कच्छपिका बुधैः ॥ ५ ॥**

वल्मी-**ग्रीवांऽसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः ।**
कः—**ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिम् ॥६॥**
**मुखैरनेकैः स्रुतितोदवद्भिर्विसर्पवत्सर्पति चोन्नताग्रैः ।**
**वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात् ॥७॥**

इन्द्रविद्धा–पद्मकर्णिकवन्मध्ये पिडकाभिः समाचिताम् ।
इन्द्रविद्धां तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥ ८ ॥
गर्दभिका–मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम् ।
रुजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम् ॥ ९ ॥
पाषाण- वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
गर्दभः– स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ॥ १० ॥
पनसिका–कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम् ।
स्थिरां पनसिकां तां तु विद्याद्वातकफोत्थिताम् ॥११॥
जालगर्दभः–विसर्पवत्सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात्स ज्ञेयो जालगर्दभः ॥ १२ ॥
इरिवेल्लिका–पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् ।
सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकाम् ॥ १३ ॥
कक्षा–बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत् ॥ १४ ॥
गन्धमाला–एकामेतादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम् ।
त्वग्गतां पित्तकोपेन गन्धमालां प्रचक्षते ॥ १५ ॥
अग्निरोहिणी–कक्षभागेषु ये स्फोटा जायन्ते मांसदारणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥ १६ ॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा हन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सर्वदोषजाम् ॥ १७ ॥

अग्निरोहिणीमाह–कक्षेत्यादि । कक्षभागेषु मांसदारणाः, अन्तर्दाहज्वरकराः, दीप्तपावकसन्निभाः, ये स्फोटा जायन्ते तां (विधेयप्राधान्यात्स्त्रीत्वम्) सर्वदोषजामसाध्यामग्निरोहिणीं विद्यात् । पश्चात्सप्ताहाद्दशाहाद् वा मानवं हन्ति ( असावग्निरोहिणीति शेषः ) वातपित्तकफाधिक्याद् यथाक्रमं सप्ताहादिविकल्पो बोध्यः ॥ २–१७ ॥

चिप्पं कुन- नखमांसमधिष्ठाय वायुः पित्तं च देहिनाम् ।
खं च– कुर्वाते दाहपाकौ च तं व्याधिं चिप्पमादिशेत् ॥ १८ ॥
तदेवाल्पतरैर्दोषैः परुषं कुनखं वदेत् ॥ १९ ॥
अनुशयी–गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् ।
पादस्यानुशयीं तां तु विद्यादन्तःप्रपाकिनीम् ॥ २० ॥

विदारिका—विदारीकन्दवद् वृत्ता कक्षावङ्क्षणसन्धिषु ।
विदारिका भवेद्रक्ता सर्वजा सर्वलक्षणा ॥ २१ ॥

विदारीलक्षणमाह—विदारीत्यादि । विदारीकन्दवद्, वृत्ता—वर्त्तुला, कक्षाऽऽदिभागेषु सर्वजा सर्वलक्षणा, रक्ता च विदारिका भवेत् । अत्र-रक्ता सर्वजा सर्वलक्षणेत्यत्र बहुविधं पदच्छेदमामनन्ति विद्वांसः । असर्वजा-असर्वलक्षणेति केचित् । असर्वजा-सर्वलक्षणेति केचिदाचक्षते । सर्वजा-असर्वलक्षणेति वा पठन्ति, परं बहुप्रपञ्चग्रस्तत्वेन तेषामनतिरमणीयत्वम् । 'विदारीमिति तां विद्यात् सर्वजां सर्वलक्षणामि'ति पाठान्तरे तु न कश्चिद् व्याख्यानप्रपञ्चः॥२१॥

शर्कराऽर्बुदः—प्राप्य मांससिरास्नायूः श्लेष्मा मेदस्तथाऽनिलः ।
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम् ॥ २२ ॥
स्रवत्यास्रावमनिलस्तत्र वृद्धिं गतः पुनः ।
मांसं संशोष्य ग्रथितां शर्करां जनयेत्ततः ॥ २३ ॥
दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं ततः सिराः ।
स्रवन्ति रक्तं सहसा तं विद्याच्छर्कराऽर्बुदम् ॥ २४ ॥

पाददारी—परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः ।
पादयोः कुरुते दारीं पाददारीं तमादिशेत् ॥ २५ ॥

कदरं—शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः
ग्रन्थिः कोलवदुत्सन्नो जायते कदरं हि तत् ॥ २६ ॥

अलसं—क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजाऽन्वितौ ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत् ॥ २७ ॥

इन्द्रलुप्तं—रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ॥ २८ ॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः ।
तदिन्द्रलुप्तं खालित्यं रुह्येति च विभाव्यते ॥ २९ ॥

इन्द्रलुप्तलक्षणमाह—रोमकूपेत्यादि । वातेन सह मूर्च्छितं रोमकूपानुगं पित्तं रोमाणि प्रच्यावयति—पातयति, ततः सशोणितः—सरक्तः, श्लेष्मा रोमकूपान् रुणद्धि, तदिन्द्रलुप्तं विभाव्यते, खालित्यं रुह्येति च विभाव्यते । खालित्यं रुह्येति चेन्द्रलुप्तस्य पर्यायाविति । केचित्तु—इन्द्रलुप्तं श्मश्रुणि—खालित्यं शिरस्येव, रुह्या च सकले काय इति भेदं भणन्ति । विनिगमनाविरहाद् भेदकथनमप्रामाणिकम् । एतच्च स्त्रीणां न भवति—यदुक्तम्—अत्यन्तसुकुमा-

**राज्यो रजो दुष्टं स्रवन्ति च । अव्यायामरता यस्मात्तस्मान्न खलितिः स्त्रियाः ॥** इति । स्त्रीष्वपि खालित्यदर्शनात् प्रायिकमेतत् कथनमिति तत्त्वविदः ॥ २८–२९ ॥

दारुणकं—**दारुणा कण्डुरा रूक्षा केशभूमिः प्रपाट्यते ।**
**कफमारुतकोपेन विद्याद्दारुणकं तु तम् ॥ ३० ॥**

अरुंषिका—**अरूंषि बहुवक्त्राणि बहुक्लेदीनि मूर्ध्नि तु ।**
**कफासृक्क्रिमिकोपेन नृणां विद्यादरुंषिकाम् ॥ ३१ ॥**

पलितं—**क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः ।**
**पित्तं च केशान् पचति पलितं तेन जायते ॥ ३२ ॥**

पलितमाह—**क्रोधे**त्यादि । क्रोधादिकृतः शिरोगतः शरीरोष्मा केशान् पित्तं च पचति तेन **पलितं**—केशानां शौक्ल्यं जायते । एतच्च द्विविधं—कालजमकालजञ्चेति । तत्र क्रोधादिकृतो वयःपरिणामादिजनितो वा चोष्मा दोषत्रययुक्तः कालजपलितहेतुः ॥ ३२ ॥

युवानपिडका-**शाल्मलीकण्टकप्रख्याः कफमारुतरक्तजाः ।**
**युवानपिडका यूनां विज्ञेया मुखदूषिकाः ॥ ३३ ॥**

पद्मिनी- **कण्टकैराचितं वृत्तं मण्डलं पाण्डुकण्डुरम् ।**
कण्टकम्—**पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम् ॥ ३४ ॥**

जतुमणिः—**सममुत्सन्नमरुजं मण्डलं कफरक्तजम् ।**
**सहजं लक्ष्म चैकेषां लक्ष्या जतुमणिस्तु सः ॥ ३५ ॥**

मषकम्—**अवेदनं स्थिरं चैव यस्मिन् गात्रे प्रदृश्यते ।**
**माषवत्कृष्णमुत्सन्नमनिलान्मषकं तु तत् ॥ ३६ ॥**

तिलकालकाः-**कृष्णानि तिलमात्राणि नीरुजानि समानि च ।**
**वातपित्तकफोच्छोषात्तान्विद्यात्तिलकालकान् ॥ ३७ ॥**

न्यच्छं—**महद्वा यदि वा चाल्पं श्यावं वा यदि वाऽसितम् ।**
**नीरुजं मण्डलं गात्रे न्यच्छमित्यभिधीयते ॥ ३८ ॥**

व्यङ्गं—**क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः ।**
**मुखमागत्य सहसा मण्डलं विसृजत्यतः ।**
**नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ॥ ३९ ॥**

नीलिका- कृष्णमेवंगुणं गात्रे मुखे वा नीलिकां विदुः ॥ ४० ॥

परिवर्त्तिका—मर्दनात् पीडनाद्वाऽपि तथैवाप्यभिघाततः ।
मेढ्रचर्म यदा वायुर्भजते सर्वतश्चरन् ॥ ४१ ॥
तदा वातोपसृष्टत्वात् तच्चर्म परिवर्त्तते ।
मणेरधस्तात् कोशश्च ग्रन्थिरूपेण लम्बते ॥ ४२ ॥
सरुजां वातसंभूतां तां विद्यात् परिवर्त्तिकाम् ।
सकण्डूः कठिना चापि सैव श्लेष्मसमुत्थिता ॥ ४३ ॥

अवपाटिका—अल्पीयःखां यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादपि वा चर्मण्युद्वर्त्तिते बलात् ॥ ४४ ॥
यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् ।

निरुद्धप्रकर्श—वातोपसृष्टे मेढ्रे वै चर्म संश्रयते मणिम् ॥ ४५ ॥
मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ।
निरुद्धप्रकशे तस्मिन् मन्दधारमवेदनम् ॥ ४६ ॥
मूत्रं प्रवर्त्तते जन्तोर्मणिर्विव्रियते न च ।
निरुद्धप्रकशं विद्यात् सरुजं वातसम्भवम् ॥ ४७ ॥

संनिरुद्धगुदः-वेगसंधारणाद्वायुर्विहतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मद्वारं करोति च ॥ ४८ ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदारुणम् ॥ ४९ ॥

अहिपूतनः—शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वाऽस्नाप्यमाने वा कण्डू रक्तकफोद्भवा ॥ ५० ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते ।
एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम् ॥ ५१ ॥

वृषणकच्छूः-स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः
यदा प्रक्लिद्यते स्वेदात् कण्डूं जनयते तदा ॥ ५२ ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते ।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥ ५३ ॥

गुदभ्रंशः—प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः ।
रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥ ५४ ॥

शूकरदंष्ट्रकः–सदाहो रक्तपर्यन्तस्त्वक्पाकी तीव्रवेदनः ।
कण्डूमाञ्ज्वरकारी च स स्याच्छूकरदंष्ट्रकः ॥ ५५ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चपञ्चाशत्तमं
क्षुद्ररोग-निदानं समाप्तम् ॥ ५५ ॥

**उत्सादनं**=मार्जनम् । **प्रवाहणेन**=प्रकर्षेण कुन्थनेन, अतिवेगोदीर्णेनेति यावत् । **शूकरदंष्ट्रकः**=लोके 'वराहदाढ' इति प्रसिद्धः ॥ ५२–५५ ॥

इति सुधायां क्षुद्ररोगनिदानम् ॥

## अथ षट्पञ्चाशत्तमं मुखरोग-निदानम् । ॥ ५६ ॥

हेतुः—आनूपपिशितक्षीरदधिमत्स्यातिसेवनात् ।
मुखमध्ये गदान् कुर्युः क्रुद्धा दोषाः कफोत्तराः ॥ १ ॥

आनूपेत्यादि । **आनूपपिशितं**=जलप्रायदेशीयमांसम् ( **जलप्रायमनूपं स्यादित्यमरः**) । **कफोत्तराः**=श्लेष्मोल्बणाः, दोषाः **क्रुद्धाः**=कुपिताः, मुखमध्ये **गदान्**=व्याधीन् । पञ्चषष्टिं कुर्युः । "**दन्तेष्वष्टावोष्ठयोश्च मूलेषु दश पञ्च च । नव तालुनि जिह्वायां पञ्च सप्तदशामयाः । कण्ठे त्रयः सर्वसरा एकषष्टिश्चतुः पराः**" इति तन्त्रान्तरे वर्णनात् ॥ १ ॥

वातजौ—कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥२॥

वाताद्युपसृष्टलक्षणमाह–**कर्कशावि**त्यादिना । मारुतकोपतः, ओष्ठौ **कर्कशौ**=कठोरौ, **परुषौ**=रूक्षौ, सम्प्राप्तानिलवेदनौ भवतः, **दाल्येते**=विदार्येते, **परिपाट्येते च**=किञ्चिदवदीर्णत्वचौ भवत इत्यर्थः ॥ २ ॥

पित्तजौ—चीयेते पिडकाभिश्च सरुजाभिः समन्ततः ।
सदाहपाकपिडकौ पीताभासौ च पित्ततः ॥ ३ ॥

**पित्ततः**=पित्तप्रकोपतः, ओष्ठौ समन्ततः सरुजाभिः पिडकाभिश्चीयेते । सदाहपाकपिडकौ पीताभासौ च भवतः ॥ ३ ॥

कफजौ—सवर्णाभिश्च चीयेते पिडकाभिरवेदनौ ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू ॥ ४ ॥

**कफात्**=कफप्रकोपतः, **सवर्णाभिः**=ओष्ठसमानवर्णाभिः, पिडकाभिश्चीयेते, अवेदनौ ईषद्वेदनौ, पिच्छिलौ शीतलौ गुरू च भवतः ॥ ४ ॥

त्रिदोषजौ-सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिडकाचितौ ॥ ५ ॥

सन्निपातेन च-सकृत् कृष्णौ सकृत् पीतौ सकृच्छ्वेतौ, अनेकपिडकाचितौ =वातादिवेदनाऽन्वितानेकपिडकाव्याप्तौ भवतः ॥ ५ ॥

रक्तजौ-खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ ॥ ६ ॥

रक्तोपसृष्टौ =रक्तदोषोल्वणावोष्ठौ, खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ शोणितप्रभौ =रक्तवर्णौ, रुधिरं स्रवतः ॥ ६ ॥

मांसजौ-गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुद्गतौ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतोमुखात् ॥ ७ ॥

मेदोजौ-सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू।
अच्छं स्फटिकसंकाशमास्रावं स्रवतो भृशम् ॥
तयोर्व्रणो न संरोहेन् मृदुत्वं च न गच्छति ॥ ८ ॥

मेदसा ओष्ठौ सर्पिर्मण्डप्रतीकाशौ कण्डुरौ गुरू च भवतः। (सर्पिर्मण्डो-हि घृतस्योपरितनः स्वच्छभागः) ॥ ८ ॥

अभिघातजौ-क्षतजाभौ विदीर्येते पाट्येते चाभिघाततः।
ग्रथितौ च तथा स्यातामोष्ठौ कण्डूसमन्वितौ ॥ ९ ॥

पञ्चदश दन्तमूलरोगाः—

शीतादः—शोणितं दन्तवेष्टेभ्यो यस्याकस्मात्प्रवर्त्तते।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥ १० ॥
दन्तमांसानि शीर्यन्ते पचन्ति च परस्परम्।
शीतादो नाम स व्याधिः कफशोणितसंभवः ॥ ११ ॥

यस्य दन्तवेष्टेभ्यः =दन्तबन्धनमांसेभ्यः, =अकस्मात् =निष्कारणं, शोणितं प्रवर्त्तते =पतति। स कफशोणितसम्भवो व्याधिः शीतादो नाम ॥१०-११

दन्तपुप्पुटकः—

दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान्।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ १२ ॥

यस्य द्वयोर्दन्तयोस्त्रिषु वा महान् श्वयथुर्जायतेऽसौ कफरक्तजो व्याधिर्दन्तपुप्पुटको नाम ॥ १२ ॥

दन्तवेष्टः—**स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।**
**दन्तवेष्टः स विज्ञेयो दुष्टशोणितसंभवः ॥ १३ ॥**

यस्य दन्तमूलानि पूयरुधिरं स्रवन्ति दन्ताश्च चला भवन्ति स व्याधिर्दुष्टशोणितसम्भवो दन्तवेष्टो नाम ॥ १३ ॥

शौषिरः—**श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः ।**
**लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥ १४ ॥**

यस्य दन्तमूलेषु **रुजावान्**=वेदनायुक्तः, **श्वयथुः**=शोथः, उत्पद्यते स व्याधिः; **नामतः**=नाम्ना, शौषिरो नाम ॥ १४ ॥

महाशौषिरः-**दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्यते ।**
**यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञितः ॥ १५ ॥**

**यस्मिन्**=शौषिरे, वेष्टेभ्यो दन्ताश्चलन्ति तालु चाप्यवदीर्यते स सर्वजो-महाशौषिरसंज्ञितः ॥ १५ ॥

परिदरः—**दन्तमांसानि शीर्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।**
**पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ १६ ॥**

यस्मिन् दन्तमांसानि शीर्यन्ते **असृग्**=रक्तं, ष्ठीवति स पित्तासृक्कफजो-व्याधिः परिदरो नाम ॥ १६ ॥

सोपकुशः—**वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।**
**यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः ॥ १७ ॥**

यस्मिन् वेष्टेषु दाहः पाकश्च भवेत् **ताभ्यां**=दाहपाकाभ्यां दन्ताश्चलन्ति च स रक्तपित्तकृतो **गदः**=व्याधिः। सोपकुशो नाम ॥ १७ ॥

वैदर्भः—**घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।**
**चला भवन्ति दन्ताश्च स वैदर्भोऽभिघातजः ॥ १८ ॥**

दन्तमांसेषु घृष्टेषु महान् **संरम्भः**=शोथः, जायते दन्ताश्च चला भवन्ति सोऽभिघातजो वैदर्भो नाम ॥ १८ ॥

खलिबर्धनं—**मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।**
**खलिबर्द्धनसंज्ञोऽसौ जाते रुक्च प्रशाम्यति ॥ १९ ॥**

मारुतेन तीव्रवेदनोऽधिको दन्तो जायतेऽसौ खलिबर्धनसंज्ञको व्याधिः, **जाते**=उत्पन्नमात्रे दन्ते **रुक्**=पीडा शाम्यति व्याधिप्रभावात् ॥ १९ ॥

करालः—**शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः ।**
**करालान्विकटान्दन्तान्करालो न स सिद्ध्यति ॥ २० ॥**

दन्तसमाश्रितो वायुः शनैः शनैः करालान् विकटान्, दन्तान्, कुरुते स करालसंज्ञको व्याधिर्न सिद्ध्यति। असाध्योऽयम् ॥ २० ॥

अधिमांसकः-**हानव्ये पश्चिमे दन्ते महाञ् शोथो महारुजः।**
**लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ २१ ॥**

**हानव्ये**=हनुकुहरे, **पश्चिमे**-प्रान्तजे, दन्ते **महारुजः**=तीव्रवेदनः, महान् शोथः लालास्रावी भवेत् स कफकृतोऽधिमांसको नाम ॥ २१ ॥

दन्तनाड्यः—**दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥ २२ ॥**

अष्टौ दन्तजरोगानाह—

दालनः—**दीर्यमाणेष्विव रुजा यस्य दन्तेषु जायते।**
**दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥ २३ ॥**

यस्य दन्तेषु **दीर्यमाणेषु**-पाट्यमानेष्विव, **रुजा**=वेदना जायते **सदागतिनिमित्तजः**=वातप्रकोपजः, असौ व्याधिर्दालनो नाम ॥ २३ ॥

क्रिमिदन्तकः-**कृष्णश्छिद्रश्चलः स्रावी ससंरम्भो महारुजः।**
**अनिमित्तरुजो वाताद्विज्ञेयः क्रिमिदन्तकः ॥ २४ ॥**

**कृष्णः**=कृष्णवर्णः, **छिद्रः**=शुषिरवान्। अर्शआद्यजन्तश्छिद्रशब्दः। स्रावी दन्तमूलेषु। **ससंरम्भः**-शोथयुक्तः, **महारुजः**-तीव्रवेदनः, **अनिमित्तरुजः**=आकस्मिकवेदनाऽन्वितः, **वाताद्**=वातकोपतः, क्रिमिदन्तको-नाम व्याधिर्विज्ञेयः ॥ २४ ॥

भञ्जनकः—**वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते।**
**कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ २५ ॥**

यस्य **वक्त्रं**=मुखं (**वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखमित्य**-मरः। **वक्रं**=कुटिलं भवेत्, दन्तभङ्गश्च जायतेऽसौ कफवातकृतो भञ्जनकसंज्ञितो व्याधिः ॥ २५ ॥

दन्तहर्षः—**शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः।**
**पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ २६ ॥**

यस्य **द्विजाः**=दन्ताः '**दन्तविप्राण्डजा द्विजाः**' इति कोशः। शीतादीनाम् **असहाः**-अक्षमाः, भवन्ति पित्तमारुतकोपेन जायमानोऽसौ **नामतः**=नाम्ना, दन्तहर्षः कथ्यते ॥ २६ ॥

दन्तशर्करा—**मलो दन्तगतो यस्तु पित्तमारुतशोषितः।**
**शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ २७ ॥**

पित्तमारुतशोषितः यस्तु दन्तगतो मलः शर्करेव खरस्पर्शा चेत् सा दन्तशर्करा ज्ञेया ॥ २७ ॥

कपालिका—**कपालेष्विव दीर्यत्सु दन्तानां सैव शर्करा ।**
**कपालिकेति विज्ञेया सदा दन्तविनाशिनी ॥ २८ ॥**

दीर्यत्सु **कपालेष्विव**=मलयुक्तदन्तावयवेषु काठिन्यात्कपालतुल्येषु दन्तानां सैव शर्करा दन्तविनाशिनी कपालिकेति विज्ञेया ॥ २८ ॥

श्यावदन्तकः—**योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।**
**श्यावतां नीलतां वाऽपि गतः स श्यावदन्तकः ॥ २९ ॥**

असृङ्मिश्रेण पित्तेन यो दन्तः, **अशेषतः**=सर्वथा । दग्धः **श्यावतां**=नीलतां वाऽपि गतः स श्यावदन्तक इति कथ्यत इति शेषः ॥ २९ ॥

दन्तविद्रधिः—**दन्तमांसे मलैः सास्रैर्बाह्यान्तःश्वयथुर्गुरुः ।**
**सदाहरुक्स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥ ३० ॥**

**सास्रैः**=सरक्तैः, मलैर्दन्तमांसे बाह्यान्तर्गुरुः श्वयथुः सदाहरुग् भिन्नः सन् पूयास्रं स्रवेद् दन्तविद्रधिरसौ कथ्यत इति शेषः ॥ ३० ॥

पञ्च जिह्वारोगानाह, तत्र वातपित्तकफजाः—

**जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा ।**
**पित्तेन दह्यत्युपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च ।**
**कफेन गुर्वी बहुला चिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः ॥ ३१ ॥**

जिह्वागतान् व्याधीनाह—**जिह्वाऽनिलेने**त्यादिना ॥ ३१ ॥

अलासः—

**जिह्वातले यः श्वयथुः प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्त्तिः ॥ ३२ ॥**
**जिह्वां स तु स्तम्भयति प्रवृद्धो मूले च जिह्वा भृशमेति पाकम् ॥ ३२ ॥**

जिह्वातले कफरक्तमूर्त्तिः **प्रगाढः**=भयङ्करः, श्वयथुः, अलाससंज्ञः स एव **प्रवृद्धः**, जिह्वां **स्तम्भयति**=जाड्यमापादयति, **मूले च**=जिह्वामूले च **भृशम्**=अत्यर्थं, पाकमेति ॥ ३२ ॥

उपजिह्वा—

**जिह्वाऽग्ररूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तमूलः ।**
**लालाकरः कण्डुयुतः सचोषः सा तूपजिह्वा पठिता भिषग्भिः ॥ ३३ ॥**

नव तालुरोगानाह, तत्रादौ कण्ठशुण्डी—

**श्लेष्मासृग्भ्यां तालुमूले प्रवृद्धो दीर्घः शोथो ध्मातवस्तिप्रकाशः ।**

**तृष्णाकासश्वासकृत्तं वदन्ति व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना॥३४॥**

तालुगतानाह—**श्लेष्मे**त्यादि। **श्लेष्मासृग्भ्यां**=कफरक्ताभ्यां तालुमूले प्रवृद्धः, **ध्मातवस्तिप्रकाशः**=अनिलपरिपूर्णचर्मपुटकनिभः, तृष्णाकासश्वासकृतो यो दीर्घः शोफस्तं व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना वदन्ति ॥३४॥

तुण्डीकेरी चाध्रुषः—

**शोथः स्थूलस्तोददाहप्रपाकी प्रागुक्ताभ्यां तुण्डिकेरी मता तु।**
**मृदुः शोथो लोहितः शोणितोत्थो ज्ञेयोऽध्रुषः सज्वरस्तीव्ररुक् च ॥३५॥**

तुण्डिकेरीमाह—**शोथ** इत्यादि। **प्रागुक्ताभ्यां**=कफासृग्भ्यां स्थूलस्तोददाहप्रपाकी शोथः '**तुण्डिकेरी**'ति **मता**=तुण्डिकेरी (वनकार्पासीफलम्) तदाकृतिलक्षणत्वादेषा संज्ञा। अध्रुषमाह—**मृदु**रित्यादि। **शोणितोत्थः**=रक्तसमुत्थः, **मृदुः**=स्वल्पः॥ ३५ ॥

कच्छपोऽर्बुदश्च—

**कूर्मोन्नतोऽवेदनोऽशीघ्रजन्मा रोगो ज्ञेयः कच्छपः श्लेष्मणा तु।**
**पद्माकारं तालुमध्ये तु शोथं विद्याद्रक्तादर्बुदं प्रोक्तलिङ्गम् ॥ ३६ ॥**

कच्छपमाह—**कूर्मे**त्यादिना। **अवेदनः**=ईषद्वेदनः, **अशीघ्रजन्मा**=चिरकालीनः। तात्वर्बुदमाह—**पद्मे**त्यादि। **पद्माकारं**=पद्मकर्णिकाऽऽकृतिं **प्रोक्तलिङ्गं**=रक्तार्बुदतुल्यलक्षणम्॥ ३६ ॥

मांससंघातः पुप्पुटश्च—

**दुष्टं मांसं नीरुजं तालुमध्ये कफाच्छूनं मांससंघातमाहुः।**
**नीरुक् स्थायी कोलमात्रः कफात् स्यान् मेदोयुक्तात् पुप्पुटस्तालुदेशे ३७**

मांससंघातमाह-**दुष्ट**मित्यादि। **कफात्**=श्लेष्मोत्पन्नं, **शूनं**-शोथयुक्तम्। पुप्पुटमाह-मेदोयुक्तात्कफात् तालुदेशे **नीरुग्**=वेदनावर्जितः, **स्थायी**=निश्चलः, **कोलमात्रः**=बदराकृतिशोथः **पुप्पुटः**=तालुपुप्पुटः, तालुशब्दोऽत्र लुप्तनिर्दिष्टो बोद्ध्यः॥ ३७ ॥

तालुशोषस्तालुपाकश्च—

**शोषोऽत्यर्थं दीर्यते चापि तालुः श्वासश्चोग्रस्तालुशोषोऽनिलाच्च।**
**पित्तं कुर्यात् पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदन्ति ॥ ३८ ॥**

रोहिणी—

**गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूष्य मांसं च तथैव शोणितम्।**
**गलोपसंरोधकरैस्तथाऽङ्कुरैर्निहन्त्यसून् व्याधिरियं हि रोहिणी ॥३९॥**

रोहिणीमाह–गलेऽनिल इत्यादि। प्रदुष्टः, अनिलो=वायुः, मूर्च्छितौ=प्रदुष्टौ, पित्तकफौ च गले मांसं तथैव शोणितं=रक्तं च प्रदूष्य गलोपसंरोधकरैः=गलनालावष्टम्भकरैः, तथाऽङ्कुरैः, असून्=प्राणान्, निहन्ति=व्यापादयति, एषा रोहिणी नाम व्याधिः कथ्यत इति शेषः। रोहिण्यः पञ्चविधा भवन्ति सर्वा एव सन्निपातजा जायन्ते, दोषोत्कर्षाद् वातजत्वादिव्यवहार एतासु भवति। केचित्तु–पृथक् समस्ताश्च तथैव शोणितम्, इति पठित्वा एकदोषजत्वमप्यामनन्ति ॥ ३९ ॥

वातजा—

**जिह्वासमन्ताद् भृशवेदना तु मांसाङ्कुराः कण्ठविरोधिनो ये।**
**सा रोहिणी वातकृता प्रदिष्टा वातात्मकोपद्रवगाढयुक्ता ॥ ४० ॥**

वातजादिभेदेन रोहिणीलक्षणमाह–जिह्वेत्यादिना। जिह्वासमन्तात्=जिह्वायाः सर्वतः कण्ठविरोधिनः=कण्ठावरोधनाः, मांसाङ्कुराः=मांसप्ररोहाः। वातात्मकोपद्रवगाढयुक्ता=वातात्मका य उपद्रवाः कम्पादयस्तैरनुगता या सा वातकृता रोहिणी प्रदिष्टा ॥ ४० ॥

पित्तजा कफजा च—

**क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजा तु।**
**स्रोतोविरोधिन्यचलोद्गता च स्थिराङ्कुरा या कफसंभवा सा॥४१॥**

त्रिदोषजा रक्तजा च—

**गम्भीरपाकिन्यनिवार्यवीर्या त्रिदोषलिङ्गा त्रितयोत्थिता च।**
**स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु॥४२॥**

त्रितयोत्थिता–दोषत्रयजन्या, अनिवार्यवीर्या=अनिवार्यं=चिकित्सयाऽपि न निवार्यं वीर्यं=प्रभावो यस्याः सा तथाभूता ॥ ४२ ॥

कण्ठशा–**कोलास्थिमात्रः कफसंभवो यो ग्रन्थिर्गले कण्टकशूकभूतः।**
लूकः–**खरः स्थिरः शस्त्रनिपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति ॥४३॥**

कण्ठशालूकमाह–कोलेत्यादि। कोलास्थिमात्रः=बदरास्थिनिभः, कफसम्भवो यो ग्रन्थिः, गले कण्टकशूकभूतः=कण्टकवत् शूकवच्च पीडाजनकः, शस्त्रनिपातसाध्यः=छेदनादिसाध्यः, तं कण्ठशालूकमिति वदन्ति ॥ ४३ ॥

अधिजि-**जिह्वाऽग्ररूपः श्वयथुः कफात्तु जिह्वोपरिष्टादपि रक्तमिश्रात्।**
ह्वः–**ज्ञेयोऽधिजिह्वः खलु रोग एष विवर्जयेदागतपाकमेनम् ॥ ४४ ॥**

अधिजिह्विकामाह–जिह्वाऽग्ररूपइत्यादि। अपि रक्तमिश्रात्=न केवला-

दित्यर्थः। कफात् **जिह्वोपरिष्टात्**=रसनाया उपरिप्रदेशे जिह्वाऽग्ररूपः श्वयथुः, एष रोगोऽधिजिह्वः खलु ज्ञेयः। एनमागतपाकं विवर्जयेत्, आगतपाकत्वेन पित्तसम्बन्धोऽप्यत्र सूचितः ॥ ४४ ॥

वलयः-**बलास एवायतमुन्नतं च शोथं करोत्यन्नगतिं निवार्य।**
**तं सर्वथैवाप्रतिवार्यवीर्यं विवर्जनीयं वलयं वदन्ति ॥ ४५ ॥**

वलयमाह-**बलासे**त्यादि। **बलासः**=कफः, **अन्नगतिम्**=अन्नवहस्रोतः, निवार्य, **आयतं**=विशालमुन्नतं च शोथं करोति। **सर्वथाऽप्रतिवार्यवीर्यं**= सर्वतो भावेनानिवार्यप्रभावं, विवर्जनीयं, वलयाख्यं व्याधिं वदन्ति वैद्या इति शेषः ॥ ४५ ॥

बलाशकः-**गले तु शोथं कुरुतः प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नम्।**
**मर्मच्छिदं दुस्तरमेनमाहुर्बलाशसंज्ञं निपुणा विकारम् ॥४६॥**

बलाशमाह-**गल** इत्यादि। **मर्मच्छिदं**=हृदयविदारकं, **निपुणाः**=मर्मज्ञाः, **विकारं**=व्याधिम् ॥ ४६ ॥

एकवृन्दः-**वृत्तोन्नतोऽन्तःश्वयथुः सदाहः सकण्डुरोऽपाक्यमृदुर्गुरुश्च।**
**नाम्नैकवृन्दः परिकीर्तितोऽसौ व्याधिर्बलाशक्षतजप्रसूतः ॥४७॥**

एकवृन्दमाह-**वृत्ते**त्यादि। अन्तः गलमध्ये, **सदाहो**=मन्ददाहः-सह शब्द ईषदर्थे। **अपाकी**=स्वल्पपाकी, **बलासक्षतजप्रसूतः**=बलासः= कफः क्षतजो=रक्तः, ताभ्यां प्रसूतो जातः श्लेष्मशोणितप्रभव इत्यर्थः ॥४७॥

वृन्दः-**समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति।**
**तच्चापि पित्तक्षतजप्रकोपाज्ज्ञेयं सतोदं पवनात्मकं तु ॥ ४८ ॥**

वृन्दमाह—**समुन्नतमि**त्यादि। पित्तक्षतजप्रकोपाद् जातं समुन्नतम्, **अमन्ददाहं**=प्रकामदाहं, **तीव्रज्वरं**=ज्वरोत्कटं, (शोथं) वृन्दम् **उदाहरन्ति**= कथयन्ति। पवनात्मकं चेत् **सतोदं**=सव्यथं, ज्ञेयम्। एष व्याधिरेकवृन्दस्यैवावस्थाविशेषरूपोऽतो न संख्याऽतिरेकः, यद्यप्येकवृन्दः कफरक्तजः, वृन्दस्तु- पित्तरक्तजो वर्णितस्तथा वृन्दस्यैव सतोदत्वेन वातात्मकत्वमुक्तं तथाऽप्येकवृन्दस्यावस्थाविशेषत्वेन वृन्दः सङ्गच्छत एवेति ॥ ४८ ॥

शतघ्नी-**वर्तिर्घना कण्ठनिरोधिनी या चिताऽतिमात्रं पिशितप्ररोहैः।**
**अनेकरुक् प्राणहरी त्रिदोषाज्ज्ञेया शतघ्नी च शतघ्निरूपा ॥ ४९ ॥**

शतघ्नीमाह—**वर्ति**रित्यादि। त्रिदोषात् **पिशितप्ररोहैः**=मांसाङ्कुरैः, अतिमात्रं **चिता**=व्याप्ता, **अनेकरुग्**=नानाविधवातपित्तकफजादिवेदनाऽन्विता।

**प्राणहरी**=जीवितक्षयकरी, **शतघ्निरूपा**=( अयः कण्टकाच्छन्ना महती शिला शतघ्नी, या वर्त्तिर्जायते सा शतघ्नी ज्ञेया । असाध्येयम् ॥ ४९ ॥

गलायुः **ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽतिरुग्यः कफरक्तमूर्त्तिः ।**
**संलक्ष्यते सक्तमिवाशनं च स शस्त्रसाध्यस्तु गलायुसंज्ञः ॥ ५० ॥**

गलायुलक्षणमाह—**ग्रन्थिरि**त्यादि । **कफरक्तमूर्त्तिः**=श्लेष्मशोणितप्रसूतः । अशनं=भुक्तमन्नं, **सक्तमिव**=संलग्नमिव ॥ ५० ॥

गलविद्रधिः—**सर्वं गलं व्याप्य समुत्थितो यः शोथो रुजः सन्ति च यत्र सर्वाः ।**
**स सर्वदोषैर्गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्वजस्य ॥ ५१ ॥**

गलविद्रधिमाह—**सर्वमि**त्यादि । यः शोथः सर्वं गलं व्याप्य समुत्थितः यत्र च **सर्वा रुजः**=वातपित्तकफजा वेदनाः, स्युः, स गलविद्रधिः **सर्वदोषैः**=सन्निपातैः स्यात् । स च **सर्वजस्य**=पूर्वोपवर्णितस्य सन्निपातजस्य, विद्रधेस्तुल्यः ॥ ५१ ॥

गलौघः-**शोथो महानन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहन्ता ।**
**कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्यते तु ॥ ५२ ॥**

गलौघमाह—रुधिरान्वितेन कफेन गले जातः, अन्नजलावरोधी तीव्रज्वरः **वायुगतेर्निहन्ता**=उदानवायुगतिरोधकः, महान् शोथः गलौघः परिकीर्त्यते ५२

स्वरघ्नः-**यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः ।**
**कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥ ५३ ॥**

मांसतानः-**प्रतानवान् यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण ।**
**स मांसतानः कथितोऽवलम्बी प्राणप्रणुत् सर्वकृतो विकारः ॥ ५४ ॥**

मांसतानमाह—**प्रताने**त्यादि । **प्रतानवान्**=विस्तृतः, **सुकष्टः**=सुदुःखदः, श्वयथुः क्रमेण गलोपरोधं कुरुते, **प्राणप्रणुत्**=प्राणनाशकः, अवलम्बी **सर्वकृतः**=सन्निपातजः, विकारो मांसतान इति कथितो भिषग्भिरिति शेषः ५४

विदारी-**सदाहतोदं श्वयथुं सुताम्रमन्तर्गले पूतिविशीर्णमांसम् ।**
**पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात् स तु येन शेते ॥ ५५ ॥**

विदारीलक्षणमाह—**सदाहे**त्यादि । **अन्तर्गले**=गलमध्ये, **पूतिविशीर्णमांसं**=दुर्गन्धशटितमांसम् , **पार्श्वे विशेषात्स तु येन शेते**=स पुरुषो येन पार्श्वेन विशेषाद्=बाहुल्येन शेते, तस्मिन्नेव पार्श्वे विदारी जायते । विशेषादितिकथनेनान्यस्मिन् पार्श्वेऽपि सम्भवोऽस्या ऊहनीयः । मांसविदारणाद् विदारीति संज्ञा ॥ ५५ ॥

वातादिजास्त्रयः सर्वसराः—

**स्फोटैः सतोदैर्वदनं समन्ताद्यस्याचितं सर्वसरः स वातात्।**
**रक्तैः सदाहैस्तनुभिः सपीतैर्यस्याचितं चापि स पित्तकोपात्।**
**अवेदनैः कण्डुयुतैः सवर्णैर्यस्याचितं चापि स वै कफेन ॥५६॥**

ओष्ठप्रकोपादिष्वसाध्यान् दर्शयति—

**ओष्ठप्रकोपे वर्ज्याः स्युर्मांसरक्तत्रिदोषजाः।**
**दन्तमूलेषु वर्ज्यौ च त्रिलिङ्गगतिशौषिरौ।**
**दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः।**
**जिह्वारोगे बलाशस्तु तालव्येष्वर्बुदं तथा ॥ ५७ ॥**

ओष्ठप्रकोपादिष्वसाध्यानाह—**ओष्ठप्रकोप** इत्यादि ॥ ५७ ॥

गलवर्ज्याः—**स्वरघ्नो वलयो बृन्दो बलाशश्च विदारिका।**
**गलौघो मांसतानश्च शतघ्नी रोहिणी गले ॥ ५८ ॥**
**असाध्याः कीर्त्तिता ह्येते रोगा नव दशैव तु।**
**तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥ ५९ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने षट्पञ्चाशत्तमं मुखरोग-निदानं समाप्तम् ॥ ५६ ॥**

एते मुखावयवगता ओष्ठजास्त्रयः, दन्तमूलेषु द्वौ, दन्तभवेषु त्रयः, जिह्वागतेष्वेकः, तालुन्येकः, स्वरघ्नादयो गले नव सङ्कलनया सर्वे नव दशैव रोगा असाध्याः। एषु प्रत्याख्याय **वैद्यः क्रियां**=चिकित्सां, समारभेत् ॥ ५९ ॥

इति सुधायां मुखरोगनिदानम्।

## अथ सप्तपञ्चाशत्तमं कर्णरोग-निदानम् ॥ ५७ ॥

कर्णशूलः-**समीरणः श्रोत्रगतोऽन्यथा चरन् समन्ततः शूलमतीव कर्णयोः।**
**करोति दोषैश्च यथास्वमावृतः स कर्णशूलः कथितो दुराचरः॥१॥**

कर्णशूलमाह—**समीरण** इत्यादि। **श्रोत्रगतः**=श्रूयतेऽनेनेति श्रोत्रं=कर्णशष्कुल्यवच्छिन्नं नभः, तद्गतः, **समीरणः**=पवनः, **अन्यथा चरन्**=प्रतिलोमं गच्छन्, **समन्ततः**=परितः, कर्णयोः शूलं करोति। **सः**=तथाविधः कर्णशूलः, **दोषैः**=श्लेष्मपित्तशोणितैः, **यथास्वं**=स्वीयदोषानतिक्रमेण, **आवृतः दुराचरः**=दुःखेनाचर्यते=उपचर्यत इति दुराचरः, दुःसाध्यः कथितः। विशे-

षतस्तु सोपद्रवत्वादस्य दुःसाध्यत्वम् । उपद्रवा यथा—**मूर्च्छा दाहो ज्वरः कासो हृल्लासो वमथुस्तथा । उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः ॥** इति ॥ १ ॥

कर्णनादः—**कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वरान् ।**
**भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते ॥ २ ॥**

कर्णनादमाह—**कर्णेत्यादि** । भेरीमृदङ्गशङ्खानां विविधान् स्वरान् शृणोति वायोर्विविधप्रकारेण सञ्चरणादिति भावः । अत्र भेर्यादिशब्द उपलक्षणं तेनान्यत्र मृदङ्गादिशब्दश्रवणमपि वर्णितं, यथाऽऽह विदेहः—**शिरोगतो यदा वायुः श्रोत्रयोः प्रतिपद्यते । तदा तु विविधाञ् शब्दान् समीरयति कर्णयोः ॥ भृङ्गारक्रौञ्चनादं वा मण्डूककाकयोस्तथा । तन्त्रीमृदङ्गशब्दं वा सामतूर्यस्वनं तथा ॥ गीताध्ययनवंशानां निर्घोषं क्ष्वेडनं तथा । अपामिव पतन्तीनां शकटस्येव गच्छतः ॥ श्वसतामिव सर्पाणां सदृशः श्रूयते स्वनः ॥ इति ॥ २ ॥**

बधिरता-**यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।**
**शुद्धः श्लेष्मान्वितो वाऽपि बाधिर्यं तेन जायते ॥ ३ ॥**

कर्णक्ष्वेडः—**वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम् ।**
**करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते ॥ ४ ॥**

कर्णक्ष्वेडमाह—**वायुरित्यादि** । पित्तादिभिर्युक्तो वायुः, **वेणुघोषोपमं**=वंशीरावतुल्यं, क्ष्वेडं=तन्नामकं **स्वनं**=शब्दं करोति स कर्णक्ष्वेड उच्यते । ननु कर्णनादादस्य कथं भेदः ? उच्यते—कर्णनादो हि केवलवातजन्यः कर्णक्ष्वेडस्तु पित्तादिसंसृष्टानिलजन्मा । किञ्च कर्णनादे विविधमृदङ्गभेर्यादिशब्दश्रवणं, कर्णक्ष्वेडे तु वेणुशब्दस्यैव नियमतः श्रवणमिति परस्परं भेदः ॥ ४ ॥

कर्णस्रावः **शिरोऽभिघातादथवा निमज्जतो जले प्रपाकादथवाऽपि विद्रधेः ।**
**स्रवेद्धि पूयं श्रवणोऽनिलार्दितः स कर्णसंस्राव इति प्रकीर्त्तितः ॥५॥**

कर्णस्रावमाह—**शिरोऽभिघातेत्यादि** । **स्रवेद्धि पूयमिति** । उपलक्षणमिदं, तेन रक्तजले अपि स्रवत इति बोध्यम् । अन्यथा जलनिमज्जनमात्रेण पूयस्यासम्भवात्, कथनमसङ्गतं स्यादिति भावः ॥ ५ ॥

कर्णकण्डूः **मारुतः कफसंयुक्तः कर्णकण्डूं करोति च ।**
कर्णगूथश्च—**पित्तोष्मशोषितः श्लेष्मा कुरुते कर्णगूथकम् ॥ ६ ॥**

कर्णप्र-स कर्णगूथो द्रवतां गतो यदा विलायितो घ्राणमुखं प्रपद्यते ।
तिनाहः तदा स कर्णप्रतिनाहसंज्ञितो भवेद्विकारः शिरसोऽर्धभेदकृत् ॥७॥

कृमिक-यदा तु मूर्च्छन्त्यथवाऽपि जन्तवः सृजन्त्यपत्यान्यथवाऽपि मक्षिकाः।
कर्णः-तद्व्यञ्जनत्वाच्छ्रवणो निरुच्यते, भिषग्भिराद्यैः क्रिमिकर्णको गदः॥८॥

क्रिमिकर्णकमाह—यदेत्यादि । यदा जन्तवः=क्रिमयः, मूर्च्छन्ति=उच्छ्रिता भवन्ति, मक्षिकाः, अपत्यानि=पृथुकान्, सृजन्ति=जनयन्ति, तद्व्यञ्जनत्वात्=क्रिमिलक्षणत्वात, आद्यैः=पुरातनैः, भिषग्भिः स श्रवणः क्रिमिकर्णकः, निरुच्यते=कथ्यते। श्रवणशब्दस्य पुंस्त्ववर्णनं लोकाश्रयत्वात्॥८॥

कर्णकीटाः—पतङ्गाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि ।
अरतिं व्याकुलत्वं च भृशं कुर्वन्ति वेदनाम् ॥ ९ ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कीटे चरति रुक् तीव्रा निष्पन्दे मन्दवेदना ॥ १० ॥

कर्णप्रविष्टकीटादिलक्षणमाह—पतङ्गा इत्यादि । शतपद्यः=( कीटविशेषाः ) कनगोजर इति प्रसिद्धाः । निष्पन्दे=स्थिरे ॥ ९-१० ॥

कर्णवि-क्षताभिघातप्रभवस्तु विद्रधिर्भवेत्तथा दोषकृतोऽपरः पुनः ।
द्रधिः-सरक्तपीतारुणमस्रमास्रवेत् प्रतोदधूमायनदाहचोषवान् ॥११॥

कर्णपाकः—कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत् ।
कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ॥ १२ ॥

पूतिकर्णकः-पूयं स्रवति पूति वा स ज्ञेयः पूतिकर्णकः ॥ १३ ॥

कर्णशोथादयः कर्णशोथार्बुदार्शांसि जानीयादुक्तलक्षणैः ॥ १४ ॥

दोषलिङ्गानि—

नादोऽतिरुक् कर्णमलस्य शोषः स्रावस्तनुश्चाश्रवणं च वातात् ।
शोथः सरागो दरणं विदाहः सपीतपूतिस्रवणं च पित्तात् ॥
वैश्रुत्यकण्डूस्थिरशोथशुक्लस्निग्धस्रुतिः स्वल्परुजः कफाच्च ।
सर्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राधिकदोषवर्णः ॥१५॥

परिपोटः—सौकुमार्याच्चिरोत्सृष्टे सहसाऽतिप्रवर्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ॥
कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः ॥ १६ ॥

उत्पातः—गुर्वाभरणसंयोगात्ताडनाद्घर्षणादपि ॥ १७ ॥
शोथः पाल्यां भवेच्छ्यावो दाहपाकरुजाऽन्वितः ।

रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः ॥ १८ ॥

उन्मन्थकः—कर्णं बलाद्वर्धयतः पाल्यां वायुः प्रकुप्यति ।
कफं संगृह्य कुरुते शोथं स्तब्धमवेदनम् ।
उन्मन्थकः सकण्डूको विकारः कफवातजः ॥ १९ ॥

परिलेही—संवर्ध्यमाने दुर्विद्धे कण्डूपाकरुजाऽन्वितः ।
शोथो भवति पाकश्च त्रिदोषो दुःखवर्धनः ॥ २० ॥
कफासृक्क्रिमयः क्रुद्धाः सर्षपाभा विसर्पिणः ।
कुर्वन्ति पाल्यां पिडकाः कण्डूदाहरुजाऽन्विताः ॥ २१ ॥
कफासृक्क्रिमिसम्भूतः स विसर्पन्नितस्ततः ।
लिह्येत् सशष्कुलीं पालीं परिलेहीति स स्मृतः ॥ २२ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने कर्णरोगनिदानं समाप्तम् ॥५७॥

स विसर्पन्नित्यत्र स इत्यनेन पिडकात्मको विकारो ग्राह्यः ॥ २२ ॥

इति सुधायां कर्णरोगनिदानम् ।

## अथाष्टपञ्चाशत्तमं नासारोग-निदानम् ॥ ५८ ॥

पीनस-आनह्यते यस्य विशुष्यते च प्रक्लिद्यते धूप्यति चापि नासा ।
रोगः-न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत्तमपीनसेन ।
तं चानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥१॥

अपीनसमाह—**आनह्यत** इत्यादि । **यस्य**=रोगिणः, **नासा**=नासिका, ( **घोणा नासा च नासिके**त्यमरः ) **आनह्यते**=आबद्धयते, **प्रक्लिद्यते**=आर्द्रो भवति, **धूप्यति**=सन्तापमनुभवति, **गन्धरसान्**=गन्धान्=सुरम्यसुरभीन्, रसान्=मधुरादीन्, **न वेत्ति**=न जानाति, **तं**=रोगिणम्, अपीनसेन **जुष्टं**=युक्तं, **व्यवस्येत्**=जानीयात्, **प्रतिश्यायसमानलिङ्गं**=वातश्लेष्मजप्रतिश्यायतुल्यं, तं च विकारम्, अनिलश्लेष्मभवं ब्रूयात् ॥ १ ॥

पूतिनस्यरोगः—

दोषैर्विदग्धैर्गलतालुमूले संमूर्च्छितो यस्य समीरणस्तु ।
निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम् ॥२॥

पूतिनस्यमाह—**दोषै**रित्यादि । **विदग्धैः**=विरुद्धलवणाम्लरसपाकेन पूतिभावमुपगतैः, दोषैः, **यस्य**=नरस्य, गलतालुमूले **सम्मूर्च्छितः**=उच्छ्रायं नीतः

**समीरणः**=पवनः, मुखनासिकाभ्यां **पूतिः**=दुर्गन्धः, **निरेति**=निर्गच्छति, तं=रोगं, **पूतिनस्यं**=नासिकाभवो नस्यः पूतिर्नस्यो यस्य तं पूतिनस्यम्। **प्रवदन्ति**=कथयन्ति, विपश्चित इति शेषः॥ २॥

नासापाकः**घ्राणाश्रितं पित्तमरूंषि कुर्याद्यस्मिन् विकारे बलवांश्च पाकः।**
**तं नासिकापाकमिति व्यवस्येद्विक्लेदकोथावथवाऽपि यत्र॥३॥**

नासापाकमाह—**घ्राणेत्यादि**। **अरूंषि**=व्रणान्, **व्यवस्येत्**=जानीयात्, **विक्लेदकोथौ**=विक्लेदः=आर्द्रता, कोथः=पूतिभावः, अन्वयः सुगमः॥ ३॥

पूयरक्त-**दोषैर्विदग्धैरथवाऽपि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तैः।**
रोगः—**नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्॥४॥**

क्षवथुः—**घ्राणाश्रिते मर्मणि संप्रदुष्टो यस्यानिलो नासिकया निरेति।**
**कफानुयातो बहुशोऽतिशब्दस्तं रोगमाहुः क्षवथुं विधिज्ञाः॥५॥**

दोषजं क्षवथुमाह—**घ्राणेत्यादि**। **घ्राणाश्रिते मर्मणि**=शृङ्गाटके, सम्प्रदुष्टः कफानुयातः, **अनिलः**=वायुः, यस्य नासिकया बहुशो निरेति तं **विधिज्ञाः**=विद्वांसः, क्षवथुं वदन्ति॥ ५॥

आगन्तुज-**तीक्ष्णोपयोगादभिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा।**
क्षवथुः—**सूत्रादिभिर्वा तरुणास्थिमर्मण्युद्घाटितेऽन्यः क्षवथुर्निरेति॥६॥**

आगन्तुजमाह—**तीक्ष्णोपयोगात्**=सर्षपादिभक्षणात्, **कटून् भावान्**=तीक्ष्णकटुफलादिनस्यम्, अभिजिघ्रतः, **अर्कनिरीक्षणात्**=सूर्यरश्मिविलोकनात्, **सूत्रादिभिः**=सूत्रनिर्मितवर्त्तिकाभिः, **तरुणास्थि**=नासावंशास्थि तदेव मर्म तस्मिन् फणामर्मणीत्यर्थः। **उद्घाटिते**=चालिते, **अन्यः**=आगन्तुकः क्षवथुः, **निरेति**=निर्गच्छति॥ ६॥

भ्रंशथुः—**प्रभ्रश्यते नासिकया तु यस्य सान्द्रो विदग्धो लवणः कफस्तु।**
**प्राक्संचितो मूर्धनि सूर्यतप्तस्तं भ्रंशथुं रोगमुदाहरन्ति॥ ७॥**

दीप्तरोगः-**घ्राणे भृशं दाहसमन्विते तु विनिःसरेद् धूम इवेह वायुः।**
**नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिं तु तं दीप्तमुदाहरन्ति॥८॥**

प्रतीनाहो नासास्रावश्च—

**उच्छ्वासमार्गं तु कफः सवातो रुन्ध्यात् प्रतीनाहमुदाहरेत्तम्॥**
**घ्राणाद् घनः पीतसितस्तनुर्वा दोषः स्रवेत् स्रावमुदाहरेत्तम्॥९॥**

नासा·घ्राणाश्रिते स्रोतसि मारुतेन गाढं प्रतप्ते परिशोषिते च।
शोषः-कृच्छ्राच्छ्वसेदूर्ध्वमधश्च जन्तुर्यस्मिन् स नासापरिशोष उक्तः॥१०॥
आमपीनसः-शिरोगुरुत्वमरुचिर्नासास्रावस्तनुः स्वरः।
क्षामः ष्ठीवत्यथाभीक्ष्णमामपीनसलक्षणम्॥११॥
पक्वपीनसः—आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति।
स्वरवर्णविशुद्धिश्च परिपक्वस्य लक्षणम्॥ १२॥

प्रतिश्यायकारणानि—

संधारणाजीर्णरजोऽतिभाष्य-क्रोधर्त्तुवैषम्यशिरोऽभितापैः॥१३॥
प्रजागरातिस्वपनाम्बुशीतरवश्ययामैथुनबाष्पधूमैः।
संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्तु॥ १४॥

वातपित्तकफरक्तसन्निपातजभेदात् पञ्चविधस्य प्रतिश्यायस्य हेतुद्वैविध्यम्, एकं-सद्योजनकं, द्वितीयन्तु-दोषादीनां चयादिक्रमापेक्षजनकं, तत्राद्यस्य सद्योजनकस्य निदानपूर्विकां सम्प्राप्तिमाह—**सन्धारणे**त्यादि। सन्धारणादिभिर्हेतुभिः संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेदित्यन्वयः। **सन्धारणं**=मलमूत्रादीनाम्, **रजो**=धूलिः, **शिरोऽभितापः**=मस्तकपीडाकरो धूमादिः, **अतिस्वपनं**=दिनेऽपि शयनम्, **अवश्यया**=तुषारेण॥१३-१४॥

चयं गता मूर्धनि मारुतादयः पृथक् समस्ताश्च तथैव शोणितम्।
प्रकुप्यमाणा विविधैः प्रकोपणैस्ततः प्रतिश्यायकरा भवन्ति हि १५

द्वितीयमाह—**चयमि**त्यादिना। **विविधैः प्रकोपणैः**=बलवद्विग्रहादिभिः, दिवास्वापादिभिर्वा-**मूर्धनि**=मस्तके, चयं गताः पृथग् मारुतादयः समस्ताश्च तथैव शोणितम्। एते सर्वे प्रतिश्यायकरा भवन्ति॥ १५॥

पूर्वरूपं क्षवप्रवृत्तिः शिरसोऽतिपूर्णता स्तम्भोऽङ्गमर्दः परिहृष्टरोमता।
उपद्रवाश्चाप्यपरे पृथग्विधा नृणां प्रतिश्यायपुरःसराः स्मृताः॥१६॥

पूर्वरूपमाह—**क्षवप्रवृत्ति**रित्यादि। **क्षवप्रवृत्तिः**=क्षवथोरुद्गमः, **शिरसोऽतिपूर्णता**=शिरोगुरुत्वं, **स्तम्भः**=जाड्यम्, **अङ्गमर्दः**=शरीरपीडा, **परिहृष्टरोमता**=रोमाञ्चः, **अपरेऽपि**=घ्राणधूमायनादयः, उपद्रवाः **प्रतिश्यायपुरःसराः**=प्रतिश्यायस्य पूर्वरूपाणि, भवन्ति॥ १६॥

वातजः—आनद्धा पिहिता नासा तनुस्रावप्रसेकिनी।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा॥ १७॥

क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च ।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके ॥ १८ ॥

पित्तजः—उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके ।
कृशोऽतिपाण्डुः संतप्तो भवेदुष्णाभिपीडितः ॥
सधूममग्निं सहसा वमतीव स मानवः ॥ १९ ॥

वातादिप्रतिश्यायलक्षणमाह—आनद्धा इत्यादिना । शङ्खयोः=भ्रूपुच्छान्तयोः, वक्त्रवैरस्यं=मुखस्य स्वादाभावः । स्वरोपघातः=स्वरभङ्गः । सपीतकः=ईषत्पीतकः ॥ १७-१९ ॥

कफजः—घ्राणात् कफः कफकृते शीतः पाण्डुः स्रवेद्बहुः ॥ २० ॥
शुक्लावभासः शुक्लाक्षो भवेद् गुरुशिरा नरः ॥
कण्ठताल्वोष्ठशिरसां कण्डूभिरभिपीडितः ॥ २१ ॥

सर्वजः—भूत्वा भूत्वा प्रतिश्यायो यस्याकस्मान्निवर्त्तते ।
संपक्वो वाऽप्यपक्वो वा स सर्वप्रभवः स्मृतः ॥ २२ ॥

सन्निपातजमाह—भूत्वेत्यादि । यस्य सम्पक्वः=परिपक्वः, अपक्वः=आमो वा, प्रतिश्यायो भूत्वा भूत्वा अकस्मात्=निष्कारणं, निवर्त्तते, स सर्वप्रभवः स्मृतः=कथितः ॥ २२ ॥

दुष्टप्रतिश्यायः—प्रक्लिद्यते पुनर्नासा पुनश्च परिशुष्यति ।
पुनरानह्यते वाऽपि पुनर्विव्रियते तथा ॥ २३ ॥
निःश्वासो वाऽतिदुर्गन्धो नरो गन्धान् न वेत्ति च ।
एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम् ॥ २४ ॥

रक्तजः—रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते ।
ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीडितः ।
दुर्गन्धोच्छ्वासवदनो गन्धानपि न वेत्ति सः ॥ २५ ॥

असाध्यहेतुः—सर्व एव प्रतिश्याया नरस्याप्रतिकारिणः ।
दुष्टतां यान्ति कालेन तदाऽसाध्या भवन्ति हि ॥ २६ ॥

असाध्यमाह—सर्व इत्यादि । अप्रतिकारिणः=चिकित्सितमनारभमाणस्य पुंसः, सर्व एव प्रतिश्यायाः कालेन=समयमासाद्य, दुष्टतां यान्ति तदाऽसाध्या भवन्ति ॥ २६ ॥

नासाक्रिमिः—मूर्च्छन्ति चात्र क्रिमयः श्वेताः स्निग्धास्तथाऽणवः ।
क्रिमितो यः शिरोरोगस्तुल्यं तेनास्य लक्षणम् ७२॥

अत्र श्वेताः, स्निग्धास्तथा, अणवः = सूक्ष्माः, क्रिमयः, **मूर्च्छन्ति**=प्रभवन्ति, क्रिमिजशिरोरोगतुल्यमस्य लक्षणं जायत इति ॥ २७ ॥

वृद्धपीनसा- **बाधिर्यमान्ध्यमघ्रत्वं घोरांश्च नयनामयान् ।**
नामुपद्रवाः **शोथाग्निसादकासांश्च वृद्धाः कुर्वन्ति पीनसाः ॥ २८ ॥**

नासाऽर्बु- **अर्बुदं सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्विधम् ।**
दादयः—**चतुर्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः ॥ २९ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदानेऽष्टपञ्चाशत्तमं**
**नासारोग-निदानं समाप्तम् ॥ ५८ ॥**

नासिकायामपरेषामपि रोगाणां सम्भवस्तानाह—**अर्बुदमित्यादि** । अर्बुदादिकं रक्तपित्तान्तं सर्वं **घ्राणेऽपि**=नासायामपि, **विदुः**=जानन्ति, विद्वांसः ॥२९॥

इति सुधायां नासारोगनिदानम् ।

---

## अथैकोनषष्टितमं नेत्ररोग-निदानम् ॥ ५९ ॥

नेत्ररोगकार **उष्णाभितप्तस्य जले प्रवेशाद् दूरेक्षणात् स्वप्नविपर्ययाच्च ।**
णानि—**स्वेदाद्रजोधूमनिषेवणाच्च छर्देर्विघाताद्वमनातियोगात् ॥ १ ॥**
**द्रवात्तथाऽन्नान्निशि सेविताच्च विण्मूत्रवातक्रमनिग्रहाच्च ।**
**प्रसक्तसंरोदनकोपशोकाच्छिरोऽभिघातादतिमद्यपानात् ॥२॥**
**तथा ऋतूनां च विपर्ययेण क्लेशाभिघातादतिमैथुनाच्च ।**
**बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकाराञ्जनयन्ति दोषाः ॥३॥**

नयनरोगाणां निदानान्याह—**उष्णाभितप्तस्येति । उष्णाभितप्तस्य**=उष्णेन=घर्मादिना, अभितप्तस्य=सन्तप्तगात्रस्य, जले **प्रवेशात्**=नीरावगाहनात्, **दूरेक्षणात्**=दूरावलोकनात्, **स्वप्नविपर्ययात्**=रात्रौ जागरणाद् दिवास्वापात्, स्वेदाद्रजोधूमनिषेवणाच्च **छर्देर्विघातात्**=वान्तिवेगधारणात्, **वमनातियोगात्**=वमनाधिक्यात्, **विण्मूत्रवातक्रमनिग्रहात्**=विण्मूत्रादीनां क्रमेण=शनैः शनैर्वेगनिग्रहात् । **प्रसक्तसंरोदनकोपशोकात्**=सततकालरोदनादिकारणात्, **शिरोऽभिघातात्**=मस्तकाघातात्, **अतिमद्यपानात्**=मद्यातिसेवनात् । **ऋतूनां च विपर्ययेण**=अन्यर्त्तुचर्य्याया अन्यर्त्तुसम्पादनात्, **बाष्पग्रहात्**=नेत्रजलविधारणात्, **सूक्ष्मनिरीक्षणात्**=स्वल्पवस्त्ववलोकनात्, **दोषाः**=वातादयः, **नेत्रे**=नयने, **विकारान्**=षट्सप्ततिसंख्यकान्, रोगान्

जनयन्ति = उत्पादयन्तीत्यर्थः। षट्सप्ततिश्चैते नेत्रगता रोगाः सुश्रुतेन विभक्ताः—यदाह-नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः। शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः। सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु। द्वौ च बाह्याश्रयावन्यावनिमित्तनिमित्तजौ। षट्सप्ततिर्नेत्ररोगाः संग्रहेण प्रकीर्त्तिताः। इति। नेत्रप्रमाणन्तु—विद्याद् द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसंमितम्। द्व्यङ्गुलं सर्वतः सार्धं भिषङ् नयनबुद्बुदम्॥ १-३॥

समस्तनेत्राश्रितरोगानाह—

अभिष्यन्दाः-वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्वनेत्रामयाकरः॥ ४॥

वातजाभिष्यन्दः—

निस्तोदनस्तम्भनरोमहर्ष-संघर्षपारुष्यशिरोऽभितापाः।
विशुष्कभावः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति॥५॥

वाताभिष्यन्दमाह—निस्तोदनेति। निस्तोदनं=सूचीव्यधनवद् व्यथा, संघर्षः = वालुकापूर्णा इव करकरिका। विशुष्कभावः=नेत्रमलराहित्यम्॥५॥

पित्तजाभिष्यन्दः—

दाहप्रपाकौ शिशिराभिनन्दा धूमायनं बाष्पसमुच्छ्रयश्च।
उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति॥६॥

पैत्तिकमाह—दाहेत्यादि। शिशिराभिनन्दा = शीतेच्छा, बाष्पसमुच्छ्रयः=बाष्पोद्रेकः॥ ६॥

कफजाभिष्यन्दः—

उष्णाभिनन्दा गुरुताऽक्षिशोथः कण्डूपदेहावतिशीतता च।
स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति॥७॥

रक्तजाभिष्यन्दः—

ताम्राश्रुता लोहितनेत्रता च नाड्यः समन्तादतिलोहिताश्च।
पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति॥८॥

चत्वारो- वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम्।
ऽधिमन्थाः-तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः॥ ९॥
तत्सामान्य- उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा।
रूपम्— शिरसोऽर्धं च तं विद्यादधिमन्थं स्वलक्षणैः॥ १०॥

अधिमन्थमाह—उत्पाट्यत इत्यादि। नेत्रं शिरसोऽर्धं वा उत्पाट्यते

निर्मथ्यते च तमधिमन्थं स्वलक्षणैः=वातादिलिङ्गैः, जानीयात् ॥ १० ॥

मिथ्याऽऽचाराद् दोषभेदेनाधिमन्थकृतो नेत्रनाशावधिः—

हन्याद् दृष्टिं श्लैष्मिकः सप्तरात्रा–दधीमन्थो रक्तजः पञ्चरात्रात् ।
षड्रात्राद्वातिको वै निहन्यान् मिथ्याचारात् पैत्तिकः सद्य एव ॥११॥

सामस्वरूपम्–उदीर्णवेदनं नेत्रं रागशोथसमन्वितम् ।
घर्षनिस्तोदशूलाश्रुयुक्तमामान्वितं विदुः ॥ १२ ॥

निरामस्वरूपं-मन्दवेदनता कण्डूः संरम्भाश्रुप्रशान्तता ।
प्रशस्तवर्णता चाक्ष्णोः संपक्वं दोषमादिशेत् ॥ १३ ॥

शोथजः कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः ।
पाकः—संरम्भी पच्यते यस्तु नेत्रपाकः स शोथजः ॥ १४ ॥

अशोथजः पाकः शोथहीनानि लिङ्गानि नेत्रपाके त्वशोथजे ॥ १५ ॥

हताधि-उपेक्षणादक्षि यदाऽधिमन्थो वातात्मकः सादयति प्रसह्य ।
मन्थः—रुजाभिरुग्राभिरसाध्य एष हताधिमन्थः खलु नाम रोगः ॥१६॥

वातपर्ययः—बारम्बारं च पर्येति भ्रुवौ नेत्रे च मारुतः ।
रुजश्च विविधास्तीव्राः स ज्ञेयो वातपर्ययः ॥ १७ ॥

शुष्काक्षि- यत् कूणितं दारुणरूक्षवर्त्म संदृश्यते चाविलदर्शनं यत् ।
पाकः— सुदारुणं यत् प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि ॥१८॥

अन्यतो-यस्यावटूकर्णशिरोहनुस्थो मन्यागतो वाऽप्यनिलोऽन्यतो वा ।
वातः—कुर्याद्रुजं भ्रुवि लोचने च तमन्यतोवातमुदाहरन्ति ॥ १९ ॥

अन्यतोवातमाह—यस्येति । अवटुः=घाटा—( अवटुर्घाटा कृकाटिके-त्यमरः ) मन्ये=ग्रीवापार्श्वशिरे, अन्यतो वा=पृष्ठे, भ्रुवि लोचने च रुजं कुर्यात् तमन्यतोवातम्, उदाहरन्ति=कथयन्ति, भिषज इति शेषः ॥ १९ ॥

अम्लाध्युषितं श्यावं लोहितपर्यन्तं सर्वं चाक्षि प्रपच्यते ।
सदाहशोथं सास्रावमम्लाध्युषितमम्लतः ॥ २० ॥

सिरो-अवेदना वाऽपि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः ।
त्पातः—मुहुर्विरज्यन्ति च याः स तादृग् व्याधिः सिरोत्पात इति प्रदिष्टः २१

सिरोत्पातमाह—अवेदनेत्यादि । अवेदनाः सवेदना वा यस्य=पुरुषस्य, अक्षिराज्यः=नेत्रसिराः, ताम्रा भवन्ति, मुहुः, विरज्यन्ति=विशेषरक्ता भवन्ति च स तादृग् व्याधिः सिरोत्पात इति प्रदिष्टः=कथितः । रक्तजोऽयम् २१

सिरा-**मोहात्सिरोत्पात उपेक्षितस्तु जायेत रोगस्तु सिराप्रहर्षः ।**
हर्षः-**ताम्राममस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुं च ॥२२॥**

सव्रण-शुक्ररोगलक्षणम्—

**निमग्नरूपं तु भवेद्धि कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै ।**
**स्रावं स्रवेदुष्णमतीव यच्च तत् सव्रणं शुक्र (क्र) मुदाहरन्ति ॥२३॥**

सव्रणशुक्लमाह—**निमग्नेत्यादि** । **कृष्णे**=कृष्णमण्डले, निमग्न, रूपं भवेत् । यत्सूच्येव विद्धं प्रतिभाति । यदतीवोष्णं स्रावञ्च स्रवेत् तत्सव्रणं शुक्लमुदाहरन्ति, मनीषिण इति शेषः ॥ २३ ॥

तस्य सन्दिग्धसाध्यलक्षणम्—

**दृष्टेः समीपे न भवेत्तु यच्च न चावगाढं न च संस्रवेद्धि ।**
**अवेदनं वा न च युग्मशुक्रं तत् सिद्धिमायाति कदा चिदेव ॥२४॥**

अव्रण-शुक्ररोगलक्षणम्—

**स्यन्दात्मकं कृष्णगतं सचोषं शङ्खेन्दुकुन्दप्रतिमावभासम् ।**
**वैहायसाभ्रप्रतनुप्रकाशमथाव्रणं साध्यतमं वदन्ति ॥ २५ ॥**

अव्रणशुक्ललक्षणमाह-**स्यन्दात्मकमित्यादि**।**स्यन्दात्मकम्**=अभिष्यन्द निमित्तकं, **वैहायसाभ्रप्रतनुप्रकाशं**=विहायसि स्थितं वैहायसं, '**तस्य निवास**' इत्यण् । वैहायसाभ्रवत्=आकाशस्थितपयोधरतुल्यं, प्रतनुप्रकाशम् । **शङ्खेन्दु-कुन्दप्रतिमावभासं**=शङ्खादीनां प्रतिमेव=आकृतिरिवाभासो यस्य तथोक्तम् । अव्रणं साध्यतमं वदन्ति ॥ २५ ॥

तस्य कृच्छ्रसाध्यलक्षणम्—

**गम्भीरजातं बहुलं च शुक्लं चिरोत्थितं चापि वदन्ति कृच्छ्रम् ॥२६॥**

कृच्छ्रसाध्यत्वादिकमाह—**गम्भीरेत्यादि** । **गम्भीरजातं**=द्वित्रित्वग्गतम् । **चिरोत्थितं**=बहुकालीनम् ॥ २६ ॥

तस्यासाध्यलक्षणम्—

**विच्छिन्नमध्यं पिशितावृतं वा चलं सिरासूक्ष्ममदृष्टिकृच्च ।**
**द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितं चापि विवर्जनीयम् ॥**
**उष्णाश्रुपातः पिडका च नेत्रे यस्मिन् भवेन्मुद्गनिभं च शुक्लम् ।**
**तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत् तित्तिरिपक्षतुल्यम् ॥२७॥**

**पिशितावृतं**=मांसावनद्धम् । **विवर्जनीयम्**=असाध्यम् । अन्यदप्यसाध्यमाह-**उष्णाश्रुपात इत्यादि** । यस्मिन् नेत्रे उष्णाश्रुपातः पिडका च

मुद्गनिभं शुक्लं भवेत् तदप्यसाध्यम् । केचिद् वदन्ति । तित्तिरिपक्षतुल्यं=शवलमपि, यस्य नेत्रं तदप्यसाध्यस्यमित्यर्थः ॥ २७ ॥

अक्षिपाकात्ययः—

श्वेतः समाक्रामति सर्वतो हि दोषेण यस्यासितमण्डलं च ।
तमक्षिपाकात्ययमक्षिरोगं सर्वात्मकं वर्जयितव्यमाहुः ॥ २८ ॥

अजकाजातम्—

अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः ।
विगृह्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत् ॥२९॥

पटलगतरोगानाह, तत्र प्रथमपटलगतदोषः—

प्रथमे पटले दोषा यस्य दृष्ट्यां व्यवस्थिताः ।
अव्यक्तानि स रूपाणि कदाचिदथ पश्यति ॥ ३० ॥

द्वितीयपटलगतः— दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ।
मक्षिकामशकांश्चापि जालकानि च पश्यति ॥ ३१ ॥
मण्डलानि पताकांश्च मरीचीन् कुण्डलानि च ।
परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि च ॥ ३२ ॥
दूरस्थानि च रूपाणि मन्यते स समीपतः ।
समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् ॥
यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ ३३ ॥

द्वितीयपटलगतस्य लिङ्गमाह—दृष्टिरित्यादि । द्वितीयं पटलं गते दोषे दृष्टिः, भृशम्=अत्यर्थं, विह्वलति=पुनः पुनरसम्यग् रूपं गृह्णाति ॥ ३१-३३ ॥

तृतीयपटलगतः— ऊर्ध्वं पश्यति नाधस्तात् तृतीयं पटलं गते ।
महान्त्यपि च रूपाणि च्छादितानीव चाम्बरैः ॥ ३४ ॥
कर्णनासाऽक्षिहीनानि विकृतानीव पश्यति ।
यथादोषं च रज्येत दृष्टिर्दोषे बलीयसि ॥ ३५ ॥

तृतीयपटलगतस्य लिङ्गमाह—ऊर्ध्वमित्यादि—तृतीयपटलगते दोषे । अम्बरैः=वस्त्रैः, छादितानि=आवृतानीव, महान्त्यपि रूपाणि पश्यति । कर्णादिविहीनान्यपि पश्यति । बलीयसि=प्रबलतरे, दोषे=वातादौ, यथादोषं दृष्टिः, रक्तपीतसितादिभिः, रज्येत=युज्येतेत्यर्थः ॥ ३४-३५ ॥

अन्येऽपि दृष्टिप्रकाराः— अधःस्थिते समीपस्थं दूरस्थं चोपरिस्थिते ।
पार्श्वस्थिते तथा दोषे पार्श्वस्थं नैव पश्यति ॥ ३६ ॥

समन्ततः स्थिते दोषे संकुलानीव पश्यति ।
दृष्टिमध्यस्थिते दोषे महद्ध्रस्वं च पश्यति ॥ ३७ ॥
द्विधा स्थिते द्विधा पश्येद्बहुधा चानवस्थिते ।
दोषे दृष्ट्याश्रिते तिर्यक् स एकं मन्यते द्विधा ॥ ३८ ॥

चतुर्थपटलगतः—

तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः ॥ ३९ ॥

चतुर्थपटलगतं तिमिराख्यं रोगमाह—तिमिरेत्यादि । आन्ध्योत्पादकत्वेन तिमिराख्य इति ॥ ३९ ॥

लिङ्गनाशः—रुणद्धि सर्वतो दृष्टिं लिङ्गनाशमतः परम् ।
अस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ ४० ॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः ।
निर्मलानि च तेजांसि भ्राजिष्णून्यथ पश्यति ॥ ४१ ॥

अतः परं स एव रोगः सर्वतो दृष्टिरोधाल्लिङ्गनाश इति कथ्यते । लिङ्ग्यते = ज्ञायतेऽनेनेति लिङ्गम्=इन्द्रियं तन्नाशोऽस्मिन्रोगेऽसौ लिङ्गनाश-इति । अन्तरीक्षे=आकाशे ॥ ४०-४१ ॥

लिङ्गनाशपर्यायौ—

स एव लिङ्गनाशस्तु नीलिका-काचसंज्ञितः ॥ ४२ ॥

दृश्यवस्तुरूपेण दोषविवेकः—

वातरूपं-वातेन चापि रूपाणि भ्रमन्तीव च पश्यति ।
आविलान्यरुणाभानि व्याविद्धानीव मानवः ॥ ४३ ॥
पित्तरूपं-पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ।
नृत्यतश्चैव शिखिनः सर्वं नीलं च पश्यति ॥ ४४ ॥
कफरूपं-कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।
( पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रमेवाभ्रसंप्लवम् । )
सलिलप्लावितानीव परिजाड्यानि मानवः ॥ ४५ ॥

दोषविशेषेण रूपविशेषदर्शनमाह—वातेनेत्यादि । आविलानि=अस्वच्छानि । व्याविद्धानीव = वक्राणीव । खद्योतः=ज्योतिरिङ्गणः । शक्रचापः इन्द्रधनुः, । तडित्=विद्युत् । गुणान्=रूपाणि, शिखिनः=बर्हिणः । असूक्ष्माणि=स्थूलानि ॥ ४४-४५ ॥

रक्तरूपं-पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ॥ ४६ ॥
त्रिदोषरूपं—स सितान्यपि कृष्णानि पीतान्यपि च मानवः ।
सन्निपातेन चित्राणि विप्लुतानीव पश्यति ॥ ४७ ॥
बहुधा च द्विधा चापि सर्वाण्येव समन्ततः ।
हीनाधिकाङ्गान्यपि तु ज्योतींष्यपि च भूयसा ॥ ४८ ॥
परिम्लायि—पित्तं कुर्यात् परिम्लायि मूर्च्छितं पित्ततेजसा ।
पीता दिशस्तु खद्योतान् भास्करं चापि पश्यति ।
विकीर्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव वा ॥ ४९ ॥
दोषभेदेन वक्ष्यामि षड्विधं रागैलिङ्गनाशमतः परम् ।
लिङ्गनाशवर्णः रागोऽरुणो मारुतजः प्रदिष्टोम्लायी च नीलश्च तथैव पित्तात्।
कफात् सितः शोणितजः सरक्तः समस्तदोषप्रभवो विचित्रः॥५०॥

वातिकरागस्यैव विशिष्टलक्षणम्—

अरुणं मण्डलं दृष्ट्यां स्थूलकाचारुणप्रभम् ॥ ५१ ॥
परिम्लायिम- परिम्लायिनि रोगे स्यान् म्लायि नीलं च मण्डलम् ।
ण्डलवर्णः—दोषक्षयात् स्वयं तत्र कदा चित् स्यात्तु दर्शनम् ॥ ५२ ॥

लिङ्गनाशस्य दोषविशिष्टलक्षणम्—

अरुणं मण्डलं वाताच्चञ्चलं परुषं तथा ।
पित्तान्मण्डलमानीलं कांस्याभं पीतमेव च ॥ ५३ ॥
श्लेष्मणा बहुलं पीतं शङ्खकुन्देन्दुपाण्डुरम् ।
चलत्पद्मपलाशस्थः शुक्लो बिन्दुरिवाम्भसः ॥ ५४ ॥
मृज्यमाने च नयने मण्डलं तद्विसर्पति ।
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् ॥ ५५ ॥
दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे ।
यथास्वं दोषलिङ्गानि सर्वेष्वेव भवन्ति हि ॥ ५६ ॥

तत्संख्या—

षड् लिङ्गनाशाः षडिमे च रोगा दृष्ट्याश्रयाः षट् च षडेव वाच्याः॥५७॥

पित्तविदग्धदृष्टिः—

पित्तेन दुष्टेन सदा तु दृष्टिः पीता भवेद्यस्य नरस्य किंचित् ।
पीतानि रूपाणि च तेन पश्येत् स वै नरः पित्तविदग्धदृष्टिः ॥५८॥
प्राप्ते तृतीयं पटलं तु दोषे दिवा न पश्येन्निशि चेक्षते सः ।

रात्रौ च शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत् ॥५९॥

कफविदग्धदृष्टिर्नक्तान्ध्यं च—

तथा नरः श्लेष्मविदग्धदृष्टिस्तान्येव शुक्लानि तु मन्यते सः ।
त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्यानुगृहीतदृष्टिः पश्येत्तु रूपाणि कफाल्पभावात् ॥६०॥

नक्तान्ध्यमाह—तथेत्यादि । त्रिषु पटलेषु स्थितः स्वल्पोः, **दोषः**=श्लेष्मा, **प्रसह्य**=हठात्, नक्तान्ध्यमुत्पादयति, **सः**=नक्तान्ध्यदोषपीडितः, **सूर्यानुगृहीतदृष्टिः**, भास्करानुग्रहात्, कफाल्पभावात्, **दिवा**=दिवसे, रूपाणि पश्यति न रात्रौ । साध्योऽयम् ॥ ६० ॥

धूम- धूमशोकज्वरायासशिरोऽभितापैरभ्याहता यस्य नरस्य दृष्टिः ।
दर्शी- धूम्रांस्तथा पश्यति सर्वभावान् स धूमदर्शीति नरः प्रदिष्टः ॥६१॥

ह्रस्वजाड्यः- यो ह्रस्वजाड्यो दिवसेषु कृच्छ्राद्-
ह्रस्वानि रूपाणि च तेन पश्येत् ॥ ६२ ॥

नकुलान्ध्यम्—

विद्योतते यस्य नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः ६३

नकुलान्ध्यमाह—यथा नकुलस्य दृष्टिर्विद्योतते तथाऽस्य दोषाभिपन्ना दृष्टिः, **दिवा**=दिने, चित्राणि रूपाणि पश्येत् । एष विकारो नकुलान्ध्यसंज्ञः । कथ्यत इति शेषः । सर्वजोऽसाध्यश्च ॥ ६३ ॥

इति सुधाया नेत्रनिदानम् ।

गम्भी- दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कोचमभ्यन्तरतस्तु याति ।
रिका- रुजाऽवगाढा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः ॥६४॥

आगन्तुजो लिङ्गनाशः—

बाह्यौ पुनर्द्वाविह सम्प्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च ॥
निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनः सः ।
सुरर्षिगन्धर्वमहोरगाणां संदर्शनेनापि च भास्करस्य ॥ ६५ ॥
हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः ।
तत्राक्षि विस्पष्टमिवावभाति वैदूर्यवर्णा विमला च दृष्टिः ॥६६॥

## अथ श्वेतमण्डलगता रोगाः ।

प्रस्तार्यर्म- प्रस्तार्यर्म तनु स्तीर्णं श्यावं रक्तनिभं सिते ।
शुक्लार्म च—सश्वेतं मृदु शुक्लार्म शुक्ले तद्वर्धते चिरात् ॥ ॥६७॥

रक्तार्माधि॰ पद्माभं मृदु रक्तार्म यन्मांसं चीयते सिते ।
मांसार्म च—पृथु मृद्वधिमांसार्म बहलं च सकृन्निभम् ॥ ६८ ॥
स्नाय्वर्म—स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नाय्वर्म पञ्चमम् ॥ ६९ ॥
शुक्तिका—श्यावाः स्युः पिशितनिभाश्च बिन्दवो ये
ऽर्जुनं च—शुक्त्याभाः सितनियताः स शुक्तिसंज्ञः ।
एको यः शशरुधिरोपमश्च बिन्दुः-
शुक्लस्थो भवति तमर्जुनं वदन्ति ॥ ७० ॥
पिष्टकं—श्लेष्ममारुतकोपेन शुक्ले पिष्टं समुन्नतम् ।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसंनिभम् ॥ ७१ ॥

सिराजालः सिराजपिडकाश्च—

जालाभः कठिनसिरो महान् सरक्तः-
सन्तानः स्मृत इह जालसंज्ञितस्तु ।
शुक्लस्थाः सितपिडकाः सिरावृता या-
स्ता ब्रूयादसितसमीपजाः सिराजाः ॥ ७२ ॥
वलासः—कांस्याभोऽमृदुरथ वारिबिन्दुकल्पो-
विज्ञेयो नयनसिते वलाससंज्ञः ॥ ७३ ॥

अथ सन्धिगतनेत्ररोगाः ।

तत्र पूयालसोपनाहयोर्लक्षणम्—

पक्वः शोथः सन्धिजो यः सतोदः स्रवेत् पूयं पूति पूयालसाख्यः ।
ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकी कण्डूप्रायो नीरुजस्तूपनाहः ॥७४॥

अश्रुस्रावो नेत्रनाडी वा—

गत्वा सन्धीनश्रुमार्गेण दोषाः कुर्युः स्रावांल्लक्षणैः स्वैरुपेतान् ।
तं हि स्रावं नेत्रनाडीति चैके तस्या लिङ्गं कीर्त्तयिष्ये चतुर्धा ॥७५॥

तत्र पूयकफरक्तपित्तस्रावः—

पाकात्सन्धौ संस्रवेद्यस्तु पूयं पूयास्रावोऽसौ गदः सर्वजस्तु ।
श्वेतं सान्द्रं पिच्छिलं यः स्रवेत्तु श्लेष्मस्रावोऽसौ विकारो मतस्तु ।
रक्तस्रावः शोणितोत्थो विकारः स्रवेद् दुष्टं तत्र रक्तं प्रभूतम् ।
हरिद्राभं पीतमुष्णं जलाभं पित्तात्स्रावः संस्रवेत् सन्धिमध्यात् ॥७६॥

पर्वणी चालजी—

ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ज्ञेया पर्वणी वृत्तशोथा ।

जाता सन्धौ कृष्णशुक्लेऽलजी स्यात् तस्मिन्नेव ख्यापिता पूर्वलिङ्गैः ७७

क्रिमिग्रन्थिः—

क्रिमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्युः क्रिमयः सन्धिजाताः ।
नानारूपा वर्त्मशुक्लान्तसन्धौ चरन्त्यन्तर्लोचनं दूषयन्तः ॥७८॥

वर्त्मरोगाः—

उत्सङ्गपिडका—अभ्यन्तरमुखी ताम्रा बाह्यतो वर्त्मनश्च या ।
सोत्सङ्गोत्सङ्गपिडका सर्वजा स्थूलकण्डुरा ॥ ७९ ॥

कुम्भिका—वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकाबीजप्रतिमाः कुम्भीकाः सन्निपातजाः ॥ ८० ॥

पोथक्यः—स्राविण्यः कण्डुरा गुर्व्यो रक्तसर्षपसन्निभाः ।
रुजावत्यश्च पिडकाः पोथक्य इति कीर्त्तिताः ॥ ८१ ॥

वर्त्मशर्करा·पिडका या खरा स्थूला सूक्ष्माभिरभिसंवृता ।
वर्त्मस्था शर्करा नाम स रोगो वर्त्मदूषकः ॥ ८२ ॥

अर्शोवर्त्म—एर्वारुबीजप्रतिमाः पिडका मन्दवेदनाः ।
श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते ॥८३॥

शुष्कार्शः—

दीर्घाङ्कुरः खरः स्तब्धो दारुणोऽभ्यन्तरोद्भवः ।
व्याधिरेषोऽभिविख्यातः शुष्कार्शो नाम नामतः ॥८४॥

अञ्जन- दाहतोदवती ताम्रा पिडका वर्त्मसंभवा ।
नामिका— मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका ॥ ८५ ॥

बहुलवर्त्म—वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः ।
सवर्णाभिः स्थिराभिश्च विद्याद्बहुलवर्त्म तत् ॥८६॥

वर्त्मबन्धकः—कण्डूमताऽल्पतोदेन वर्त्मशोथेन यो नरः ।
न स संछादयेदक्षि यत्रासौ वर्त्मबन्धकः ॥ ८७ ॥

क्लिष्टवर्त्म— मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च ।
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः ॥ ८८ ॥

वर्त्मकर्दमः—क्लिष्टं पुनः पित्तयुतं शोणितं विदहेद्यदा ।
ततः क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः ॥ ८९ ॥

श्याववर्त्म—यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् ।
तमाहुः श्याववर्त्मेति वर्त्मरोगविशारदाः ॥ ९० ॥

प्रक्लिन्नवर्त्म–अरुजं बाह्यतः शूनं वर्त्म यस्य नरस्य हि ।
प्रक्लिन्नवर्त्म तद्विद्यात् क्लिन्नमत्यर्थमन्ततः ॥ ९१ ॥
अक्लिन्नवर्त्म-यस्य धौतान्यधौतानि संबध्यन्ते पुनः पुनः ।
वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म तत् ॥ ९२ ॥
वातहतवर्त्म–विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य न मील्यते ।
एतद्वातहतं वर्त्म जानीयादक्षिचिन्तकः ॥ ९३ ॥
वर्त्मार्बुदः– वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् ।
आचक्षीतार्बुदमिति सरक्तमविलम्बितम् ॥ ९४ ॥
निमेषः–निमेषिणीः सिरा वायुः प्रविष्टः सन्धिसंश्रयाः ।
प्रचालयति वर्त्मानि निमेषं नाम तद्विदुः ॥ ९५ ॥
शोणितार्शः–यः स्थितो वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः ।
तद्रक्तजं शोणितार्शश्छिन्नं छिन्नं प्रवर्धते ॥ ९६ ॥
लगणः–अपाकी कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः ।
लगणो नाम स व्याधिर्लिङ्गतः परिकीर्त्तितः ॥ ९७ ॥
बिसवर्त्म–त्रयो दोषा बहिः शोथं कुर्युश्छिद्राणि वर्त्मनोः ।
प्रस्रवन्त्यन्तरुदकं बिसवद्बिसवर्त्म तत् ॥ ९८ ॥
वर्त्मकुञ्चनं–वाताद्या वर्त्मसङ्कोचं जनयन्ति मला यदा ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः ॥९९॥
पक्ष्मकोपः—प्रचालितानि वातेन पक्ष्माण्यक्षि विशन्ति हि ।
घृष्यन्त्यक्षि मुहुस्तानि संरम्भं जनयन्ति च ॥ १०० ॥
असिते सितभागे च मूलकोषात् पतन्त्यपि ।
पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः ॥ १०१ ॥
पक्ष्मशातः–वर्त्मपक्ष्माशयगतं पित्तं रोमाणि शातयेत् ।
कण्डूं दाहं च कुरुते पक्ष्मशातं तमादिशेत् ॥ १०२ ॥

( वाग्भटोक्तं कृच्छ्रोन्मीलनम्—

रोगान् कुर्युश्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः ।
सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम् ॥ १०३ ॥
पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमश्रु च ।
विमर्दनात् स्याच्च शमः कृच्छ्रोन्मीलं वदन्ति तम् ) ॥१०४॥

समस्तनेत्ररो-(नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः ।
गाणां संख्या-शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः ॥ १०५ ॥
सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु ।
बाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ ) ॥ १०६ ॥

इति श्रीमाधवकरविरचिते माधवनिदाने एकोनषष्टितमं नेत्ररोग-निदानं समाप्तम् ॥ ५९ ॥

## अथ षष्टितमं शिरोरोग-निदानम् ॥ ६० ॥

शिरोरोग-शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः ।
संख्या—सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्यावर्त्तानन्तवातार्धावभेदकशङ्खकैः ॥ १ ॥

शिरोरोगानाह—**शिरोरोगास्त्वि**त्यादि । एकादश शिरोरोगाः सम्भवन्ति—वातेन पित्तेन कफेन त्रयः, सन्निपातेन चैकः, रक्तेन चैकः, क्षयेण चैकः, तथा कृमिभिरेकः, सूर्यावर्त्तानन्तवातार्धावभेदकशङ्खकैस्त्रयः, एवमेकादश । शिरोरोगशब्देन शिरोगतशूलरूपा वेदना बोध्यते तेन **'सूर्यावर्त्तानन्तवातार्धावभेदकशङ्खकै'**रित्युक्तिः सङ्गच्छते, अन्यथा तेषामेव शिरोरोगत्वात्तैः **'शिरोरोगा जायन्त'** इति कथनमसङ्गतं स्यात् ॥ १ ॥

वातजशिरोऽभितापः—

**यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैः प्रशमश्च यत्र शिरोऽभितापः स समीरणेन ॥ २ ॥**

वातिकशिरोरोगलक्षणमाह—**यस्यानिमित्त**मित्यादि । **यस्य**=रोगिणः, **अनिमित्तम्**=अतर्कितहेतुकं, वायोर्विषमक्रियत्वात्, **शिरसः**=मस्तकस्य, तीव्रा **रुजः**=पीडाः, भवन्ति । **निशि**=रात्रौ च, अतिमात्रं शीतेन वायोराधिक्याद् बन्धोपतापैः **प्रशमः**=प्रशान्तिः, यत्रासौ **समीरणेन**=वायुना, **शिरोऽभितापः**=शिरःपीडा, कथित इति शेषः ॥ २ ॥

पैत्तिकशिरोऽभितापः—

**यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूप्यति चाक्षिनासम् ।
शीतेन रात्रौ च भवेच्छमश्च शिरोऽभितापः स तु पित्तकोपात् ॥३॥**

पित्तजमाह—**यस्योष्णमि**त्यादि । **अङ्गारचितं**=ज्वलदङ्गाराच्छन्नमिव । **अक्षिनासम्**=अक्षि च नासा चेत्यक्षिनासम् (प्राण्यङ्गत्वादेकवद्भावः) **धूप्यति**=सन्तापं याति ॥ ३ ॥

कफजशिरोऽभितापः—

शिरो भवेद्यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमं च ।
शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात् ॥४॥

त्रिदोषजशिरोऽभितापः—

शिरोऽभितापे त्रितयप्रवृत्ते सर्वाणि लिङ्गानि समुद्भवन्ति ।
रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च ॥ ५ ॥

क्षयजशिरोऽभितापः—

क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम् ।
असृग्वसाश्लेष्मसमीरणानां शिरोगतानामिह संक्षयेण ।
संस्वेदनच्छर्दनभूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति ॥६॥

क्रिमिजशिरोऽभितापः—

निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः ।
घ्राणाच्च गच्छेत् सलिलं सपूयं शिरोऽभितापः क्रिमिभिः स घोरः ॥७॥

सूर्यावर्त्तः सूर्योदयं या प्रति मन्दमन्द-मक्षिभ्रुवं रुक् समुपैति गाढा ।
विवर्द्धते चांशुमता सहैव सूर्यापवृत्तौ विनिवर्त्तते च ।
सर्वात्मकं कष्टतमं विकारं सूर्यापवर्त्तं तमुदाहरन्ति ॥९॥

सूर्यापवर्त्तलक्षणमाह—**सूर्योदयमित्यादि**, **सूर्योदयं**=भास्करोदयकालं लक्षीकृत्य, या **रुक्**=पीडा मन्दमन्दमक्षिभ्रुवं समुपैति, **अंशुमता**=सूर्येण, सह गाढा यथा स्यात्तथा वर्धते, **सूर्यापवृत्तौ**=सूर्यापगमे, ( सूर्यास्तसमये ), **विनिवर्त्तते**=शान्तिमापद्यते, **सर्वात्मकं**=त्रिदोषजं, **कष्टतमं**=कृच्छ्रतमं, **विकारं**=रोगं सूर्यापवर्त्तम्, **उदाहरन्ति**=कथयन्ति । व्याधिमाहात्म्यात्कालविशेषनियमोऽत्र बोध्यः ॥ ९ ॥

( निमिप्रोक्ता सूर्यापवर्त्तसंप्राप्तिः—

सूर्यसोमात्मकौ नित्यं स्वहेतू पित्तमारुतौ ।
कुर्वाते वेदनां तीव्रां दिनात् पूर्वाह्ण एव तु ॥ १ ॥
आदित्यतेजसा युक्ते निवृत्तेऽपि च भास्करे ।
स्रोतसां विवृतत्वाच्च ततः श्लेष्माऽधिगच्छति ॥२॥
उद्गतो मातरिश्वा च स्वमार्गं प्रतिपद्यते ।
तस्मान्मध्यदिनादूर्ध्वं वेदनाऽत्र प्रशाम्यति ॥३॥ इति )

तेनैव प्रोक्तोऽस्य विपर्ययोऽपि—

तत्र वातानुगं पित्तं चितं शिरसि तिष्ठति ।
मध्याह्ने तेजसाऽर्कस्य तद्विवृद्धं शिरोरुजम् ॥ ४ ॥
करोति पैत्तिकीं घोरां संशाम्यति दिनक्षये ।
अस्तंगते प्रभाहीने सूर्ये वायुर्विवर्द्धते ॥ ५ ॥
पित्तं शान्तिमवाप्नोति ततः शाम्यति वेदना ।
एष पित्तानिलकृतः सूर्यावर्त्तविपर्ययः ॥६॥ इति ॥ )

अनन्तवातः—

**दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटासु रुजां सुतीव्राम् ।
कुर्वन्ति योऽक्षिभ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु ॥१०॥
गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान् ।
अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम् ॥ ११ ॥**

अनन्तवातमाह—**दोषास्त्वि**त्यादि । त्रयो दोषा दुष्टाः, **मन्यां**=ग्रीवासिराद्वयं, सम्पीड्य **घाटासु**=ग्रीवापश्चिमभागेषु, सुतीव्रां वेदनां कुर्वन्ति । **यः**=रोगः, अक्षिभ्रुवि शङ्खदेशे विशेषत आशु स्थितिं करोति गण्डस्य पार्श्वे कम्पं हनुग्रहादिकं वा करोति तमनन्तवातमुदाहरन्ति, शेषः सुगमः ॥ १०–११ ॥

अर्द्धावभेदः-**रूक्षाशनात्यध्यशनप्राग्वातावश्यमैथुनैः ।
वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥ १२ ॥
केवलः सकफो वाऽर्धं गृहीत्वा शिरसो बली ।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्धेऽतिवेदनाम् ॥ १३ ॥
शस्त्रारणिनिभां कुर्यात् तीव्रां सोऽर्धावभेदकः ।
नयनं वाऽथवा श्रोत्रमतिवृद्धो विनाशयेत् ॥ १४ ॥**

अर्धावभेदकमाह—**रूक्षे**त्यादि । एभी रूक्षादिकारणैः, कुपितोऽनिलः शिरसोऽर्धं गृहीत्वा मन्याऽऽदावतिवेदनां करोति । वेदनाविशेषणमाह-**शस्त्रारणिनिभां**=शस्त्रच्छेदनिभाम् , अरणिनिभाञ्च, **तीव्रां** = दारुणाम् , सोऽर्धावभेदकोऽतिवृद्धः सन् नयनं श्रोत्रं वा विनाशयेत् ॥ १२–१४ ॥

शङ्खकः—**रक्तपित्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः ।
तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम् ॥ १५ ॥
स शिरो विषवद्वेगी निरुध्याशु गलं तथा ॥**

त्रिरात्राज्जीवितं हन्ति शङ्खको नामतः परम् ।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्याय समाचरेत् ॥१६॥
इति श्रीमाधवकरविरचिते माधवनिदाने षष्टितमं
शिरोरोग-निदानं समाप्तम् ॥ ६० ॥

शङ्खकमाह—रक्तेत्यादि । दुष्टा रक्तादयो दोषाः शङ्खदेशे विमूर्च्छिताः=प्रवृद्धाः, दारुणं=भयङ्करं, शोथं कुर्वन्ति । सः=शङ्खकः, विषवद्वेगी शिरस्तथा गलमाशु निरुध्य त्रिरात्राज्जीवितं हन्ति । त्र्यहात्=त्र्यहं व्याप्य, जीवति सति प्रत्याख्याय भेषजं समाचरेत् ॥ १५–१६ ॥

इति सुधायां शिरोरोगनिदानम् ।

## स्त्रीरोगाणां निदानप्रकरणम्—

### अथैकषष्टितमसृग्दरनिदानम् ॥ ६१ ॥

प्रदररोगस्य कारणं संख्या च

विरुद्धमद्याध्यशनादजीर्णाद् गर्भप्रपातादतिमैथुनाच्च ।
यानाध्वशोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च ।
तं श्लेष्मपित्तानिलसन्निपातैश्चतुष्प्रकारं प्रदरं वदन्ति ॥१॥

सामान्यरूपम्-असृग्दरं भवेत् सर्वं साङ्गमर्दं सवेदनम् ॥ २ ॥

तस्यातिप्रवृत्तिरूपं—

तस्यातिवृत्तौ दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा ।
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥३॥

स्त्रीपुन्नियतान्रोगानभिधाय स्त्रीनियतरोगानभिधातुमसृग्दरमाह—विरुद्धेत्यादि । विरुद्धमद्याध्यशनात्=विरुद्धं—क्षीरमत्स्यादि, अध्यशनं=भुक्तोपरिभोजनम् । अतिकर्षणात्—लङ्घनाद्यतिप्रसङ्गेन क्षीणधातुत्वात् साङ्गमर्दं सवेदनं च सर्वमसृग्दरं भवेत् । असृग् दीर्यते—च्यवते यस्मिन्नित्यसृग्दरनामव्याधिः । तस्य—रक्तस्य, अतिप्रवृत्तौ दौर्बल्यादय उपद्रवास्तथा वातजाश्च रोगा जायन्त इति तं प्रदरं श्लेष्मपित्तानिलसन्निपातैश्चतुष्प्रकारं वदन्ति ॥ १–३ ॥

कफप्रदरम् आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु ।
पित्तप्रदरं च-सपीतनीलासितरक्तमुष्णं पित्तार्त्तियुक्तं भृशवेगि पित्तात्॥४॥

वातप्रदरम्-रूक्षारुणं फेनिलमल्पमल्पं वातार्त्ति वातात् पिशितोदकाभम्५ ॥

त्रिदोषप्रदरं तदसाध्यत्वं च—

**सक्षौद्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात् ।**
**तं चाप्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्वीत भिषक् चिकित्साम् ॥६॥**

श्लैष्मिकादिभेदेन विशेषलक्षणान्याह—**आममित्यादि** । **आमम्**=आमरसानुविद्धम् । **सपिच्छाप्रतिमं**=पिच्छा=शाल्मल्यादिनिर्यासस्तत्तुल्यम् , **सपाण्डु**=ईषत्पाण्डु, **पुलाकतोयप्रतिमं**=गवेधुकान्नवारिवत् । **वेगि**=अतिशयवेगयुक्तम् । **पिशितोदकाभं**=मांसधावनतोयाभम् , **कुणपं**=शवगन्धि ॥४-६॥

असाध्यरूपं-**शश्वत् स्रवन्तीमास्रावं तृष्णादाहज्वरान्विताम् ।**
**क्षीणरक्तां दुर्बलां च तामसाध्यां विनिर्दिशेत् ॥ ७ ॥**

असाध्यमाह—**शश्वदित्यादि** । **शश्वत्**=निरन्तरम् , आस्रावं स्रवन्तीं तृष्णाऽऽद्यन्विताम् । शेषं सुबोधम ॥ ७ ॥

शुद्धार्त्तवरूपं-**मासान्निष्पिच्छदाहार्त्ति पञ्चरात्रानुबन्धि च ।**
**नैवातिबहुलात्यल्पमार्त्तवं शुद्धमादिशेत् ॥**
**शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम् ।**
**तदार्त्तवं प्रशंसन्ति यच्चाप्सु न विरज्यते ॥ ८ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने एकषष्टितमममसृग्दरनिदानं समाप्तम् ॥ ६१ ॥**

शुद्धार्त्तवलक्षणमाह—**मासादित्यादि** । **मासात्**—अनन्तरमिति शेषः । **निष्पिच्छदाहार्त्ति**=पिच्छारहितं, दाहशूलादिवेदनारहितञ्च । **पञ्चरात्रानुबन्धि**=पञ्चाहोरात्रव्यापकम् , आर्त्तवं **नैवातिबहुलं**=नात्यधिकं, **नात्यल्पं**=न बहुस्वल्पमात्रं शुद्धम्, **आदिशेत्**=जानीयात् । यच्च रक्तम् । ऋतुसम्भवं, **शशासृक्प्रतिमं**=शशकरक्ततुल्यम् , **लाक्षारसोपमम्**=अलक्तकरसाभं यच्च **अप्सु**=जलेषु, **न वासो विरञ्जयेत्**=रागोपेतं वस्त्रं न कुर्यात् । ईदृशमार्त्तवं प्रशंसन्ति । गर्भजननायेति शेषः ॥ ८ ॥

इति सुधायामसृग्दरनिदानम् ॥

## अथ द्विषष्टितमं योनिव्यापन्निदानम् ॥ ६२ ॥

योनिव्यापत्संख्या तद्धेतवश्च—

**विंशतिर्व्यापदो योनौ निर्दिष्टा रोगसंग्रहे ।**

**मिथ्याऽऽचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च ।**
**जायन्ते बीजदोषाच्च दैवाच्च शृणु ताः पृथक् ॥ १ ॥**

योनिसम्भूतत्वेनासृग्दरानन्तरं योनिव्यापदमाह—**विंशतिरित्यादि** । **रोगसंग्रहे**=रोगाणां संग्रहो रोगसंग्रहः। सचाष्टोदरीये चरकोक्ते-**योनौ**=स्त्रीणामपत्यमार्गे, विंशतिः, **व्यापदः**=रोगाः, निर्दिष्टाः, **ताः**=व्यापदः, स्त्रीणां मिथ्याऽऽचारेण, **प्रदुष्टेन**=वातादिदोषदूषितेन, आर्त्तवेन च **बीजदोषात्**=मातापित्रोर्गर्भारम्भकबीजदोषात्, **दैवात्**=पूर्वजन्मार्जिताधर्मकारणाच्च, जायन्ते ॥१॥

पञ्चवातसम्बद्धा योनिव्यापदः—

उदावर्त्ता—**सा फेनिलमुदावर्ता रजः कृच्छ्रेण मुञ्चति ॥ २ ॥**

बन्ध्या विप्लुता परिप्लुता च—

**बन्ध्यां नष्टार्त्तवां विद्याद्विप्लुत्तां नित्यवेदनाम् ।**
**परिप्लुतायां भवति ग्राम्यधर्मेण रुग्भृशम् ॥ ३ ॥**

वातला—**वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता ।**
**चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥ ४ ॥**

वातजा व्यापद आह—**सा फेनिलमित्यादि । उदावर्त्तेति** । उत्=ऊर्ध्वमावर्त्तः=समन्ताद् वर्त्तनं वायोर्यत्र सा तथोक्ता, **अर्शआदित्वादच् । फेनिलं**=फेनयुक्तं, **रजः**=आर्त्तवं, कृच्छ्रेण मुञ्चति । **नष्टार्त्तवाम्**=अदृष्टरजस्कां, बन्ध्यां विद्यात् । नित्यवेदनां विप्लुतां विद्यात् । **ग्राम्यधर्मेण**=मैथुनेन, भृशम्=अत्यर्थं, **रुग्**=वेदना, परिप्लुतायां भवति । वातला योनिः **कर्कशा**=कठोरस्पर्शा, स्तब्धशूलनिस्तोदपीडिता च भवति । **आद्यासु चतसृषु**=वातलां हित्वा, उदावर्त्ताबन्ध्याविप्लुतापरिप्लुतासु, अनिलवेदना भवन्ति ॥२-४॥

पञ्च पित्तसम्बद्धाः—

रक्तक्षया—**सदाहं क्षीयते रक्तं यस्यां सा लोहितक्षया ।**

वामिनी च—**सवातमुद्गिरेद्बीजं वामिनी रजसा युतम् ॥ ५ ॥**

स्रंसिनी क्षोभिता पुत्रघ्नी पित्तला च—

**प्रस्रंसिनी स्रंसते च क्षोभिता दुष्प्रजायिनी ।**
**स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंक्षयात् ॥ ६ ॥**
**अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता ।**
**चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥ ७ ॥**

पित्तजा व्यापद आह—**सदाहमि**त्यादि। **यस्यां**=योनौ, सदाहं रक्तं क्षीयते सा **लोहितक्षया**। सवातं **रजसा**=आर्त्तवेन, युतं बीजम्, **उद्गिरद्**=वमेत्, सा **वामिनी**। **स्रंसते**=स्वस्थानाच्च्यवते, रक्तं सा **प्रस्रंसिनी**। **क्षोभिता**=विमर्दिता, **दुष्प्रजायिनी**=दुःखप्रसवा, रक्तसंक्षयात्। स्थितं स्थितं गर्भं हन्ति सा **पुत्रघ्नी** स्मृता। **अत्यर्थम्**=अतिशयेन, दाहादियुक्ता पित्तला योनिः, **आद्यासु चतसृषु**=लोहितक्षयादिषु, **पित्तलिङ्गोच्छ्रयः**=पित्तलक्षणाधिक्यं भवेत्॥ ५–७॥

पञ्च कफसम्बद्धास्तत्रात्यानन्दा कर्णिका च—

**अत्यानन्दा न सन्तोषं ग्राम्यधर्मेण गच्छति।**
**कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते॥ ८॥**

अचरणाऽतिच·**मैथुनेऽचरणा पूर्वं पुरुषादतिरिच्यते।**
रणा च—**बहुशश्चातिचरणा तयोर्बीजं न विन्दति॥ ९॥**

कफजा—**श्लेष्मला पिच्छिला योनिः कण्डूग्रस्ताऽतिशीतला।**
**चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रयो भवेत्॥ १०॥**

श्लेष्मजा व्यापद आह—**अत्यानन्दे**त्यादि। अत्यानन्दा योनिः, **ग्राम्यधर्मेण**=**मैथुनेन**, **सन्तोषं**=शान्तिं, न गच्छति। कर्णिन्यां योनौ **श्लेष्मासृग्भ्यां**=कफरक्ताभ्यां, कर्णिका प्रजायते (कर्णिका हि मांसकन्दाकारग्रन्थिः)। अचरणा योनिः–मैथुने पूर्वं पुरुषाद्, **अतिरिच्यते**=विराममधिगच्छति। बहुशो मैथुनाचरणादतिचरणा। **तयोः**=अचरणाऽतिचरणयोः, बीजं **न विन्दति**=न गृह्णाति। कण्डूग्रस्ताऽतिशीतला पिच्छिला च श्लेष्मला योनिः। शेषं सुबोधं पूर्ववत्॥ ८–१०॥

पञ्च त्रिदोषसम्बद्धाः—

अस्तनी षण्डी चाण्डली—

**अनार्त्तवाऽस्तनी षण्डी खरस्पर्शा च मैथुने।**
**अतिकायगृहीतायास्तरुण्योस्त्वण्डली भवेत्॥ ११॥**

विवृता चातिसंवृता—

**विवृता च महायोनिः सूचीवक्त्राऽतिसंवृता॥ १२॥**

त्रिदोषज·- **सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा।**

असाध्याः—**चतसृष्वपि चाद्यासु सर्वलिङ्गोच्छ्रयो भवेत् ।**

**पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः ॥ १३ ॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने द्विषष्टितमं योनिव्यापन्निदानं समाप्तम् ॥ ६२ ॥**

सन्निपातजा व्यापद आह—**अनार्त्तवे**त्यादि । **अनार्त्तवा**=रजःशून्या, **अस्तनी**=ईषत्स्तनी मैथुने च खरस्पर्शा षण्ढी योनिः । महायोनिर्विवृता । **सूचीवक्त्रा**=सूक्ष्मद्वारा, अतिसंवृता **सर्वलिङ्गसमुत्थाना**=सर्वेषां दोषलिङ्गानां समुत्थानं यत्र सा तथोक्ता सर्वदोषप्रकोपजा । **सर्वदोषजाः**=सन्निपातजाः, पञ्चापि योनयोऽसाध्या एव भवन्तीति ॥ ११-१३ ॥

इति सुधायां योनिव्यापन्निदानम् ॥

---

## अथ त्रिषष्टितमं योनिकन्द-निदानम् ॥ ६३ ॥

योनिकन्दहेतुः—

**दिवास्वप्नादतिक्रोधाद् व्यायामादतिमैथुनात् ॥**

**क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यथा ॥ १ ॥**

कन्दस्वरूपं—**पूयशोणितसंकाशं लकुचाकृतिसन्निभम् ।**

**जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः ॥२॥**

योन्यधिष्ठितत्वेनातः परं योनिकन्दमाह—**दिवास्वप्ना**दित्यादि । दिवास्वप्नादिहेतुभिः कुपिता वातादयो दोषाः **पूयशोणितसङ्काशं**=पूयरक्तसदृशम्, **लकुचाकृतिसन्निभं**=डहुफलतुल्यं (रोगम्) योनौ जनयन्ति स योनिजो-नाम्ना कन्दः (लकुचफलम्) बड़हर इति लोके ख्यातम् । **'लकुचो लिकुचो-डहुरि**'त्यमरः ॥ १-२ ॥

वातिकः पैत्तिकश्च—

**रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।**

**दाहरोगज्वरैर्युक्तं विद्यात् पित्तात्मकं तु तम् ॥३॥**

कफजः- **नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।**

सर्वजश्च—**सर्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः ॥४॥**

**इति श्रीमाधवकरविरचिते माधवनिदाने त्रिषष्टितमं योनिकन्द-निदानं समाप्तम् ॥६३॥**

वातजादिभेदेन रूपमाह— **रूक्षमित्यादि** । **नीलपुष्पप्रतीकाशम्**= अतसीपुष्पवर्णम् । शेषं सुस्फुटम् ॥ ३-४ ॥

॥ इति सुधायां योनिकन्दनिदानम् ॥

## अथ चतुःषष्टितमं मूढगर्भ-निदानम् ॥ ६४ ॥

गर्भपातहेतुः—

**भयाभिघातात्तीक्ष्णोष्णपानाशननिषेवणात् ।**
**गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥ १ ॥**

भयादिहेतुभिः पतति गर्भे सशूलं रक्तस्य दर्शनं भवेत् । **पतनं**= स्रंसनं, तेनोभयोः-स्रावपातयोः संग्रहः ॥ १ ॥

कालसम्बन्धेन स्राव-पातयोर्भेदः—

गर्भस्रावो गर्भपातश्च—

**आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः ।**
**ततः स्थिरशरीरस्य पातः पञ्चम-षष्ठयोः ॥२॥**

स्रावपातयोः कालनियममाह—**आचतुर्थादित्यादि** । **आचतुर्थात्**=चतुर्थमासादनन्तरं, **गर्भविद्रवः**-विशेषेण द्रवो=विद्रवः । **स्थिरशरीरस्य**=कठिनशरीरावयवस्य, पञ्चमषष्ठयोः पात इति ॥ २ ॥

मूढगर्भरूपं- **गर्भोऽभिघातविषमाशनपीडनाद्यैः-**
**पक्वं द्रुमादिव फलं पतति क्षणेन ।**
**मूढः करोति पवनः खलु मूढगर्भं**
**शूलं च योनिजठरादिषु मूत्रसङ्गम् ॥ ३ ॥**

असामयिकगर्भपाते निदानपूर्वकं दृष्टान्तमाह—**गर्भोऽभिघातेत्यादि** । अभिघातादिनिमित्तैः, **द्रुमात्**=वृक्षात्, पक्वं फलमिव क्षणेन पतति । **मूढः पवनः**=वायुः, योनिजठरादिषु शूलं **मूत्रसङ्गं**=मूत्रावरोधञ्च, करोति ॥ ३ ॥

मूढगर्भाः—( अष्टविधाः )

**भुग्नोऽनिलेन विगुणेन ततः स गर्भः-**
**संख्यामतीत्य बहुधा समुपैति योनिम् ।**
**द्वारं निरुध्य शिरसा जठरेण कश्चित्**
**कश्चिच्छरीरपरिवर्तितकुब्जदेहः ॥ ४ ॥**

**एकेन कश्चिदपरस्तु भुजद्वयेन**
**तिर्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः ।**
**पार्श्वापवृत्तगतिरेति तथैव कश्चि-**
**दित्यष्टधा गतिरियं ह्यपरा चतुर्धा ॥ ५ ॥**

ततो विगुणेन **अनिलेन**=वायुना, स गर्भः, बहुधा-संख्यामतीत्य **योनिम्**=अपत्यपथं, समुपैति । **द्वारं**=योनिद्वारं, निरुध्य शिरसा कश्चित् । जठरेण वा कश्चित् । कश्चिद् **शरीरपरिवर्त्तितकुब्जदेहः**=शरीरस्य परिवर्त्तने कुब्जो देहो यस्य स तथाभूतः, सन् संलग्नो भवति । एकेन बाहुना कश्चित् । अपरश्च **भुजद्वयेनः**=बाहुद्वयेन, कश्चित् **तिर्यग्गतः**=अर्गलायमानः । कश्चित् **अवाङ्मुखः**=अधोमुखः सन् । कश्चित् **पार्श्वापवृत्तगतिः**=पार्श्वनतः सन् प्रपद्यते । इयमष्टधा गतिर्मूढगर्भस्य निर्दिष्टा ॥ ४-५ ॥

अपरासु चतुर्विधगतिषु संकीलकादीनां लक्षणानि—

**संकीलकः प्रतिखुरः परिघोऽथ बीज-**
**स्तेषूर्ध्वबाहुचरणैः शिरसा च योनिम् ।**
**सङ्गी च यो भवति कीलकवत्स कीलो-**
**दृश्यैः खुरैः प्रतिखुरं स हि कायसङ्गी ।**
**गच्छेद्भुजद्वयशिराः स च बीजकाख्यो-**
**यानौ स्थितः स परिघः परिघेण तुल्यः ॥६॥**

अपरा=अन्या चतुर्धा=चतुःप्रकारेणये गतिविशेषास्तानाह—**संकीलक** इत्यादिना। **परिघेण**=अर्गलेन तुल्यः **'परिघो मुद्गरे शस्त्रे कथ्यतेऽर्गलघातयो-रि'**ति कोशः। सङ्कीलकप्रतिखुरपरिघबीजसंज्ञिका या गतयो निर्दिष्टास्ता अन्यत्रापि वर्णिताः। तथा हि—**ऊर्ध्वबाहुशिरःपादो रुन्ध्याद् योनिमुखन्तु यः। प्रतिकीलोपमस्थित्या स च कीलकसंज्ञितः। अधस्ताद् पार्श्वतो वाऽपि तथैवाकुञ्चितोऽपि वा । यो निःसृत्य मुखं योनेर्भ्रंशः प्रतिखुरस्तु सः । योनिद्वारात्तु निर्गच्छेद् यश्चैकः सशिरोभुजः । तमाहुर्बीजकं नाम मूढगर्भचिकित्सकाः । योनिमावृत्य यस्तिष्ठेत् परिघो गोपुरं यथा । तथाऽन्तर्गर्भमायान्तं वियात् परिघसंज्ञितमिति ॥ ६-७ ॥**

असाध्यरूपम्-**अपविद्धशिरा या तु शीताङ्गी निरपत्रपा ।**
**नीलोद्गतसिरा हन्ति सा गर्भं स च तां तथा ॥७॥**

असाध्यमूढगर्भगर्भिण्योर्लिङ्गमाह-**अपविद्धशिराः**=शिरोधारयितुमक्षमा, **निरपत्रपा**=निर्लज्जा **नीलोद्गतसिरा**=**नीला**=नीलवर्णा उद्गता सिरा कुक्षौ यस्याः सा तथोक्ता। **सा**=गर्भिणी च गर्भं हन्ति। **सः**=गर्भः, च तां=गर्भिणीहन्ति ॥ ७ ॥

अन्तर्मृतशिशुरूपम्—

**गर्भास्पन्दनमावीनां प्रणाशः श्यावपाण्डुता।**
**भवेदुच्छ्वासपूतित्वं शूनताऽन्तर्मृते शिशौ ॥८॥**

गर्भमृत्यु-**मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः।**
हेतवः—**गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च निपीडितः ॥९॥**
असाध्यरूपं-**योनिसंवरणं सङ्गः कुक्षौ मक्कल्ल एव च।**
**हन्युः स्त्रियं मूढगर्भा यथोक्ताश्चाप्युपद्रवाः ॥१०॥**

मृतगर्भलक्षणमाह—अन्तर्मृते शिशौ एतानि लिङ्गानि जायन्ते तथा हि-**गर्भास्पन्दनं**=गर्भस्य अस्पन्दनं=निश्चलत्वम्। **आवीनां**=प्रसवव्यथानां, प्रणाशः। शूनता=शोफः,अङ्गानामिति शेषः॥ ८ ॥

इति सुधायां मूढगर्भनिदानम् ॥

**( योनिसंवरणं नाम तन्त्रान्तरपठितो रोगविशेषः, तथाहि—**
**वातलान्यन्नपानानि ग्राम्यधर्मं प्रजागरम्।**
**अत्यर्थं सेवमानाया गर्भिण्या योनिमार्गगः ॥ १ ॥**
**मातरिश्वा प्रकुपितो योनिद्वारस्य संवृतिम्।**
**कुरुते रुद्धमार्गत्वाद् योन्यन्तर्गतोऽनिलः ॥२॥**
**निरुणद्ध्याशयद्वारं पीडयन् गर्भसंस्थितिम्।**
**निरुद्धवदनोच्छ्वासो गर्भश्चाशु विपद्यते ॥३॥**
**बद्धां संरुद्धहृदयां नाशयत्याशु गर्भिणीम्।**
**योनिसंवरणं विद्याद् व्याधिमेनं सुदारुणम्।**
**अन्तकप्रतिमं घोरं नारभेत चिकित्सितम् ॥४॥ इति।**
मक्कल्लरोग-**वायुः प्रकुपितः कुर्यात् संरुध्य रुधिरं स्रुतम्।**
लक्षणम्—**सूताया हृच्छिरोबस्तिशूलं मक्कल्लसंज्ञकम् ॥९॥ )**

**इति माधवकरविरचिते माधवनिदाने चतुःषष्टितमं मूढगर्भनिदानं समाप्तम् ॥ ६४ ॥**

## अथ पञ्चषष्टितमं सूतिकारोगनिदानम् ॥६५॥

सूतिकारोग-अङ्गमर्दो ज्वरः कम्पः पिपासा गुरुगात्रता ।
रूपम्—शोथः शूलातिसारौ च सूतिकारोगलक्षणम् ॥ १ ॥

सूतिकारोगस्य लक्षणमाह—अङ्गेत्यादि। अङ्गमर्दप्रभृतयो हि सूतिकात्वेन व्यपदिश्यन्ते ॥ १ ॥

सूतिकारोग-मिथ्योपचारात् संक्लेशाद्विषमाजीर्णभोजनात् ।
हेतुः—सूतिकायाश्च ये रोगा जायन्ते दारुणास्तु ते ॥ २ ॥

सूतिकानां निदानमाह—मिथ्योपचारादित्यादि। संक्लेशादिति=संक्लिश्यते=उत्क्लिश्यते दोषोऽनेनेति संक्लेशो=दोषोत्पादकमन्नम् ॥ २ ॥

सूतिकारोगाः-ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः ।
तन्द्राऽरुचिप्रसेकाद्याः कफवातामयोद्भवाः ॥३॥

कष्टसाध्याः—कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाग्नितः ।
ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः ॥४॥

इति श्रीमाधवकरविरचिते माधवनिदाने पञ्चषष्टितमं सूतिकारोग-निदानं समाप्तम् ॥६५॥

---

## अथ षट्षष्टितमं स्तनरोगनिदानम् ॥६६॥

सम्प्राप्तिः—सक्षीरौ वाऽप्यदुग्धौ वा प्राप्य दोषः स्तनौ स्त्रियाः ।
प्रदूष्य मांसरुधिरं स्तनरोगाय कल्पते ॥ १ ॥

विद्रधि-पञ्चानामपि तेषां हि रक्तजं विद्रधिं विना ।
सादृश्यं—लक्षणानि समानानि बाह्यविद्रधिलक्षणैः ॥ २ ॥

इति श्रीमाधवकरविरचिते-माधवनिदाने षट्षष्टितमं स्तनरोग-निदानं समाप्तम् ॥ ६६ ॥

---

## अथ सप्तषष्टितमं स्तन्यदुष्टिनिदानम् ॥६७॥

शुक्रवत्स्तन्यस्यापि शरीरेऽवस्थानबहिःप्रवर्त्तनादिप्रदर्शनम्—

विशस्तेष्वपि गात्रेषु यथा शुक्रं न दृश्यते ।
सर्वदेहाश्रितत्वाच्च शुक्रलक्षणमुच्यते ॥ १ ॥
तदेव चेष्टयुवतेर्दर्शनात् स्मरणादपि ।
शब्दसंश्रवणात् स्पर्शात् संहर्षाच्च प्रवर्त्तते ॥ २ ॥

**सुप्रसन्नं मनस्तत्र हर्षणे हेतुरुच्यते ।**
**आहाररसयोनित्वादेवं स्तन्यमपि स्त्रियाः ॥ ३ ॥**
**तदेवापत्यसंस्पर्शाद्दर्शनात्स्मरणादपि ।**
**ग्रहणाच्च शरीरस्य शुक्रवत् संप्रवर्त्तते ।**
**स्नेहो निरन्तरस्तत्र प्रस्रवे हेतुरुच्यते ॥ ४ ॥**

( स्तन्यं=दुग्धं, तद्दुष्टिः )—

स्तन्यदुष्टेर्हेतुस्तस्याश्च बालरोगहेतुत्वम्—

**गुरुभिर्विविधैरन्नैर्दुष्टैर्दोषैः प्रदूषितम् ।**
**क्षीरं मातुः कुमारस्य नानारोगाय कल्पते ॥ ५ ॥**

वातदुष्टं पित्तदुष्टं दुग्धं—

**कषायं सलिलप्लावि स्तन्यं मारुतदूषितम् ।**
**कट्वम्ललवणं पीतराजिमत् पित्तसंज्ञितम् ॥ ६ ॥**

कफदुष्टं द्वन्द्वत्रिदोषदुष्टं च दुग्धं—

**कफदुष्टं घनं तोये निमज्जति सपिच्छिलम् ।**
**द्विलिङ्गं द्वन्द्वजं विद्यात् सर्वलिङ्गं त्रिदोषजम् ॥ ७ ॥**

स्तन्यदुष्टिलक्षणमाह—**कषायमि**त्यादि । **सलिलप्लावि**=सलिले=जले प्लवते=लाघवादुन्मज्जति यत्तत्सलिलप्लावि । **मारुतदूषितं**=वातदुष्टम् । **पीतराजिमत्**=पीतरेखाऽन्वितम् , कफदुष्टं तोये=जले निमज्जति गुरुत्वादित्यर्थः । शेषः सुगमः ॥ ६-७ ॥

स्तन्यस्वरूपं-**रसप्रसादो मधुरः पक्वाहारनिमित्तजः ।**
**कृत्स्नदेहात् स्तनौ प्राप्तः स्तन्यमित्यभिधीयते ॥८॥**

शुद्धदुग्धरूपम्-**अदुष्टं चाम्बुनिक्षिप्तमेकीभवति पाण्डुरम् ।**
**मधुरं चाविवर्णं च प्रसन्नं तत् प्रशस्यते ॥ ९ ॥**

**इति श्रीमाधवकरविरचिते-माधवनिदाने सप्तषष्टितमं स्तन्य-दुष्टिनिदानं समाप्तम् ॥६८॥**

शुद्धस्तन्यस्वरूपमाह—**अदुष्ट**मित्यादि। **अम्बुनिक्षिप्तं**=जले पतितं, सत्सर्वात्मना जलेन सहैकीभवति। **अविवर्णं**=वातादिदुष्टवर्णरहितम्, **प्रसन्नं**=निर्मलम्, प्रकृतिस्थमिति यावत् ॥९॥

इति सुधायां स्तन्यदुष्टिनिदानम् ॥

# अथाष्टषष्टितमं बालरोगनिदानम् ॥ ६८ ॥

वातरोगि वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः।
शिशुः—क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः ॥ १ ॥
पित्तरोगि-स्विन्नो भिन्नमलो बालः कामलापित्तरोगवान्।
शिशुः—तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन् ॥ २ ॥
कफरोगि-कफदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान्।
शिशुः—निद्रान्वितो जडः शूनवक्त्राक्षश्छर्दनः शिशुः ॥३॥

द्वन्द्वत्रिदोषरोगिशिशुलक्षणम्—

द्वन्द्वजे द्वन्द्वजं रूपं सर्वजे सर्वलक्षणम् ॥ ४ ॥

बालामयानां दुष्टस्तन्यजन्यत्वात्स्तन्यदुष्टेरनन्तरं तत्प्रसङ्गः। वातदुष्टमित्यादि। वातादिदुष्टं स्तन्यं पिबन् शिशुर्यथास्वं वातादिवेदनाऽन्वितो वातादिरोगपीडितश्च जायत इति तात्पर्यार्थः ॥ १-४ ॥

शिशुपीडाज्ञानोपायः—

शिशोस्तीव्रामतीव्रां च रोदनाल्लक्षयेद्रुजम्।
स यं स्पृशेद् भृशं देशं यत्र च स्पर्शनाक्षमः।
तत्र विद्याद्रुजं, मूर्ध्नि रुजं चाक्षिनिमीलनात् ॥ ५ ॥
कोष्ठे विबन्धवमथुस्तनदंशान्त्रकूजनैः।
आध्मानपृष्ठनमनजठरोन्नमनैरपि, ॥ ६ ॥
वस्तौ गुह्ये च विण्मूत्रसङ्गत्रासदिगीक्षणैः।
स्रोतांस्यङ्गानि सन्धींश्च पश्येद्यत्नान्मुहुर्मुहुः ॥ ७ ॥

वक्तुमसमर्थानां बालानामाभ्यन्तरिकवेदनाज्ञानोपायमाह—शिशोरित्यादि। **शिशोः**=बालस्य, **तीव्रां**=दारुणां वेदनां बहुरोदनात्, **अतीव्रां**=स्वल्पां वेदनाम् अल्परोदनाल्लक्षयेत्। **सः**=बालः, भृशम्=अत्यर्थं, यं **देशं**=गात्रावयवं स्पृशेत् स्पर्शनाक्षमश्च **यत्र**=देशे स्यात् **तत्र**=देशे **रुजं**=वेदनां विद्यात्। अक्षिनिमीलनात् मूर्ध्नि वेदनां जानीयात्। एवं विबन्धादिभिः कोष्ठे वेदनां विद्यात् विण्मूत्रसङ्गादिभिर्वस्तौ गुह्ये च वेदनां विद्यात्। **यत्नात्**=सावधानतया, **स्रोतांसि**—अङ्गानि च पुनः सन्धींश्च मुहुर्मुहुर्वारंवारं लक्षयेत्तर्कयेत् ॥ ५-७ ॥

कुकूणकरोग-:कुकूणकः क्षीरदोषाच्छिशूनामक्षिवर्त्मनि।
जायते तेन तन्नेत्रं कण्डुरं च स्रवेन्मुहुः ॥ ८ ॥

**शिशुः कुर्याल्ललाटाक्षिकूटनासाऽवघर्षणम् ।**
**शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः ॥ ९ ॥**

कुकूणकमाह—**कुकूणक** इत्यादि । **क्षीरदोषात्**=दुष्टस्तन्यपानात्, **शिशूनां**=बालानाम्, अक्षिवर्त्मनि कुकूणको नाम व्याधिर्जायते । **तेन**=रोगेण नेत्रं कण्डुरं भवेत् । **अर्कप्रभां**=सूर्यतेजः, द्रष्टुं शक्तो न भवेत् । वर्त्मोन्मीलनक्षमश्च न भवेत् ॥ ८-९ ॥

पारिगर्भिकः परिभवो वा —

**मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि ।**
**कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः ॥१०॥**
**युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम् ।**
**रोगं परिभवाख्यं च युञ्ज्यात्तत्राग्निदीपनम् ॥११॥**

तालुकण्टकः-**तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् ।**
**तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते ॥१२॥**
**तालुपातः स्तनद्वेषः कृच्छ्रात् पानं शकृद् द्रवम् ।**
**तृडक्षिकण्ठास्यरुजा ग्रीवादुर्धरता वमिः ॥१३॥**

तालुकण्टकमाह—**तालिव**त्यादि । दुष्टः कफस्तालुमांसे तालुकण्टकं कुरुते । **तेन**=व्याधिना तालुप्रदेशस्य निम्नता, **मूर्ध्नि**=मस्तके जायते । **तालुपात**-इत्यादिलक्षणं जायते । **ग्रीवादुर्धरता**=शिरोधराया दुःखेन धारणं, **वमिः**=छर्दिः, क्षीरस्येति शेषः ॥ १२-१३ ॥

महापद्म-**विसर्पस्तु शिशोः प्राणनाशनो वस्तिशीर्षजः ।**
विसर्पः—**पद्मवर्णो महापद्मनामा दोषत्रयोद्भवः ।**
**शङ्खाभ्यां हृदयं याति हृदयाद्वा गुदं व्रजेत् ॥ १४ ॥**

महापद्मविसर्पमाह—**दोषत्रयोद्भवः**=सन्निपातजः, **वस्तिशीर्षजः**=वस्तिजः शीर्षजश्च । **पद्मवर्णः**=रक्तकमलच्छविः ॥ १४ ॥

शेषा रोगाः-**क्षुद्ररोगे च कथिते त्वजगल्ल्यहिपूतने ॥ १५ ॥**
**ज्वराद्या व्याधयः सर्वे महतां ये पुरेरिताः ।**
**बालदेहेऽपि ते तद्वद्विज्ञेयाः कुशलैः सदा ॥१६॥**

बालानां ग्रहसम्भूतरोगानाह ।

**स्कन्दादिग्रहाणां पीडादातृत्वे हेतुः—**

(**धात्रीमात्रोः प्राक्प्रदिष्टापचाराच्छौचभ्रष्टान् मङ्गलाचारहीनान् ।**

त्रस्तान् हृष्टांस्तर्जितान् ताडितान् वा पूजाहेतोर्हिंस्युरेते कुमारान् ॥)

ग्रहजुष्टसामा- क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति ।
न्यरूपम्— नखैर्दन्तैर्दारयति धात्रीमात्मानमेव वा ॥ १७ ॥
ऊर्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते ।
भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चासकृत् ॥ १८ ॥
क्षामोऽति निशि जागर्त्ति शूनाक्षो भिन्नविट्स्वरः ।
मांसशोणितगन्धिश्च न चाश्नाति यथा पुरा ।
सामान्यं ग्रहजुष्टानां लक्षणं समुदाहृतम् ॥ १९ ॥

ग्रहजुष्टानां बालानां सामान्यलिङ्गमाह-**क्षणा**दित्यादि । क्षणाद् उद्विजते-त्रस्यति क्षणादेव रोदिति । **असकृत्**—पौनःपुन्येन फेनं वमति, **अतिक्षामः**—अतिदुर्बलः । **निशि**=रात्रौ, जागर्त्ति, **शूनाक्ष**=शोथयुक्तनेत्रः, **पुरा**—स्वस्थदेहे, यथा-**अश्नाति**—खादति, न तथा भक्षयति । सामान्यमेतल्लक्षणं ग्रहजुष्टानां, **समुदाहृतम्**—कथितम् ॥ १७–१९ ॥

स्कन्दग्रह- एकनेत्रस्य गात्रस्य स्रावः स्पन्दनकम्पनम् ।
रूपम्— ऊर्ध्वं दृष्ट्या निरीक्षेत वक्रास्यो रक्तगन्धिकः ॥ २० ॥
दन्तान् खादति वित्रस्तः स्तन्यं नैवाभिनन्दति ।
स्कन्दग्रहगृहीतानां रोदनं चाल्पमेव च ॥ २१ ॥

स्कन्दापस्मा- नष्टसंज्ञो वमेत् फेनं संज्ञावानतिरोदिति ।
ररूपम्— पूयशोणितगन्धित्वं स्कन्दापस्मारलक्षणम् ॥ २२ ॥

शकुनी- स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
ग्रहरूपं- सास्रावव्रणपरिपीडितः समन्तात् ।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥ २३ ॥

शकुनीलक्षणमाह-**स्रस्ताङ्ग** इत्यादि । **स्रस्ताङ्गः**—शिथिलगात्रः । भयेन चकितो **भयचकितः** । **विहङ्गगन्धिः**—विहङ्गस्य—पक्षिणो गन्ध इव गन्धो यस्य स तथाभूतः । **सास्रावव्रणपरिपीडितः**—आस्रावयुक्तैर्व्रणैः परिपीडितः । सदाहपाकैः स्फोटैश्च **प्रचिततनुः**=व्याप्तकलेवरः । शकुन्या क्षतः शिशुर्विज्ञेयो भवति ॥ २३ ॥

रेवतीग्रह- व्रणैः स्फोटैश्चितं गात्रं पङ्कगन्धं स्रवेदसृक् ।
रूपम्— भिन्नवर्चा ज्वरी दाही रेवतीग्रहलक्षणम् ॥ २४ ॥

पूतनाग्रह-अतीसारो ज्वरस्तृष्णा तिर्यक्प्रेक्षणरोदनम् ।
रूपम्—नष्टनिद्रस्तथोद्विग्नो ग्रस्तः पूतनया शिशुः ॥२५॥
अन्धपूतना-छर्दिः कासो ज्वरस्तृष्णा वसागन्धोऽतिरोदनम् ।
रूपं—स्तन्यद्वेषोऽतिसारश्च अन्धपूतनया भवेत् ॥ २६ ॥
शीतपूतना-वेपते कासते क्षीणो नेत्ररोगी विगन्धिता ।
रूपं—छर्द्यतीसारयुक्तश्च शीतपूतनया शिशुः ॥२७॥
मुखमण्डि-प्रसन्नवर्णवदनः सिराभिरभिसंवृतः ।
कारूपं—मूत्रगन्धी च बह्वाशी मुखमण्डिकया भवेत् ॥ २८ ॥
नैगमेयरूपं-छर्दिस्प(स्य) न्दनकण्ठास्यशोषमूर्च्छाविगन्धिता ।
ऊर्ध्वं पश्येद्दशेद्दन्तान् नैगमेयग्रहं वदेत् ॥ २९ ॥

ग्रहजुष्टस्य बालस्यासाध्यलक्षणम्—

प्रस्तब्धाक्षः स्तनद्वेषी मुह्यते चानिशं मुहुः ।
तं बालमचिराद्धन्ति ग्रहः सम्पूर्णलक्षणः ॥ ३० ॥

इति श्रीमाधवकरविरचिते-माधवनिदानेऽष्टषष्टितमं बालरोग-निदानं समाप्तम् ॥ ६८ ॥

## अथैकोनसप्ततितमं विषनिदानम् ॥ ६९ ॥

द्विविधं विषं-स्थावरं जङ्गमं चैव द्विविधं विषमुच्यते ।
मूलाद्यात्मकमाद्यं स्यात् परं सर्पादिसंभवम् ॥ १ ॥

स्थावरमित्यादि। विषमिति विषादजननाद् देवानामन्वर्थसंज्ञा। तद्धि द्विविधमुच्यते—स्थावरजङ्गमभेदात्। आद्यं=स्थावरं मूलाद्यात्मकं दशविधं—'मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च। निर्यासो धातवश्चैव कन्दश्च दशमः स्मृतः॥' इति सुश्रुतवचनात्। परं=द्वितीयं, जङ्गमं सर्पादिसम्भवं षोडशविधं—दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालाऽऽर्त्तवमुखसंदंशपर्दितगुदास्थिपित्तशूकशवभेदात्। प्रभेदास्तु विस्तरशः सुश्रुतस्य कल्पस्थानेऽवगन्तव्याः ॥१॥

स्थावरविष-स्थावरं च ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ।
लक्षणं-फेनच्छर्द्यरुचिश्वासं मूर्च्छां च कुरुते भृशम् ॥ २ ॥

स्थावरविषस्य सामान्यलिङ्गमाह—स्थावरमित्यादि ॥ २ ॥

जङ्गमविष- निद्रां तन्द्रां क्लमं दाहमपाकं लोमहर्षणम् ।
लक्षणं-शोथं चैवातिसारं च जङ्गमं कुरुते विषम् ॥ ३ ॥

जङ्गमविषस्य सामान्यलिङ्गमाह-निद्रामित्यादि । **लोमहर्षणम्**=रोमाञ्चः । स्पष्टमन्यत् ॥ ३ ॥

पूर्वं स्थावरविषस्य प्रकरणम्—

विषदातृ-**इङ्गितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः ।**
रूपम्—**जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान् ॥ ४ ॥**

विषदातृज्ञानोपायमाह-**इङ्गितज्ञ** इत्यादि । **इङ्गितम्**=अभिप्रायं जानातीति-**इङ्गितज्ञः**=बुद्धिमान्, मनुष्याणामेभिर्वक्ष्यमाणैर्लिङ्गैर्वाक्चेष्टामुखवैकृतैश्च विषदातारं जानीयात् ॥ ४ ॥

**न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च ।**
**अपार्थं बहु संकीर्णं भाषते चापि मूढवत् ॥ ५ ॥**
**हसत्यकस्मात् स्फोटत्यङ्गुलीर्विलिखेन्महीम् ॥**
**वेपथुश्चास्य भवति त्रस्तश्चान्योऽन्यमीक्षते ॥ ६ ॥**
**विवर्णवक्त्रोऽध्यानश्च नखैः किंचिच्छिनत्त्यपि ।**
**आलभेतासनं दीनः करेण च शिरोरुहम् ।**
**वर्त्तते विपरीतं च विषदाता विचेतनः ॥ ७ ॥**

विषदाता किं कुरुते ? तदाह-**न ददात्युत्तरं पृष्ट** इत्यादि । **अपार्थकम्**=अनर्थकम् । **सङ्कीर्णम्**=अस्फुटम् । **अकस्मात्**=कारणमन्तरेण । **शिरोरुहं**=केशम् आलभेत । शेषः सुगमः ॥ ५-७ ॥

मूलपत्रविष-**उद्वेष्टनं मूलविषैः प्रलापो मोह एव च ।**
यो रूपम्-**जृम्भणं वेपनं श्वासो मोहः पत्रविषेण तु ॥ ८ ॥**
फलपुष्पवि-**मुष्कशोथः फलविषैर्दाहोऽन्नद्वेष एव च ।**
षयो रूपं-**भवेत् पुष्पविषैश्छर्दिराध्मानं श्वास एव च ॥ ९ ॥**

त्वक्सारनिर्यासविषरूपम्—

**त्वक्सारनिर्यासविषैरुपयुक्तैर्भवन्ति हि ।**
**आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥ १० ॥**
क्षीरविषरूपं-**फेनागमः क्षीरविषैर्विड्भेदो गुरुगात्रता ॥ ११ ॥**
धातुविषरूपं-**हृत्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि ।**
**प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत् ॥ १२ ॥**

मूलादिविषाणामनवधानादिदोषवशादुपयुक्तानां प्रत्येकं लक्षणमाह-**उद्वे-**

**वेष्टन**मित्यादि । **उद्वेष्टनं**=लगुडैर्विमर्दनवद् व्यथा । एतानि नव मूलादिविषाणि प्रायेण **कालघातीनि**=कालान्तरमारकाणि, निर्दिशेत् ॥ ८-१२ ॥

विषदिग्धशस्त्रहतरूपम्-

**सद्यः क्षतं पच्यते यस्य जन्तोः स्रवेद्रक्तं पच्यते चाप्यभीक्ष्णम् ।**
**कृष्णीभूतं क्लिन्नमत्यर्थपूति क्षतान्मांसं शीर्यते चापि यस्य ॥**
**तृष्णा मूर्च्छा ज्वरदाहौ च यस्य दिग्धाहतं तं पुरुषं व्यवस्येत् ॥१३॥**

व्रणगतविषरूपम्—

**लिङ्गान्येतान्येव कुर्यादमित्रैर्व्रणे विषं यस्य दत्तं प्रमादात् ॥ १४ ॥**

विषलिप्तशस्त्रहतस्य लक्षणमाह-**सद्य** इत्यादि । **यस्य जन्तोः**=मनुष्यस्य, क्षतं सद्यः पच्यते क्षतस्थानाद् रक्तं स्रवेत् । **अभीक्ष्णं**=निरन्तरम् , अत्यर्थं क्लिन्नं पूति मांसं **शीर्यते**=पतति, तृष्णाऽऽदीनि लक्षणानि यस्य भवन्ति तं पुमांसं दिग्धाहतं **व्यवस्येद्**=जानीयात् । एतान्येव लक्षणानि प्रमादात् शत्रुभिर्वा व्रणे प्रदत्तं विषं यस्य भवति तत्र बोध्यानि ॥ १३-१४ ॥

विषपीतरूपं-**सपीतं गृहधूमाभं पुरीषं योऽतिसार्यते ।**
**फेनमुद्वमते चापि विषपीतं तमादिशेत ॥ १५ ॥**

अथ जङ्गमविषप्रकरणम्—

सर्पाण भेदाः-**वातपित्तकफात्मानो भोगिमण्डलिराजिलाः ।**
**यथाक्रमं समाख्याता द्व्यन्तरा द्वन्द्वरूपिणः ॥ १६ ॥**

स्थावरमुक्त्वा जङ्गमेषु महाविषत्वेन सर्पविषे वाच्ये तदाश्रयान् सर्पानाह—**वातपित्तकफात्मान** इत्यादि । भोगिमण्डलिराजिला यथाक्रमं वातपित्तकफात्मानो वेदितव्याः । व्यतिकरेण जातान् सर्पानाह—**द्व्यन्तरा** इत्यादि । **द्व्यन्तरा**=द्वयोरन्तरं विशेषो येषु ते तथा, फणिना मण्डलिन्यां जाता **गोनसाः**, मण्डलिना गोनसेन च फणिन्यां सम्भूताः **कृष्णसर्पाः** । **द्वन्द्वरूपिणः**=द्वयोः फणिमण्डलिन्योर्यद्रूपं=प्रकृतिस्तन्मिलितप्रकृतयः । अथवा-द्वयोर्दोषयोर्वातपित्तयोः श्लेष्मपित्तयोर्वा यद्रूपं तद्रूपमेषामित्यर्थः ॥ १६ ॥

सर्पदंशेषु वातादीनां लक्षणानि—

**दंशो भोगिकृतः कृष्णः सर्ववातविकारकृत् ।**
**पीतो मण्डलिजः शोथो मृदुः पित्तविकारवान् ॥ १७ ॥**
**राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः ।**
**पाण्डुः स्निग्धोऽतिसान्द्रासृक् सर्वश्लेष्मविकारकृत् ॥१८॥**

असाध्याः सर्पदष्टाः—

**अश्वत्थदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु ।**
**याम्ये च दृष्टाः परिवर्जनीया ऋक्षे सिराममंसु ये च दृष्टाः १९**

देशविशेषेण दष्टस्यासाध्यत्वमाह—**अश्वत्थ** इत्यादि । **याम्ये**=भरण्याम् , **ऋक्षे**=नक्षत्रे, **'नक्षत्रमृक्षं भं तारा'** इत्यमरः । चकाराद्—आर्द्राऽश्लेषाऽऽदीनामपि संग्रहः ॥ १९ ॥

सर्पविषस्य कालवशादाशुमारकता—

**दर्वीकराणां विषमाशुघाति सर्वाणि चोष्णे द्विगुणीभवन्ति ॥ २० ॥**

सर्पदंशेऽसाध्यलक्षणम्—

**अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु बुभुक्षितेषु ।**
**क्षीणक्षते मेहिनि कुष्ठयुक्ते रूक्षेऽबले गर्भवतीषु चापि ॥२१॥**

अपरमप्यवस्थाविशेषेणासाध्यत्वमाह—**अजीर्णे**त्यादि । अजीर्णादिपीडितेषु दोषत्रयप्रकोपात् । बालवृद्धयोः सुकुमारत्वेन सर्पवेगासहत्वात् । एवमेवान्यत्रापि विषस्याशुघातित्वमूहनीयम् ॥ २१ ॥

सर्वथावर्ज्याः सर्पदष्टरोगिणः—

**शस्त्रक्षते यस्य न रक्तमेति राज्यो लताभिश्च न संभवन्ति ।**
**शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्जयेत्तम् ॥ २२ ॥**
**जिह्मं मुखं यस्य च केशशातो नासाऽवसादश्च सकण्ठभङ्गः ।**
**कृष्णः सरक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वं च विवर्जनीयः ॥२३॥**
**वर्त्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्ध्वमधश्च यस्य ।**
**दंष्ट्रानिपाताः श्चतुरश्च यस्य तं चापि वैद्यः परिवर्जयेच्च ॥२४॥**

सर्वथाऽसाध्यत्वमाह—**शस्त्रक्षत** इत्यादि । **यस्य**—पुरुषस्य, शस्त्रक्षते रक्तं **नैति**—न निःसरति । **लताभिः**—कशाऽऽद्याघातैः । **राज्यः**=लेखाश्च चिह्नानि ( वाम इति लोके, ) न सम्भवन्ति । **शीताभिरद्भिः**=शीतलजलैः, **रोमहर्षः**=रोमाञ्चः, न भवेत्तं विषाभिभूतं **परिवर्जयेत्**=न चिकित्सेत् । अस्य मुखं **जिह्मं**—कुटिलं भवेत् **केशशातः**—केशपतनम् । वक्त्राद् यस्य **घना**—कठिना, वर्त्तिः, **निरेति**—जायते । यस्य, **ऊर्ध्वं**—मुखादिभिः, **अधः**—अपानादिभिर्वा रक्तं स्रवेत् । सोऽपि विवर्जनीयः ॥ २२-२४ ॥

**उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाऽप्यथवा विवर्णम् ।**
**सारिष्टमत्यर्थमवेगिनं च ज्ञात्वा नरं कर्म न तत्र कुर्यात् ॥२५॥**

एवमुन्मत्तादिकं वाऽपि ज्ञात्वा नरः कर्म=चिकित्सां, न कुर्यात् ॥२५॥

अथ दूषीविषप्रकरणं तत्र दूषीविषत्वनिर्देशः—

जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा ।
स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ॥ २६ ॥

दूषीविषमाह—जीर्णमित्यादि ॥ २६ ॥

दूषीविषकार्याणि—

वीर्याल्पभावान्न निपातयेत्तत् कफान्वितं वर्षगणानुबन्धि ।
तेनार्दितो भिन्नपुरीषवर्णो दौगन्ध्यवैरस्ययुतः पिपासी ।
मूर्च्छां भ्रमं गद्गदवाग्वमिं च विचेष्टमानोऽरतिमाप्नुयाद्वा ॥२७॥

दूषीविषाभिपन्नस्य लक्षणमाह—तेनार्दित इत्यादि ॥ २७ ॥

स्थानविशेषेण दूषीविषस्य विशिष्टलक्षणम्—

आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी ।
भवेत् समुद्ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥२८॥

रसादिधातुगतदूषीविषलक्षणानि—

स्थितं रसादिष्वथवा यथोक्तान् करोति धातुप्रभवान् विकारान् ।
कोपं च शीतानिलदुर्दिनेषु यात्याशु पूर्वं शृणु तस्य रूपम् ॥ २९ ॥

दूषीविषस्य पूर्वरूपम्—

निद्रा गुरुत्वं च विजृम्भणं च विश्लेषहर्षावथवाऽङ्गमर्दम् ।
ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठजन्म ॥ ३० ॥
मांसक्षयं पादकरप्रशोथं मूर्च्छां तथा छर्दिमथातिसारम् ।
दूषीविषं श्वासतृषाज्वरांश्च कुर्यात्प्रवृद्धिं जठरस्य चापि ॥ ३१ ॥
उन्मादमन्यज्जनयेत्तथाऽन्यदानाहमन्यत्क्षपयेच्च शुक्रम् ।
गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान्विकारांश्च बहुप्रकारान् ॥ ३२ ॥

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ।
यस्मात् संदूषयेद्धातून्स्तस्माद्दूषीविषं स्मृतम् ॥ ३३ ॥

दूषीविषस्य निरुक्तिमाह—दूषितमित्यादि ॥ ३३ ॥

दूषीविषस्य साध्यत्वादि—

साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम् ।
दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः ॥ ३४ ॥

अथ गरप्रकरणम्—

(संयोगजं च द्विविधं तृतीयं विषमुच्यते ।
गरः स्याद्विषं तत्र सविषं कृत्रिमं मतम् ॥ १ ॥)

गराभिभूतलक्षणम्—

सौभाग्यार्थं स्त्रियः स्वेदं रजो नानाऽङ्गजान् मलान् ।
शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान् ॥ ३५ ॥
तैः स्यात् पाण्डुः कृशोऽल्पाग्निर्गरश्चास्योपजायते ।
मर्मप्रधमनाध्मानं हस्तयोः शोथलक्षणम् ॥ ३६ ॥
जठरं ग्रहणीदोषो यक्ष्मा गुल्मः क्षयो ज्वरः ।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गानि दर्शयेत् ॥ ३७ ॥

अथ लूताऽऽदिविषप्रकरणम् ।

जन्महेतुः—यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः ।
तस्माल्लूतास्तु भाष्यन्ते संख्यया ताश्च षोडश ॥ ३८ ॥

लूतायाः षोडशनामानि—

त्रिमण्डला तथा श्वेता कपिला पीतका तथा ।
लालामूत्रविषा रक्ता कठिना चाष्टमी स्मृता ॥ १ ॥
सौवर्णिका लाजवर्णा जालिन्येकपदी तथा ।
कृष्णाऽग्निवर्णा काण्डा च मालागुण्यष्टमी मता ॥२॥

मतान्तरेण लूतोत्पत्तिवर्णनम्—

अन्ये वदन्ति भुक्तस्य दुष्टस्यान्नस्य मूर्च्छनात् ।
सम्भवन्ति विषस्फोटा ये लूताकीटलक्षणाः ॥
यथास्वं धारयन्तस्ते लूताकीटास्तु कीर्त्तिताः ॥ ३ ॥ )

लूतादंशरूपं ( सामान्यम् )—

ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च ।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः ॥३९॥
पिडका विविधाकारा मण्डलानि महान्ति च ।
शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा ।
सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम् ॥४०॥

लूतानां घोरविषत्वख्यापनार्थमैतिह्यमाह—यस्मादित्यादि । पुरा हि श्रूयते विश्वामित्रो नरपतिः कामधेनोर्बलात्कारपरिग्रहेण मुनिसत्तमं वशिष्ठं

कोपयामास, कुपितेन तेनान्तर्ज्वलदविरलकोपानलज्वलितं कुकूलयुगलमिव बहलपाटलं लोचनयुगलं वहता भगवान् रविरवलोकितः। ततस्तस्य भ्रुकुटिभयङ्करललाटतटप्रस्यन्दी स्वेदबिन्दूत्करः प्रचण्डतरः प्रत्यासन्नलूनतृणे धेन्वर्थं संभृते निपतितो लूताऽभवदिति। ता लूतास्तु षोडश। तासां लूतानां सामान्यदंशलक्षणमाह—**ताभिर्दष्ट** इत्यादि॥ ३८-४०॥

अष्टविधत्रिमण्डलादिलूतानां कृच्छ्रसाध्यत्वम्—

**ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना।**
**भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः॥**

दूषीविषलूतानां दंशलक्षणम्—

**दंशमध्येतु यत् कृष्णं श्यावं वा जालकाचितम्॥४१॥**
**ऊर्ध्वाकृति भृशं पाकं क्लेदशोथज्वरान्वितम्।**
**दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्दिशेत्॥४२॥**

सर्वलूतानां दंशरूपम्—

**(सर्पाणामेव विण्मूत्र-शवकोथसमुद्भवाः।**
**दूषीविषाः प्राणहरा इति संक्षेपतो मताः॥१॥)**

प्राणहराणां सौवर्णिकाऽऽदीनामष्टानां लूतानां दंशसामान्यलक्षणम्—

**शोथः श्वेताः सिता रक्ताः पीता वा पिडका ज्वरः।**
**प्राणान्तिकाश्च जायन्ते श्वासहिक्काशिरोग्रहाः॥४३॥**

मूषिकादंशरूपम्—

**आदंशाच्छोणितं पाण्डु मण्डलानि ज्वरोऽरुचिः।**
**लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्दिते॥ ४४॥**

आखुविषलक्षणमाह—**आदंशा**दित्यादि। आखवो हि शुक्रविषाः॥४४॥

**मूर्च्छाऽङ्गशोथवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः।**
**शिरोगुरुत्वं लालाऽसृक्छर्दिश्चासाध्यमूषकैः॥४५॥**

कृकलासदंशरूपं—

**कार्ष्ण्यं श्यावत्वमथवा नानावर्णत्वमेव वा।**
**मोहोऽथवर्चसो भेदो दष्टे स्यात् कृकलासकैः॥४६॥**

वृश्चिकदंशरूपं**दहत्याग्निरिवादौ च भिनत्तीवोर्ध्वमाशु च।**
**वृश्चिकस्य विषं याति दंशे पश्चात्तु तिष्ठति॥४७॥**

वृश्चिकविषलिङ्गमाह—दहत्यग्निरिवेत्यादि । वृश्चिकः=स्वनामप्रसिद्धः कीटविशेषः ॥ ४७ ॥

असाध्यरूपम्—

दष्टोऽसाध्यश्च हृद्घ्राणरसनोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसून् ॥ ४८ ॥

कणभदंशरूपम्—

विसर्पः श्वयथुः शूलं ज्वरश्छर्दिरथापि च ।
लक्षणं कणभैर्दष्टे दंशश्चैवावसीदति ॥ ४९ ॥

उच्चिटिंगदंशरूपम्—

हृष्टलोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्तिमान् ।
दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते ॥ ५० ॥

मण्डूकदंशरूपम्—

एकदंष्ट्रार्दितः शूनः सरुजः पीतकः सतृट् ।
छर्दिर्निद्रा च सविषैर्मण्डूकैर्दष्टलक्षणम् ॥ ५१ ॥

मत्स्यदंशजलौकोदंशयो रूपम्—

मत्स्यास्तु सविषाः कुर्युर्दाहं शोथं रुजं तथा ।
कण्डूं शोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः ॥ ५२ ॥

गृहगोधिकादंशशतपदीदंशयो रूपम्—

विदाहं श्वयथुं तोदं स्वेदं च गृहगोधिका ।
दंशे स्वेदं रुजं दाहं कुर्याच्छतपदीविषम् ॥ ५३ ॥

मशकदंशतदसाध्यदंशयो रूपम्—

कण्डूमान् मशकैरीषच्छोथः स्यान्मन्दवेदनः ।
असाध्यकीटसदृशमसाध्यं मशकक्षतम् ॥ ५४ ॥

माक्षिकादंशस्थगिकाऽसाध्यत्वयो रूपम्—

सद्यः प्रस्राविणी श्यावा दाहमूर्च्छाज्वरान्विता ।
पिडका मक्षिकादंशे तासां तु स्थगिकाऽसुहृत् ॥ ५५ ॥

चतुष्पद्द्विपद्दंशयो रूपम्—

चतुष्पद्भिर्द्विपद्भिश्च नखदन्तविषं च यत् ।
शूयते पच्यते वापि स्रवति ज्वरयत्यपि ॥ ५६ ॥

श्वाघ्रादिहिंस्रजन्तूनां विषलक्षणानि—

श्व शृगाल तरक्ष्वर्क्ष व्याघ्रादीनां यदाऽनिलः।
श्लेष्म प्रदुष्टो मुष्णाति संज्ञां संज्ञा वहा श्रितः॥ ५७॥
तदा प्रस्रस्तलाङ्गूल हनुस्कन्धोऽतिलालवान्।
अव्यक्त बधिरान्धश्च सोऽन्योन्यमभिधावति॥ ५८॥

विषाधिकारसामान्यात् श्वशृगालादिविषलक्षणमप्याह—श्वेत्यादि। श्वा=कुक्कुरः। तरक्षुः=मृगादनः,। लाङ्गूलः=पुच्छः। श्वादिदष्टस्यारिष्टमाह—येनेत्यादि। येन=श्वादिना, दष्टो भवेत्॥ ५७–५८॥

प्रमूढोऽन्यतमस्त्वेषां खादन्वि परिधावति।
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणा सविषेण तु॥ ५९॥
सुप्तता जायते दंशे कृष्णं चाति स्रवत्य सृक्।
दिग्ध विद्धस्य लिङ्गेन प्रायः शश्चोपलक्षितः॥ ६०॥

श्वादिदष्टस्य रिष्टलक्षणानि—

येन चापि भवेद्दष्टस्तस्य चेष्टां रुतं नरः।
बहुशः प्रतिकुर्वाणः क्रियाहीनो विपश्यति॥ ६१॥

तस्य चेष्टां=क्रियां, रुतं=शब्दं, वा प्रतिकुर्वाणः क्रियाहीनः=अकर्मण्यः, विनश्यति=म्रियते॥ ६१॥

दंष्ट्रिणा येन दष्टश्च तद्रूपंयस्तु पश्यति॥
अप्सु चादर्श-बिम्बेवातस्य तद्रिष्टमादिशेत्॥ ६२॥
त्रस्यत्यकस्माद्योऽभीक्ष्णं दृष्ट्वा स्पृष्ट्वाऽपि वा जलम्।
जलत्रासं तु तं विद्याद्रिष्टं तदपि कीर्तितम्॥ ६३॥

अपरमप्यरिष्टमाह—दंष्ट्रिणेत्यादि। येन दंष्ट्रिणा दष्टस्तद्रूपं यो वा पश्यति सोऽपि नश्यत्येव। अकस्माद्—जलत्रासहेतुं विना, जलं दृष्ट्वा स्पृष्ट्वा वा यस्त्रस्यति अपिना श्रुत्वा वा। तं जलत्रासरोगं विद्यात्। तदपि रिष्टमेव६२–६३॥

अदष्टो वा जलत्रासी न कथंचन सिद्ध्यति।
प्रसुप्तो वोत्थितो वाऽपि स्वस्थस्त्रस्तो न सिद्ध्यति॥६४॥

निर्विषपुरुषलक्षणम्—

**प्रशान्तदोषं प्रकृतिस्थधातुमन्नाभिकामं सममूत्रविट्कम् ।**
**प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यम् ॥६९॥**

**इत्युत्तरार्द्धम् ।**

**इति श्रीमाधवकरविरचिते-माधवनिदाने एकोनसप्ततितमं विष-निदानं समाप्तम् ॥ ६९ ॥**

विषातुरः कीदृशो निर्विषो भवतीति तमाह—**प्रशान्तदोष**मित्यादि । **प्रशान्तदोषं**=प्रशान्ताः=स्वभावमापन्नाः, दोषा वातादयो यस्य तं तथाभूतम्। **प्रकृतिस्थधातुं**=प्रकृतिस्था धातवो यस्य तम् । धातुपदेन रसादयो मलादयश्च संगृह्यन्ते (दधतीति धातव इति व्युत्पत्तेः) **अन्नाभिकामं**=भोजनाभिलाषम् , **सममूत्रविट्कम्**=अक्षीणानतिरिक्तमूत्रपुरीषम । **प्रसन्नवर्णेन्द्रियचित्तचेष्टं**=प्रसन्नाः=निर्मला वर्णा इन्द्रियाणि चित्तं चेष्टा च यस्य तं तथोक्तम् मनुष्यम् **अविषं**=निर्विषं, **वैद्यः**, **अवगच्छेद्**=जानीयात् । एतद्विपरीतलक्षणं सविषं जानीयात्। तथाहि—

**"प्रवृद्धदोषाप्रकृतिस्थधातुमनन्नकाङ्क्षं हतमूलजिह्वम् ।**
**विरुद्धवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेत्सविषं मनुष्यम् ॥ ६५ ॥**

इति शाहाबादमण्डलान्तर्गत 'सेमरा' ग्रामवास्तव्येन आयुर्वेदवाचस्पति-
पं० रामानन्दमिश्रतनूजन्मना रामप्रतापकमलियाऽऽयुर्वेद-
विद्यालये मुख्याध्यापकपदमलङ्कुर्वता व्याकरणसाहित्या-
चार्येण मिश्रोपाह्वोमेशानन्दशर्मणा विरचितया-
'सुधालहरी' टीकया समुल्लसितं माधव-
निदानं सम्पूर्णम् ।

## अथ विषयानुक्रमणिका ।

ज्वरोऽतिसारो ग्रहणी चार्शोऽजीर्णं विसूचिका ।
अलसश्च विलम्बी च क्रिमिरुक्पाण्डुकामलाः ॥ १ ॥
हलीमकं रक्तपित्तं राजयक्ष्मा उरःक्षतम् ।
कासो हिक्का सह श्वासैः स्वरभेदस्त्वरोचकः ॥ २ ॥
छर्दिस्तृष्णा च मूर्च्छाद्या रोगाः पानात्ययादयः ।
दाहोन्मादावपस्मारः कथितोऽथानिलामयः ॥ ३ ॥
वातरक्तमूरुस्तम्भ आमवातोऽथ शूलरुक् ।
पक्तिजं शूलमानाह उदावर्तोऽथ गुल्मरुक् ॥ ४ ॥
हृद्रोगो मूत्रकृच्छ्रं च मूत्राघातस्तथाऽश्मरी ।
प्रमेहो मधुमेहश्च पिडकाश्च प्रमेहजाः ॥ ५ ॥
मेदस्तथोदरं शोथो वृद्धिश्च गलगण्डकः ।
गण्डमालाऽपची ग्रन्थिरर्बुदः श्लीपदं तथा ॥ ६ ॥
विद्रधिर्व्रणशोथश्च द्वौ व्रणौ भग्ननाडिके ।
भगन्दरोपदंशौ च शूकदोषस्त्वगामयः ॥ ७ ॥
शीतपित्तमुदर्दश्च कोठश्चवाम्लपित्तकम् ।
विसर्पश्च सविस्फोटः सरोमान्त्यो मसूरिकाः ॥८॥
क्षुद्राऽऽस्यकर्णनासाक्षिशिरः स्त्रीबालकामयाः ।
विषं चेत्ययमुद्दिष्टो रुग्विनिश्चयसंग्रहः ॥ ९ ॥
सुभाषितं यत्र यदस्ति किञ्चित्तत्सर्वमेकीकृतमत्र यत्नात् ।
विनिश्चये सर्वरुजां नराणां श्रीमाधवेनेन्दुकरात्मजेन ॥ १० ॥
यत्कृतं सुकृतं किञ्चित्कृत्वैवं रुग्विनिश्चयम् ।
मुञ्चन्तु जन्तवस्तेन नित्यमातङ्कसन्ततिम् ॥११॥

इति श्रीमाधवकरविरचिते माधवनिदानम्
समाप्तम् ।

Printed at the Vidya Vilas Press, Benares.

श्रीगौरकृष्णः शरणं ममास्तु ।

माधवनिदाने—

# नव्यरोगनिदानम्

नाम

# परिशिष्टम् ।

लोकव्याधिसदाधिकृन्तनविधौ सिद्धं हरिं माधवं-
नत्वा माधवशर्मणा निगदिते ग्रन्थे निदानस्य वै ।
प्रब्रूते परिशिष्टरूपत इहाक्लिष्टैः सुपद्यैः स्फुटं-
नूत्नानूत्नतरान् सदैव भिषजां दृग्गोचरानामयान् ॥१॥
श्रीव्राजमोहनिरयं व्रजराजभक्तो-
दामोदराङ्घ्रिरसिकोऽपि च मिश्रवंश्यः ।
सत्पङ्क्तिपावनमहीसुरगौतमोत्थः-
सन् ब्रह्मशङ्कर उमाधवकाशिकास्थः ॥ २ ॥
मिश्रौलियाऽऽवसथवासिजनो मुदाऽऽदौ
तत्रानवाञ्ज्वरगदान् विलिखत्यनुक्तान् ।
श्रीश्रेष्ठिवर्यजयकृष्णपदादिदास-
प्रोत्साहितस्त्वितरतन्त्रत आकलय्य ॥ ३ ॥

## अथ सामान्यसन्निपातज्वरस्य त्रयोदश भेदाः ।

एकोल्वणास्त्रयस्तेषु द्व्युल्वणाश्च तथेति षट् ।
त्र्युल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः ॥ १ ॥
प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट् ।
सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश ॥ २ ॥

प्रवृद्धवातो मध्यपित्तो हीनकफः १ ।
मध्यवातः प्रवृद्धपित्तो हीनकफः २ ।
हीनवातः प्रवृद्धपित्तो मध्यकफः ३ ।
प्रवृद्धवातो हीनपित्तो मध्यकफः ४ ।

मध्यवातो हीनपित्तः प्रवृद्धकफः ५ ।
हीनवातो मध्यपित्तः प्रवृद्धकफः ६ । इति षट् ।

अथानुक्रमेण त्रयोदशसंनिपातनामानि—

विस्फारकश्चाशुकारी कम्पनो बभ्रसंज्ञकः ।
शीघ्रकारी तथा भल्लुः सप्तमः कूटपाकलः ॥ ३ ॥
संमोहकः पाकलश्च याम्यः क्रकच इत्यपि ।
ततः कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः ॥ ४ ॥

तन्त्रान्तरे 'विस्फारक' इत्यत्र 'विस्फोरक' इति पाठः । 'बभ्र' स्थाने 'बभ्रु' रिति पाठः। 'भल्लु' रित्यत्र 'फल्गु' रिति पाठः। 'याम्य' इत्यत्र 'संग्राम' इति पाठः । 'कर्कटक' इत्यत्र 'कर्कोटक' इति पाठः ।

१ तत्र वातोल्वणविस्फारकलक्षणम्—

श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू ।
पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च ॥ ५ ॥
वातोल्वणस्य लिङ्गानि संनिपातस्य लक्षयेत् ।
एष विफारको नाम्ना संनिपातः सुदारुणः ॥ ६ ॥

२ पित्तोल्वणाशुकारिलक्षणम्—

अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च ।
गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते ॥ ७ ॥
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत् ।
भिषग्भिः संनिपातोऽयमाशुकारी प्रकीर्तितः ॥ ८ ॥

३ कफोल्वणकम्पनलक्षणम्—

जडता गद्गदा वाणी रात्रौ निद्रा भवत्यपि ।
प्रस्तब्धे नयने चैव मुखमाधुर्यमेव च ॥ ९ ॥
कफोल्वणस्य लिङ्गानि संनिपातस्य लक्षयेत् ।
मुनिभिः संनिपातोऽयमुक्तः कम्पनसंज्ञकः ॥ १० ॥

४ वातपित्तोल्वणबभ्रलक्षणम्—

वातपित्ताधिको यस्तु संनिपातः प्रकुप्यति ।
तस्य ज्वरो मदस्तृष्णा मुखशोषः प्रमीलकः ॥ ११ ॥
आध्मानारतितन्द्राश्च कासश्वासभ्रमश्रमाः ।
मुनिभिर्बभ्रनामाऽयं सन्निपात उदाहृतः ॥ १२ ॥

५ वातकफोल्बणशीघ्रकारिलक्षणम्—

वातश्लेष्माधिको यस्य संनिपातः प्रकुप्यति ।
तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रहः ॥ १३ ॥
शूलमस्थिव्यथमानस्य तन्द्रा श्वासश्च जायते ।
असाध्यः संनिपातोऽयं शीघ्रकारीति कथ्यते ।
न हि जीवत्यहोरात्रमनेनाविष्टविग्रहः ॥ १४ ॥

६ पित्तकफोल्बणभल्लुलक्षणम्—

पित्तश्लेष्माधिको यस्य संनिपातः प्रकुप्यति ।
अन्तर्दाहो बहिः शीतं तस्य तृष्णा प्रवर्द्धते ॥ १५ ॥
तुद्यते दक्षिणे पार्श्वे उरःशीर्षगलग्रहः ।
ष्ठीवति श्लेष्मपित्तं च कृच्छ्रात्कोठश्च जायते ॥ १६ ॥
विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः ।
ऋषिभिर्भल्लुनामाऽयं संनिपात उदाहृतः ॥ १७ ॥

७ वातपित्तकफोल्बणकूटपाकललक्षणम्—

सर्वदोषोल्बणो यस्य संनिपातः प्रकुप्यति ।
त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥ १८ ॥
व्याधयो दारुणश्चैव वज्रशस्त्राग्निसंनिभः ।
केवलोच्छ्वासपरमः स्तब्धाङ्गः स्तब्धलोचनः ॥ १९ ॥
त्रिरात्रात्परमेतस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः ॥ २० ॥
धर्षितो राक्षसैर्नूनमवेलायां चरन्ति ये ।
अन्यथा ब्रुवते केचिद् यक्षण्या ब्रह्मराक्षसैः ॥ २१ ॥
पिशाचैर्गुह्यकैश्चैव तथाऽन्यैर्मस्तके हतम् ।
कुलदेवार्चनाहीनं धर्षितं कुलदेवतैः ॥ २२ ॥
नक्षत्रपीडामपरे गरकर्मेति चापरे ।
संनिपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥ २३ ॥

८ अधिकवातमध्यपित्तहीनकफसंमोहकलक्षणम्—

प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ २४ ॥
प्रलापायाससंमोह-कम्पमूर्च्छाऽरतिभ्रमाः ।

एकपक्षाभिघातश्च तत्राप्येते विशेषतः ॥ २५ ॥
एष संमोहको नाम्ना सन्निपातः सुदारुणः ॥ २६ ॥

रोगास्त एवोक्ताः—व्यथावेपथुनिद्रानाशविष्टम्भादयो वातजाः। दाहतृष्णोष्णतास्वेदादयः पित्तजाः। गौरवाग्निमान्द्योत्कासनासिकामुखप्रसेकादयः कफजाः। तत्रापि प्रलापादयः पक्षाघातान्ता विशेषाद्भवन्ति।

९ मध्यवाताधिकपित्तहीनकफपाकलक्षणम्—

मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ २७ ॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः।
कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदि व्यथा ॥२८॥
खेभ्यो रक्तं विसृजति सरक्तस्तब्धनेत्रता।
तत्राप्येते विशेषाः स्युर्मृत्युरर्वाक् त्रिवासरात्।
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ॥ २९ ॥

१० हीनवाताधिकपित्तमध्यकफयाम्यलक्षणम्—

हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ३० ॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुस्फुसाः।
पच्यन्तेऽत्यर्थमूर्ध्वाधः पूयशोणितनिर्गमः ॥ ३१ ॥
शीर्णदन्तश्च मृत्युश्च तत्राप्येतद्विशेषतः।
भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्त्तितः ॥३२॥

११ अधिकवातहीनपित्तमध्यकफक्रकचलक्षणम्—

प्रवृद्धहीनमध्यैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ३३ ॥
प्रलापायाससंमोहाः कम्पमूर्च्छाऽरतिभ्रमाः।
मन्यास्तम्भेन मृत्युः स्यात्तत्राप्येतद्विशेषतः ॥ ३४ ॥
भिषग्भिः सन्निपातोऽयं क्रकचः संप्रकीर्त्तितः ॥ ३५ ॥

१२ मध्यवातहीनपित्तमध्यकफकर्कटकलक्षणम्—

मध्यहीनाप्रवृद्धैस्तु वातपित्तकफैश्च यः।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ३६ ॥

अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते ।
रक्तमालक्तकेनैव लक्ष्यते मुखमण्डलम् ॥ ३७ ॥
पित्तेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते ।
इषुणेवाहतं पार्श्वं तुद्यते खन्यते हृदि ॥ ३८ ॥
प्रमीलकश्वासहिक्का वर्द्धन्ते तु दिने दिने ।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः ॥ ३९ ॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् ।
अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रौष्ठतालुकः ॥ ४० ॥
तन्द्रानिद्राऽतियोगार्त्तो हतवाङ् निहतद्युतिः ।
अरतिं लभते नित्यं विपरीतानि चेच्छति ॥ ४१ ॥
आयम्यते च बहुशो रक्तं ष्ठीवति चाल्पशः ।
एष कर्कटको नाम्ना सन्निपातः सुदारुणः ॥ ४२ ॥

१३ हीनवातमध्यपित्ताधिककफवैदारिकलक्षणम्—

हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥ ४३ ॥
अल्पशूलं कटीतोदो मध्ये दाहो रुजा भ्रमः ।
भृशं क्लमः शिरोबस्तिमन्याहृदयवाग्रुजः ॥ ४४ ॥
प्रमीलकः श्वासकासहिक्काजाड्यविसंज्ञताः ।
प्रथमोत्पन्नमेनन्तु साधयन्ति कदा चन ॥ ४५ ॥
एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणा ।
पिडका जायते जन्तोर्यया कृच्छ्रेण जीवति ॥ ४६ ॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
त्रिरात्रात्परमेतस्य व्यर्थमौषधकल्पनम् ॥ ४७ ॥

---

## अथ पूर्वोक्तत्रयोदशसन्निपातज्वरविशेषाणां तन्त्रान्तरस्थनामानि ।

शीताङ्गाभिमलोज्झवज्वरगणे तन्द्री प्रलापी ततो-
रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा ।
साभिन्यासकजिह्वकश्च कथितः प्राक्सन्धिगोऽथान्तको-
रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ ॥ ४८ ॥

तन्द्री=तन्द्रिकः, प्रलापी=प्रलापकः, रक्तष्ठीवयिता=रक्तष्ठीवी, संभुग्ननेत्रः=भुग्ननेत्रः, अभिन्यासकः=अभिन्यासः, कर्णकण्ठग्रहौ=कर्णग्रहः (कर्णिकः), कण्ठग्रहः=( कण्ठकुब्जक )श्चेत्यत्र बोध्यम् ।

अथ तेषां प्रत्येकं लक्षणानि ।

१ तत्र शीताङ्गस्य लक्षणम्—

हिमशिशिरशरीरः सन्निपातज्वरी यः श्वसनकसनहिक्कामोहकम्पप्रलापैः ।
क्लमबहुकफवातैर्दाहवम्यङ्गपीडा-स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ४९

२ तन्द्रिकस्य लक्षणम्—

तन्द्राऽतीव ततस्तृषाऽतिसरणं श्वासोऽधिकः कासरुक्
संतप्ताऽतितनुर्गले श्वयथुना सार्द्धञ्च कण्डूः कफः ।
सुश्यामा रसना क्लमः श्रवणयोर्मान्द्यञ्च दाहस्तथा
यत्र स्यात् स हि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः ॥५०॥

३ प्रलापकस्य लक्षणम्—

यत्र ज्वरे निखिलदोषनितान्तरोष-जाते प्रलापबहुलाः सहसोत्थिताश्च ।
कम्पव्यथापतनदाहविसंज्ञताः स्युर्नाम्ना प्रलापक इति प्रथितः पृथिव्याम्

४ रक्तष्ठीविनो लक्षणम्—

निष्ठीवो रुधिरस्य रक्तसदृशं कृष्णं तनौ मण्डलं-
लौहित्यं नयने तृषाऽरुचिवमिश्वासातिसारश्रमाः ।
आध्मानं च विसंज्ञता च पतनं हिक्काऽङ्गपीडा भृशं-
रक्तष्ठीविनि संनिपातजनिते लिङ्गं ज्वरे जायते ॥ ५२ ॥

५ भुग्ननेत्रस्य लक्षणम्—

भृशं नयनवक्रता श्वसनकासतन्द्रा भृशम्-
प्रलापमदवेपथुश्रवणहानिमोहास्तथा ।
पुरो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे
पुरातनचिकित्सकैः स इह भुग्ननेत्रो मतः ॥ ५३ ॥

६ अभिन्यासस्य लक्षणम्—

दोषास्तीव्रतरा भवन्ति बलिनः सर्वेऽपि यत्र ज्वरे
मोहोऽतीव विचेष्टता विकलता श्वासो भृशं मूकता ।
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य क्षयः-
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञैर्भिषग्भिः पुरा ॥५४॥

७ जिह्वकस्य लक्षणम्—

त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं-
वृता कठिनकण्टकैस्तदनु निर्भरं मूकता ।

श्रुतिक्षतिबलक्षतिश्वसनकासस्तप्ता:-
पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥ ५५ ॥

८ सन्धिगस्य लक्षणम्—

व्यथाऽतिशयिता भवेच्छ्वयथुसंयुता सन्धिषु
प्रभूतकफता मुखे विगतनिद्रता कासरुक् ।
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे-
त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः ॥ ५६ ॥

९ अन्तकस्य लक्षणम्—

यस्मिन्नलक्षणमेतदस्ति सकलैर्दोषैरुदीते ज्वरे-
ऽजस्रं मूर्द्धविधूननं सकसनं सर्वाङ्गपीडाऽधिका ।
हिक्काश्वाससदाहमोहसहिता देहेऽतिसन्तप्तता-
वैकल्यञ्च वृथावचांसि मुनिभिः संकीर्त्तितः सोऽन्तकः ॥५७॥

१० रुग्दाहस्य लक्षणम्—

दाहोऽधिको भवति यत्र तृषा च तीव्रा
श्वासप्रलापविरुचिभ्रममोहपीडाः ।
मन्याहनुव्यथनकण्ठरुजः श्रमश्च
रुग्दाहसंज्ञ उदितस्त्रिभवो ज्वरोऽयम् ॥ ५८ ॥

११ चित्तभ्रमस्य लक्षणम्—

गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्येत् ।
दाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमे ज्वरे भवति ॥ ५९ ॥

१२ कर्णिकस्य लक्षणम्—

दोषत्रयेण जनितः किल कर्णमूले
तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च ।
कण्ठग्रहो बधिरता श्वसनं प्रलापः-
प्रस्वेदमोहदहनानि च कर्णिकाख्ये ॥ ६० ॥

१३ कण्ठकुब्जस्य लक्षणम्—

कण्ठः शूकशतावरुद्धवदतिश्वासः प्रलापोऽरुचि-
र्दाहो देहरुजा तृषाऽपि च हनुस्तम्भः शिरोऽर्त्तिस्तथा ।
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
यत्र स्यात् स हि कण्ठकुब्ज उदितः प्राज्ञैश्चिकित्साबुधैः ॥६१॥

अथ संनपातज्वरस्यासाध्यासाध्यत्वम्—

सन्धिगस्तेषु साध्यः स्यात् तन्द्रिकश्चित्तविभ्रमः ।
कर्णिको जिह्वकः कण्ठ-कुब्जः पञ्चापि कष्टदाः ॥ ६२ ॥
रुग्दाहस्त्वतिकष्टेन संसाध्यस्त्वेषु भाषितः ।
रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः ।
अभिन्यासोऽन्तकश्चैते षडसाध्याः प्रकीर्त्तिताः ॥ ६३ ॥

## अथान्यग्रन्थोक्तवातोल्बणादित्रयोदशसन्निपातानां कुम्भीपाकादीनि नामानि ।

कुम्भीपाकः प्रोर्णुनावः प्रलापी ह्यन्तर्दाहो दण्डपातोऽन्तकश्च ।
एणीदाहश्चाथ हारिद्रसंज्ञो भेदा एते सन्निपातज्वरस्य ॥ ६४ ॥
अजघोषभूतहासौ यन्त्रापीडश्च संन्यासः ।
संशोषी च विशेषास्तस्यैवोक्तास्त्रयोदशान्यत्र ॥ ६५ ॥

अथैषां लक्षणानि ।

१ तत्र कुम्भीपाकस्य लक्षणम्—

घोणाविवरस्नवद्बहु–शोणासितलोहितं सान्द्रम् ।
विलुठन्मस्तकमभितः कुम्भीपाकेन पीडितं विद्यात् ॥ ६६ ॥

२ प्रोर्णुनावस्य लक्षणम्—

उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्तमुच्छ्वसिति ।
तं प्रोर्णुनावजुष्टं विचित्रकष्टं विजानीयात् ॥ ६७ ॥

३ प्रलापिनो लक्षणम्—

स्वेदभ्रमाङ्गभेदाः कम्पो दवथुर्वमिर्व्यथा कण्ठे ।
गात्रञ्च गुर्वतीव प्रलापि जुष्टस्य जायते लिङ्गम् ॥ ६८ ॥

४ अन्तर्दाहस्य लक्षणम्—

अन्तर्दाहः शैत्यं बहिः श्वयथुररतिरति तथा श्वासः ।
अङ्गमपि दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥ ६९ ॥

५ दण्डपातस्य लक्षणम्—

नक्तन्दिवा न निद्रा–मुपैति गृह्णाति मूढधीर्नभसः ।
उत्थाय दण्डपाती भ्रमातुरः सर्वतो भ्रमति ॥ ७० ॥

६ अन्तकस्य लक्षणम्—

संपूर्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता ।
श्वासातुरस्य सततं विचेतनस्यान्तकार्त्तस्य ॥ ७१ ॥

७ एणीदाहस्य लक्षणम्—

परिधावतीव गात्रे रुक्पात्रे भुजगपतगहरिणगणः।
वेपथुमतः सदाहस्यैणीदाहज्वरार्त्तस्य ॥ ७२ ॥

८ हारिद्रस्य लक्षणम्—

यस्यातिपीतमङ्गं-नयने सुतरां मलस्ततोऽप्यधिकम्।
दाहोऽतिशीतता बहि-रस्य स हारिद्रको ज्ञेयः ॥ ७३ ॥

९ अजघोषस्य लक्षणम्—

छगलकसमानगन्धः स्कन्धरुजावान्निरुद्धगलरन्ध्रः।
अजघोषसन्निपाता-दाताम्राक्षः पुमान् भवति ॥ ७४ ॥

१० भूतहासस्य लक्षणम्—

शब्दादीनधिगच्छति न स्वान् विषयान् यदिन्द्रियग्रामैः।
हसति प्रलपति पुरुषं स ज्ञेयो भूतहासार्त्तः ॥ ७५ ॥

११ यन्त्रापीडस्य लक्षणम्—

येन मुहुर्ज्वरवेगाद् यन्त्रेणेवावपीड्यते गात्रम्।
रक्तं पित्तञ्च वमेद् यन्त्रापीडः स विज्ञेयः ॥ ७६ ॥

१२ संन्यासस्य लक्षणम्—

अतिसरति वमति कूजति गात्राण्यभितश्चिरं नरः क्षिपति।
संन्याससन्निपाते प्रलपत्युग्राक्षिमण्डलो भवति ॥ ७७ ॥

१३ संशोषिणो लक्षणम्—

मेचकवपुरतिमेचक-लोचनयुगलो मलोत्सर्गात्।
संशोषिणि सितपिडका-मण्डलयुक्तो ज्वरे नरो भवति ॥७८॥

सन्निपातज्वरस्य भयङ्करता—

नारायण एव भिषग्-भेषजमेतेषु जाह्नवीनीरम्।
भैषज्यहेतुरेको नित्यं मृत्युञ्जयो ध्येयः ॥ ७९ ॥

सन्निपातज्वरस्य साध्यासाध्यत्वम्—

सन्निपातज्वरान् कष्टा-नसाध्यानपरे जगुः।
दोषे प्रबृद्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणः॥
सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्त्वतोऽन्यथा ॥ ८० ॥

# अथ मन्थरकज्वरनिदानम् ।

इत आरभ्यते सम्प्रत्याधुनिकैश्चिकित्सकैः ।
अनुभूतं रोगवृन्दं सनिदानं ज्वरादिकम् ॥

तत्रादौ मन्थरकज्वरनिदानम्—

बह्वब्दक्लान्ततनवस्तथाऽनशनकर्षिताः ।
दुर्गन्धपूर्णभूमौ वा नित्यमेव निवासिनः ॥ १ ॥
यद्यप्येषां मलोन्मिश्र-भक्ष्यपानादिसेवनात् ।
भवेद्दतुषु सर्वेषु घोरो मन्थरको ज्वरः ॥ २ ॥
तथाऽपि बहुशो लोके ग्रीष्मप्रावृट्शरत्स्वसौ ।
भीमलक्षणसंयुक्तो लक्ष्यते वैद्यसत्तमैः ॥ ३ ॥
आन्त्रिकेत्यभिधानं वा-परमस्यैव कथ्यते ।
सामान्यं कारणं प्रोक्तं विशिष्टं तु निगद्यते ॥ ४ ॥
कीटाणवो 'वैसिलस-टाइफोसिस' नामकाः ।
दण्डाकाराः कृतावासा रक्ते मूत्राशये मले ॥ ५ ॥
स्वेदे पित्ताशये प्लीह्नि पिडकास्वान्त्रिकव्रणे ।
जनयन्ति नृणां देहे ज्वरं प्रोक्तं विशेषतः ॥ ६ ॥

मन्थरकज्वरस्य सम्प्राप्तिः—

मलमूत्रस्वेदजात-दोषसंसर्गदूषितैः ।
भक्ष्यपेयादिभिर्द्रव्यै-नानासंक्रमकारणैः ॥ ७ ॥
कीटाणवः संक्रमणं प्रकुर्वन्ति विशेषतः ।
कृत्वा संक्रमणं नृणा-मादावन्त्रं प्रयान्ति ते ॥ ८ ॥
तत्पश्चादन्त्रभित्तिस्थान् ग्रन्थीन् छोथसमन्वितान् ।
कृत्वा सद्यो रसं रक्तं-दोषान् सङ्कोपयन्त्यपि ॥ ९ ॥
ततः क्षुद्रान्त्रान्त्यभागान्-शनैः कुर्वन्ति सक्षतान् ।
पश्चादान्त्रक्षतानां च वृद्धिः संजायते क्रमात् ॥ १० ॥
तथा क्षुद्रान्त्रभागस्थं क्षतं तत्पारगं भवेत् ।
ततः शोथत्वमाप्नोति चोदरस्था कला ध्रुवम् ॥ ११ ॥

एवं रीत्या क्षते वृद्धे पुरीषोत्सर्जने क्वचित् ।
लक्ष्येत यदि रक्तस्य स्रावो भिन्नान्त्रता तदा ।
ज्ञातव्या भिषजा चापि नूनं तस्याप्यसाध्यता ॥ १२ ॥

मन्थरकज्वरस्य पूर्वरूपम्—

शिरोव्यथा स्यादरुचिस्ततोऽरति-स्तमोऽवसादोऽपि च विड्विबद्धता ।
सप्ताहपर्यन्तमिति स्फुटास्फुटं ज्वरेऽग्ररूपं नियतं सदाऽऽन्त्रिके ॥१३॥

मन्थरकज्वरस्य रूपम्—

तदग्ररूपं च ततोऽष्टमेऽहनि-भवेदभिव्यक्तिमवाप्य लक्षणम् ।
ज्वरोऽथ नित्यं क्रमतः प्रवर्द्धते सहापरैर्मन्थरकेऽत्र लक्षणैः ॥१४॥

भवेत्सदा तु ज्वरतापसीमा चतुर्युतं पञ्चयुतं शतं वा ।
प्लीह्नोऽपि वृद्धिः परिदृश्यतेऽस्मिन्ज्वरे नृणां मन्थरकाभिधाने ॥१५॥

ये भारतीयाः खलु तेषु मुक्ता-फलोपमाः स्यु पिडका ज्वरेऽस्मिन् ।
लीयन्त उद्भूय च तास्तु जङ्घा-ग्रीवोदरेष्वेव गदस्वभावात् ॥ १६ ॥

किन्त्वाङ्ग्लदेशस्थनरेषु तद्वत्-पूर्वोदिताङ्गेष्वरुणाश्च ताः स्युः ।
ज्वरेऽत्र जिह्वा मलिनाऽथ रूक्षा-रक्ताङ्कुरैःस्यात् परितश्चिता च ॥१७॥

एवं क्वचिच्च स्फुटिता तथा चो-दरं सदाऽऽध्मानयुतं निरीक्ष्यते ।
एतेषु चिह्नेषु समुद्भवत्सु प्रागुक्तसीमां लभते ज्वरोऽपि ॥ १८ ॥

आद्ये तु सप्ताह इयं दशा स्या-दथो द्वितीये दिनसप्तके तु ।
ज्वरस्तु पूर्वोदितसीमसंस्थः प्रलापतन्द्राक्लमप्रमोहैः ॥ १९ ॥

आक्षेपदौर्बल्यमुखप्रशोषा-ध्मानैररत्या सहितो विशेषात् ।
जिह्वाऽत्र रक्ता परितोऽन्त्यभागे तथा च मध्ये मलिनाऽथ कर्कशा ॥२०॥

विलोक्यते प्रस्फुटिता च नेत्रे स्तब्धे च तेजोरहिते भवेताम् ।
नाडीगतिर्नातिचलाऽतिताप-श्चिन्ताविहीना वदनाकृतिः स्यात्॥२१॥

अन्यानि दोषत्रितयोदितानि चिह्नानि चाप्यत्र भवन्ति नूनम् ।
अथो द्वितीये दिनसप्तके तु क्वचिच्चतुर्थे क्रमतो ज्वरोऽयम् ॥ २२ ॥

उपद्रवैः सार्द्धमुपैति रिक्ततां प्रायस्तृतीये तु गते विमुञ्चति ॥ २३ ॥

इत्थं विमुक्तिसमयावधिरान्त्रिकस्य-
सामान्यतो निगदितो भिषजा तु योऽत्र ।
स स्यात् कुपथ्यपरिशीलनतत्परस्य
द्वैगुण्यभागथ च तत्त्रिगुणोऽपि नूनम् ॥ २४ ॥

उपद्रवसमाधिक्यं सतताहितसेविनः ।
जायते तेन नियतं कुपथ्यं यत्नतस्त्यजेत् ॥ २५ ॥

मन्थरकज्वरस्यासाध्यलक्षणम्—

यदा कुपथ्याचरणे रतस्य ज्वरार्दितस्यान्त्रगतो हि यक्ष्मा ।
भवेत्तदा तेन च फुप्फुसद्वयं-ध्रुवं समाक्रान्तमपि प्रदृश्यते ॥ २६ ॥
तथा प्रजातैरितरैरुपद्रवैर्युतोऽयमान्त्रक्षयनामभाग् भवन् ।
असाध्यतां प्राप्य तदा तु जीवनं लभेत रोगी बहुयत्नतः क्वचित् ॥२७॥
यदाऽतिसारोऽधिकतोष्णतापो-विषाक्तता रक्तविनिर्गमश्च ।
शोथान्विताऽथोदरगा कला स्यात्-तदाऽप्यसाध्यो गदितो गदोऽयम्२८
अन्यानि रूपाणि च यानि पूर्वं-प्रोक्तानि वैद्यैरपि तानि नूनम् ।
प्राबल्यभीयुर्यदि दैवतः क्वचित्-तदाऽप्यसाध्यत्वमितो गदो भवेत्॥२९॥
यदा प्रदृश्येत रुजाऽस्त्वसाध्यता-चिकित्सकैर्मन्थरकज्वरार्दिते ।
विना चिकित्साऽऽगमसिद्धपाद-चतुष्टयं स्यान्न तदा तु साध्यता ॥३०॥

इति मन्थरकज्वरनिदानम् ।

# अथाक्षेपकज्वरनिदानम् ।

आक्षेपकज्वरनिरुक्तिः—

यस्मादाक्षिप्यन्ते, प्रायेणाङ्गानि यन्ति संकोचम् ।
घोरो ज्वरश्च संज्ञा-हृदसावाक्षेपकः प्रोक्तः ॥ १ ॥

आक्षेपकज्वरस्य निदानम्—

बहुजनसमवायो यत्र देशे विशेषा-
दथ च यदि सदा स्यात्पांसुधूमप्रसारः ।
नरि रचयति वासं तत्र जीवाणुजातो-
ज्वर इह खलु जाये-तातिदुःखप्रदोऽयम् ॥ २ ॥

तस्य संप्राप्तिः—

पूर्वोक्तहेतोरुदितं विषं हि, मस्तिष्कमूले मनुजस्य यस्य ।
प्रायेण नूनं परितः सुषुम्णा-काण्डं च तच्छादिकलाऽन्तराले
क्रमाल्लसीकामतिपूयतुल्यां-संहृत्य दोषान्निखिलान्प्रकोप्य ॥३॥
चेष्टावहनाडिकाव्रजाना-मत्युत्तेजनहेतुतो जनानाम् ।
बह्वाक्षिपदङ्गकानि शाखाः-संकोच्य प्रणिहन्ति चेतनां च ॥ ४ ॥
आक्षेपकगदस्यैषा-संप्राप्तिर्बुधनिश्चिता ।
प्रायेणात्र नृणां लोके, जीवितं दुर्लभं भवेत् ॥ ५ ॥

तस्य रूपम्—

उग्रा पीडा जायते यस्य शीर्ष्णि-च्छर्दिः शैत्यं जातु चित्क्षेपथुश्च ।
ग्रीवास्तम्भोऽपि प्रसह्याथ शीर्ष-पश्चाद् यत्राकृष्यतेऽङ्गाऽऽमये तु ॥६॥
गच्छन्त्यङ्गान्येव संकोचभावं-स्यातां वक्रे चक्षुषी नूनमेव ।
शाखाः स्तब्धाः सन्ति वृद्धिर्ज्वरस्या-जस्रं प्रायो लक्ष्यते स्पष्टतोऽपि॥७॥
तन्द्रा मोहोऽपि प्रलापोऽथ शश्वत्-स्यादाक्षेपो गात्रमध्ये जनानाम् ।
नूनं रक्तश्यावलक्ष्मोद्भवश्च,-नाशो जाये-तेन्द्रियाणां क्रमेण ॥ ८ ॥

आक्षेपकज्वरभवं निखिलं तु चिह्न-
मेतन्मतं सुभिषजां गदितं मयेत्थम् ।

स्यात् यत्र रोगिपुरुषे स मृतो भवेदे-
काहाच्च कश्चिदथवा त्रिदिनाद्‌द्वयम् ॥ ९ ॥
एवं किलद्वयँस्त्रिचतुरदिनान्येव सप्ताहमद्धा
कश्चिद्वाऽसून्नियतिवशतः प्रायशः संजहाति ।
कश्चित् पूर्वार्जितसुकृतितः सच्चिकित्साप्रसङ्गा-
ज्जीवेदाक्षेपकपदयुते-न ज्वरेणार्दितोऽपि ॥ १० ॥

इति माधवनिदानपरिशिष्ट आक्षेपकज्वरनिदानं समाप्तम् ।

## अथ दण्डकज्वरनिदानम् ।

तत्रादौ दण्डकज्वरस्य परिचयः—

विशिष्टमशकोद्भवो जगति दण्डकाख्यो ज्वरः-
सदाऽस्थिनिचयं नर-स्य परिपीडयन्निर्भरम् ।
स्थितिं मुनिमितान्यहा-नि विदधाति नित्यं तनौ
ततो निगदितो ज्वरो मुनिभिरेष सप्ताहकः ॥ १ ॥

एनं चौङ्गय्-फीवरं त्वाङ्ग्लभाषा-विज्ञा वैद्या दण्डकाख्यं ज्वरं च ।
अस्थ्नां नूनं भञ्जनं भूमिमध्ये संभाषन्ते नामधेयैरमीभिः ॥ २ ॥

दण्डकज्वरपूर्वरूपम्—

यदा मानवस्याङ्गमध्येऽङ्गमर्दः-क्लमश्चारुचिर्दृश्यते दैवयोगात् ।
अथोत्क्लेशसादौ तदा दण्डकाख्य-ज्वरस्याग्ररूपं जनैर्वेदितव्यम् ॥३॥

दण्डकज्वररूपम्—

अस्थ्नां सन्धिषु घोरा-दण्डाहननजसमा पीडा ।
क्षिप्रोदयलयशाली-समस्ततनुगोऽपि वीसर्पः ॥ ४ ॥
संचारि सन्धिशूलं-शोथयुतं लक्ष्यते यत्र ।
ज्वरमध्येऽपि च कासः-कण्ठे पीडा प्रतिश्यायः ॥ ५ ॥
पुनरावर्त्तनशीलो-मुञ्चत्यष्टाहतो ज्वरो यत्र ।
सन्धिरुजाश्चिरकालं-सन्ति वदन्ति च दण्डकज्वरं तम् ॥६॥
प्रायो जनपदजन्मा-कफमारुतकोपजातनिजवर्ष्मा ।
बालानामथ जरतां-जातो दारुण उदीरितो धीरैः ॥ ७ ॥

इति माधवनिदानपरिशिष्टे दण्डकज्वरनिदानं समाप्तम् ।

## अथ कर्णमूलिकज्वरनिदानम् ।

पूर्वं भवेदेकतरे हि पार्श्व-कर्णस्य शोथो ज्वरकृद्रुजावान् ।
ततो द्वितीयेऽनुपदं भिषग्वरै-र्गदः स उक्तो भुवि कर्णमूलिकः ॥१॥
अस्मिन् रोगे कर्णमूलस्थिता वा-जिह्वाऽधःस्था ग्रन्थयोऽधोहनुस्थाः ।
नूनं शूयन्ते ततः पञ्चभिर्वा-षड्भिर्घस्रैरेष शान्तिं प्रयाति ॥ २ ॥
पुंसो भूयो मुष्कयोर्वै रुजाऽथो-शोथो जायेत क्वचिद् योषितस्तु ।
योनौ वक्षोजातयोस्तौ दशाहात्-प्रायःशाम्यन्त्यत्र सर्वे विकाराः ॥३॥
अयं ज्वरो वातकफोद्भवस्तथा-विशेषतो जानपदः प्रदृश्यते ।
प्रवर्त्तते प्रायश एव यूनां-किंवा शिशूनां ननु कर्णमूलिकः ॥ ४ ॥
शीर्षकलायामपि च क्लोम्नि-शोथश्चार्दितमप्यध्यवनि ।
ज्वरे कर्णमूलिकपदवाचि-सद्भिरुपद्रव एषोऽवाचि ॥ ५ ॥

इति माधवनिदानपरिशिष्टे कर्णमूलिकज्वरनिदानं समाप्तम् ।

---

## अथ माल्टाज्वरनिदानम् ।

माल्टाज्वरस्य परिचयः—

ज्वरः प्रागयं माल्टाद्वीपमध्ये-निवासं प्रकुर्वत्सु मर्त्येषु नूनम् ।
अभूल्लब्धनैजोद्भवस्तेन चास्य-प्रसिद्धिर्भवे माल्टासंज्ञयैव ॥१॥

तस्य निदानम्—

गदस्यास्य कीटाणवो बिन्दुतुल्या-कृतिं धारयन्तो रुजाऽऽर्त्ताऽजासु ।
पयस्यालयं स्वे प्रकुर्वन्त एते-विदध्युर्गदार्त्तान् सदा तत्प्रसक्तान् ॥२॥
क्वचिच्चाजमर्त्येक्ष्यते सन्निमित्तं-मलं वाऽथ मूत्रं च रक्तं हि पित्तम् ।
तथाऽऽवालवृद्धेभ्य एषोऽत्र नूनं-समानां प्रवृत्तिं विधत्तेऽप्यनूनम् ॥३॥

तस्य संप्राप्तिः—

अजादुग्धपानादिना रोगकीटा—णवस्त्वन्नमार्गेण चान्त्रं प्रविष्टाः ।
ततः शोणितं चोपगम्यातिदुष्टं-समुत्पादयन्ति ज्वरं तौ विशिष्टम् ॥४॥
ततश्चोदरस्थां कलामास्थितांस्तान्-लसीकासमुत्पादने सिद्धहस्तान् ।
अपि ग्रन्थिराशीनशेषानवश्यं-स्वयं शूनयन्ति प्रसह्य प्रशास्यम् ॥५॥

माल्टाज्वरस्य रूपम्—

गदे माल्टानामके नाम नूनं-सदाऽऽरोहते स्वैरमुष्णो ज्वरोऽपि ।

शिरोरुक् तथावाङ्गमर्दो वमिश्चा-प्यथोत्क्लेश उत्पद्यते रोगिवर्गे ॥६॥
कदाचिद् भवेत्कण्ठदाहः क्वचिच्च-प्रतिश्यायकासप्रकाशोऽप्यवश्यम् ।
प्रवृत्तिः परं स्वेदराशेर्ज्वरस्या-वरोहे सशोथा रुजा सन्धिदेशे ॥७॥
अपि प्लीहवृद्धिस्तथा कोष्ठजाता-महाबद्धता स्याद्धि माल्टाज्वरेऽस्मिन्।
प्रभेदाश्चतुःसंख्यकाश्चास्य सद्भि-र्निदानैकविद्भिर्भिषग्भिः प्रदिष्टाः ॥८॥
तत्र प्रभेदो मृदुराद्य उक्तः-साधारणः स्यात्तदनु द्वितीयः ।
ततस्तृतीयो विषमश्चतुर्थो-ज्ञेयः सदा दारुण इत्थमेव ॥९॥

प्लीहाऽभिवृद्धिरुदिता तु मृदौ ज्वरेऽस्मिन्-
साधारणे निखिललक्ष्मसमुद्भवः स्यात् ।
किंचास्य मध्यसमयोऽथ तदैधतेऽद्धा-
भेदे भवेद्धि विषमे विषमाऽपि वेगः ॥१०॥
येन ज्वरस्य हि दशोषसि शान्तरूपा-
मध्येदिनेऽपि च भवेदिह सोग्ररूपा ।
तेनैव तस्य नियतं ननु तापमानं-
संलक्ष्यते गदिनि पञ्चषयुक् छतं वै ॥११॥
सायं ज्वरस्तु सहसा बहुशो जनानां-
प्रस्वेदनिर्गमनतो विलयं प्रयाति ।
एवंविधा ज्वरदशा विषमाऽत्र भेदे-
स्यात् सर्वसंधिषु विशेषरुजाऽपि नूनम् ॥१२॥
उग्रे ज्वरो भवति चोग्रतमः शरीरे-
भूरिप्रचण्डपिडकापरिदर्शनं स्यात् ।
दाहोऽपि फुप्फुसकलागत एव चाती-
सारो विपद्यत इहाशु गदी दशायाम् ॥ १३ ॥

इति माधवनिदानपरिशिष्टे माल्टाज्वरनिदानं समाप्तम् ।

---

## अथ कालज्वरनिदानम् ।

तस्य निदानम्—

आनूपदेशेषु महीजबाष्पात्-प्रायेण नृणां कृमिकारणाच्च ।
कालज्वरः कालसमः किलायं-जायेत तल्लक्षणमुच्यतेऽग्रे ॥१॥

तस्य संप्राप्तिः—

जीवाणवस्त्वस्य गदस्य नूनं-मज्जान्त्रयोर्मुष्कजकोशमध्ये ।
अभ्यन्त्रभित्त्यस्थन्यधिफुप्फुसं वै-प्रायो यकृत्प्लीहगता वसन्ति ॥२॥
प्लीहा यकृच्चैवत एव नून—मनारतं ते क्षुभिते विशेषात् ।
स्यातां च ते सौत्रिकतन्तुयुक्ते-ज्वरामयेऽस्मिन्ननु कालसंज्ञे ॥३॥

तस्य रूपम्—

गदेऽस्मिञ्ज्वरः पूर्वमेवाविसर्गी-प्रवर्त्तेत यावत्त्रिसप्ताहमद्धा ।
क्वचिद्रोगिमध्येऽधिकं वा ततो वै-सदाऽऽरोहसत्ताऽवरोहैः स्थितः स्यात् ४
विमुच्य कालं किल कं चिदेव-मावर्त्तते रोगिजनेषु भूयः ।
पूर्वोदितैर्लक्ष्मभिरन्वितः सन्-प्रायेण कालज्वर आमयोऽयम् ॥५॥
एवं द्विवारागमनेन नॄणां-रक्ताल्पतां प्रत्यहमाचरेच्च ।
स्वेदस्य बाहुल्यमथाङ्गमध्ये-प्रायेण हस्ताङ्घ्रिणि च प्रपीडनम् ॥६॥
ज्वरस्तु मन्दत्वमुपागतस्तदा-भवेत्स्थिरो रोगितनौ सुनिश्चितम् ।
विपाण्डुताऽपि ग्रहणी च कामला-प्रजायते चोर्ध्वगरक्तपित्तम् ॥७॥
तथा क्वचित्स्यादपि रोमकूपिकं-कराङ्घ्रिवक्त्रेऽपि च शोथसंभवः ।
ध्रुवं हि सद्यःफलदं चिकित्सितं-विनाऽमयोऽयं बहुकष्टसाध्यः ॥८॥

कालज्वरोपद्रवाः—

अरोचकच्छर्दियुतं मनुष्यं—क्षीणेन्द्रियं क्षीणबलं तथैव ।
क्षीणामिषं फुफ्फुसदाहयुक्तं-समन्वितं यक्ष्मजलक्ष्मजातैः ॥९॥
प्रवाहिकापीडितमप्यतीसा-राक्रान्तमेवंविधमेव वैद्यः ।
कालज्वरेणार्दितमन्तकस्या-ध्वगं विदित्वा न च तं चिकित्सताम् १०

इति माधवनिदानपरिशिष्टे कालज्वरनिदानं समाप्तम् ।

## अथाह्निकज्वरनिदानम् ।

नासापुटाभ्यन्तरगात्परक्त-वर्णो भवेद् यत्र गदे तु शोथः ।
तथा ज्वरो गात्ररुजासमेतः-स आह्निकः श्लेष्मकृतो ज्वरः स्यात्॥१॥

इति माधवनिदानपरिशिष्ट आह्निकज्वरनिदानं समाप्तम् ।

## अथ श्लीपदिकज्वरनिदानम् ।

शाखासु मुष्कद्वितयेऽपि रागं-शोथं रुजां चाधिकमेव तन्वन् ।

पक्षान्तभावी बहुशो ज्वरो यो-वैद्यैरिह श्लैपदिकः स्मृतः सः ॥ १ ॥

इति माधवनिदानपरिशिष्टे श्लैपदिकज्वरनिदानं समाप्तम् ।

## औपद्रविकज्वरनिदानम् ।

प्रायेण जीर्णेषु गदेषु सर्व-ष्वपि ग्रहण्यादिषु वै विशेषात् ।
यः संनिपातप्रभवो ज्वरः स्याद्-विद्यात्तमौपद्रविकाभिधं हि ॥१॥

इति माधवनिदानपरिशिष्ट औपद्रविकज्वरनिदानं समाप्तम् ।

## अथ देशान्तरीयज्वरनिदानानि ।

ये रक्तपीतादय एव युद्ध-खातादयोऽनेकविधा ज्वरास्तु ।
देशान्तरेषु प्रविलोकयमाना-स्ते लक्षणीयाः किल शास्त्रदृष्ट्या ॥१॥
अतो देशकालादिभेदानुसारै-रनेके ज्वरा दृश्यमाना नृलोके ।
विचिन्त्या यथावत्तदीयैः स्वरूपैः-सदा शास्त्रमालोक्य सर्वैः सुवैद्यैः ॥२॥

इति माधवनिदानपरिशिष्टे देशान्तरीयज्वरनिदानानि समाप्तानि ।

## अथ ग्रन्थिकज्वरनिदानम् ।

तस्य परिचयः—

ग्रीवाकक्षावङ्क्षणाद्ये लसीका-ग्रन्थिव्राते शोथरुक्कृज्ज्वरो यः ।
जातो घोरो देशविध्वंसकारी-वैद्यैर्नूनं ग्रन्थिकाख्यः स्मृतः सः ॥१॥
दण्डाकारास्तस्य कीटाणवो वै-मूलं प्रोक्तं मूषकोत्था भिषग्भिः ।
तद्भेदास्तु ग्रन्थिकः कीटरक्तः-संदृश्यन्ते फुफ्फुसौकप्रदाही ॥२॥

तस्य निदानम्—

भूम्ना रोगार्त्ताखुभी रोगयुक्त-स्थाने श्वासोच्छ्वासतः स्पर्शतोऽपि ।
सञ्चारेण प्रायशो नग्नपद्भ्यां-संक्रामन्त्येते तु पुंसः पुमांसम् ॥३॥
यदा मूषकस्थायिकीटः कथंचि-न्नरं संदशत्यत्र दंशात्तदानीम् ।
विनिःसृत्य कीटाणवस्तल्लसीका-वहासु प्रकुर्वन्ति संचारमेव ॥४॥
यदा ते ततो यान्ति तद्ग्रन्थिमध्ये-तदा क्षोभमायान्ति तद्ग्रन्थयोऽपि ।
चिकीर्षन्ति नाशं च कीटाणुजस्य-प्रकृत्या विरुद्धस्य नूनं विषस्य ॥५॥
ग्रन्थीनां वै कार्यवृद्धिप्रभावा-दस्मिन् कार्ये जायते तत्प्रवृद्धिः ।
किञ्चोत्पद्येत ज्वरस्तद्विषात्स-प्राप्तिः प्रोक्ता ग्रन्थिकस्येत्थमस्य ॥६॥

यदा ग्रन्थिमध्ये कदाचिन्न कीटा-णवस्ते विनाशं गता वा भवेयुः ।
तदा कीटरक्तत्वमेव ध्रुवं स्या-द्वस्थेयमुग्रा भृशं दारुणाऽपि ॥७॥
न शूनाः स्युरत्र क्वचिद् ग्रन्थयोऽङ्ग-विशेषस्थिताः किन्तु सर्वाङ्गजाता ।
मनागुच्छ्वसेयुः समस्ताः स्वतस्ता-त्वियं कीटरक्तस्य सम्प्राप्तिरुक्ता ॥८॥
कीटाणवः फुफ्फुसदाहका ये श्लेष्मादिभिस्ते बहिरागतास्तु ।
श्वासायनेनान्यनरस्य चान्त-र्गत्वा भवेयुर्ननु फुफ्फुसप्लुषः ॥९॥
इत्थं त्वियं फुफ्फुसदाहकस्य-ज्वरस्य च ग्रन्थिकनामकस्य ।
सम्प्राप्तिरुक्ता भिषगुत्तमैर्या-सा कष्टदायिन्यमिता सदोग्रा ॥ १० ॥

ग्रन्थिकज्वरस्य पूर्वरूपम्—

व्यथा शीर्ष्णि शैथिल्यमङ्गेषु सादो-मनोदैन्यमुत्क्लेशभक्तारुची च ।
ज्वरोक्तं च सामान्यतः पूर्वरूपं-भवेद् ग्रन्थिकाख्ये ज्वरेऽग्रोऽग्ररूपम्॥११॥

ग्रन्थिकज्वरस्य रूपम्—

तीव्रज्वरो भवति पूर्वमिह क्वचिद्वा-मन्दः शिरोरुगरती वमनं भ्रमश्च ।
उत्क्लेशगात्रशिथिलत्वतृषाप्रलापा-उन्मादमोहधमनीद्रुतगामिताश्च १२
मूर्च्छा तथा सततदुर्बलताऽथ निद्रा-नाशो नृणां नियतमित्यपि लक्ष्मजातम्।
कक्षाऽऽदिकावयवमध्यलसद्धसीका-ग्रन्थिव्रजस्य परितापनमप्यवश्यम् १३
ततस्तृतीयेऽहनि वा चतुर्थे-ग्रन्थिस्तु दृष्टाङ्गसमीपजाता ।
सुतीव्रवेगेन विवर्द्धतेऽद्धा-स्पर्शं न चेषत् सहते तु तत्र ॥ १४ ॥
तस्यां तु पाकोऽपि च पूयपूर्णता-चिरात् प्रजायेत सदैव रोगिषु ।
अक्ष्णोस्तथा स्याच्छ्वसोः प्रसुप्ति-श्चेष्टां न कांचिद्विदधीत रोगी ॥१५॥
अभिन्यासजातानि लिङ्गानि चान्या-न्यपीक्ष्यन्त एवानिशं रोगिवर्गे ।
भृशं कर्कशा दग्धतुल्या रसज्ञा-भवेत्स्रस्तभावं भजन्ती च नाडी ॥१६॥
द्वित्रैस्तथा पञ्चभिरेव षड्भिर्घस्रैः क्वचिद्वा दशभिः कदाचित् ।
सद्यः किलासून् विजहाति रोगी-चिराच्च सिद्धयत्यपि तत्र कश्चित् ॥१७॥
भवेद्वाहुजग्रन्थिजातो हि शोथ-स्तथा चात्र पाकः शुभोऽवश्यमेव ।
इदं ग्रन्थिकाख्यज्वरस्याद्यभेद-स्वरूपं यथावद् भिषग्भिः प्रदिष्टम् ॥१८॥

ग्रन्थिकज्वरस्य द्वितीयभेदस्य कीटरक्तस्य स्वरूपम्—

बहुग्रन्थयः कीटरक्ताख्यभेदे-ज्वरे ग्रन्थिके नापि वर्द्धन्त एव ।
भवेत्तत्र रक्तस्य दुष्टिस्तथा च-ज्वरस्यानिशं तीव्रता वै विशेषात् ॥१९॥

गतिर्नाडिकायाश्च दौर्बल्ययुक्ता-गदार्त्तस्य पुंसोऽतितीव्रा सदा स्यात् ।
तथाऽन्यानि संज्ञाप्रणाशादिकानि-त्रिदोषोद्भवानीह चिह्नान्यपि स्युः२०
गदी संयुतो लक्षणैरेभिरेव-द्रुतं दारुणामप्यवस्थामवाप्य ।
दिनैः पञ्चभिः सप्तभिर्वाऽपि नूनं-यमस्यालयं याति देहं विहाय ॥ २१ ॥
अतः प्रायशोऽसावसाध्यो भिषग्भिः-प्रदिष्टोऽत्र भाग्याद्विमुच्येत कश्चित् ।
इदं कीटरक्ताख्यभेदस्य रूपं-ज्वरे ग्रन्थिके वर्णितं सर्वदैव ॥ २२ ॥

ग्रन्थिकज्वरस्यान्तिमभेदस्य फुप्फुसप्लुषस्य रूपम्—

फुप्फुसप्लुषनामके निर्ग्रन्थिके भेदे भृशं-
श्वासमार्गं नूनमस्मिन्नेव संक्रमते विषम् ।
शीतपूर्वकदारुणज्वर आशु संजायेत हि-
शिरसि शूलमथाङ्गमर्दो भ्रमश्चोत्क्लेशोऽधिमहि ॥२३॥
उरोरुक्कसनादिजान्यन्यानि लिङ्गानि त्विह-
स्युश्च फुप्फुसकूजनं श्वासस्य तीव्रतया सह ।
कर्करायनमथ घनत्वं फुप्फुसे परिदृश्यते-
रक्तनिष्ठीवनमिहेदं लक्ष्मजातं लक्ष्यते ॥२४॥
वैद्यवर्यैरप्यसाध्योऽसौ सदा संभाषितः-
कश्चिदेव हि दैवयोगाज्जीवतीह चिकित्सितः ।
इत्थमत्र हि भेदयुक्तग्रन्थिकज्वरलक्षणं-
सर्वमेव निरूपितं प्रविधाय शास्त्रनिरीक्षणम् ॥ २५ ॥

ग्रन्थिकरोगस्योपद्रवाः—

कासोऽतिसारोऽप्यथ रक्तपित्तं-मूत्रावरोधो वमनं तथैव ।
उपद्रवा ग्रन्थिकनामकेऽस्मिन् ज्वरे त्वमी वैद्यजनैः प्रदिष्टाः ॥२६॥

ग्रन्थिकज्वरस्य साध्यलक्षणम्—

अनेका यदि ग्रन्थयः स्युः प्रजाता-
भवेदाशुपाकित्वमद्धाऽपि तासाम् ।
अथो बालको वा जरन् ग्रन्थिकाख्य-
ज्वरार्त्तस्तदा स्याद् गदोऽयं सुसाध्यः ॥ २७ ॥

ग्रन्थिकज्वरस्यारिष्टलक्षणानि—

सर्वेन्द्रियाणां मनसोऽप्यशेष-व्यापारनाशो यदि वाऽतिसारः ।

अत्युल्वणः स्यात्तु तदा सुधीभ्यो-ऽरिष्टं वदेद् ग्रन्थिकपीडितस्य ॥ २८ ॥
ष्ठीवेत् सुसिन्दूरसमोज्ज्वलं चेद्-रक्तं कफेनानुगतं तु रोगी ।
श्वासार्दितः फुप्फुसदाहयुक्त-स्तदाऽत्यसाध्यो नियतं सना स्यात् ॥२९॥
अग्रन्थिके ग्रन्थिकयोग्यलिङ्ग-समुद्भवः स्याद् यदि रोगिमध्ये ।
तदा तु तस्यान्तकसद्मयात्रा-ऽवश्यं भवेदित्यपि वेदितव्या ॥ ३० ॥
ग्रन्थिकज्वरमिमं तु के चन-प्रायशः सुभिषगाहृता जनाः ।
क्षुद्ररोगपठिताग्निरोहिणी-नामकामयमुदाहरन्ति नौ ॥ ३१ ॥

इति माधवनिदानपरिशिष्टे ग्रन्थिकज्वरनिदानं समाप्तम् ।

---

## अथ वातश्लैष्मिकज्वरनिदानम् ।

तत्र वातश्लैष्मिकज्वरस्य परिचयः—

यतः श्लेष्मजोपद्रवाः प्रायशोऽत्रो-द्भवन्ति त्रिदोषोत्थचिह्नैः सहाढ्या ।
भवेन्मुख्यता मारुतस्य स्मृतोऽसौ ज्वरः श्लेष्मको देशविध्वंसकारी ॥१॥
अयमागन्तुकरोगः-पूर्वैः पश्चान्निबद्ध्यते दोषैः ।
वातश्लेष्माधिक्याद्-वातश्लैष्मिक उदीरितः क्वापि ॥ २ ॥

वातश्लैष्मिकज्वरस्य भेदानाह—

साधारण-श्वसनका-न्त्रिक-वातिकाख्य-
भेदाच्चतुर्विध उदीरित एष रोगः ॥ ३ ॥

तस्य निदानम्—

कीटाणवोऽस्य हि गदस्य मरुत्प्रवाह-विस्तारिता जगति मर्त्यसमूहमध्ये।
श्वासायनेन लघु नॄन् ननु संक्रमन्ते-स्यादन्नमार्गत इमे क्वचनाशनाद्यात् ॥
एवं क्वचिच्च पटमाल्यमुखैः प्रकार-रेषां भवेदपि हि संक्रमणं कथं चिद् ४
पाश्चात्त्यनैद्यविसरैरणुवीक्षणेन-यन्त्रेण चातिनिपुणं बहुशो निरीक्ष्य ।
निर्द्धारितं सततमस्य गदस्य कीटा-णोर्दण्डवन्नियतरूपमतीव विज्ञैः॥५॥
यदा श्वासमार्गेण कीटाणवोऽस्य-प्रवेशं प्रकुर्युस्तदा ते गलं च ।
प्रणालीं तु वायोः परं दूषयन्तो-व्रजेयुर्ध्रुवं फुप्फुसौ सर्वदैव ॥ ६ ॥
तथा येऽन्नमार्गेण दैवाद्विशेयुः-समस्तं च ते सर्वथा तं रुजेयुः ।
क्वचिद्धातवो दूषितास्तैर्भवेयु-स्ततो रोगमेनं समुत्पादयेयुः ॥ ७ ॥
ततो धातुजातं समस्तं विषाक्तं-प्रकुर्वन्त एते नरान्मारयन्ति ।

मरुच्छ्लेष्ममुख्यं ज्वरं संनिपातं–सर्मप्राप्ति चेत्थं सुधीद्या वदन्ति ॥८॥
शिरःशूलमङ्गैकमर्दोऽथ कम्पः–कटीपृष्ठवक्षःस्थलेऽत्युग्रपीडा ।
प्रतिश्यायशैत्यावसादज्वराश्च–गलौकग्रहोऽल्पैर्दिनैर्भूरि कार्श्यम् ॥९॥
बलस्यापि हानिर्भृशं नाडिकाया–गतेर्नातिचाञ्चल्यमाभाति चात्र ।
समन्ताच्च रक्ताऽतिमालिन्ययुक्ता–रसज्ञाऽपि चोच्छूनतामाश्रिताऽत्र ॥
मरुच्छ्लैष्मिकस्य प्रभेदे तु साधा–रणे चिह्नमेतत् समस्तं मयेत्थम् ।
अभिज्ञैर्भिषग्भिर्यथैवोपदिष्टं–तथैवात्र हृद्यैः स्वपद्यैः प्रदिष्टम् ॥ ११ ॥

तत्र श्वसनकस्य रूपम्—

भेदे तथा श्वसनके सकलैः पुरोक्तै–रूपैः सहोद्भवति तीव्रतमोऽपि कासः।
निष्ठीवनं कफविमिश्रितशोणितस्य–श्वासप्रलापबहुशोणितवर्णताश्च ।
दृशेयं ज्वरस्यास्य विश्वस्तवैद्यैः–समस्तैर्भृशं दारुणोदीरिताऽपि ।
अतः सावधानेन सर्वोत्तमेन–चिकित्साप्रकारेण रक्ष्योऽत्र रोगी।॥१३॥

आन्त्रिकस्य रूपम्—

भवेदुद्भवोऽथान्त्रिकाख्यप्रभेदे–वमेर्वाऽतिसारस्य किंवा द्वयोश्च ।
तथोत्क्लेशशूलामयौ कामलाऽपि–क्वचिन्नूनमेवोद्भवेयुर्विशिष्य ॥१४॥

वातिकस्य रूपम्—

अथो वातिकाख्यप्रभेदे विशेषात्–प्रतिश्यायकासज्वरक्षीणताश्च ।
प्रलापो मनोऽस्थैर्यनिद्राविनाशौ–क्वचित् पक्षघातः प्रजायेत दैवात् १५
शीर्षावरणकदाहः–कृतसंनाहः क्वचिच्चैव ।
अवलोक्यत इह साधा–रणचिह्नैर्युत आमयान्वितेषु ॥ १६ ॥

वातश्लैष्मिकज्वरस्योपद्रवाः—

पक्षाभिघातो हृदयावसादः–पुनः पुनश्चाक्रमणं गदस्य ।
तथा प्रदाहो ननु फुप्फुसे स्यु–र्ज्ञेया इमे श्लेष्मकजा उपद्रवाः॥१७॥

इति माधवनिदानपरिशिष्टे वातश्लैष्मिकज्वरनिदानं समाप्तम् ।

---

## अथ सन्धिकज्वरनिदानम् ।

तत्रादौ संधिकज्वरस्य परिचयः—

भवेज्ज्वरो यो व्रणशोथपीडा–तोदैर्भृशं संधिगणं प्रपीडयन् ।
घोरोऽपि हृद्रोगयुतः स वैद्यै–रुदीरितः सन्धिकनामकोऽत्र ॥ १ ॥

तस्य संप्राप्तिः—

हेमन्तवर्षाशिशिरर्तुमध्ये-तथा वसन्तेऽपि च शीतकाले ।
क्लिन्नोष्णभूमिष्वविशङ्कमद्धा-ऽजस्रं जनानां भ्रमतामवश्यम् ॥२॥
तथैव बाल्ये नवयौवनेऽपि-प्रायेण जातेऽपचये बलस्य ।
भवेज्ज्वरो योषिदपेक्षयाऽयं-पुंसां च तत्रापि विशिष्य यूनाम् ॥३॥
लोके तु बिन्द्वाकृतिशालिनैज-कीटाणुहेतोर्जननं सुसिद्धम् ।
तथा गदस्यास्य हि सन्धिकाख्य-ज्वरेति नामापि सदा प्रसिद्धम् ४

तस्य संप्राप्तेः सविस्तरमवतरणम्—

गदस्यास्य कीटाणवो दैवयोगा-द्गलग्रन्थितो धातुमध्ये प्रविष्टाः ।
ध्रुवं वातपित्तोल्बणं सन्निपातं-शरीरे भृशं सर्वथोदीरयन्ति ॥ ५ ॥
ततोऽतिघोरं व्रणशोथमाशु ते-ऽधिसन्धि कुर्वन्ति समन्ततो नृणाम् ।
विदन्ति चेत्थं भिषजस्तु केचन-स्वबुद्धितः सन्धिकजातिरीदृशी ॥६॥
अथापरे तु ब्रुवते सुवैद्या-इदं शृणु त्वं ननु वक्ष्यमाणम् ।
विषं हि कीटाणुसमुत्थितं नृणां-गलाच्छरीरस्थितधातुमध्ये ॥७॥
कृतप्रसारं किल वातपित्तो-ल्बणं त्रिदोषं समुदीरयत् सत् ।
सुघोरमेव व्रणशोथमाशु-करोति सन्धीन् परितः प्रसह्य ॥ ८ ॥
मतद्वयं संप्रति सन्धिकाख्या-गताविदं चेत्थमिह प्रदर्शितम् ।
परन्तु तत्रादिमपक्षमुत्तमं-समाश्रयन् वच्म्यहमग्र एतद् ॥ ९ ॥
अथोपरिप्रोक्तनिमित्तजातैः-सन्धौ प्रयाते बहुशूनतां च ।
या श्लैष्मिकी सन्धिगता कला सा-प्रजायते शोथयुताऽम्बुपूर्णा॥१०॥
तद्धेतुतः स्यात्तरुणास्थिमूर्द्ध्वंसु-तथाऽस्थिबन्धेष्वखिलेषु शोथः ।
सन्धेरथाभ्यन्तर एधमानो-विद्यते पूर्णतया बलासः ॥११॥
विषप्रभावादपि शोणिताणवः-क्षीणा भवन्तीह विशेषतस्तु ।
न्यूनत्वमस्त्रस्य ततश्च हेतोः-श्वेताणुवृन्दोपचयोऽधिकं स्यात् ॥१२॥
हृदन्तिकस्थायिकलापुटेऽपी-भवेत्कृशं सञ्चय एव शीघ्रम् ।
तथा विकारा व्रणशोथजा हृदि-कपाटमध्ये हृदयस्य वा स्युः ॥१३॥
स्याच्छ्वासयन्त्रीयकलास्थशोथः-सव्ये हि पार्श्वे बहुशो गदेऽस्मिन् ।
लिङ्गैश्च कासश्वसनादिभिः सहा-क्रान्तं भवेत्फुफ्फुसमप्यवश्यम्॥१४॥

तस्य रूपम्—

गदे ज्वरः स्यात् सहसेह साधा-रणः स शीतेन विबर्द्धतेऽत्रा ।
अथाङ्गमर्दोऽपि च कण्ठदाहो-हृदि व्यथा स्वेदकृतं बहुत्वम् ॥१५॥
ग्रीवास्तम्भोऽथो गलग्रन्थिमध्ये-शूनत्वं स्यादल्पमूत्रत्वमेव ।
गुल्फे किंवा जानुदेशे कफोण्यां-नृणां प्रायेणैव बन्धे मणेर्वा ॥१६॥
रक्तः शोथो रौद्रलिङ्गाभ्युपेतः-स्पर्शं सोढुं चाक्षमोऽन्यत्र रोगी ।
देहे पीडा दुःसहा सन्धयोऽन्ये-पर्यायेणात्राभिभूयन्त एव ॥१७॥
पूर्वप्रोक्तैर्लक्षणैः सार्द्धमस्मिन्-रोगे वृद्धिर्जायते च ज्वरस्य ।
आषट्सप्ताहं गदस्यास्य कालः-प्रोक्तो वैद्यैः संप्रशाम्येत्तदन्ते ॥१८॥

तस्य साध्यासाध्यत्वं—

यत्र त्रिदोषभवलक्षणमध्यगानां-केषां चन क्वचन दर्शनमस्तु रोगे ।
किंवा हृदामयसमुद्भव एव तत्र-प्राणान्तकः स तु भवेदनुपक्रमाश्च ॥१९॥

कथं चिज्ज्वरमुक्तावपि हृद्रोगित्वम्—

कीटाणुसंभवविषस्य तथा चिकित्सा-नैपुण्यतो यदि हि संधिकरोगयुक्तः ।
जीवेत्परं ननु चतुर्दशवासरेभ्यः-किंवैकविंशतिदिनेभ्य इह स्वपुण्यैः २०
तत्रापि रोगमुक्तः सन्-हृदामययुतः पुमान् ।
भवेदेवेति विज्ञेयं-वैद्यवर्यैरशान्तिमान् ॥ २१ ॥

हृद्रोगस्य परिणामः—

सर्वैर्हृदामयसमागतदुःखजातं-प्रायोऽनुभूयत इह प्रसभं मनुष्यैः ।
शोथश्रमश्वसनकादिभिरर्द्यमानै-स्त्यज्यन्त आशु किल तै रसवो विशेषात् ।

अत्र वैशिष्टयम्—

प्रायो ज्वरे भवति संधिकनामकेऽस्मिन्-
यूनां तु संधिषु विक्षिप्य विकारवृन्दम् ।
तद्वन्नृणां हि हृदि बाल्यवयःस्थितानां-
वैशिष्टयमित्यपि विबोध्यमुदारवैद्यैः ॥ २३ ॥

सन्धिकज्वरस्योपद्रवाः—

शोथाः सदा हृदयफुफ्फुसशीर्षकण्ट-मध्यस्थिता अथ च तीव्रतरो ज्वरोऽपि ।
नूनं निदानविधिविज्ञवरैः सुवैद्यैः-ख्याता उपद्रवतयेति गदा इहैव ॥२४॥

सन्धिकज्वरे मतान्तरम्—

यः सन्धिकः संप्रति भाषितो मया-स एव कैश्चिज्ज्वर आमवातिकः ।
सिद्धान्तितः स्वीयधिया भिषग्भि-र्विज्ञेयमेतद् ध्रुवमत्र विज्ञैः ॥२५॥

इति माधवनिदानपरिशिष्टे सन्धिकज्वरनिदानं समाप्तम् ।

---

## अथ श्वसनकज्वरनिदानम् ।

तस्य परिचयः—

लाक्षारसप्रतिमरक्तमजस्रमेव-ष्ठीवेज्ज्वरेण बहुशः श्वसनेन युक्तः ।
स्त्यानो भवेदपि च फुप्फुसमूलभागो-यस्य स्मृतः श्वसनकज्वरपीडितः सः

तस्य निदानम्—

ये चान्नवस्त्ररहिता अपि दुर्बलाः स्युः-
श्रान्ताश्च दुःखितहृदो मनुजास्तु दीनाः ।
ये चाप्यजीर्णगदिनो बहुमद्यपा वा-
वृक्कस्य चापि यकृतो ननु शोथिनो वा ॥२॥

मिथ्याऽऽहारान् वा विहारानजस्रं-ये वा कुर्युर्नूनमेव प्रमादात् ।
तेषां प्रायः शीतवर्षाऽऽदिबाधा-हेतोः किंवा पूतिगन्धौकयोगात् ॥३॥
किंवाऽभीघातात् क्वचिद्व्याधिनाऽने-नार्त्तस्यापि प्रत्यहं संगमाद्वा ।
सर्वेष्वेवर्त्तुष्वसावुद्भवेच्च-प्रायः काले शैशिरे वा वसन्ते ॥४॥
किंवा वर्षासु ज्वरः प्रोक्तलिङ्गो-वैद्यैः प्रोक्तं नाम कोटाणवोऽस्य ।
नूनं मूलं जन्मनो नैकरूपा-ज्ञेयाश्चत्वारस्तु तत्र प्रधानम् ॥ ५ ॥
तत्राभिज्ञैर्दारुणास्तु त्रयोऽथो-तेष्वप्यन्त्यो दारुणोऽत्यर्थमुक्तः ।
इत्थं सर्वं प्राच्यपाश्चात्यरीत्या-सम्यङ् निर्दिष्टं निदानं किलास्य ॥ ६ ॥

तस्य भेदौ—

द्विविधः श्वसनकसंज्ञो-गदितो वैद्यैर्ज्वरस्तत्र ।
खण्डीयस्तु प्रथम-स्तथा द्वितीयः प्रणालिकः प्रोक्तः ॥७॥
अत्रैतच्च ज्ञेयं-द्वावपि फुप्फुसप्रदाहसंयुक्तौ ।
तत्रादिमस्य भेदा-विज्ञैः पञ्चैव संप्रोक्ताः ॥८॥
तत्र प्रथमः साधा-रण उत्क्रामकसंज्ञको द्वितीयः ।
अपि केन्द्रिकस्तृतीय-स्तदनु चतुर्थो बृहन्नामा ॥९॥

फुप्फुसावरणप्रदाहः पञ्चमः परिभाषितः-
स्युः प्रभेदा आदिमस्यामी विबोध्या बुद्धितः ।
तदनु द्वितीयस्यापि भेदौ मुख्यगौणविभेदतः-
कथ्यते तेषामथो जातिश्च रूपमशेषतः ॥१०॥

तस्य संप्राप्तेरवतरणम्—

आस्यतो गलतोऽणवोऽस्य श्वासपथतो रोगदाः-
फुप्फुसस्यान्तःप्रकोष्ठे-पूपयाता वै यदा ।
वातप्रणालीष्वपि विषस्य प्रभावमापाद्य हि तदा-
शोणिते विदधति घनत्वं सर्वदा ते दुःखदाः ॥ ११ ॥
शोणिते घनतामिते वामेऽथवा वामेतरे-
फुप्फुसे किंवा द्वयोरपि जायते शोथो ज्वरे ।
वक्ष्यते संप्रति विशेषश्चात्र।शृणु यदि कोष्ठगः-
शोथ आख्यातस्तदा खण्डीयनामविभेदगः ॥ १२ ॥
वातप्रणालीगामिशोथश्चेत्ततः स प्रणालिकः-
कथ्यते फुप्फुसप्रदाहः सद्भिरत्र श्वसनकः ।
ज्वरः पीडाश्वासकृच्छ्रत्वं च तत्र तु जायते-
नूनमुभयोरपि भिषग्भिश्चेति नियतं कथ्यते ॥ १३ ॥

श्वसनकज्वरस्य पूर्वरूपम्—

प्रायो ज्वरे श्वसनके ननु पार्श्वपीडा-श्वासोऽवसादकसने अपि कम्पनं च।
संदृश्यमानमितिलक्षणमग्ररूपं सर्वे गदन्ति भिषजो गदरूपविज्ञाः ॥१४॥

श्वसनकज्वरस्य स्वरूपम्—

ज्वरोऽतितीव्रः सहसैव शीते-न संप्रवर्त्तेत ततोऽतितृष्णा ।
अन्नारुचिः श्वाससमृद्धिरेधे-त पार्श्वशूलं कसनं क्रमेण ॥ १५ ॥
लाक्षारसाभं रुधिरं तु सान्द्रं-कासात्प्रवर्त्तेत मुहुः कफाढ्यम् ।
श्वासेन संस्फूर्जत एव नासा-पुटौ सदा श्वासगतिस्तु तीव्रा ॥१६॥
कपोलभागेऽपि च रक्तिमा स्या-त्स्वेदो ललाटे परिदृश्यतेऽद्धा ।
स्विन्नानि गात्राणि भृशं भवेयु-र्निरन्तरं दुर्बलता प्रमोहः ॥ १७ ॥
सिद्धार्थकाभाः पिडकास्तनौ सं-दृश्यन्त एवापि च कण्ठकूजनम् ।
सादः प्रलापः परुषाऽपि जिह्वा-कार्कश्ययुक्ता मलिना भृशं च ॥१८॥

द्वैगुण्यमह्वाऽऽश्रयते गतौ तु-स्यात् कोमला स्थूलचला च नाडी।
यावज्ज्वरं भाति दशेयमस्या-ज्वरादिमुक्तावपि दुर्बलत्वम्।
प्रायेण सा संभजते मृदुत्वं-विनिश्चितं चेति विशेषतोऽत्र॥ २०॥
संख्या न चास्यां परिमण्यते गते-ररिष्टकाले किल केनचित् क्वचित्।
अमूनि लिङ्गानि भवन्ति प्रायः-प्रणालिकेत्याह्वयभेदमध्ये॥ २१॥

धातुमलपाकानुसारं तीव्रातीव्रलक्षणानुसारं वाऽस्य मुक्तिः—

सप्तमे दिवसेऽष्टमे वा प्रायशो नवमे क्वचिद्-
दृश्यते दशमेऽत्र सहसा ज्वरविमुक्तिः कुत्रचित्।
रोगिणो देहे तदैव स्वेदनिचयस्योद्गमः-
स्याच्च तेन हि रोगमुक्तिर्जातु वाऽसुविनिर्गमः॥२२॥

श्वसनकज्वरस्य साध्यासाध्यत्वम्—

एकस्मिन्नधिफुप्फुसं विधिवशाद्दुष्टे च मन्दे ज्वर-
देहे साधुतया स्थिते ननु बले पादत्रयेऽत्युत्तमे।
ज्ञातव्या सुखसाध्यता श्वसनकेनार्त्तस्य नुः सर्वदा-
स्वेदो यद्यधिको ज्वरोऽपि च भवेत्तीव्रोऽथ वृद्धो गदी॥२३॥
किंवा क्षीणतमस्तदा तु भिषजि द्रव्येऽथ भृत्ये शुभे-
शास्त्रप्रोक्तगुणान्विते सति कथंचिद्दैवयोगात् क्वचित्।
जीवेत् कश्चिदिहामयाविषु नरः सत्पुण्यपुञ्जान्वितः-
प्रायेणान्तकमन्दिराश्रितकगतिं प्राप्नोति चात्रान्यथा॥२४॥

श्वसनकज्वरस्यारिष्टानि—

यस्याक्रान्तौ फुप्फुसौ स्तः कदाचित्-किंवाऽप्येकः फुप्फुसोऽशेषतः स्यात्।
नासामध्ये श्वासशब्दो विशेषः-स्वेदोऽत्यर्थं जीवने तस्य शङ्का॥२५॥
स्वेदस्नातो यः प्रलापेन मन्दे-नोपेतः सन् पूरुषः प्रायशः स्यात्।
वेपेते वा यस्य हस्तौ च पादौ-नूनं प्राप्नोत्यत्र मृत्युं स रोगी॥२६॥
यो दुर्वारेणातिसारेण पूर्ण-माक्रान्तः सन् क्षीण एवाधिकः स्यात्।
कीनाशागारं यियासुं नरं तं-विद्याद्वैद्यः स्वल्पकालादवश्यम्॥२७॥

श्वसनकज्वरस्योपद्रवाः—

निद्रानाशोऽपि प्रलापोऽथ कम्प-स्तीव्रस्तापोऽत्यर्थमेवातुरस्य।
संज्ञाहानिः कार्यरोधो हृदोऽस्मिन्-ज्ञेया एते सर्वदोपद्रवा वै॥२८॥

इति माधवनिदानपरिशिष्टे श्वसनकज्वरनिदानं समाप्तम्।

## अथ क्लोमरोगनिदानम् ।

तत्रादौ क्लोमस्वरूपम्—

अग्न्याशयः संप्रति यः स वैद्यैः-क्लोमेतिनाम्नाऽऽधुनिकैर्निगद्यते ।
कुत्रास्ति प्राचीनभिषक्प्रदिष्टं-क्लोमेति नाद्याप्यवधारितं हि ॥ १ ॥
निरूप्यतेऽद्धाऽऽधुनिकानुसारि-क्लोमस्वरूपं सविशेषरूपम् ।
भागे तु दक्षे हृदयादधः स्यात्-क्लोम्नो निवासो विदुषां मतेन ॥ २ ॥
इदं तु नूनं सलिलप्रवाहि-सिरैकमूलं लपितं विशेषात् ।
तृष्णासमुत्पादनशालिचायु-र्वेदज्ञवृन्दैर्बहुशो निरीक्ष्य ॥ ३ ॥

क्लोमरोगनिदानम्—

क्लोम्नोऽभिवृद्धिर्मद्रुताऽथवाऽन्नैः-स्निग्धैर्भृशं वा गुरुभिः सुसेवितैः ।
किंवाऽभिघातादिभिरेव नूनं-संजायते मानवदेहमध्ये ॥ ४ ॥
किंचापि संघात इहास्त्रजातः-प्रदृश्यते विद्रधिराश्ववश्यम् ।
एवंविधा नैकविधास्तथाऽन्ये-रोगा भवेयुर्भृशदारुणाश्च ॥ ५ ॥

क्लोमरोगलक्षणम्—

अग्नेर्मान्द्यं पाण्डुता चापि कार्श्यं-भ्रान्तिः सादः स्यादथोर्ध्वोदरे तु ।
औष्ण्यं काठिन्यं तथोत्क्लेशवान्ती-क्लोमस्थायिन्यामये कामलाऽपि॥६॥
प्रजाते विकारे सदा विद्रधेस्तु-भवेदत्र शूलं तथाऽऽध्मानमेव ।
तृषा चाधिकाऽप्यश्मरीतुल्यरूपा-ऽतिघोरा शिला कष्टदायिन्यवश्यम् ७

इति माधवनिदानपरिशिष्टे क्लोमरोगनिदानं समाप्तम् ।

---

## अथौपसर्गिकविषूचीनिदानम् ।

तस्याः परिचयः—

पुरा या विषूची भिषग्भिः प्रदिष्टा-मता दोषसंबन्धयुक्ता सदा सा ।
इदानीं मया वक्ष्यते तूपसर्ग-प्रजाता विषूची महाघोररूपा ॥१॥
अयं लोकमध्ये तु मारीस्वरूपे-ण सर्वत्र रोगः प्रसारं व्रजेद्धि ।
प्रदृश्येत संक्रामकश्चाथ तत्रा-तिसारो वमिर्नम्नमत्यर्थमेव ॥२॥

अस्य निदानम्—

दण्डाकारास्त्वस्य कीटाणवः सं-प्रोक्ता नूनं मूलभूता भिषग्भिः ।
तेषां वासः प्रायशो रोगिणां स्या-दन्त्रे मूत्रे वा मले भाग्यदोषात् ॥३॥

अधिपित्ताशयमथवो-दरककलायां कदा चिदखिलासु ।
उद्भूतासु लसीको-त्पादनकुशलासु हि ग्रन्थिषु ॥४॥
प्रसरन्त्यस्य गदस्य हि-कीटाणव आन्त्रिकज्वरवत् ।
यान्ति विशेषाद् ग्रीष्मे-प्रावृषि पयसाऽपि ते प्रसारमत्र ॥५॥
इत्थं चायं रोगो-वस्त्रैर्भोज्यैर्विशेषतो मलिनैः ।
वस्तुभिरथ च स्थाने-र्नूनं यायाद्धि संक्रमणम् ॥६॥

तस्य संप्राप्तेरवतारः—

कीटाणवस्त्वन्नपथेन गत्वा-क्षुद्रान्त्रमध्ये समनुप्रविष्टाः ।
चेत्तत्र वृद्धिं बहुशो ह्यवाप्य-प्रसारयेयुर्विषमन्नमध्ये ॥ ७ ॥
तदा प्रजायेत विषूचिकेयं-भिषग्वरैरित्थमिहोपदिष्टम् ।
केचित्तु वैद्या गदहेतुविज्ञा-वदन्ति यत्त्वत्र शृणुष्व तत् त्वम् ॥८॥
क्षुद्रान्त्रमध्येऽनिशमेव तिष्ठद्-विषं विषूचीं जनयत्यवश्यम् ।
इत्थं विषूच्या भवतीह जन्मो-पसर्गजाया अतिदुःखदायाः ॥ ९ ॥
क्षुद्रान्त्रमध्ये तु ततः स्थितासु-ग्रन्थिष्वपि स्यान्ननु शोथजन्म ।
किंचोदरस्थायिकलालसीका-ग्रन्थिष्ववश्यं हि भवेत्तदेव ॥१०॥
ततो वमेरप्यतिसारतः स्याद्-विनिर्गमो वै तरलस्य तेन ।
घनत्वमात्यन्तिकमस्रमध्ये-जायेत रोगेऽत्र विषूच्यभिख्ये ॥११॥
ततो निमित्तेन तदा त्वनेन-विषप्रभावादपि वृक्कयुग्मे ।
मूत्रस्य निर्माणविधेर्निरोधः-संजायते रोगिजनेष्वजस्रम् ॥ १२ ॥
मूत्रप्रवृत्तिस्तत एव नात्र-संदृश्यते जातु चिदामयेऽस्मिन् ।
अन्तस्तु तापोऽथ बहिर्हि शैत्यं-न्यूनत्वतः स्यात्तरलास्रयोश्च ॥१३॥

विषूच्याः पूर्वरूपम्—

आदौ नाशश्चेत्क्षुधायास्तु तृष्णा-ऽऽधिक्यं हृल्लासो बलस्यापि हानिः ।
ओजोनाशश्चारतिः स्यात्तदा तु-ज्ञेयं नूनं पूर्वरूपं विषूच्याः ॥ १४ ॥

विषूच्या रूपम्—

क्वचिच्चातिसारो वमिः स्याद् गदेऽस्मिन्-क्वचित् केवला वा वमिर्दृश्यतेऽपि ।
तथाऽन्यत्र सामान्यमुक्तं विषूच्याः समस्तं बुधैर्लक्षणं ज्ञेयमत्र ॥ १५ ॥
स्वरूपं च साध्यस्य किंवाऽप्यसाध्य-स्य बोध्यं बुधैर्दोषजाया विषूच्याः।
यथा भाषितं वैद्यवर्यैस्तथैवो-पसर्गोद्भवायाश्च कृत्स्नं विशेषात् ॥१६॥
गदस्यास्य चात्यर्थमुग्रे स्वरूपे क्षणादेव मृत्युर्भवेन्मानवस्य ।

गदे दारुणे चेदृशे तु प्रजाते म्रियन्ते नरो रोगिणोऽद्धाऽप्यसंख्याः ॥१७॥
अनुग्रेऽपि रूपे क चिद् यान्ति भीत्या-गदे पञ्चतामत्र नूनं मनुष्याः ।
बुधैः कैश्चिदस्याः स्वरूपं चतुर्द्धा-सुखेनावबोधार्थमुक्तं विशेषात् ॥१८॥

उपसर्गजविषूचिकायाः पूर्वावस्था—

हृच्छूलमादौ तु भवेद्गदेऽस्मिंस्ततो वमिश्चाप्यतिसार एव ।
तत्रापि पूर्वं सरणं मलस्य भुक्तस्य च च्छर्दनतस्तथैव ॥ १९ ॥
तत्पश्चादतिसार-स्याथ वमेः स्याच्च पीतवर्णत्वम् ।
तदनु तयोरपि तण्डुल-जलसन्निभता भिषग्भिरिह कथिता ॥२०॥

द्वितीयावस्था—

चिह्नानि यानीह पुरोदितानि भवेयुरद्धा द्विगुणानि तानि ।
आक्षेपतृष्णाऽरतयश्च तीव्रा-भुक्तं तथाऽन्नं न पचेच्च किं चित् ॥२१॥

तृतीयावस्था—

द्रवातिसाराद्बहुशोऽत्र रक्तं-गाढं भवेद् देहभवं तु नूनम् ।
क्षीणेन्द्रियः क्षीणतनुप्रभोऽति-दीनो नरो हीनबलः सदैव ॥२२॥
स्याच्छीतदेहोऽपि च नेत्रमन्त-र्गतं स्थिरं तस्य च शीर्णवाक्त्वम् ।
नीलौष्ठताऽन्यैरपि घोररूपै-श्चिह्नैर्युतत्वं यमसद्मपान्थता ॥ २३ ॥

तुर्यावस्था—

यदाऽन्तकग्रासविमुक्तदेहो-व्रजेदवस्थां तु गदी तुरीयाम् ।
तदाऽस्य पूर्वोक्तसमस्तलिङ्गा-नि वैपरीत्यं नितरामियुः ॥ २४ ॥
यदा जातु चिद् रोगिदेहे ज्वरः स्यात् तथा च प्रवर्त्तेत मूत्रं हि सम्यक् ।
स्थिरत्वं प्रयायाच्च नाडी तदा तू-पसर्गप्रजाता विषूचीह साध्या ॥२५॥
भयाद्विस्तृतेः ख्यापनं चात्र तेषां समासेन किञ्चित् कृतं तेन सद्भिः ।
तदीयप्रबन्धे च तज्ज्ञानमद्धाऽधिगन्तुं प्रबन्धो विधेयो भिषग्भिः ॥२६॥

इति माधवनिदानपरिशिष्ट औपसर्गिकविषूचिकानिदानं समाप्तम् ।

---

## अथोरस्तोयनिदानम् ।

तस्य निदानपूर्विका संप्राप्तिः—

ज्वरादिष्वसावानुबन्ध्येन रोगा-प्रजायेत किंवा क्वचिद् गुप्तरोगैः ।
क्वचिच्चाभिघातादिभिर्वा निमित्तै-र्विलोकयेत लोके नरेष्वत्र बाह्यैः ॥१॥
उरस्तोयनामामये प्रायशोऽस्मि-न्नुरस्येकपार्श्वेऽथवा पार्श्वयोर्वै ।
भवेत् संचयोऽद्धा जलौघस्य धातो-रपि प्राणहृत् पूर्णतो यः प्रदिष्टः ॥२॥

उरस्तोयस्य रूपम्—

श्वासस्य कृच्छ्रत्वमथो कफस्या-स्रावः पिपासाऽङ्घ्रिगतश्च शोथः ।
नीलत्वमास्ये रदनच्छदेऽधो-मूत्रप्रवृत्तिर्बहुमन्दवेगात् ॥ ३ ॥
कृच्छ्राच्च मात्राऽल्पतया विशेषा-दत्यन्तसूक्ष्मा द्रुतगामिनी स्यात् ।
नाडी नितान्तं विषमा नरस्य-ध्रुवं शयानस्य न सौख्यलेशः ॥ ४ ॥
आसीन एवापि सुखी कथंचि-द्भवेद्रुदी तेन नितान्तकृच्छ्रः ।
सदा ह्युरस्तोयपदाभिधानो-गदो भिषग्भिर्गदितोऽयमद्धा ॥ ५ ॥

इति माधवनिदानपरिशिष्ट उरस्तोयनिदानं समाप्तम् ।

---

## अथ फुप्फुसावरणप्रदाहनिदानम् ।

अस्य परिचयः—

उरस्तोयसंज्ञे गदे यन्निमित्तं-पुरा ख्यापितं तत्र तेनैव चात्र ।
समुत्पादयेयुः प्रदाहं तु कीटा-णवः फुप्फुसाच्छादिकायां कलायाम् ॥१॥
प्रसारं च लब्ध्वाऽत्र तद्वत्तु ते त-रलेनैव नूनं कलां फुप्फुसीयाम् ।
सदा पूरयेयुस्ततस्तस्य शोषो-द्विधा दृश्यते रोगिमध्ये विशेषात् ॥२॥
भवेत्तत्र चाद्यस्तु संपूर्णशोषी-द्वितीयो ह्यसंपूर्णशोषी प्रभेदः ।
तयोर्नैद्यवर्यैः प्रदिष्टं च साधा-रणं लक्षणं प्रोच्यते सर्वमग्रे ॥ ३ ॥

अस्य लक्षणम्—

गदेऽस्मिन् भवेत् पार्श्वशूलं च कासो,ज्वरोऽन्तः सशोथप्रदेशप्रपीडा ।
शयानः सदा रुग्णपार्श्वेन रोगी-सुखं सर्वथा संलभेत प्रकामम् ॥ ४ ॥

इति माधवनिदानपरिशिष्टे फुप्फुसावरणप्रदाहनिदानं समाप्तम् ।

---

## अथ स्मरोन्मादनिदानम् ।

तस्य निदानम्—

यश्चोन्मादः प्रायशः पूरुषस्या-प्राप्तेः प्रेयस्याश्च रेतोविकारात् ।
किंवोपस्थस्येन्द्रियस्यापि दोषाद् वैगुण्याद्वा मारुतस्यात्र नौ स्यात्॥१॥
अनेन प्रकारेण नार्या यदि स्या-दवाप्तेरभावात् प्रियस्यापि पुंसः ।
अथोन्माद एभिर्निमित्तैः पुरोक्तैः स एवोदितोऽत्र स्मरोन्मादरोगः ॥२॥

तस्य लक्षणम्—

स्मरोन्मादरोगे भवेत्स्तब्धताऽथ-प्रलापस्तथा कम्पनं श्वास एव ।
तनौ पाण्डुता रोदनं चाप्यधैर्य-परं चिन्तनं प्रेयसो वा प्रियायाः ॥३॥

तस्य दश दशाः—

आदौ चक्षुःप्रीतिरुक्ता ततः स्या-च्चिन्ताऽऽसक्तिश्चाथ संकल्प एव ।
निद्राच्छेदः कार्श्यताऽथो निवृत्ति-र्भोगात्सर्वस्मात्सदैवेन्द्रियाणाम् ॥४॥
लज्जानाशोन्मादमूर्च्छाश्च मृत्यु-र्मताः संख्याता दशास्तु स्मरस्य ।
आक्रम्यन्ते चाभिरत्यल्पसत्त्वा लोका अस्मिन् दुर्बलात्मान एव ॥५॥

इति माधवनिदानपरिशिष्टे स्मरोन्मादनिदानं समाप्तम् ॥

## अथ भ्रमोन्मादादिनिदानम् ।

भ्रमोन्माद एवं जडोन्माद उग्र-स्तथा यौवनोन्माद आलोक्यते यः ।
नृलोके तु गर्भप्रसूत्यादिजाता इहोन्मादरोगा अनेके च ये स्युः ॥ १ ॥
समेषां भवन्त्येव चिह्नानि तेषा-मवस्थाऽनुसारेण भिन्नानि यानि ।
अतो बुद्धिमद्भिस्तु सद्भिर्भिषग्भिः स्वया प्रज्ञया वेदितव्यानि तानि॥२॥

इति माधवनिदानपरिशिष्टे भ्रमोन्मादादिनिदानं समाप्तम् ।

## अथ तत्त्वोन्मादनिदानम् ।

पूर्णं भाग्यं सर्वथाऽहो मदीयं प्राप्ता पूर्णा ब्रह्मणो यत् कृपाऽद्य ।
एवंरूपो यो भ्रमोत्थो हि मोहो वैद्यैस्तत्त्वोन्माद इत्युक्त एव ॥ १ ॥
तत्त्वोन्मादो हर्षमौढ्यं च तस्य सर्वत्रैव ब्रह्ममोहो नृलोके ।
नामान्युक्तान्येष सद्भिर्वृथाधी-जातो व्याधिर्भाषितो व्याधिविद्भिः ॥२॥
तद् ब्रह्मास्ते कुत्र वा किंस्वरूपं नो जानात्येतत्त्वहो कोऽपि किंचित् ।
नूनं सर्वदर्शनैर्वा पुराणै-र्नासं यस्माद् ब्रह्मणो दर्शनं हि ॥ ३ ॥
एकेशकर्तृकमिदं निगदन्ति विश्वं केचिद्बुधा अथ निरीश्वरमेव चान्ये ।
ब्रह्माण्डमेतदखिलं बहुधा वृथैव ब्रह्मप्रतर्कवशतो वसुधातलेऽस्मिन् ॥४॥
मानं दुरूहमिह भाति सदैव सत्ता-यां ब्रह्मणोऽथ च दयाऽऽद्यपि दूर आस्ताम्।
निर्णीतमत्र न कदा चन केन चित्तद् निर्णयमप्यनिशमेव न चेत्यवेहि ॥५॥
ब्रह्मन् मदर्थमिदमद्य विधेहि नूनं किंचाप्यरातिमधुना जहि मेऽरमेतम् ।
वित्तं प्रदेहि शुचिकीर्त्तिमपि प्रदेहि निष्कण्टकं विततराज्यमिह प्रदेहि ॥६॥
पीनोन्नतस्तनवतीं सुदतीं मृणाल-बाहुं विशालनयनां सुकुलां सुशीलाम् ।
रम्भोरुमप्यविरतं रसिकावतंसां नर्मप्रियां स्मरकलाकुशलांसु मध्याम्॥७॥
तन्वीं तथा मदनुगां स्मितशोभितास्यां सर्वाङ्गसुन्दरतनुं तनुमध्यभागाम् ।
बिम्बाधरां श्रुतिमनोहरवाग्विलासां देहि प्रियां सकलदेहिजनप्रियां मे ८

न ब्रह्म चेत्थमलमर्थनमात्रतोऽति-भीतं ससंभ्रममभीप्सितमप्यनूनम् ।
संपादयिष्यति सदेति विमूढबुद्धेः संसारमध्यपतितस्य च ते तु नूनम् ॥९॥
कांचित् कदाचन च ते सफलाऽर्थना स्या-च्चेत्प्रार्थितेषु विषयेष्वखिलेषु तेषु।
जानीहि तत्तु कलितं ननु काकतालीयं ब्रह्म नैव किल तत्र निमित्तमीषत् १०
न ब्रह्म हृष्यति तव स्तुतिभिः कदाचि न्न द्वेष्टि वाऽविरतनिन्दनतोऽपि जातु।

अस्यास्तिवादिमनुजोऽतिप्रियोऽथ नास्ति-
वादी जनो नहि भवेत् क्वचनाप्रियोऽपि ॥ ११ ॥

जायेत वाऽऽदरमतिर्नहि पण्डितेऽस्य मूर्खे जने नहि कदाचिदनादरोऽपि ।
नास्योद्भवेदपि भयं धनिनः सकाशा न्नोत्पीडनप्रकृतिरीषदतीव निःस्वे १२
म्लेच्छे श्वपाककुलजे श्रुतिपारगे वा विप्रेऽपि मद्यपजने गणिकाप्रसक्ते।

किंवाशुचावपि शुचौ पृथुकेऽथ वृद्धे
किंवाऽधिवेश्यमखिलास्विव समस्तलोके ॥ १३ ॥

सर्वत्र संस्थितवदत्र हि विश्वरूपं ब्रह्मैव भाति बहुशस्तु सनातनं वै । १४
एवंविधस्य ननु तस्य जगत्समस्त-मेतद्विधानमिह मत्प्रमदाय बोध्यम्१
तत्त्वेन चोन्मादयति यस्तु तत्त्वो-न्मादस्ततस्तस्य गदोऽयमुक्तः ।
प्रायः स दुर्बुद्धिमतां च नीचा-स्मनां कदाचिन्महतामपि स्यात् ॥१५॥

तत्त्वोन्मादनिदानम्—

अतिप्रगाढान्ननु चेतसोऽसौ धर्मादिमध्येषु वृथाग्रहाच्च ।
मरुत्प्रकोपादनिशं तु तत्त्वो-न्मादः प्रजायेत गदो विचित्रः ॥ १६ ॥

तत्त्वोन्मादस्य लक्षणम्—

प्रमूढताऽतिस्थिरता तथाऽस्मि-न्नस्पन्दता स्याच्च कनीनिकायाम् ।
उन्मीलितं चक्षुरतो निरन्तरं ह्युन्निद्रताऽथो बहुवाग्मिताऽद्धा ॥ १७ ॥
दम्भोग्रभावा वपि चातिहासो विक्षेप उन्माद उदाररोदनम् ।
एवंविधानि स्युरिमानि तत्त्वो-न्मादे तु चिह्नान्यखिलानि नूनम् ॥१८॥

इति माधवनिदानपरिशिष्टे तत्त्वोन्मादनिदानं समाप्तम् ।

---

## अथ ताण्डवरोगनिदानम् ।

तत्रादौ तस्योपोद्घातः—

सुगन्धिपुष्पै रसवत्फलैर्नगैः समन्विते सिद्धमहर्षिसेविते ।
निनादरम्यद्विजवृन्दनादिते हिमाचले श्वापदसंकुलेऽमले ॥ १ ॥

मनोहरे सच्छिखरे सनिर्झरे विराजमानं वटमूल आसने ।
समस्तविज्ञाननिधिं मुनीश्वरं नितान्तमायुर्विदुषामधीश्वरम् ॥ २ ॥
तपःप्रभादीप्तकलेवरं गुरुं दयालुमात्रेयमुरश्च आदरात् ।
कृताञ्जलिश्चार्त्तनरानुकम्पया प्रशान्तचेता इति साऽब्भाषत ॥ ३ ॥
अभूत्कथं चात्र जनिस्तु ताण्डवा-मयस्य चिह्नानि च कानि तस्य ।
कथं प्रतीकारमिहाचरेज्जन-स्तदीयमेतत्कृपयाऽखिलं वद ॥ ४ ॥
इमामधिश्रुत्य तदर्थनां वरा-मृषीश्वरो धीरतरोऽत्युदारः ।
तमात्मशिष्यं प्रति शिष्यवत्सलो-ऽब्रवीदिदं व्यक्तपदार्थवद्वचः ॥ ५ ॥

ताण्डवरोगस्य निदानम् ।

आत्रेय उवाच—

प्रीतोऽस्मि हे वत्स ! तवातिभक्त्या यच्छ्रोतुमिच्छस्यधुना ब्रुवे तत् ।
इदं तु दक्षाय पुराऽवदज्जगत् पितामहो लोकहिताय हर्षितः ॥ ६ ॥
चिरन्तनातङ्कपरानुबन्धतो बलक्षयात्क्रोधमुदोः प्रकर्षतः ।
क्रिमेश्चयात् स्वप्ननिरोधहेतुतः प्रकर्षणादुच्यतिविड्विबन्धतः ॥ ७ ॥
आशाऽतिघातादधिकाभिघातात् स्त्रीणां विशेषेण रजोविकारात् ।
अत्युग्रभावान्ननु पृष्ठवंशे कशेरुकाभञ्जनमुद्भवेद् यत् ॥ ८ ॥
स देहिनां दुःखकरः परः सदा गदोऽगदङ्कारवरैरुदीरितः ।
अकाण्डमेवाङ्गकदम्बताण्डवात्प्रचण्डरीत्या ननु ताण्डवाह्वयः ॥९॥
कैशोरके वयसि प्रायश एष योषा-मध्ये विशेषत इहातिजराऽऽतुराणाम् ।
नृणां बलापचयतो नितरां प्रजाये-त्तैवामयोऽतिभयदायितया प्रसिद्धः १०

ताण्डवस्य स्वरूपम्—

आरभ्य वामभुजतः प्रथमं तु प्रायः संजायते तदनु चापरबाहुमध्ये ।
संचाल्य तौ तदनु पादयुगं ततोऽङ्गा-न्येवं प्रचालयति ताण्डवरोग एषः ११
तेनामयी न किमपीह हि मुष्टिमध्ये द्रव्यं निधातुमपि पारयति प्रयत्नैः ।
नो वा समर्पयितुमात्ममुखे कदाऽपि भक्ष्यान्नमीषदपि ताण्डवपीडिताङ्गः १२
नृत्यन्निव प्रचलति प्रसभं विशेषाद् बीभत्सनैकविधचेष्टितमास्यसंस्थम् ।
संदर्शयन्नतिचलः सततं च तिष्ठे-न्निद्रादशामनुभवन्न भवेत् सकम्पः ।

इति माधवनिदानपरिशिष्टे ताण्डवरोगनिदानं समाप्तम् ।

## अथ महागदनिदानम् ।

अस्य पर्यायाः—

महागदस्यैव हि यानि नामा न्युक्तानि लोके सकलानि तानि ।
आकर्णनीयानि भवद्भिरद्धा संकीर्त्यमानानि मयाऽधुनाऽत्र ॥ १ ॥
अतत्त्वाभिनिवेशोऽस्मिन्-नपदार्थगदस्तथा ।
विक्षिप्तता गदोद्वेगो महागद उदीरितः ॥ २ ॥
सदा गदोद्वेगत एव भिन्नो-महागदोऽयं बहुभिस्तु मन्यते ।
परन्तु भेदोऽत्र हि सूक्ष्मदृष्ट्या-ऽवलोकनात्कश्चन न प्रदृश्यते ॥३॥
यतो गदोद्वेगवदत्र बुद्धि-र्महागदे स्याद्विषमा विशेषतः ।
स्यादप्यभिव्याप्त इहामये महा-गदे गदोद्वेग इति प्रबोध्यम् ॥४॥
सुखावबोधाय तथाऽपि रोग-निदानलिप्साऽन्वितमानसानाम् ।
नृणां विशेषादिह वर्ण्यते मया-तयोः पृथग्लक्षणमप्यशेषतः ॥ ५ ॥

तत्रादौ महागदस्य वर्णनम्—

निरन्तरं दुर्मलिनान्नभोजिनो-निगृह्णतः प्राप्तसमस्तवेगान् ।
स्निग्धैश्च रूक्षैरपि चोष्णशीता-दिकैर्निमित्तैरतिमात्रसेवितैः ॥६॥
दोषाः प्रदुष्टा हृदयं समाश्रिताः-शिरा मनोबुद्धिवहाः प्रदूष्य ।
तिष्ठन्ति पश्चाद्रजसाऽथ मोहे-नैवावृते चात्मनि सत्यवश्यम् ॥ ७ ॥
तथा च बुद्धौ मनसि प्रवृद्ध-रजस्तमोभ्यामतिमात्रमावृते ।
दोषैरथ व्याकुलिते हृदि स्या-न्नरो विमूढो बहुशोऽल्पचेतनः ॥ ८ ॥
करोति बुद्धिं विषमां च नित्या-नित्ये पदार्थेऽपि हिताहिते तु ।
चिह्नैरमीभिर्नियतं महागदं-वैद्या अतत्त्वाभिनिवेशमाहुः ॥ ९ ॥

गदोद्वेगस्य वर्णनम्—

अन्यन्तदुर्बलतया मनसोऽथ मस्ति-ष्कस्यातिसंभ्रमवशान्ननु मानवानाम् ।
नूनं वृथा विविधकल्पनयैकजातः-ख्यातो स आमय इहाद्य शृणुष्व तं त्वम् १०
उपर्युक्तहेतुप्रजातामयो वै-गदोद्वेगसंज्ञो भिषग्भिः प्रदिष्टः ।
तदीयं स्वरूपं च शास्त्रानुरूपं-यथावन्मया प्रोच्यते साधु सर्वम् ॥११॥
विना व्याधिना व्याधिशङ्का यदि स्यात्-तदा तं गदोद्वेगमेवात्र विद्यात्
पदार्थस्य राहित्यतः सर्वथा सोऽ पदार्थो गदो भाषितः संज्ञयाऽद्धा॥१२॥

गदोद्वेगस्य निदानम्—

शारीरिकश्रमवशान्मनसः श्रमाद्वा नैराश्यतोऽपि वशुचो बलहानितो वा।
मानस्य हानित उदारभयाच्च सत्त्व-हानेस्तथैव विषबीजसमुत्थदोषात्१३

गदोद्वेगसंज्ञो गदो जायतेऽसौ–निदानं त्विति प्रोक्तमत्रार्यवैद्यैः ।
अतीवाद्भुतस्यास्य रोगस्य–चिह्ना–न्यथाग्रेऽद्भुतानीह कृत्स्नं शृणुष्व १४
गदेऽस्मिन् भवेद् यस्य रोगस्य चिन्ता–नरे लक्षणं तस्य जायेत नूनम् ।
गदी कोऽपि मन्येत नैजोदरेऽत्र–प्रविष्टं कथं चिद् ध्रुवं गूढपादम् ॥१५॥
भ्रमन्तं च तं खाद्यमानं हि तेन–स जानाति सर्वं प्रभुक्तं स्वमन्नम् ।
निरेष्यत्ययं किं कथं वा पथाऽथो–विनङ्क्ष्यत्युपायेन केनेह नूनम् ॥१६॥
न जाने करिष्यत्ययं किं विघात–र्भवेयं न दष्टः कदाचिच्च तेन ।
मदीयोदरस्थस्य चास्य प्रणाशः–प्रयत्नेन केन ध्रुवं संभवेद्वा ॥१७॥
निमित्तेन चानेन मृत्युर्मदीयो–भविष्यत्यवश्यं च दुर्दवयोगात् ।
सदा तर्कयन्नित्थमेवात्मनि स्वे गदार्तोऽश्नुते दुःखमत्यर्थमत्र ॥ १८ ॥
प्रजानाति कश्चित्स्वमस्तिष्कमध्ये–प्रविष्टं च कं चित्किर्थंचिद्धि भेकम्।
स भित्त्वा मदीयं च मस्तिष्कमाशु–हनिष्यत्यवश्यं नु मामित्यजस्रम् १९
तनुं मन्यते काचरूपां च कश्चित्–स्वकीयामतस्तस्य रक्षाऽर्थमेव ।
प्रकामं करोति प्रयत्नं स नूनं–मुधाऽनेकरूपाभिरेवंविधाभिः ॥२०॥
सदैवाकुलः प्रायशो भूरिचिन्ता–भिरार्तो गदोद्वेगरोगेण भीतः ।
सुखं चाप्नुवन्नैव किंचित् कचिद्दै-प्रशुष्येदिवारात्रिमध्ये विशेषात्॥२१॥
न शक्नोति स प्रायशःसान्त्ववाक्यै-र्भृशं सान्त्वितोऽभीक्ष्णमप्यात्मचित्तात्
निराकर्तुमद्धा भ्रमं पूर्वमुक्तं–सुयुक्त्याऽपि दूरीकृतं वा कदा चित् ॥२२॥
तव भ्रान्तिरेषेति योऽस्मै गदेद्वा–स तस्मै सदा क्रुध्यति भ्रान्तचित्तः ।
य एतद्विचारानुसारेण रोगा–नुमोदी स तस्मै ध्रुवं रोचतेऽपि ॥ २३ ॥
रुजा चातिकष्टप्रदा तस्य पक्वा–शये लक्ष्यते श्लेष्मणा संततं हि ।
प्रलिप्ता रसज्ञा तथा श्वासमध्ये भवेत् पूतिगन्धो गदेऽस्मिन् विशेषात्२४
वमिः स्यादथोत्क्लेश एतत्तु सर्वं ध्रुवं लक्षणं जीर्णतायाश्च बोध्यम् ।
अथ स्पर्शशक्तेश्च तीक्ष्णत्वमत्रा–नुभूयेत केनापि रोगार्दितेन ॥२५॥
जलोदरादेरुदरामयस्य वा–विपाण्डुताया हृदये निरन्तरम् ।
सांघातिकस्यापि गदस्य कश्चित्–करोत्यतीवानुभवं गदीह ॥ २६ ॥

क्वचित्पुरुषताक्षयो भवति रोगिणि प्रायशः-
क्वचिच्च सततज्वरो–दय उदारदुःखप्रदः ॥
क्वचिच्च किल कम्पना–दिकमलं गदोद्वेगिनि-
ष्विति प्रकृतितोऽप्यने–कपरिकल्पनासम्भवाः ॥ २७ ॥

भवन्ति बहुशोऽनिशं-भ्रममयाश्च ये त्वामया-
निरन्ततमसत्त्वव-स्त्वपि विशिष्टमूलेष्विह ।
न केन चन भाषितुं निखिलरूपतस्तान् क्वचित्
क्षमेण ननु भूयते तत उदारवैद्यैः स्वयम् ॥ २८ ॥
तदीयपवनप्रभृत्यखिलदोषरूपानुसा-
रिलक्षणनिरीक्षणात्सततमेव बोध्याश्च ते ।
गदोऽयमुपजायते क्व चन नैव कैशोरके
न वा जरसि वै निमित्तमिह भाति चेतोगतिः ॥ २९ ॥
रजःप्रसेकात्प्रतिमासमद्धा स्त्रिया विशुद्ध्यत्यथ धातुवृन्दम् ।
अतो नहि प्रायश एव तस्यां मनोगदस्यास्य समुद्भवः स्यात् ॥३०॥

इति माधवनिदानपरिशिष्टे महागदनिदानं समाप्तम् ।

---

## अथागन्तुजपक्षवधनिदानम् ।

तत्रादौ संख्यासम्प्राप्तिमाह—

भिषग्भिर्गदितो दोषा-गन्तुकारणतो द्विधा ।
विशेषतः पक्षवध-स्तत्राद्यो दोषजः पुरा ॥ १ ॥
वातव्याधौ विनिर्दिष्टो-ऽधुनाऽऽगन्तुज उच्यते ।
सोऽपि कारणभेदेन-प्रोक्तो वैद्यैश्चतुर्विधः ॥ २ ॥
तत्राद्यो रससंजातो-द्वितीयो नागजः स्मृतः ।
इन्द्रियोत्थविकारोत्थ-स्तृतीयस्तु ततो मतः ॥
व्यापारिकविकारोत्थ-श्चतुर्थः परिकीर्त्तितः ॥ ३ ॥

रसहेतुजपक्षवधनिदानमाह—

अनारतं यत्र भवेद् रसस्य सं-स्पर्शोऽधिकस्तद्गतधूमसेवनम् ।
तत्रोद्गमः पक्षवधस्य चेत् स्यात् तदा स वैद्यै रसहेतुजः स्मृतः ॥४॥

रसहेतुजपक्षवधमाह —

बलप्रणाशो भुजयोस्तु पूर्वं-ततः प्रकम्पोऽथ च सक्थिमध्ये ।
स्याद्वेपनं नूनमतः परं तु-प्रकम्पनं सर्वशरीरवर्त्ति ॥ ४ ॥
द्रव्यं ततो नैव दृढं ग्रहीतुं-किञ्चित् क्वचिद्रोगिजनः क्षमेत ।
न व्यक्तरूपेण हि वक्तुमीष-न्न चर्वितुं च प्रभवेत् कदा चित् ॥५॥

नृत्यं प्रकुर्वन्निव च प्रगच्छे–न्निद्रालुता तस्य ततः प्रकम्पः ।
बलप्रणाशोऽनलमन्दता चो–त्क्लेशोऽपि लालासरणं रदच्युतिः ॥६॥
एतानि चिह्नानि भिषङ्मतानि–स्युः पक्षनाशे रसहेतुजाते ।
संधारितेऽङ्गेऽत्र करादिभिः स्या–त्कम्पस्य शान्तिर्गदिनोऽपि नूनम्॥७

अथ नागहेतुजपक्षाघातनिदानमाह—

चित्रादिकर्माणि सदैव नागैः–कुर्वन्ति ये शिल्पिजना अगत्या ।
किंवा भवेत्सीसकर्सनिबद्धा–वृत्तिर्यदीया प्रतिवासरं हि ॥ ८ ॥
ये चापि मोहादथवा कुवैद्यै–रशुद्धनागोद्भवभस्म दत्तम् ।
अदन्ति दैवादिह तेषु नूनं प्रजायते नागजपक्षवातः ॥ ९ ॥

अथ तस्य लक्षणमाह—

आदौ समारभ्य तुरङ्गुलीभ्यो व्याप्नोति नूनं मणिबन्धमेषः ।
उक्तो गदानामतिदारुणोऽपि–प्रायेण नागैकनिमित्तजातः ॥१०॥
जायेत दौर्बल्यमतीव तत्र–प्राधान्यतो लक्ष्म तथांऽसदेशे ।
प्रकोष्ठमध्येऽपि च तोद एव–स्यात्स्रंसनं बाहुयुगेऽप्यवश्यम् ।
शूलञ्च नीलत्वमपीह दन्त–वेष्टे भवेन्नागजपक्षवाते ॥ ११ ॥

अथेन्द्रियोत्थविकारोत्थपक्षाघातनिदानमाह—

मस्तिष्कस्य गतिक्षेत्रे–सुषुम्णाशीर्षकेऽथवा ॥ १२ ॥
शोथोऽर्बुदं तथा रक्त–स्रुतिः क्षीणत्वमेव च ।
अथवा तत्समीपस्था–वयवस्य च शूनता ॥ १३ ॥
स्याच्चेत्तेन गतिक्षेत्र–तन्तूनां त्रुटनं भवेत् ।
किंवाऽवरोधस्तस्मात्तु–गत्यभावोऽभिजायते ॥ १४ ॥
ततः पक्षवधो जाये–तेन्द्रियोत्थविकारजः ।
पूर्वोक्तान्येव लिङ्गानि ज्ञातव्यानीह सूरिभिः ॥ १५ ॥

व्यापारिकविकृतिजपक्षाघातमाह—

व्यापारिकविकारोत्थ–पक्षाघाताभिधे गदे ।
गतिक्षेत्रे न विकृतिः परिदृश्येत का चन ॥ १६ ॥
किन्तु मानसिकक्षेत्रे–सैवालोक्येत केवला ।
गत्यर्थं मनसाऽऽज्ञप्तं गतिक्षेत्रं क्षमं यतः ॥ १७ ॥
ततो मानसिकक्षेत्रे विकृते तद्ददाति नो ।
गतितन्तुभ्य आज्ञां तौ यस्माद्भवति किं चन ॥ १८ ॥

काय नहि शरीरेऽस्मिन्-अत एव प्रजायते ।
शैथिल्यं मांसपेशीनां पक्षाघातामयप्रदम् । १९ ॥
एवं च पक्षाघातीय-लक्ष्मसंघातसंभवः ।
स्यादतोऽयं गदः कष्ट-प्रदः प्रोक्तो हि मानसः ॥ २० ॥

इति माधवनिदान परिशिष्टे आगन्तुजपक्षाघातनिदानं समाप्तम् ।

---

## अथाचलवातनिदानम् ।

यथैव संस्थया जनो-विमोहमाप्नुयाद्धि चेत् ।
ततोऽप्यनन्तरं तथैव च स्थितिं लभेत वै ॥ १ ॥

सा क्लेशकारिण्यपि चेत्स्थितिः स्यात्-तदा स रोगोऽचलवातनामा ।
निदानविद्भिर्बहुशो भिषग्भिः संकीर्त्तितोऽथापरिवर्त्तकोऽपि । २ ॥

अपि चाचलसंस्थाना-ह्वयस्तथा तादवस्थ्यगदनामा ।
इत्यभिधानचतुष्टय-मुक्तं विज्ञैः क्रियावशतः ॥ ३ ॥
वातागतेश्चापरिवृत्तिहेतो-स्तथासमस्थानत एव नूनम् ।
चतुर्विधं नाम च पूर्वभाव-स्थितेः कृतं वैद्यवरैः सहेतुकम् ॥४॥

अस्य निदानम्—

संचिन्तनाद्वाऽतिभयात्तथा च-संक्षीणधातुत्वत एव लोके ।
क्षयाद्धि सत्त्वस्य च बीजदोषा-दुत्पद्यतेऽस्वाऽचलवातरोगः ॥ ५ ॥

अस्य लक्षणम्—

स्पर्शाज्ञत्वं दृढता-पेशीनां स्यादचेष्टितं नियतम् ।
आक्षेपेण विना वै-मूर्च्छाऽचलवातसंज्ञके रोगे ॥ ६ ॥
प्राक् संस्थया तु गदिनः-स्थितिरित्यस्य विशेषचिह्नमुक्तम् ।
श्वासाधिक्यं जातु-क्षुद्रत्वं स्याद्धमन्यां वै ॥ ७ ॥
प्रागूरूपेण विनैव-व्याधेः सहसोदयोऽप्यत्र ।
ग्रीवास्तम्भः शूलं-शिरसि कदाचिच्च चेतसश्चलता ॥ ८ ॥
इति संक्षेपेणाचल-वातनिदानं निदानबुधसिद्धम् ।
माधवनिदानपरिशि-ष्टे सुस्पष्टं विनिर्दिष्टम् ॥ ९ ॥

इति माधवनिदानपरिशिष्टेऽचलवातरोगनिदानम् ।

## अथ स्नायुशूलनिदानम् ।

तत्रादौ तस्य परिचयः—

स्नायुष्वथवा शश्वत्-तच्छाखासूपजायते घोरा ।
पीडा प्राणपीडनी-गदिता सा स्नायुशूलाह्वा ॥ १ ॥

व्याधेः स्थानम्—

सदा मस्तकस्याथ बाह्वोश्च सक्थ्नो-
स्तथाऽन्यस्य चाङ्गस्य नूनं जनानाम् ।
त्वचानिम्नभागस्थितस्नायुमध्ये
गदोऽयं भवेत् स्नायुशूलाह्वयोऽत्र ॥ २ ॥

प्रजायेत वै प्रायशोऽङ्गेषु सर्वे-ष्वयं तीव्रप्राणप्रपीडाप्रदायी ।
विशिष्टाङ्गजातस्य चास्याभिधेया-न्यपि स्युर्विशिष्टानि शिष्टोदितानि ३
क्रमादूर्ध्वभेदस्तथैवार्धभेदो-ह्यधोभेद एवामयानां समेषाम् ।
नृणां मुण्डमुण्डार्धकस्फिग्भवानां-भवेयुर्भवेऽमूनि नामानि नूनम् ॥४॥

ऊर्ध्वभेदस्य निदानम्—

बलक्षीणतातोऽथ रक्तक्षयाद्वा-नृणां वृक्कमस्तिष्कयोर्दोषतोऽपि ।
अजीर्णाच्च दन्तामयादूर्ध्वभेदा-भिधः स्नायुशूलो गदो जायतेऽत्र ॥५॥

तस्य लक्षणम्—

ललाटे पुटेऽक्ष्णोऽप्यधोभागमध्ये-तथैवाधिगण्डं च दन्तच्छदे वा ।
रदे वाऽधरे शूलवद्दाहवद् र-सनापार्श्वमध्ये भवेद् वेदना या ॥ ६ ॥
सुघोरा भविष्णुर्भृशं चैकपार्श्वे-क्रमेणैधिनी चास्यसंबन्धिभागे ।
सदैवोर्ध्वभेदाभिधोदीरिता सा-ऽगदङ्काररत्नैर्नूत्नैर्विविच्य ॥ ७ ॥

अस्यानुपशयः—

भृशं स्पर्शनाच्चातिशीतस्य वायो-र्विवर्द्धेत देहप्रकम्पाच्च नूनम् ।
विकाशात्तथा स्नायुभेदस्य रोगो-भवेदङ्गभेदे विशेषान्नृदेहे ॥ ८ ॥

अर्द्धभेदस्य निदानम्—

सदैवार्द्रभूमिस्थितेश्चातिशीता-निलैर्बन्धतो वा बलक्षीणतातः ।
प्रजायेत दुष्टस्य वातस्य नीर-स्य वा सेवनादर्द्धभेदो गदोऽयम् ॥९॥

तस्य लक्षणम्—

भवेद् वेदना व्याप्य याऽर्द्धं मुखस्या-निशं मण्डले तीव्ररूपा जनानाम् ।
अपि प्रायशो वामपार्श्वे प्रजाता-ऽर्द्धभेदो गदः सा प्रकीर्त्येत वैद्यैः॥१०॥

व्यथेताशुगेनेव विद्धं शिरोऽद्धा-नृणां दारुणं तीव्ररूपेण पूर्णम्।
कदाचित् क्रमं चावलम्ब्य प्रशस्तं-विरामो महान् वा प्रजायेत चात्र ११
अपि प्रायशो योषितामेष रोगो-वपुष्येव जातः प्रदृश्येत लोके।
वयःस्थेऽथ वा यौवने वाऽस्य भूम्ना-भवेदुद्भवोऽस्यामयस्य स्वभावात्१२

अधोभेदस्य निदानम्--

सदा विड्विबन्धाच्छ्रमाच्छीतयोगा-त्तथा वाऽऽमवाताच्च दौर्बल्यतोऽद्धा।
अथार्द्रस्थलावस्थितेर्गर्भदोषा-दधोभेदनामोपजायेत रोगः॥ १३॥

तस्य लक्षणम्—

अधिस्फिक् तथा चोरुजानुस्थसन्ध्योः-पदे पश्चिमे वा क्वचिच्चाधिजङ्घम्।
प्रजायेत यच्छूलमुच्येत वैद्यै-रधोभेदनामा गदो वै तदेव॥ १४॥
भवेत्प्रायशः सक्थिन सर्वत्र चैक-तरे रात्रिमध्ये बली शूल एषः।
अपि प्रौढ एव प्रजायेत भूम्ना-वयस्यामयः स्याद्धधोभेदनामा॥ १५॥

इति माधवनिदानपरिशिष्टे स्नायुशूलनिदानं समाप्तम्।

---

## अथ हृद्यन्त्ररोगनिदानम्।

तत्रादावावरणिकलक्षणम्—

वृक्कस्य दोषादपि चामवातात्-तथाऽऽर्द्रशीतस्थलसन्निवासात्।
हृत्कोष्ठसंबन्धिकलाविभागे-जायेत रोगो भृशदारुणोऽयम्॥ १॥
रोगेण चानेन कला तु तत्र-प्रपीड्यते सत्वरमेव नूनम्।
तेनोष्णता स्यादथ शोथदाहौ-तथोष्णता दुर्बलता च गौरवम्॥२॥
श्वासस्य कृच्छ्रत्वमतीव पीडा हृत्कोष्ठकम्पः कसनं विशेषात्।
नासापथेनास्रमपि स्रवेच्च--शाखासु शोथोऽनलमन्दताऽपि॥ ३॥
भवेत्तु विषमा गतिर्यदि हि नाडिकायाः क्वचिद्-
धृदावरणिकस्तदा निगदितो गदः कोविदैः।
चिकित्स्यत इह द्रुतं स किल जातमात्रः सदा
ऽन्यथा मरणदो नृणां भणित एव चोपेक्षया॥ ४॥

कोष्ठयकहृद्यन्त्ररोगलक्षणम्—

सदाऽभिघातादथवाऽऽमवाता-त्तथैव पूर्वोदितलक्षणाद्धि।
प्रजायते हृद्गतकोष्ठमध्ये-यतस्ततः कोष्ठयक एव उच्यते॥ ५॥
अस्मिन् गदे स्यादरुचिर्ज्वरोऽथो-वैवर्ण्यमङ्गेऽनलसंक्षयोऽपि।

श्वासोऽथ कम्पः कसनं च दाहो-यस्माऽधिकोष्ठं ननु पूयसंचयः ॥६॥
आक्षेपमूर्च्छे अपि च प्रलापो-नूनं धमन्या विषमा गतिश्च ।
अस्माद्गदाद् घोरतरात्कदाचिद्-विमुच्यते कोऽपि गदी तु दैवात् ॥७॥

पृथुकहृद्यन्त्ररोगलक्षणम्—

मिथ्यानिजाहारविहारहेतो-र्हृत्कोष्ठमध्येऽस्त्रगतिर्यदैव ।
स्याद् व्याहता तर्हि समस्तपेशी-हृदः प्रयायात्पृथुतामवश्यम् ॥८॥
ततश्च हृत्कम्पनदुर्बलत्वा-न्यपि स्युरद्धा हृदये तथैव ।
श्वासस्य कृच्छ्रत्वमथो भ्रमश्चा-रतिः प्रमोहः पृथुकामये हृदः ॥९॥

आयामिकहृद्यन्त्ररोगलक्षणम्—

स्याद् विस्तृतिर्हृदयकोष्ठगता तु यस्मि-
न्नायामिकः स गदितो गद आमयज्ञैः ।
प्रायेण दारुणतया परिवर्णितेऽस्मिन्
मूर्च्छा भ्रमः श्वसनहृद्द्रुतवेपथू च ॥ १० ॥
शून्यत्वमप्यवयवेष्वनलस्य मान्द्यं हानिर्बलस्य पललस्य परिक्षयोऽपि।
उन्निद्रताऽथ सलिलोदररोगजन्मा-न्यानि स्युरत्र हृदयामयलक्षणानि ११

परिक्षयहृद्यन्त्ररोगलक्षणम्—

क्षयाद् यतो जायत एष रोग-स्ततोऽतिघोरः कथितः परिक्षयः ।
हृत्कोष्ठपेश्या इह संक्षयः स्याद् भ्रमोऽवसादोऽपि च दुर्बलत्वम् ॥१२॥
श्वासोऽग्निमान्द्यं हृदयप्रकम्पः-शोथस्य नूनं क्रमिकाभिवृद्धिः ।
जायन्त एतानि परिक्षयेऽस्मि-स्तथाऽपरेऽपि स्युरुपद्रवाश्च ॥ १३ ॥

मेदःसूत्रहृद्यन्त्ररोगलक्षणम्—

यदा तु हृत्कोष्ठगतेषु मांस-सूत्रेषु मेदःकणसञ्चयः स्यात् ।
तदा गदज्ञानविदा स मेदः-सूत्राभिधेयो गदितो गदोऽत्र ॥ १४ ॥
अस्मिन् गदे स्याद्धृदयप्रकम्पो-मन्दाऽवलोकयेत गतिश्च नाड्याः ।
मूर्च्छाऽवसादो नियतं भ्रमश्च-बलक्षयोऽलं किल नाडिकानाम् ॥ १५ ॥
अन्ते हृदोऽप्यावरणस्य नूनं-संभेदतः स्यात् सहसैव मृत्युः ।
सद्यश्चिकित्स्योऽयमतश्चिकित्सा-विधानदक्षैरतिदारुणो गदः ॥ १६ ॥

विक्षेपिकाहृद्यन्त्ररोगलक्षणम्—

हृदाक्षेपिका यत्र पीडा भवेद्व-स विक्षेपिकाख्यो गदः संप्रदिष्टः ।
प्रजातेऽत्र रोगेऽतिघोरे नृदेहे-स्वधोभागमध्ये ह्युरोऽस्थ्नोऽधिकोष्ठम् ॥१७॥

अथो वामबाहौ तथा वामभाग-स्थितांसास्थिमध्येऽपि पृष्ठप्रदेशे।
अधिग्रीवमुग्रा भृशं प्राणमर्म-प्रपीडिन्यवश्यं प्रजायेत पीडा ॥ १८ ॥
समाकर्षतोदौ तथा भेददाहा-वभीक्ष्णं च निःश्वासरोधोऽथ मोहः।
भृशं निर्गमः स्वेदशीरथाध्मा-नमानाहवैवर्ण्यकार्श्यान्यवश्यम् ॥१९॥
स्युरत्रारुचिश्चेन्द्रियाणां क्रमेण-प्रणाशोऽपि मृत्युं लभेताजिताक्षः।
मयेत्थं तु हृद्यन्त्ररोगोत्थितानि स्मृतानीह चिह्नानि चोक्तानि कृत्स्नम् २०

उपसंहारः—

स्युरेवं भृशं हृद्रदा दारुणा ये-सुसाध्यास्त एवात्र वैद्यैर्नवा ये।
तथा वर्जिताः सर्वदोपद्रवैर्वा-चिकित्साचतुष्पादवाप्तिप्रसङ्गात् ॥२१॥
अतोऽन्ये चिरोत्था निजोपद्रवैर्वा-युताः सर्वहेतुप्रजाताश्च ये स्युः।
क्रमेणैव कृच्छ्रास्तथा ते तु याप्या-असाध्या बुधैर्बोधिता नूनमेव ॥२२॥

इति माधवनिदानपरिशिष्टे हृद्यन्त्ररोगनिदानं समाप्तम्।

---

## अथ यकृद्रोगनिदानम्।

यकृतः परिचयः—

यकृतोऽवस्थितिरनिशं-दक्षिणतः स्यादधो हृदयात्।
तत्र तु विविधा रोगा-जायेरन् भूरिदुःखदा नियतम् ॥ १ ॥

यकृद्रोगनिदानम्—

मद्यातिपानादथ वेगरोधा-दत्युष्णगुर्वन्ननिषेवणाच्च।
स्वापाद्दिवा जागरतोऽथ रात्रा-वतिव्यवायादभिघाततो वा ॥ २ ॥
गुरून् पदार्थान् वहतां नराणां-सदैव मार्गक्रमणे रतानाम्।
तथाऽपरैर्घोरतरैश्च कर्मभि-र्भवन्ति नूनं यकृदुत्थिता गदाः ॥ ३ ॥

म्लानावस्थायां यकृतो लक्षणम्—

म्लाने यकृत्यथ भवेत् शकृत्प्रवृत्तिः-
पित्ताल्पताऽत्यतितृषाऽऽविलमूत्रता च।
देहस्य कर्दमसमप्रभताऽथ पाण्डु-
त्वाध्मानसादवमनान्यनलस्य मान्द्यम् ॥ ४ ॥
प्रातश्च तिक्तमुखता रसना मलाढ्यो-
द्गारो भृशं कठिनता धमनीगता स्यात्।
आकुञ्चिवद्धृदुरुजाऽपि वमेश्चिकीर्षा-

लिङ्गान्यमूनि नितरां ननु संभवेयुः ॥ ५ ॥

वृद्धिदशायां यकृतो लक्षणम्—

वृद्धिं गते यकृति चोरु रुजाऽप्युरोऽस्थिन
स्कन्धेऽधिदक्षिणमथापि च दक्षसक्थिन ।
जायेत जाड्यमपि दक्षिणबाहुमध्ये
वैवर्ण्यमप्यधिकृत् कसनं ज्वरश्च ॥ ६ ॥
तिक्तास्यताऽप्यरतिर्लोहितमूत्रते वा
हानिर्बलस्य तनुबद्धपुरीषताऽपि ।
पीताक्षताऽथ सततं शयनं तु सव्य-
पार्श्वेन चात्र गदिनः सुखलिप्सया स्यात् ॥ ७ ॥
निद्रानाशः कामला तोदभेदौ-दाहः शोथो जायते चात्र तृष्णा ।
प्राणघ्नो स्याद्विद्रधिर्नो यकृत्स्था-प्राणी मुच्येतात्र कश्चित् सुभाग्यात् ॥८॥

इति माधवनिदानपरिशिष्टे यकृद्रोगनिदानं समाप्तम् ।

## अथ वृक्करोगनिदानम्—

वृक्कस्य पूर्वरूपं—

निद्रानाशो वह्निमान्द्यं च शोथो नेत्रे चास्ये पादयोर्वृक्करोगे ।
नाडी स्तब्धा वेगयुक्ताऽथ चोष्णा-त्वचं रौक्ष्यं पूर्वरूपं प्रदिष्टम् १

वृक्करोगस्य लक्षणम्—

रक्तह्रासात्पाण्डुवर्णत्वमास्ये स्वेदाभावस्त्वाचरौक्ष्याग्निमान्द्ये ।
पीडा कट्यां चोदरे वृक्कदेशे-नाडी नूनं वेगयुक्ता भवेच्च ॥ २ ॥
मूत्रं शश्वद्बिन्दुरूपेण चोष्णं-पीडायुक्तं वृक्करोगे स्रवेद्वै ।
एवं तीव्रं लक्षणं वृक्कयुग्मे-जातु स्यादेवाश्मरीयोगतोऽपि ॥ ३ ॥
शिश्नस्याग्रे जायते चाति पीडा-मूत्रं रक्तेनान्वितं स्यात् कदाचित् ।
शैत्योपेतं पाणिपादं भवेद्वै-दाहश्चाल्पो मूत्रकाले च्वजागे ॥ ४ ॥
वृक्कद्वन्द्वे कार्यशैथिल्यहेतो-र्घोरः स्वैः स्वैर्लक्षणैर्लक्ष्यमाणः ।
रोगः प्लीहो ह्ययकृत्सम्भवो नु-र्वृक्कप्रस्तस्येति चिह्नं प्रदिष्टम् ॥ ५ ॥
नादः कर्णे नेत्ररोगो ज्वजोत्थो-भङ्गः शाखागौरवं चापि मूर्च्छा ।
ग्रीवामूलेंऽसदेशेऽपि पीडा मोहो लिङ्गान्येवमेतानि च स्युः ॥ ६ ॥

विशेषतो वृक्करोगो रक्तस्य परिवर्त्तनात् ।
नराणां जायते देहे भिषजामिति निर्णयः ॥ ७ ॥

इति माधवनिदानपरिशिष्टे वृक्करोगनिदानं समाप्तम् ।

---

## अथ शुक्रमेहनिदानम् ।

तत्र शुक्रमेहे हेतुः—

ये हस्तमैथुनमुखातिविगीतरीत्या-रेतःक्षयं विदधतीह जना विमूढाः ।
तेषामवश्यमतिकामवशं गतानां- जायेत दारुणगदः खलु शुक्रमेहः ॥१॥

तस्य लक्षणम्—

मलमूत्रमनोजजवाधिकता-युवतिस्थविलासहृदस्मृतितः ।
पतनं यतनेन विनैव मुहु-र्ननु रेतस आशु भवेदनिशम् ॥ २ ॥
अथवा प्रमदाऽङ्गमपि स्पृशतः-सहसा तरुणीजनदर्शनतः ।
स्वपने रमणीरमणेक्षणतः-स्खलनं पुरुषस्य भवेत् क्षणतः ॥ ३ ॥
अधितन्द्रमथाप्यधिवर्त्म यतः-शयनं च जनस्य मनोजवतः ।
स्मरणादवलोकनतोऽप्यचिरा-च्च्यवनं प्रमदात् प्रमदाविषयात् ॥ ४ ॥
अहोरात्रमध्ये प्रवृद्धे गदेऽस्मिन्-नरस्य त्रिवारं चतुर्वारमद्धा ।
उपर्युक्तहेतोश्च्युती रेतसः स्यात्-क्वचिल्लिङ्गशैथिल्यमन्ते नितान्तम्॥५॥
ततोऽनेन रोगेण संव्यूढदेहो-जनो भामिनीमानभेदेऽप्यशक्तः ।
भवन्नङ्गनाऽङ्गस्य संस्पर्शमात्रा-च्च्युतिं रेतसो नूनमत्राभ्युपैति ॥ ६ ॥
ततोऽतीव लज्जाविषादाभिभूतः—पराभूतचेता भृशं कामिनीतः ।
विरक्तो भवाज्जातु विक्षिप्तगत्या-स्वयं वाऽनथो मृत्युमीप्सेदगत्या ॥७॥

शुक्रमेहस्योपद्रवाः—

वह्नेर्मान्द्यं मूत्रवर्चोऽवरोधो-हृष्टेर्ह्रासो मौलिमाऽल्पोऽप्यजीर्णम् ।
वातीसारो घूर्णनं मस्तकस्थं-मेहे शुक्रस्योपसर्गा इमे स्युः ॥ ८ ॥

इति माधवनिदानपरिशिष्टे शुक्रमेहनिदानं समाप्तम् ।

---

## अथौपसर्गिकमेहनिदानम् ।

तस्य परिचयः—

औपसर्गिकमेहाख्यो-गदो यः स भिषग्वरैः ।
पूयमेहो व्रणमेह-श्चागन्तुमेह उच्यते ॥ १ ॥

संप्राप्तिः—रजस्वलायां बहुशुक्रवत्यां-तथाऽऽर्द्रयोनौ मदमातुरो यः ।

प्रयातु मोहाद् यदि कोऽपि तर्हि-ध्रुवं गदं दारुणमेतमेतु ॥२॥
या मूत्रनाड्यन्तरसंस्थिता त्वक्-श्लेष्मावहा सा व्रणिता सती तु ।
क्लेदं गदेऽत्राहरति प्रकामं-ततो भिषग्भिर्व्रणमेह उक्तः ॥ ३ ॥
लक्षणं—प्रायः स्त्रीसङ्गदिष्टं मुनिमितरजनीकाल आरभ्य रोगो-
जायेतायं कदाचिद् विपुलतररुजाव्यञ्जकः पूरुषेषु ।
वारं वारं ध्वजस्योत्थितिरपि महती शिश्नमुण्डे च कण्डूः-
किञ्चासह्या भृशार्त्तिर्भवति हि सततं मूत्रकाले गदेऽस्मिन् ४
स्फीतो मेढ्रो लोहितश्चाग्रभागे-पीडायुक्तावण्डकोशौ सदैव ।
पूयस्योपस्थात् प्रवृत्तिविशेषात्-संजायेतात्रापि तुल्यं व्रणेन ॥ ५ ॥
सदा रक्तपिप्पल्यतीवानुलिप्तं-मुखं शिश्नसंबन्धि संदृश्यतेऽत्र ।
गदी चापि रात्रिन्दिवं दाहयुक्तः-कदाचिन्न शान्तिं क्वचित्प्राप्नुयाद्वै ॥६॥
यदा पूयसंशोषजो मूत्रमार्गा-वरोधो भवेद् घोरदाहेन मूत्रम् ।
तदा युग्मधारं प्रवर्त्तेत नूनं-युतानां व्रणाढ्येन मेहेन यूनाम् ॥ ७ ॥
आर्द्रं तथा चिमचिमान्वितमामयेऽत्र-प्रस्राववर्त्म सततं नियतं भवेद्वा ।
स्रावस्ततस्तनुरपि क्रमतः प्रवृद्धि-र्लक्ष्येत तस्य गदितं किल लक्ष्म चेति८
रोगश्चायं दारुणः पूरुषाणां-प्रायेणोत्पद्येत संसर्गतोऽपि ।
पीडाऽल्पत्वं कालवृद्धिक्रमेण-स्यादस्यालं दुश्चिकित्स्यत्वमेव ॥ ९ ॥
व्रणमेहे विनिर्दिष्टा-आमनेत्रामयादिकाः ।
उपद्रवा विशेषेण नाशनीया भिषग्वरैः ॥ १० ॥

इति माधवनिदानपरिशिष्टे औपसर्गिकमेहनिदानं समाप्तम् ।

## अथ भूशोष्णवातनिदानम् ।

अस्य परिचयः—

मूत्राध्वना यत्र विनिर्गमः स्यात्-पूयस्य पुंसु प्रमदाजनेषु ।
योन्यध्वना चापि भूशोष्णवातः-संसर्गजस्तीव्रगदः स उक्तः ॥१॥

भूशोष्णवातस्य कारणम्—

कीटाणवो युगलबिन्दुनिभा निदानं-त्वस्यामयस्य गदितं गदलक्ष्मविद्भिः।
स्यान्मैथुनेन खलु संक्रमणं सदैत-द्रोगार्दितप्रमदया सह पूरुषेषु ॥ २ ॥
तथा जनन्या गदियोनिमार्गा-दुत्पद्यमानेषु शिशुष्वचक्षम् ।

विलोक्यते संक्रमतोऽक्षिपाको भृशोष्णवातस्य च लोकमध्ये ॥३॥

संप्राप्तिमाह—

रोगाक्रान्तवराङ्गमैथुनवशात् कीटाणवोऽस्यामय-
स्याशास्ते जननेन्द्रियेऽपि च तदन्तःस्थां कलां श्लैष्मिकीम् ।
निर्दग्धां विदधत्यथाल्पदमरं दग्धं भवेत्पूययुक्
तत्पश्चाच्च शनैः शनैरविरतं संवर्द्धमानो गदः ॥ ४ ॥
मूत्रस्थानमनुप्रयाति च तदा मूत्रस्य मार्गं क्रमा-
न्नृग्रन्थिं च तथाऽण्डकोशयुगमाक्राम्यन् भृशं दारुणः ।
एवं तत्र भवेत् कदाचिदपि नौ शाथोऽथ पूयादिकं-
किं चाप्यस्य गदस्य शोणितमिताः कीटाणवो जातु चित् ॥ ५ ॥
कुर्वन्तीह हि सन्धिशोथमपि-स्नैप् टीसीमियां कुत्रचित्
कृत्वा रोगिजनस्य मारणकृतो नूनं भवन्ति द्रुतम् ।
किं चाप्यस्य गदस्य पाकसमयो वैद्योत्तमैर्भाषितो·
ज्ञातव्यो वसुवासरावधिरहोयुग्मादपि प्रायशः ॥ ६ ॥

भृशोष्णवातस्य लक्षणम्—

प्रदाहो रुजा मूत्रमार्गेऽपि पूया-गमः शिश्नमुण्डे च शोथः किल स्यात् ।
कटिश्रोणिदेशोत्थिता चापि पीडा ज्वरस्यागमो मूत्रमार्गस्थितायाम् ॥
कलायां च शोथो ध्रुवं श्लेष्मलाया-मथो मूत्रकृच्छ्रश्च रक्तस्य मेहः
तथा मूत्ररोधो गदस्याग्रगत्वं-ततः पौरुषग्रन्थिमध्येऽपि शोथः ॥ ८ ॥
तथैवाशये रेतसो ग्रन्थिभागे-यदोपद्रवै रेभिरासेवितः स्यात् ।
जनः काऽप्यवस्था तदा तस्य दुःख-प्रदाऽऽविर्भवेन्नो भवेद्रोगशान्तिः॥९॥
अथो सा कदाचित्कथं चिद् यदि स्यात् तदा सौत्रिकैस्तन्तुभिर्मूत्रमार्गः ।
प्रजायेत संकीर्ण आश्वेव तस्मात् प्रदाहादिभिर्दुःखितश्चापि रोगी ॥१०॥
ततो जीवनं नारकौपम्यमेव स्वकीयं स जानाति तद्दुःखतप्तः ।
अतः सद्य एवामयस्यास्य वैद्यैः सदाऽऽरम्भकाले चिकित्सा विधेया ॥
डिम्बप्रणाल्यां परिविस्तृतासु कलासु योषित्सु हि योनिमार्गे ।
गर्भाशये जायत एष रोगो भिषग्वराणामिह निर्णयोऽयम् ॥ १२ ॥

उपद्रवाः—

शुक्रग्रन्थिष्वाशये रेतसोऽथो-शोथोऽवश्यं पौरुषग्रन्थिमध्ये ।

मूत्रस्याल्पं पूर्णता मूत्रधाम्नि-प्रादुर्भावो विद्रधीनां विशेषात् ॥१३॥
मूत्राध्मानं सर्वतोऽथ प्रभिन्नै-स्तैरुत्पत्तिश्चोग्रशोथस्य तत्र ।
किंवा नाडीसंज्ञकस्य व्रणस्यो-त्पत्तिर्भूयो दुःखदस्यापि नूनम् ॥१४॥
भृशोष्णवाते भृशदुःसहे सदा-गदेऽगदङ्कार-वरैरुपद्रवाः ।
उदीरिता एत उदारबुद्धिभि-र्द्रुतं चिकित्स्या अपि यत्नपूर्वकम् ॥१५॥

इति माधवनिदानपरिशिष्टे भृशोष्णवातनिदानं समाप्तम् ।

---

## अथौजोमेहनिदानम् ।

अथामवातादभिघाततो वा-ऽजीर्णादिकाज्जाठरवह्निमान्द्यात् ।
शोथात्तथा वा विषमज्वराच्च-क्षयाच्च कासप्रभृतेर्नराणाम् ॥ १ ॥
रक्तस्रोतोविक्रियातोऽस्रदोषात्-किंवा वृक्कद्वन्द्वदुष्ट्या विशेषात् ।
पूयेनास्रेणाथवा वै लसीका-द्वारा दुष्टे रेतसा वाऽपि मूत्रे ॥ २ ॥
क्षारेण किंवा कटुना कषाये-णवर्जितैर्गर्भवतीजनस्य ।
ओजस्करैर्वा मधुरैः सदैवा-न्नपानजातैरतिमात्रभक्षितैः ॥ ३ ॥
गुरोस्तथा पर्युषितस्य चान्न-स्य सेवनादप्यतिभोजनाद्वा ।
शिखोश्च हंसस्य विशिष्य गोधू-मनव्यधान्यप्रभृतेश्च सेवनात् ॥ ४ ॥
अतीवशीते सलिलेऽपि दुष्टे-स्नानेन पानेन च वाऽवगाहनात् ।
एभिर्निमित्तैरपरैस्तथौजो-मेहो भवेद्धि विकृतादिहौजसः ॥ ५ ॥
आयुर्बलयोर्नितरां-कृन्तननिपुणो विशेषतो नृणाम् ।
आमय एष उदारै-रायुर्वेदस्य कोविदैरुदितः ॥ ६ ॥

पुनश्च तस्य हेतुपूर्वकरूपवर्णनम्—

शारीरिकश्रमवशादथवाऽपरस्मा-द्धेतोर्द्रुतं रुधिरसंचरणाज्जनानाम् ।
किंवा विपर्ययवशात्प्रकृतेः किलौजो-मूत्रेण सार्द्धमतिदुष्टिमितः स्रवेद्धि ॥

हंसाण्डसंस्थितसमुज्ज्वलभागतुल्यं-
किंवाऽपि तण्डुलजलप्रतिमं च शुक्लम् ।
ओजःस्थितं भवति रूपमिदं तदानी-
मित्थं वदन्ति गदतत्त्वविदां कुलानि ॥ ८ ॥

अस्य साध्यादिकम्—

मेदःक्षयो यदि भवेदरुचिर्ज्वरो वा-
शोथोऽग्निमान्द्यमपि तर्हि न साध्य एषः ।

दुःसाध्य एव कथितोऽत इहान्यथौजो-
मेहो भिषग्भिरथ न क्वचिदाशु साध्यः ॥ ९ ॥

इति माधवनिदानपरिशिष्ट ओजोमेहनिदानं समाप्तम् ।

## अथ लसीकामेहनिदानम् ।

अनूपदेशोद्भवमीनमांसा-दिकादनाद्वाऽमितभोजनाद्वा ।
क्लिन्नं सदा पर्युषितं भृशाभि-ष्यन्दि प्रकामं मधुरं गरीयः ॥१॥
अन्नं विशेषाद्रसनाऽतिलौल्यात् समश्नतामत्र नृणामवश्यम् ।
तथा च शारीरपरिश्रमं वा-ऽप्यकुर्वतां वा मनसोऽधिकश्रमात् ॥२॥
प्रदूषितो हेतुभिरेभिरन्यैः पाकाशयश्चापि यकृन्नितान्तम् ।
वृक्कद्वयेऽथापि च मूत्रकोषे क्षतं समुत्पादयतो विशेषतः ॥ ३ ॥
ततश्च मूत्रं तरलं सरक्तं-लसीकया वा सहितं च मेदसा ।
क्वचिद्घनं स्थूलमथापि सूत्रव-ज्जतूकवारिप्रतिमं प्रवर्त्तते ॥
वैशिष्ट्यतोऽस्मिन्नपि दोषदूष्ययोः-ह्रासं प्रवृद्धिं च सदैव लक्षयेत् ।
कुर्याच्चिकित्सामवगत्य वैद्यो मूत्रस्थितं वर्णविशेषमेव ॥ ५ ॥

वातजस्य तस्य लक्षणम्—

वातोपसृष्टेऽत्र भवेद्धि मूत्रं-सशोणितं पूर्णतयाऽम्लगन्धकम् ।
मलावरोधोऽपि च संधिवृन्द-विश्लेषणं चाप्युपजायतेऽद्धा ॥
मुहुर्मुहुर्मूत्रमतिप्रवर्त्तते-गदे स्वमिक्षाजलसंनिभं सदा ।
इदं लसीकाऽभिधमेहरोग-स्य वातिकस्योक्तमशेषलक्ष्म ॥ ८ ॥

पित्तजस्य लक्षणम्—

घनं पूतियुक्तं च दुर्गन्धपूर्णं-भवेत्पैत्तिके रोगिमूत्रं च पूर्णम् ।
तथाऽऽस्यस्य वैरस्यमत्यर्थमेव-प्रदाहश्च हस्ताङ्घ्रिमध्ये सदैव ॥ ८ ॥

श्लैष्मिकस्य लक्षणम्—

कफेनोपसृष्टेऽत्र शुक्लं तु मूत्रं-भवेत्स्वच्छमत्यर्थमद्धाऽधिपात्रम् ।
निशि स्थापितं प्रातरेवोपरिस्थं-तदच्छं घनं सर्वथा चाप्यधःस्थम् ॥९॥
कटौ वङ्क्षणेऽनुक्षणं चापि पीडा-प्रजायेत तीव्रोऽग्निविद्वेष एव ।
इदं लक्ष्म सर्वं कफेनोपसृष्टस्य मेहस्य चोक्तं लसीकाऽभिधस्य ॥१०॥

द्वित्रिदोषजयोर्लक्षणम्—

द्विदोषोत्थितेऽथ त्रिदोषोत्थितेऽद्धा-यथादोषमक्ष्यं तयोर्लक्षणं वै ।

पुरा वर्णितं यत् पृथग्दोषरूपं-तदेवात्र बोध्यं यथावद्विमिश्रम् ॥११॥

साध्यासाध्यलक्षणम्—

लसीकाऽभिधोऽयं तु मेहो हि यूनां-बलेनान्वितानां विशेषान्नवोत्थः ।
अपि प्रायशः साध्य एवामयज्ञै-र्भिषग्भिर्जनैर्बोधितो बुद्धिमद्भिः ॥१२॥
स एवाथवा दुर्बलानां तु वृद्धा-त्मनां नैव साध्यः कदाचित्प्रदिष्टः ।
क्वचिच्चामयोऽयं गतः प्रौढभावं-प्रशान्तिं प्रयायात् सुपथ्यस्य योगात् ॥
पुनर्दैवदुर्दृष्टितो रोगयुक्तं स एवाधिगत्योत्थितिं स्वामवश्यम् ।
नयत्येव कालान्नरं चान्तकस्या-न्तिके सच्चिकित्सामतिक्रम्य सर्वाम् ॥

इति माधवनिदानपरिशिष्टे लसीकामेहनिदानं समाप्तम् ।

## अथ मूत्रातिसारनिदानम्

तस्य निदानम्—

अभिष्यन्दिगुर्वन्नसंभोजनाद्वा श्रमाभावतोऽथो विलासाद्विशेषात् ।
विचाराद्व्यवायात्तथा मद्यपाना-ज्जलस्यातिदुष्टस्य संसेवनाद्वा ॥१॥
गुडोत्थस्य नौ वस्तुनो भोजनाद्वा यकृद्दुष्टिहेतोश्च मर्माभिघातात् ।
विकाराद्थो नाडिकामण्डलस्या-भिचारप्रयोगाद्भयाच्छोको वा ॥२॥
सदा मानसस्य प्रवृत्तेर्भृशं विषयेषु स्वकीयेषु वेगावरोधात् ।
गराख्यस्य नूनं विषस्यापि योगाद् दिवास्वापतश्चातिनिद्राप्रसङ्गात्॥३॥
चिरं रोगिलोकस्य सेवाविधानात् तथा पत्तने सर्वदा संनिवासात् ।
अतीवोष्मसंतप्तदेहस्य शौघ्र्यात् सदा शीतसंसेवनादेव नूनम् ॥ ४ ॥
तथा चेदृशैः सेवितैश्चातिमात्रं निमित्तैरिहान्यैर्गदः प्रायशोऽयम् ।
प्रजायेत नृणां तनावेव मूत्रा-तिसाराभिधस्तस्य संप्राप्तिरग्रे ॥ ५ ॥

तस्य संप्राप्तिः—

उपर्युक्तहेतोरतीव प्रसङ्गाद् नृणां सर्वदेहस्थितोऽब्धातुरेव ।
गतः क्षोभभावं द्रुतं सोऽतिमात्रं समन्तात्ततः प्रस्रवत्याशवश्यम् ॥६॥
ततः प्रच्युतः स्थानतः स्वात्स मूत्र-पथं याति तेनातिमात्रं प्रसन्नम् ।
सितं शीतलं गन्धशून्यं च पीडा-विहीनं क्वचिन्मन्ददाहं कृशान्धम् ।
गदेनार्दितानां स्रवत्येव मूत्रं सदैवेदृशं पूरुषाणां विशेषात् ।
मयेत्थं च सद्भिर्भिषग्भिस्तु मूत्रा-तिसारस्य संप्राप्तिरुक्ता प्रदिष्टा ॥८॥

मूत्रप्रस्रवणमानम्—

अहोरात्रमध्ये चतुःप्रस्थतुल्यो-न्मितं मूत्रमस्मिञ्जनानां स्रवेद् गौ ।
निशि स्थापितं प्रातरालोकितं तद् घनं निम्नभागे स्रुपयँच्छमस्तु ॥९॥

मूत्रातिसारलक्षणम्—

भवेन्मूत्रमार्गेऽति कण्डूस्तथा पि-डिकोत्पत्तिरद्धाऽथवा दुःक्षुतं च
तथा तत्र चर्मक्षयो येन रोगी भृशं चावसीदेद्रुजा तज्जया तु ॥ १० ॥
अथाङ्गेषु दाहस्तृषा चाधिकाऽपि रसज्ञाऽपि शुष्का चिता कण्टकैश्च ।
क्वचित्तीव्रताऽग्नेः क्वचिद्वाऽग्निमान्द्यं प्रजायेत कार्श्यं तथा विड्विबन्धः॥
दृशोर्म्लानता रूक्षताऽधित्वचं पे-शिकाः कोमलाश्चातिशैथिल्यभाजः ।
शिरोघूर्णनं चालसत्वं च संको-चभावो हृदो मैथुनाशक्तता च ॥१२॥
बलक्षीणतोद्वेग आलस्यस्य मालि-न्यमेवारतिः स्वीयकर्तव्यकृत्ये ।
परिक्षीणता मेदसश्चाधिकाऽऽस्ये प्रशोषस्तथा तालुनि स्याद्‌द्रवद्रम्॥१३॥
इतीमानि चिह्नानि मूत्रातिसारो-दितानीह बोध्यानि चाद्धाऽखिलानि ।
तनौ चाबलानां गदोऽयं तु सोम-क्षयात् सोमनामाऽपि वैद्यैः प्रदिष्टः॥
अतीव प्रवृद्धे क्रमेणामयेऽस्मिन् स्रवेन्मूत्रमत्यर्थमेवाभ्रभीक्ष्णम् ।
अतो रोगमेनं तु वैद्या हि मूत्रा-तिसारं च रोगानुसारेण प्राहुः ॥१५॥

मूत्रातिसारस्योपद्रवाः—

बलस्यातिनाशस्तृषा चातिघोरा प्रलापोऽपि मूर्च्छाऽथ वीसर्प एव ।
क्षतं वा क्षयो दुर्व्रणश्चापि नून-मभिन्यासरोगाद्योऽस्मिन् गदे तु॥१६॥
भिषग्भिः प्रदिष्टा विशेषात्तु चोप-द्रवा एत एभिस्तु मूत्रातिसारी ।
उपेतोऽभ्युपैतीह शीघ्रं विहाय स्वलोकं तु कीनाशलोकं मनुष्यः ॥१७॥

अत्रर्तुप्रभावः—

निदाघे प्रजायेत रोगो विशेषा-दयं चापि तत्रैव कुप्येद्‌द्रवद्रम् ।
कदाचिच्च कालेऽतिशीते प्रवृत्तिः प्रदृश्येत लोके क्वचिच्चास्य वैद्यैः॥१८॥
पुरोक्तैरिहैभिर्निमित्तैस्थोम-धुमेहोऽपि जायेत रोगोऽतिकृच्छ्रः ।
समासेन चेत्थं तु मूत्रातिसारो-दितं हेतुरूपादिकं सर्वमुक्तम् ॥ १९ ॥

इति माधवनिदानपरिशिष्टे मूत्रातिसारनिदानं समाप्तम् ।

---

## अथ क्लैब्यनिदानम् ।

तत्रादौ क्लैब्यप्रकाराः—

बीजोपघातात्तदनुध्वजोप-घाताज्जरातोऽपि च शुक्रसंक्षयात् ।

इत्थं प्रजायेत चतुर्विधं हि-क्लैब्यं पुराणै ऋषिभिः प्रदिष्टम् ॥ १ ॥

क्लैब्यस्य सामान्यलक्षणम्—

यः स्यादशक्तः सुरते मनुष्यः-स क्लीब उक्तः किल वैद्यवृन्दैः ।
क्लैब्यं तु तद्भाव इहोपदिष्टं-तल्लक्ष्म सामान्यमथो ब्रवीमि ॥ २ ॥
न फेनिलं यस्य भवेद्धि मूत्रं-तथाऽप्सु विष्ठा सततं निमज्जेत् ।
उत्थानशक्त्याऽपि च रेतसा वा-हीनश्च जायेत यदेह मेढ्रः ॥ ३ ॥
क्लीबः स एवाभिमतस्तदा स्यात्-ततः स सङ्कल्पनिमग्नचेताः ।
न यात्यधीनां प्रमदामपि स्वकां-मुपस्थशैथिल्यनिमित्ततः स्वयम् ॥ ४ ॥
अथो कदाचिद् यदि याति कुत्रचित्-श्वासार्त्तिमान् स्विन्नतनुस्तदानीम् ।
संकल्पवैफल्ययुतोऽपि मोघ-संचेष्टितः संश्लथलिङ्ग एव ॥ ५ ॥
तथा च निर्बीजतया समन्वितो-भवत्यवश्यं प्रमदासमीपे ।
क्लैब्यस्य सामान्यमदोऽत्र लक्ष्म-प्रभाषितं विस्तरतोऽथ वक्ष्यते ॥ ६ ॥

अथ बीजोपघातजक्लैब्यमाह—

शीतं रूक्षं वाऽल्पमन्नं विरुद्धं-संक्लिष्टं चाजीर्णकालेऽपि भुक्तम् ।
शोकश्चिन्ताऽर्थादिजाताऽपि भीति-स्त्रासो भूरिस्त्रीप्रसङ्गः श्रमश्च ॥ ७ ॥
चाविश्वासोऽथाभिचारो रसादेः-संक्षीणत्वं पञ्चकर्मापचारः ।
वातादीनां चापि वैषम्यमल्पा-हारः स्त्रीणां चारसज्ञत्वमेव ॥ ८ ॥
प्रायेणैभ्यो तुहि बीजोपघातो-जायेतास्मिन् कारणेभ्यो विशेषात् ।
यस्मात्स स्यात्कामिनीष्वल्पहर्ष-श्चाल्पप्राणो दुर्बलः पाण्डुवर्णः ॥ ९ ॥
हृत्कामलातमकपाण्डुगदश्रमाद्यैः-शूलातिसारवमनज्वरकाससंज्ञैः ।
रोगैर्निपीडिततनुश्च भवेन्मनुष्यो-बीजोपघातजनपुंसकताऽभिजुष्टः ॥ १० ॥

ध्वजभङ्गजक्लैब्यस्य कारणमाह—

क्लैब्यं पुनर्ननु पुरातनवैद्यजातै-र्गीतं शृणु त्वमधुना ध्वजभङ्गजातम् ।
अत्यम्बुपानविषमाशनपिष्टभोज्या-लब्धन्नभोजनपरस्य नरस्य नूनम् ११

क्षारं तथा लवणमम्लमथो विरुद्ध-
द्रव्यं त्वनूपभवमांसमपि प्रकामम् ।
दुग्धं दधि प्रतिदिनं त्वदतोऽतिलौल्या-
त्सात्म्यभोजिन इहातिकृशस्य रोगैः ॥ १२ ॥

कन्यास्वयानिषु पुरातनरोगिणीषु-स्वदुष्टासु दीर्घसमयात् पुरुषैः प्रसक्तै ।

दुर्गन्धितास्वपि च पुष्पवतीषु दुष्ट-
योनिष्वनङ्गवशतो हि परिस्रुतासु ॥ १३ ॥
एतादृशीषु युवतीषु चतुष्पदासु-प्रायः परं विदधतः सुरतं प्रमोहात् ।
लिङ्गस्य शस्त्रनखदन्तकृतक्षताद्वा-घातादधावनत इध्मप्रहारतोऽपि १४
निष्पेषणादपि परिच्युतरेतसः सं-रोधाच्च शूकपरिशीलनतश्च मेढ्रे ।
संजायतेऽधिपुरुषं ध्वजभङ्गनामा-क्लीबत्वसंजननकारणमामयो वै ॥१५॥

ध्वजभङ्गजक्लैब्यस्य लक्षणमाह—

अतः परं यानि च लक्षणानि-भवन्ति नूनं ध्वजभङ्गजानि ।
प्रवच्मि वैद्योत्तमसंमतानी-दानीं शृणु त्वं निखिलानि तानि ॥ १६ ॥

वातजध्वजभङ्गमाह—

मेढ्रेऽतिरुजा स्याद् ध्वजभङ्गे-रामः श्वयथुर्वातसमुत्थे ।

पित्तजध्वजभङ्गमाह—

स्फोटाः प्रखराः स्युर्ननु लिङ्गे-पाकः परमः पित्तसमुत्थे ॥ १७ ॥

कफजध्वजभङ्गमाह—

लिङ्गोपरि मांसस्य समृद्धिः-क्षिप्रं व्रणजन्माऽमितवृद्धिः ।
स्रावश्च पुलाकोदककल्पः-श्यावारुणभः स्याद् यदनल्पः ॥ १८ ॥
वलयीकुरुते स्फीतो देशः-शिश्ने कठिनः स्यात् सविशेषः ।
कफजे ध्वजभङ्गे किल लक्षण-मेतद्धिद्धि निदानविचक्षण ! ॥ १९ ॥

रक्तजध्वजभङ्गमाह—

छर्दिज्वरमूर्च्छाभ्रमतृष्णाः-स्युरिमे रोगाः पुंसि सतृष्णाः ।
लोहितमाविलनीलसवर्णं वहति हि कृष्णं रक्तमुदीर्णम् ॥ २० ॥
शिश्नव्रणतो यस्य जनस्य-ध्वजभङ्गो रक्तज इह तस्य ।
इति विज्ञेयं साधु सदैव-श्रेष्ठेनायुर्वेदविदेव ॥ २१ ॥

सन्निपातजध्वजभङ्गमाह—

अग्निदग्धसदृशोऽपि च दाहः-सरुजश्चेत्स्यात्कृतसंनाहः ।
वस्तौ सीवन्यामथवृषणं-वङ्क्षणमध्ये स्वीकृतमरणम् ॥ २२ ॥
पाण्डुर्वा पिच्छिल आस्रावः-कादाचित्कोऽप्येवंभावः ।
मन्दः स्तिमितः श्वयथुर्नूनं-स्रावः स्यादिह संततमूनम् ॥ २३ ॥
चिरकालादपि पाकं गच्छेत्-संत्वरया वा मुक्तिं यच्छेत् ।
जायेरन् क्रिमयोऽप्यचिकित्स्यं-क्लेदि पूतिगन्धीति च लिङ्गम् ॥ २४ ॥

मणिर्विशीर्येतापि च यस्य-मेढ्ं मुष्कौ वाऽथ विश्लिष्य ।
संनिपातजनितध्वजभङ्गं-विद्यात्तस्योदितमध्यङ्गम् ॥ २५ ॥
कथितं क्लैब्यं ध्वजभङ्गोत्थं-चरकप्रोक्तमिदं हि मयेत्थम् ।
एतं ब्रुवते साङ्गोपाङ्ग-केचित् पञ्चविधं ध्वजभङ्गम् ॥ २६ ॥

जरासम्भवक्लैब्यमाह—

क्लैब्यं जराजातमथो ब्रवीमि त्वं सांप्रतं तच्छृणु सावधानः ।
जघन्यमध्यप्रवरप्रभेदा-दुक्तं मुनीन्द्रैस्त्रिविधं वयोऽत्र ॥ २७ ॥

प्रायस्तत्र प्रवरवयसां मानुषाणामजस्रं-
शुक्रं क्षीणं स्वत इह भवत्यात्मना निर्विकल्पम् ।
तस्मिन् काले यदि न मनुजा वृष्यमासेवमानाः-
स्युस्तेषान्तु ध्रुवमनुदिनं संक्षयाद्वा रसादेः ॥ २८ ॥

वीर्यस्याथेन्द्रियाणामपि तदनु बलस्य क्रमेण क्षयाद्वा-
किञ्चायुः क्षीणतातोऽनशनविधिवशात्क्लान्तितोऽपि श्रमाच्च ।
जायेत क्लीबताऽसावधिधरणि जराऽवाप्तजन्मा जनानां
तेनातिक्षीणधातुर्भृशमबलतनुर्विह्वलो वर्णहीनः ।
दीनः सन् पूरुषः स द्रुततरमुदितं वृद्धतातो गदं तु
प्राप्य प्रायो रमण्या सह रमणविधावक्षमः स्यादवश्यम् ॥ २९ ॥

शुक्रक्षयजक्लैब्यमाह—

क्लैब्यं संकथ्यमानं त्वमिह शृणु तुरीयं च शुक्रक्षयोत्थं-
चिन्ताऽऽधिक्याच्च शोकादपि च बहुभयात्क्रोधतो वा मनुष्यः॥३०॥
उद्वेगादीर्ष्यया वा युवतिजनमुपेयात्समुत्कण्ठया चेत्
किं वा कार्श्यं ।श्रतः सन्ननुदिनममितं रूक्षमन्नादिजातम् ।
भैषज्यं वा भजेदप्यशनविरहितो दुर्बलः स्यात् प्रकृत्या
किंचासात्म्यान्नपानं समधिकरसनाऽधीनतातः सदाऽद्यात् ॥ ३१ ॥
मुख्यो धातू रसाख्यः स्थित इह हृदये यस्तदीये स आशु-
क्षीयेताथो मनुष्यः स्वयमपि बहुशः क्षीयमाणो भवेद्धि ।
शुक्रान्ता लोहिताद्यास्तदनु ननु परं धातवस्तु क्रमेण-
क्षीयेरंस्तस्य जन्तोर्मतमधिकवरं तत्र शुक्रस्य धाम ॥ ३२ ॥
यः सेवेत ग्राम्यधर्मं प्रहर्षा-च्चित्तस्यातीवाथवा स्त्रीषु नित्यम् ।
क्षीयेताथो तस्य रेतोऽपि नूनं-स प्राप्नोति क्षीणतां सर्वतोऽरम् ॥३३॥

घोरं व्याधिं चान्ततो वाऽपि मृत्युं प्राप्नोऽवाप्नोत्येव शुक्रक्षयी सः ।
सार्द्धं हेत्वाद्येन शुक्रक्षयोत्थं क्लैब्यं कृत्स्नं प्रोक्तमित्थं चतुर्धा ॥३४॥

मतान्तरमाह—

क्षयोद्भवं च ध्वजभङ्गजातं-क्लैब्यद्वयं चैतदसाध्यमेव ।
समामनन्तीति भिषग्जनेज्याः-केचिन्निदानायनरीतिविज्ञाः ॥ ३५ ॥

उत्पाटनाद्धि वृषणस्य तथैव शेफः-
संछेदतोऽधिगतजन्म नपुंसकत्वम् ।
चासाध्यमेव निगदन्ति निदानविज्ञाः-
पूर्णं कृतं प्रयतनं किल तत्र चोनम् ॥ ३६ ॥

बीजदोषाद्गर्भजक्लैब्यमाह—

मातापित्रोर्बीजदोषात्तथा चा-पुण्यैः कृत्यैः प्राक्तनैर्देहिनोऽस्य ।
गर्भस्थस्यावाप्य दोषा यदाऽरं-नाडी रेतोवाहिनीः शोषयन्ति ॥३७॥
तस्माद्रेतः शुष्कतां तर्हि यातं—जातं बालं पूर्णसर्वाङ्गयुक्तम् ॥
कन्यारूपेणाथवा पुत्ररूपेणा-शक्तं च स्वस्वकृत्ये प्रकुर्यात् ॥ ३८ ॥

एतेषामसाध्यत्वमाह—

एतत्क्लैब्यं सर्वमेवात्यसाध्यं-प्रोक्तं प्रत्नैर्वैद्यरत्नैर्विशेषात् ।
यद् दोषाणां संनिपातस्य पूर्णा-धिक्यं तत्रालोक्यते लोकमध्ये ॥३९॥

आसेक्यलक्षणमाह—

अत्यल्पवीर्यत्वत एव तात-स्य क्लीब आसेक्यपदाभिधो हि ।
संजायते ना स निजध्वजोत्था-नं प्राप्नुयात् प्राश्य किलात्र शुक्रम् ।४०॥

सौगन्धिकलक्षणमाह—

जायेत यो ना यदि पूतियोना-वजस्रमाघ्राय स शेफसो वै ।
भगस्य वा गन्धमतिप्रहर्ष-योषित्प्रसङ्गं प्रलभेत लोके ॥ ४१ ॥

कुम्भीकलक्षणमाह—

यः स्वे गुदे मैथुनमन्यपुंसा-विधाप्य पुंवत् प्रमदासु सर्वदा ।
यदि प्रवर्त्तेत तदा भिषग्भि-र्ज्ञायेत कुम्भीकनपुंसकः सः ॥ ४२ ॥

ईर्ष्यकलक्षणमाह—

दृष्ट्वा व्यवायं यदि चान्यदीयं-स्वयं भवेद् यः सुरते प्रवृत्तः ।
स ईर्ष्यकक्लीब इह प्रदिष्टो-विशिष्टतः शिष्टतमैर्भिषग्भिः ॥ ४३ ॥

षण्ढलक्षणमाह—

ऋतौ प्रवर्त्तेत यदाऽङ्गनावद्-मोहात् स्त्रियां यः खलु तस्य नूनम् ।
स्त्रीचेष्टिताकारयुतस्तु षण्ढा-भिधः प्रजायेत नपुंसकस्तदा ॥ ४४ ॥
किंवाऽङ्गना काऽपि यदि प्रवर्त्ते-तर्त्तौ रतौ पुंवदपीह पुंसि ।
ततः प्रजायेत सुता कथञ्चेत्-पुंचेष्टिताकारयुता भवेत्सा ॥ ४५ ॥

द्विरेतः क्लीबमाह—

समांशभागादुपतप्तशुक्रात्-सशोणिताद् यो नियतः प्रजातः ।
क्लीबो द्विरेताः स तु संज्ञया स्यात्-स्त्रीपुंसलिङ्गाकृतिचेष्टिताभ्याम् ४६

पवनेन्द्रियत्वं लक्षयति—

वायुर्यदा गर्भगतस्य हन्याद्-बालस्य शुक्राशयमत्र दैवात् ।
तदा प्रकुर्यात्पवनेन्द्रियत्वं-नपुंसकत्वप्रदमेव निश्चितम् ॥ ४७ ॥

संस्कारवाहस्य लक्षणमाह—

यदा मारुतः कस्यचित् पूरुषस्य-प्रदुष्टः परं वहनं च प्रकुर्वन् ।
प्रदुष्येत्तु शुक्राशयद्वारमद्धा-विदध्यात्तदा तं हि संस्कारवाहम् ॥४८॥

मन्दवेगाल्पहर्षयोर्लक्षणमाह—

यदा मन्दबीजाल्पबीजौ तथा वा-बलौ वाऽप्यहर्षौ भवेतां कदाचित् ।
तदा क्लैब्ययुक्ताविमौ कारणं वै-विकारद्वयस्येति विज्ञेयमत्र ॥४९॥

वक्रिलक्षणमाह—

यदा विदध्याज्जननी तु मैथुने-निजाङ्गजातं विषमं कदाचित् ।
स्याद्बीजदौर्बल्ययुतः पिता चेत्-तदा भवेद्बालजनो हि वक्री ॥ ५० ॥

ईर्ष्यारतेर्लक्षणमाह—

यौ स्त्रीपुंसौ मैथुनं मन्दहर्षौ-कुर्यातां चेदीर्ष्यया चाभिभूतौ ।
तौ तु प्रायो वैद्यवृन्दैर्निमित्तं-संकथ्येतेर्ष्यारतेरेव लोके ॥ ५१ ॥

वातिकषण्ढलक्षणम्—

वायोः पित्तस्यापि दोषाद् यदीयौ-नष्टौ स्यातामण्डकोशौ कदाचित् ।
रोगज्ञानावाप्तवैशिष्ट्यवैद्यै-राख्यातोऽद्धा वातिकः षण्ढकः सः ॥ ५२ ॥
इत्थं विकृतिविकारा-अष्टावेते नपुंसकाः कथिताः ।
प्राक्तनदुष्कृतिजन्या-स्ते विज्ञेया ध्रुवं विज्ञैः ॥ ५३ ॥

## अथ प्रकारान्तरेण क्लैब्यलक्षणम् ।

क्लैब्यभेदाः—

क्लैब्यं प्रोक्तं सप्तधा वह्निपविभ-स्तस्येदानीं वक्ष्यमाणं क्रमेण ।

कृत्स्नं चिह्नं सावधानेन नूनं-रोगज्ञानाभीप्सुनाऽऽकर्णनीयम् ॥ ५४ ॥

तत्र मानसक्लैब्यलक्षणम्—

यद् द्वेषपात्रप्रमदाप्रसङ्गात् पुंसां प्रजायेत नपुंसकत्वम् ।
तन्मानसं नाम सदा सुधीभि-राम्नातमद्धाऽऽकलनीयमत्र ॥ ५५ ॥

पित्तजक्लैब्यलक्षणम्—

येऽम्लं कटूष्णमथवा लवणं सदैव-
द्रव्यं नरोऽपरिमितं खलु भक्षयन्ति ।
शुक्रक्षयो भवति पित्तत एव तेषां-
क्लैब्यं ततो निगदितं ननु पित्तजं स्यात् ॥ ५६ ॥

शुक्रक्षयजक्लैब्यलक्षणम्—

नो सेवित्वा वाजीकरणं-नित्यं विदधति रमणीरमणम् ।
शुक्रक्षयजं क्लैब्यं तेषां-भवति नराणामत्र समेषाम् ॥ ५७ ॥

मेढ्ररोगजक्लैब्यलक्षणम्—

अतिशयकालव्यापिगदेन-मेढ्रमध्यसम्प्राप्तभवेन ।
क्लैब्यं जायत इव भो यस्य-मेढ्ररोगजं ज्ञेयं तस्य ॥५८ ॥

उपघातजक्लैब्यलक्षणम्—

या सिरा भवति वीर्यवाहिनी-लिङ्गनिम्नतलनित्यगेहिनी ।
छिन्नयाऽस्ति मनुजोऽन्वितस्तया-तूपघातजनपुंसकाख्यया ॥५९॥

शुक्रस्तम्भजक्लैब्यलक्षणम्—

देहे यस्य स्यादतुल्यं बलं भो-तस्य प्रायो ब्रह्मचर्यप्रसङ्गात् ।
प्राप्तक्षोभस्यापि चित्तस्य रोधात्-क्लैब्यं शुक्रस्तम्भहेतूत्थमुक्तम् ।

सहजक्लैब्यलक्षणम्—

आजन्म स्याद् यत्तु नरस्य-क्लैब्यं दुर्विधिवशतो यस्य ।
सहजं नाम च तन्निर्दिष्टं-वैद्यवरैरिह तस्य विशिष्टम् ॥ ६२ ॥

साध्यासाध्यत्वम्—

क्लैब्यमसाध्यं निगदितं-सहजाख्यं तु यथैव ।
ज्ञातव्यं भिषजोपघा-तजमपि चात्र तथैव ॥ ६३ ॥

इति माधवनिदानपरिशिष्टे क्लैब्यनिदानं समाप्तम् ।

## अथ शुक्रदोषनिदानम् ।

तत्रादौ तस्य परिचयः—

ततो व्यवायेषु विशेषहर्ष-निमित्ततो बीजमिदं प्रजायते ।
ततो ध्रुवं पौरुषशुक्रमेनदू-वदन्ति वैद्या गदतत्त्ववेदिनः ॥ १ ॥
शृणूच्यते तद्विषयेऽधुना मया-यथा ह्यकालोदककीटवह्निभिः ।
प्रदूषितं रोहति नैव बीजं-तथा नृणां शुक्रमपि प्रदुष्टम् ॥ २ ॥

अस्य निदानपूर्विका संप्राप्तिः—

व्यायामतोऽतीव नितान्तमैथुनात्-सदैव चासात्म्यपदार्थसेवनात् ।
अकालमध्येऽप्ययोनि मैथुनं-प्रकुर्वतां वा त्यजतां रतिक्रियाम् ॥३॥
अतीव रूक्षं लवणं तथाऽम्ल-मुष्णं कषायं बहुशश्च तिक्तम् ।
पदार्थजातं च समश्नतां नृणां-निषेवणाच्चाप्यरसज्ञयोषिताम् ॥ ४ ॥
तथा च शुक्रस्रवणाज्जरातो-ऽथवाऽतिशोकादपि चिन्तनाद् भृशम् ।
किंवाऽग्निदाहादथ शस्त्रघातात्-क्षाराभिपाताच्च भयाद्विशेषात् ॥५॥
क्रोधादविश्वासत एव चातो-सारात्तथा व्याधिसमुत्थकार्श्यात् ।
वेगावरोधादधिकक्षताद्वा-संदूषणाद् धातुगणस्य चापि ॥ ६ ॥
पृथक्पृथग्वा मिलितास्तु दोषा-रेतोवहाः प्राप्य शिराः प्रदुष्टाः ।
द्रुतं च शुक्रं ननु दूषयेयु-र्ब्रवीमि तद्दुष्टिमथो विभागशः ॥ ७ ॥

तत्रादौ शुक्रस्याष्टौ दोषाः—

यत्फेनिलं तनु च रूक्षमतीव वाऽन्य-धातूपसृष्टमवसाद्यपि पूतिगन्धि ।
स्यात् पिच्छिलं प्रकृतितोऽपि विवर्णमल्पं तद्दुष्टशुक्रमिह वैद्यवरा वदेयुः॥

वातदुष्टशुक्रलक्षणम्—

यत्फेनिलं तनु च रूक्षमथातिकृच्छ्र-
णाल्पं स्रवेत्तदनिलेन विदूषितं स्यात् ।
एवंविधं तु नहि शुक्रमुशन्ति वैद्या
गर्भाय जातु चन योग्यमवश्यमेव ॥ ९ ॥

पित्तदुष्टशुक्रलक्षणम्—

शुक्रं भवेन्नीलमथापि पीत-मत्युष्णमल्पं ननु पूतिगन्धि ।
स्रवेच्च लिङ्गं प्रदहत्तु यत्तत्-पित्तेन संदूषितमेव बोध्यम् ॥ १० ॥

कफदुष्टशुक्रलक्षणम्—

भवेत् पिच्छिलं चाधिकं बद्धमार्गं-कफेनैव संदूषितं शुक्रमत्र ।

ब्रुवन्तीत्थमायुर्विदामग्रगण्या-वरेण्याश्च ये शुक्रदोषज्ञमध्ये ॥ ११ ॥

रक्तान्वितशुक्रलक्षणम्—

अतीवाङ्गनासङ्गमाद्वाऽभिघातात्-क्षताच्चापि संयुक्तमस्रेण नृणाम् ।
अपि प्रायशः संप्रवर्त्तेत शुक्रं-तथा वेगसन्धारणान्मारुतेन ॥ १२ ॥
स्वमार्गऽवरुद्धं च कृच्छ्रेण रेतः-सदा ग्रन्थियुक्तं स्रवेच्चावसादि ।
इति ख्यापिता रेतसोऽष्टौ तु दोषाः-समस्ताः सलक्ष्माण आयुर्विदग्र्यैः॥

शुद्धशुक्रलक्षणम्—

घनं स्निग्धमस्राऽथ माधुर्ययुक्तं-तथा पिच्छिलं चाविदाहीह शुक्रम् ।
सदा स्फाटिकं वर्णमासं तु शुक्रं-विशुद्धं विशेषेण बोध्यं सुधीभिः ॥१४॥

इति माधवनिदानपरिशिष्टे शुक्रदोषनिदानं समाप्तम् ।

---

## अथोपान्त्रशोथनिदानम् ।

उपान्त्रशोथस्य परिचयः—

प्रतिमानवं विभिन्ना-मानेनान्त्रपुटेऽन्त्रनित्यलग्ना ।
एका नलिका वर्त्तत-उपान्त्रपदनामिका विदिता ॥ १ ॥
तस्या मानं क्वचन-स्यादङ्गुलिद्वयोन्मिता बहुधाऽपि ।
जातु चनातोऽप्यधिकं-मानं क्वचिदष्टाङ्गुलोन्मितं भवति ॥ २ ॥
अत एव स्थितिरस्या-भवति हि मनुजानुसारिणी नियतम् ।
जाते चात्र प्रदाहे-तीव्रा पीडा प्रजायते नूनम् ॥ ३ ॥

अत्र प्रदाहे कारणम्—

यदाऽऽहारभागोऽत्र किंवाऽन्यदेवा-विशेद्वस्तु काठिन्ययुक्तं कदाचित् ।
तदोपान्त्रमध्ये प्रदाहोऽतिघोरो-ऽनुभूयेत रोगार्दितेनैव नूनम् ॥ ४ ॥

अस्य संप्राप्तिः—

उपान्त्रस्य भित्तौ यदा श्लेष्मणो वा-कलायां प्रकुर्युर्हि कीटाः प्रशोथम् ।
ततो मन्दभावेन वृद्धः स शोथो-व्रणस्य स्वरूपं तु नूनं सुदध्यात् ॥५॥
ततो यानि रूपाण्युपान्त्रस्य शोथे-गदेऽस्मिन्भवेयुश्च तानीह कृत्स्नम् ।
नवीनैश्चिकित्साप्रवीणैश्च पाश्चा-त्यदेशोद्भवैर्वर्णितानि ब्रुवेऽत्र ॥ ६ ॥

उपान्त्रशोथस्य स्वरूपम्—

इह श्रोणिदेशे रुजा दक्षिणे स्यात्-भृशं जातु देशे कपर्दाभिधे वा ।
समुत्पद्य पूर्वं ततश्चोदरं वै-परिव्याप्य सा प्रायशश्चाभ्युदेति ॥ ७ ॥

स्थिरा श्रोणिमध्ये पुनः पूर्णरीत्या-ततश्छर्दनाधिक्यमाटोप उग्रः ।
भवेन्मांसपेशीस्थितः स्पर्शनोत्या-रुगुग्राऽप्युपान्त्रस्य नूनं तदानीम् ॥८॥
सदा दक्षिणं सक्थि संकोच्य रोगी स्वपित्यत्र यत्नादभीप्सुः प्रशान्तिम्।
भवेद् द्व्युत्तरं तापमानं ज्वरस्या-निशं ह्येकसंख्यं शतं रोगिदेहे ॥९॥
विबन्धस्य संबन्ध एवात्र भूम्ना प्रदृश्येत वा जातु चिच्चातिसारः ।
उपान्त्रस्यशोथाख्यरोगे बुधानां स्वरूपाभिधानेऽयमित्थं विचारः ॥१०॥

अस्य साध्यत्वादिकम्—

दशायां तु साध्यस्य रोगोऽयमुक्तो मृदुश्च क्रमेण द्व्यहाद्वा त्र्यहाद् गौ ।
लभेतापि च न्यूनभावं च तेना-मयी मानवः सौख्यमाप्नोति नूनम्॥११॥
यदा चाक्रमेदेष रोगस्तु शश्व-न्नरानस्य कृच्छ्रत्वमूह्यं तदा तु ।
प्रशस्तैः प्रयोगैश्चिकित्साऽतियत्ना-द्विधेयेति सर्वैः सुवैद्यैरिहोक्ता ॥
यदा चात्र योगो भवेद्विद्रधेर्वा प्रजायेत विस्फोट एवैतदीयः ।
तथा चोदराच्छादिकायां कलायां भवेच्छोथसंदर्शनं दैवदोषात् ॥१३॥
विना शल्यसंबन्धिनीं सच्चिकित्सा-मसाध्यत्वमस्येति बोध्यं तदा तु ।
प्रजातेऽत्र योगे ध्रुवं विद्रधेर्वै-ज्वरादीनि रूपाणि दृष्टान्यपि स्युः ॥१४॥
तथा चोदराच्छादिकायां कलायां-प्रजाते च शोथे भवेत् तापमानम् ।
अपि स्वस्थतुल्यं ज्वरस्याथ शीता-ङ्गताच्छर्दनादीनि चिह्नान्यपि स्युः॥

इति माधवनिदानपरिशिष्ट उपान्त्रशोथनिदानं समाप्तम् ।

---

## अथ चुल्लिकाग्रन्थिरोगनिदानम् ।

अस्य परिचयः—

ग्रीवायां स्वरयन्त्रसंनिधिभवा या चुल्लिकानामिका-
ग्रन्थिः स्यात् किल तत्समुत्थितरसो देहेऽतिलाभप्रदः ।
तस्या द्वौ गदितौ गदौ मदरहस्यज्ञानिभिः कोविदै-
स्तत्राद्यो रसवृद्धिहेतुजगदः संकीर्तितः सर्वथा ॥ १ ॥
अप्यन्यो रसहानिहेतुजगदोऽग्रे वर्ण्यते पूर्णत-
स्तत्रादौ रसवृद्धिहेतुजगदो नूनं बहिर्नेत्रयुग् ।
आख्यातो गलगण्डनामक इहैकः श्लैष्मिकाद्यान्वितः-
शोथो वामनता तथा च गलग-ण्डोऽन्यस्य भेदास्त्रयः ॥२॥
तेष्वन्त्ये गलगण्डनामकगदे सर्वाधिका चुल्लिका-

ग्रन्थैर्वृद्धिरवेक्ष्यतेऽथ सकलानां वर्णनं कृत्स्नशः ।
अप्यस्माभिरिह क्रमेण विधिवत्संपाद्यते सांप्रतं-
तत् प्रीत्या रसवृद्धिहानिजगदानां त्वं समाकर्णय ॥३॥

बहिर्नेत्रगलगण्डनिदानम्—

चिन्ताशोकक्रोधभीतिप्रकर्षा-दुष्णप्रायेष्वेव देशेष्वसौ स्यात् ।
भूम्ना तत्रातीव सभ्येषु चैवं-प्रायः पुंसोऽपेक्षया स्त्रीषु रोगः ॥४॥
आपञ्चदशशरद्भ्यो-विंशतिवर्षाण्यभिव्याप्य ।
जायेत हि बहिर्नेत्र-गलगण्डाख्यो विशेषेण ॥ ५ ॥

अस्य संप्राप्तिः—

अन्त्राद्विषं चापि विलीय पीडो-पेत्योपवृक्कद्वितये निरन्तरम् ।
प्रक्षोभयेन्नन्विह पिङ्गलायाः-सर्वं शिरायाः किल चक्रवालम् ॥६॥
ततो बहिर्नेत्रपदान्वितोऽयं-प्रजायते वै गलगण्डरोगः ।
संप्राप्तिरित्थं गदिता भिषग्भि-र्निदानविद्भिर्बहुशो विविच्य ॥७॥

अस्य स्वरूपम्—

श्रमो मानसः क्षोभ एवं कदाचिद्-रुजा चाधिका जातुचिद्धृत्प्रकम्पः ॥८॥
अथो चुल्लिकाग्रन्थिवृद्धिश्च चक्षु-र्व्युदासस्तथा कामशक्तेश्च ह्रासः ॥
इतीमे विकाराः समुद्भूय नूनं-नरान् पीडयेयुर्गदेऽस्मिन् विशेषात् ।
अतो यत्नतः सद्य एवावलोक्य-क्रिया रोगनाशिन्यवश्यं विधेया ॥९॥

अस्य साध्यासाध्यत्वम्—

दशायां मृदौ चास्य रोगस्य नूनं-भवेत्स्वस्थताऽब्दात्परं सर्वदैव ।
तथा तीव्रतामास्थितायां तु वर्ष-द्वयादेव पञ्चत्वमेतीह रोगी ॥ १० ॥

अत्रारिष्टम्—

बहिर्नेत्रयुक्ते गदेऽस्मिन् यदाग-लगण्डाभिधे रोगिदेहे कदाचित् ।
प्रहृष्येत शक्तिर्व्ययस्याधिकत्वं-तदाऽरिष्टमत्यर्थमंद्धाऽत्रगच्छेत् ॥११॥

श्लैष्मिकार्द्रशोथनिदानम् ।

तस्य परिचयः—

गदे श्लैष्मिकार्द्राख्यशोथे विशेषाद्-
भवेच्चुल्लिकाग्रन्थिजातस्य नूनम् ।
रसस्याधिका हीनताऽथो त्वचायां-
तथा श्लेष्मकायां कलायां भवेच ॥ १२ ॥

अपि स्थूलता गौरवं चेन्द्रलुप्तो-भवो मानसस्यापि कायस्य शीघ्रम् ।
क्रियायां भृशं मन्दता मन्दभाव्या-दितीमानि चिह्नानि संक्षेपतः स्युः १३

तस्य च कारणम्—

भवेत् कारणं श्लैष्मिकाद्राख्यशोथा-मयस्योद्भवे दृश्यमानं विशेषात् ।
परं चुल्लिकाग्रन्थिनिष्कासनं वै स्वयं नाश एवाथवाऽस्या अकस्मात् १४
तथा पूरुषापेक्षया स्त्रीषु सप्त-गुणाधिक्यवद् दृश्यते रोगजन्म ।
भिषग्भिश्च पाश्चात्यदेशप्रजातै-रिहेति प्रकाशीकृतं लोकमध्ये ॥ १५ ॥

तस्य संप्राप्तेरवतारः—

अन्तःस्था रसकारकाः प्रकथिता ये चुल्लिकाया ध्रुवं
भागा ग्रन्थिभवास्त एव हि गदे गच्छन्ति च क्षीणताम् ।
श्लेष्मा यस्त्वगधः स्थितोऽपि च भवेत् सोऽत्यन्तवृद्धिं त्वियात्-
तस्मात्त्वक् प्रविलोक्यते प्रकुपितः स्थूला कला श्लेष्मला ॥१६॥
विधिनाऽनेनोत्पत्ती-रोगस्यास्योपजायते नूनम् ।
इति विज्ञेयं विबुधैः-कथितं विधिवन्मयाऽनूनम् ॥ १७ ॥

तस्य लक्षणम्—

गदारम्भकाले सदैवावसादो-भृशं मानसे भ्रष्टताऽपि स्मृतेश्च ।
ततः सर्वशाखासु पीडोद्भवोऽथो-भवेद् गौरवं वर्त्मनो मण्डलेऽपि ॥१८॥
त्वचा स्थूलभावं गता चातिशुष्का-खरस्पर्शयुक्ता प्रदृश्येत नूनम् ।
विकृत्याऽन्विताः स्थौल्यमाप्ता विशुष्काः-परिभ्रंशिनश्चापि केशा भवेयुः१९
ततोऽपि प्रवृद्धे गदे रोगिदेहे-गुरुत्वं च मूढत्वमुत्पद्यतेऽद्धा ।
मुखं चायतं स्थूलता दीर्घताऽपि-प्रजायेत दन्तच्छदद्वन्द्वमध्ये ॥ २० ॥
तथा गण्डयो रक्तिमा कर्णपाल्यां-गुरुत्वं च रोम्णां परिक्षीणताऽपि ।
अथ स्थूलता हस्तयोः पादयोश्च-द्विजानां तु पातो मतेर्मन्दता स्यात् २१
भवेदिन्द्रियाणां हृदः क्षीणताऽपि-प्रजाते भृशं दारुणेऽस्मिन् गदे तु ।
ज्वरस्थायितापस्थमानस्य तद्वत्-क्षुधो मन्दभावोऽपि मूत्रा विबन्धः २२
उग्रदशायामस्य गदस्य-बन्ध्यात्वं योषित्सु विशिष्य ।
सर्वत्रैवं बहुशो दृष्टं-तस्माद्वैद्यैरिह निर्दिष्टम् ॥ २३ ॥

अथ वामनरोगनिदानम् ।

तस्य परिचयः—

शरीरमानहीनता-तथाऽतिबुद्धिमन्दता ।
उपस्थसूक्ष्मता भवेत्-सदा गदे तु वामने ॥ २४ ॥

तस्य कारणनिर्देशः—

आजन्मनो भवति यस्य न चुल्लिकाख्या
ग्रन्थिस्तनावथ च तद्भवदुर्बलत्वम् ।
तस्मिन्नरे नियमतो ननु वामनत्वं-
तस्मान्निमित्तत इहोदितमेव विद्यात् ॥ २५ ॥

गलगण्डगदेन रोगिणः-कुलबीजस्य च दुष्टता सदा ।
अपि देशविशेषताऽस्य नौ-जनने स्यात् सहकारि कारणम् ॥२६॥

तस्य लक्षणम्—

गदे श्लैष्मिकाद्र्राख्यशोथे तु यानि-पुरोक्तान्यशेषाणि लक्ष्माणि तानि ।
विशेषादिह स्युर्ध्रुवं वामनत्वे ह्यभिव्यक्तिमाप्तानि विद्वन्मतानि ॥२७॥
सदा मेदसा गर्भितानीह सर्वा-णि चाङ्गानि ह्रस्वानि नूनं भवेयुः ।
पुनश्चात्र वैशिष्ट्यमाभाति यत्तत् समस्तं मया सांप्रतं कथ्यतेऽग्रे ॥२८॥
भवेज्जङ्घयोर्वक्रता चापि बाहु-द्वये ऽथोदरे पूर्णरीत्या गुरुत्वम् ।
खरस्पर्शयुक्ताऽतिशैथिल्यमाप्ता तथा स्थौल्यवत्यत्र जायेत च त्वक् ॥२९॥
प्रशूने च नासापुटे वर्तुलं नौ भवेदाननं नासिका चायताऽपि ।
ललाटं विशालं तथैवोष्ठयुग्मं सदा पीवरं पीवराऽथो रसज्ञा ॥ ३० ॥
मतेर्मन्दता प्रायशश्च प्रणाशः-स्मृतेरेवमुग्रत्वमाप्ते गदे तु ।
प्रभेदः स्वरस्यात्र मेदःसमुत्थः प्रजोत्पत्तिकारीन्द्रियक्षीणता च ॥ ३१ ॥
तथा जायते कामशक्तेश्च मान्द्यं विशेषाद्गदे वामने नूनमेव ।
इतीमानि चिह्नानि पाश्चात्यवैद्यैः समुक्तानि सर्वाणि बोध्यानि लोकैः ३२

गलगण्डविषये कथनम्—

गलगण्डगदो गदितो मुनिभि-र्यत एव ततोऽस्य च रूपमलम् ।
अवबोध्यमिहाखिलमुक्तमतो न हि किंचन तुल्यतया तु मया ॥३३॥

इति माधवनिदानपरिशिष्टे चुल्लिकाग्रन्थिनिदानं समाप्तम् ।

---

## अथोपदंशनिदानम् ।

तत्रोपदंशस्य परिचयः ।

द्विधोपदंशः प्रथमं तु वैद्यै-रिहोपदिष्टः किल तत्र चाद्यः ।
निबोधनीयो ननु दोषहेतुजः-कीटाणुजन्मा तदनु द्वितीयः ॥ १ ॥
तयोस्तु चाद्यो बुधमाधवेन निरूपितः स्वीयनिबन्धमध्ये ।
अहन्त्विदानीमत एव चापरं ब्रवीमि जीवाणुजमेव केवलम् ॥ २ ॥

गदोऽगदङ्कारवरैरयं चिर-स्थितिस्वभावः सकलेषु रोगिषु ।
अथापि संसर्गनिमित्तसंभवो भवेऽनुभूतोऽतिभयप्रदो भृशम् ॥ ३ ॥
व्रणाः प्रजायन्त इहाभ्युपस्थं बहिःस्थलेऽथो रुधिरे गदाणवः ।
प्रविश्य कुर्वन्ति च लक्ष्म नैकं सामान्यतो लक्षणमेतदूह्यम् ॥ ४ ॥

तस्य कारणम्—

"स्पाइटा कीटा-त्रैलिडा" कीटाः । लोहिते विष्टा-इचक्षुषाऽदृष्टाः ॥५॥
कारणं शस्य-मामयस्यास्य । कर्षिणोतुल्या-रोगिणे शल्याः ॥ ६ ॥
प्रायेण चाक्रमणमस्य तु मैथुनेन-जायेत च क्वचन संक्रमणैरथान्यैः ।
मर्त्येषु संक्रमणमत्र बहुत्र दृष्टं-किंचैतदामयचिरार्दितयोस्तु पित्रोः॥७॥
स्वीयासु संततिषु चापि विलोक्यते तत्-तद्वर्णनं च पृथगेव विधास्यतेऽग्रे ।

चेद्ग्राम्यधर्मवशतः प्रसरस्तु यस्मिन्
जीवाण्वनल्पनिचयस्य विशिष्य च स्यात् ॥ ८ ॥
तत्राभ्युपस्थमधिबाह्यपदं स्त्रियाश्च-
पुंसो व्रणा नियमतो ह्युपदंशजाः स्युः ।
सामान्यतो निगदितं च निदानमेवं-
सर्वं मयाऽस्य सविशेषमथोच्यतेऽग्रे ॥ ९ ॥

अस्य संप्राप्तिस्तत्र च प्रथमावस्था—

जीवाणवोऽस्य हि गदस्य सदाऽभ्युपस्थं-
स्पर्शस्थले विदधति व्रणमत्युदग्रम् ।
पूर्वं भवेत्त्वचि तु वर्त्तुलसूक्ष्मसेला-
नां वृद्धिरत्यधिकतासहिता विशेषात् ॥ १० ॥
संजायते तदनु सौत्रिकतन्तुजाल-
संवर्द्धनं प्रतिदिनं ननु रोगिमध्ये ।
शूना कला भवति रक्तधराऽतिवृत्त-
सेलाभिवृद्धिसहिताऽविरतं नितान्तम् ॥ ११ ॥
हेतोरतो रुधिरधारिधराऽथवसूक्ष्म-
त्वं जायते तदनु संनिधिवर्त्तिनोऽस्याः ।
पूर्णाभिवृद्धिरुदिताऽपि भवेल्लसीका-
ग्रन्थिव्रजस्य किल तास्वपि सेलसंस्था ॥ १२ ॥
इत्थं प्रथमाऽवस्था-रोगं विद्भिरस्य गाद्यतेयम् ।

संप्राप्स्या त्वनयैवो-पदंशरोगस्य सर्वथा नूनम् ॥१३॥

अस्य द्वितीयाऽवस्था—

सप्ताहषट्केन ततः प्रयान्ति ग्रन्थिभ्य एवास्य गदाणवोऽस्त्र ।
प्रकुर्वते च त्वचि तत्र संगता-स्ते श्लेष्मलायां हि ततः कलायाम् ॥१४॥
स्फोटांस्तथाऽद्धा पिडिका अवश्यं ततः प्रवृद्धिं विपुलां प्रयाति ।
समस्तकायस्थितिमल्लसीका-ग्रन्थिव्रजोऽस्मिन्नुपदंशरोगे ॥ १५ ॥
पश्चाद्भवेद् ग्रन्थिषु सेलतन्तु-प्रवर्धनं पूर्ववदेव नूनम् ।
गदस्य चेत्थं गदिता द्वितीयाऽ-वस्था भिषग्भिर्बहुशो विविच्य ॥ १६ ॥

अस्य तृतीयाऽवस्था—

श्यानग्रन्थीरूर्ध्वमब्दद्वयात्त प्रायः कुर्वन्त्यामयस्याणवोऽस्य ।
रोगग्रस्तानां नृणां वै विशिष्ट-भागेष्वेवाथो शरीरस्य मध्ये ॥ १७ ॥
पश्चात्तास्तु ग्रन्थयो मांसपेशी-भिस्तत्रस्था आवृताः सत्य एव ।
सूक्ष्माः स्थूलाः क्षुद्रवृत्तैश्च सेलैः-किं वा सेलैः श्लैष्मिकैः सर्वथैव॥१८॥
नूनं सौत्रैस्तन्तुभिर्वा कृताः स्युः-पश्चात्ताश्च ग्रन्थयो मध्यभागात् ।
संयाताः स्युः शीर्णभावं विशेषात्-पश्चाज्जायेत व्रणत्वं तु तत्र ॥१९॥
तस्मिन् काले रक्तसंवाहिनाड्यो दार्ढ्यं प्राप्ता रज्जुवच्चातिमात्रम् ।
संदृश्यन्ते चातिसंकीर्णमार्गा-इत्थं संकीर्णत्वातिरेकाद् यदा तु ॥२०॥
तासां जायेताथ मस्तिष्कदेशे-भूम्ना मार्गस्यावरुद्धत्वमेव ।
पक्षाघातो मूर्च्छनं वाऽपि मृत्यु-र्नूनं तेनास्मिन् गदे स्यात्तदा तु ॥२१॥
इत्थं तासां हृत्प्रदेशे कदाचि-च्चेत्स्यान्मार्गस्यावरुद्धत्वमद्धा ।
संजायेताशु प्रायशो वै तदा तु-हृत्कार्यस्यातीवरोधोऽप्यकस्मात्॥२२॥
किंवा वा तत्र स्याद्दृषदो विस्तृतिश्च-ह्येवंभूता अन्य एवोपसर्गाः ।
प्राणघ्ना वा दृश्यमाना भवेयुः-प्रोक्ताऽवस्थाऽस्येत्थमेषा तृतीया ॥२३॥

आसूत्तरोत्तरं जीवाणूनामल्पतानिर्देशः—

पुरोदितास्वासु दशासु तूत्तरो-त्तरं भिषग्वृन्दमवेतु चाल्पताम् ।
व्रणेषु जीवाणुगणस्यचामय-प्रदायिनो नूनमिहोपदंशे ॥ २४ ॥

अस्य लक्षणम्—

श्यानाभिधा ग्रन्थय आमयेऽस्मि-स्तनौ भवेयुर्ननु यत्र तत्र ।
वर्णस्तु तासां पललोपमो वा ताम्रोपमो वा परिदृश्यतेऽत्र ॥ २५ ॥
ता उद्भवेयुश्च समानरूपतो-भूयः शरीरस्य च पार्श्वयोः सदा ।

यदा हि बह्व्यो मिलिताः परस्परं तदा तु दध्युर्ननु मण्डलाकृतिम् ॥२६॥
मन्दज्वरः स्यादिह कण्ठपाकता-न्यूनत्वमस्त्रस्य तथेन्द्रलुप्तता ।
शिरोव्यथा नक्तमथास्थिमध्ये रुजा सशोथाऽभ्यधिका प्रदृश्यते ॥२७॥
मुखेऽधिनासं रदनच्छदेऽथो श्लेष्मच्छदे योनिगते विशेषात् ।
भवेद् व्रणोत्पत्तिरपीह संशयो विधेय ईषन्न कदाऽपि कोविदैः ॥ २८ ॥
परिस्थितावत्र तदा तृतीया-र्या लक्ष्मणां प्रागुपवर्णितानाम् ।
संवर्द्धनं पूर्णतयाऽखिलानां भवेत्तनावप्युपदंशरोगिणाम् ॥ २९ ॥
क्वचनाभिधग्रन्थिसमुद्भवोऽस्थिन यकृत्यथो प्लीह्नयथिफुप्फुसे हृदि ।
संदृश्यते तत्स्फुटनं ततश्च-तथा च तत्र स्फुटितेऽथ रूढे ॥३०॥
समुद्भवेत्सौत्रिकतन्तुता तदा गदेऽत्र योषित्स्वपि गर्भपातः ।
आदौ भवेच्च क्रमतस्ततः स-विलम्बतो दृश्यत एव लोके ॥ ३१ ॥
तदन्वपातश्च ततोऽल्पजीविनः शिशोर्भवेदुद्भव एव सर्वथा ।
ततः क्रमेण ह्युपदंशरोगिण—श्चिरायुषो बालजनस्य जन्म ॥ ३२ ॥
प्रजायते प्रायश एव चैषा-रीतिर्भिषग्भिर्भुवनेऽनुभूता ।
ततस्तु तद्बालगतो ह्यवश्यं सदोपदंशः सहजः स बोध्यः ॥ ३३ ॥

अत्रोपद्रवाः—

संकोचभावो ह्यथिफुप्फुसे वा यकृत्यथो प्लीह्नयपि पक्षवातः ।
अपस्मृतिर्मूर्च्छनमप्यवश्य-मुन्मत्तता मारुतजा गदाश्च ॥ ३४ ॥
एते यदा ह्युपदंशरोग-मुपद्रवा वैद्यवरैर्विशिष्य ।
संकीर्तितास्तैन युतः सदैभी-रोगी लभेतान्तकलोकवासम् ॥ ३५ ॥

इति माधवनिदानपरिशिष्ट उपदंशरोगनिदानं समाप्तम् ।

---

## अथ सहजोपदंशनिदानम् ।

जीवाणुयोगयुतशोणितशुक्रहेतु-
जातोपदंश उदितः सहजाभिधो हि
शुक्रे तथा रजसि दुष्ट इहोपदंश-
जीवाणुभिः सति तयोरवमेलनाद्धे ॥ १ ॥

जायेत कश्चन कदाचन दैवयोगा-द्गर्भः स नाशमपि नूनमवाप्नुयाच्च ।
किंवा कश्चिदथभिनवेऽप्युपदंशरोगे भी शोद्भवेत्सुकृतितोऽथ च गर्भपातः॥२॥
एवं च जातु चन बालकजन्म चेत् स्यात्

सद्वैद्यवृन्दपरिभाषित एव लोके ।
नूनं बुधैः स सहजेन गदेन चोप-
दंशेन पीडिततनुर्ननु बोधनीयः ॥ ३ ॥
किं चोपदंशवशगा यदि गर्भिणी स्यात्
तत्रोद्भवं त्वधिगतः शिशुरप्यवश्यम् ।
सांसर्गिकेण कलितः स इहोपदंशे-
नाभाषितो बुधजनैरपि वेदनीयः ॥ ४ ॥

अत्र वैशिष्ट्यम्—

अत्रोपदंशे सहजाभिधे बुधै-रवश्यमेतत्सततं विशोध्यम् ।
अथोपदंशस्य च चिह्नजातं न चेज्जनन्यां क्वचिद्वीक्षितं स्यात् ॥५॥
तदेव चेद्बालशरीरमध्ये जन्मक्षणे लक्षितमेव नूनम् ।
स बालको मातरि तूपदंशे प्रभुर्न संक्रामयितुं भवेत्क्वचित् ॥ ६ ॥
स्यात् किन्तु चान्यत्र निजोपदंश-व्रणस्य संक्रान्तिकृतेऽनिशं क्षमः ।
न संशयस्यावसरोऽत्र देयो यतो भिषग्भिर्बहुशोऽनुभूतः ॥ ७ ॥
एवं च पित्रोरुपदंशिनोः क्वचि-च्चेन्नोपदंशार्त्ततनुः शिशुः स्यात् ।
तदा स संसर्गभवोपदंश-संक्रान्तिभीत्या रहितो भवेद् ध्रुवम् ॥ ८ ॥
इयं तु रोगाक्रमणप्रभावं सोढुं च शक्तिः किल तत्र बाले ।
संदृश्यमाना वयसि प्रवृद्धे विलीयमाना स्वयमेव वै भवेत् ॥ ९ ॥

सहजोपदंशस्य लक्षणम्—

भवन्ति चास्मिन् सहजोपदंशे गदे शिशौ यान्यपि लक्षणानि ।
प्रदृश्यमानान्यखिलानि तानि ब्रवीम्यहं संशृणु साम्प्रतमिदानीम् ॥ १० ॥
न जातमात्रे हि शिशौ विलोक्यते गदस्य किंचित् क्वचिदेव लक्षणम् ।
परन्तु सप्ताहचतुष्टयात्परं तद्वर्ष्मणि प्राय अनावृतेषु वै ॥ ११ ॥
नासामुखादिष्वखिलेषु चाङ्गके-षु पाटलाभाः पिडिका भवेयुः ।
परस्परं ता मिलिता व्रणत्वं प्रसारिणोऽङ्गा बहुधा हि दध्युः ॥ १२ ॥
ततस्त्विमां प्राप्य दशामवश्यं संक्षीयमाणाः शिशवः सदेहशाः ।
वलीविशेषाकलिताननाः ध्रुवं विलोक्यमाना इह वै भवेयुः ॥ १३ ॥
पतिष्णुता वाऽथ विरूपता भवे न्नखेषु तेषामपि चेन्द्रलुप्तता ।
मुखोष्ठयोर्वा व्रणयुक्तताऽधिकाऽधिनासिकं वा स्वरयन्त्रमध्ये ॥ १४ ॥

श्लेष्मच्छदेऽपि व्रणिता तथोध्रुवं-

नासाऽस्थिमध्ये गलितिर्विशेषात् ॥
मिथो विलम्बेन तथाऽस्थिकेन्द्रा-।
णां मेलनं जायत एव नूनम् ॥ १५ ॥

समुद्गमश्चाथ विनाश आशु प्रदृश्यते बालतनौ रदानाम् ।
तथाऽऽश्रितेष्वप्यथ तेषु यौवनं पुरोदिताथो उपदंशजाया: ॥ १६ ॥
प्रायो दशाया बहुशस्तृतीया-या लक्षणानीह भवेयुरेव ।
अथोपदंशीयगदाणुजुष्टयोः पित्रो रजःशुक्रत आप्तजन्मसु ॥ १७ ॥
किंचित्प्रवृद्धेषु च तेषु नूनं कार्श्यं प्रदृश्येत च दुर्बलत्वम् ।
तथाऽधिकत्वं वयसोऽपि लक्ष्यते तदायदेहस्थितलक्षणैर्ध्रुवम् ॥ १८ ॥
नासासेतुश्चिप्पिटः स्याच्च तेषां साम्यं शीर्ष्णि प्रायशः संभवेद्धि ।
मूर्ध्नो रन्ध्राण्यत्र नूनं चिरेण-संपूर्णत्वं संभजन्ते विशेषात् ॥ १९ ॥
ऊर्ध्वस्था ये भेदकास्ते रदास्तु तीक्ष्णाः कीलौपम्ययुक्ता भवेयुः ।
चक्राकारा ओष्ठयोः प्रान्तभागे बाह्ये जायेरन् व्रणाः पूर्णरीत्या ॥२०॥
दीर्घास्थ्नां च स्युः शिरांसि प्रकामं स्थूलान्येवं नेत्रयोः शुक्ररोगः ।
जायेताथो शोथ एवोपतारि-कायामन्ये चाक्षिरोगा भवेयुः ॥ २१ ॥
कथनं सहजोपदंशजानां-निखिलानामिह लक्ष्मणां मयेत्थम् ।
विहितं बहुशो भिषग्जनेज्यै-र्गदितानां तु नवैः सुपद्यवृन्दैः ॥२२॥

इति माधवनिदानपरिशिष्टे सहजोपदंशनिदानं समाप्तम् ।

---

## अथ फिरङ्गरोगनिदानम् ।

फिरङ्गाख्यदेशे यतोऽयं गदः स्याद्-विशेषात्ततो भाषितो ज्ञैः फिरङ्गः ।
असौ गन्धरोगः फिरङ्गो जनानां-प्रजायेत नूनं फिरङ्गयङ्गसङ्गात् ॥१॥
फिरङ्गिणीसङ्गमतोऽपि जातु-प्रदृश्यते व्याधिसमुद्भवोऽपि ।
अतो मतो वैद्यवरैर्गदोऽसा-वागन्तुजः स्यादिह दोषसंक्रमः ॥ २ ॥
संलक्षयेद्दोषकृतैस्तु चिह्नै-स्तैर्वैद्यवर्योऽमुकदोषजुष्टम् ।
फिरङ्गरोगस्त्रिविधो भिषग्भिः-प्रोक्तस्तु तत्रादिम एव बाह्यः ॥ ३ ॥
आभ्यन्तरः स्यादपि च द्वितीयो-बाह्यान्विताभ्यन्तरसंज्ञकोऽन्त्यः ।
लिङ्गानि चैषामथ संब्रवीमि-क्रमेण कृत्स्नं कथितानि वैद्यैः ॥ ४ ॥
बाह्यः फिरङ्गो गदितस्तु तत्र-विस्फोटतुल्योऽल्परुजाऽन्वितश्च ।
प्रदृश्यते च स्फुटितो भिषग्भिः-प्रायेण लोके व्रणवत् सुसाध्यः ॥५॥

आभ्यन्तरो यः स इहामवातो-पमव्यथां सन्धिषु चापि नूनम् ।
शोथं विशेषाज्जनयेत्ततोऽसौ-ख्यातो भिषग्भिर्ननु कष्टसाध्यः ॥६॥
नासाभङ्गो वह्निमान्द्यं च कार्श्यं-शोषश्चास्थ्नां वक्रता वा फिरङ्गे ।
तूपद्रुत्यो भाषिता वै बलस्य-क्षीणत्वं चास्त्रार्यवैर्यैरिमा वै ॥ ७ ॥
उपद्रवैरेभिरनन्वितो यो-गदः फिरङ्गोऽभिनवो बहिर्भवः ।
भवेत् स साध्योऽथ च कष्टसाध्य-आभ्यन्तरोऽयं बहुशो भिषग्भिः ॥८॥
क्षीणजनस्योपद्रवसहितो-व्याप्तो बहिरन्तःस्थल उदितः ।
भवेदसाध्यः फिरङ्गरोगः-कथयत्येतद्वैद्यपुरोगः ॥ ९ ॥

इति माधवनिदानपरिशिष्टे फिरङ्गरोगनिदानं समाप्तम् ।

## अथौपसर्गिकोपदंशनिदानम् ।

विभिन्नजातीयपराङ्गनासु किंवाऽप्यनेकास्ववलासु सङ्गमात् ।
व्रणोऽतिघोरो बहुरुक्प्रकाशकः-स्यात्कष्टदो वै जननेन्द्रिये नृणाम् ॥ १ ॥
पापोपदंशोऽथ विषोपदंशो-यः कीर्त्तितो वैद्यवरैर्विशेषात् ।
स एव प्राचीनतमैर्ध्रुवं चौ-पसर्गिकाख्यो ह्युपदंश उक्तः ॥ २ ॥
संक्रामति प्रायश एष पुंसि स्त्रीतश्च तस्यां तत एव रोगः ।
जायेत चापत्यजनेष्वतोऽसौ सुदारुणोऽद्धा कुलजः प्रकीर्त्तितः ॥ ३ ॥
द्विधोपदंशो ननु मुख्य-गौण-विभेदतो वैद्यजनैः प्रदिष्टः ।
मुख्यस्तु तत्रेन्द्रियगो हि दोषो बोध्यः सदा देहगतोऽथ गौणः ॥ ४ ॥

विषोपदंशस्वरूपम्—

आरभ्य यः सौरतकालतस्त्रि-सप्ताहमध्ये जननेन्द्रिये तु ।
प्रजायमानो गदितो व्रणः स विषोपदंशेतिपदेन नूनम् ॥ ५ ॥
यश्चातिदीर्घं समतीत्य कालं नृणां शरीरे सततं स्थितः स्यात् ।
स चातिकृच्छ्रोऽमितदुःखदायी निबोधितः सर्वभिषग्जनेन ॥ ६ ॥

पापोपदंशस्वरूपम्—

पापोपदंशस्य विशेषतः स्याद् द्विधा व्रणोऽद्धा कठिनो मृदुश्च ।
तत्रादिमः कृत्स्नतनुप्रतापी संक्रामकः कृच्छ्रतरः प्रसिद्धः ॥ ७ ॥
नान्यः संक्रमेत्कदाचित्क्वचिच्च कंचिद् देहं नैव संदूषयेद्वा ।
प्रोक्तश्चातोऽत्यन्तसाध्यो भिषग्भि-र्भूम्ना भूमौ नापि संकष्टदायी ॥८॥

मुख्योपदंशरूपम्—

जायन्ते पिडिकाः सदैव पुरुष-स्योपस्थमुण्डे तथा-
चर्मण्यावरके स्त्रियास्तु च भग-द्वारे भगौष्ठेऽपि च ।
याश्च स्युः कठिनाः समन्तत इमा निम्नाश्च मध्ये रस-
स्यात्यन्तं परिवाहिका दृढतमा मूले विदीर्णा मुखे ॥ ९ ॥
ज्वरब्रध्नरोगादिजन्मप्रदाश्चो विशेषेण मुख्योपदंशे प्रजाताः ।
भवेयुश्च ता इत्थमुक्तान्यशेषा-णि लक्ष्माणि बोध्यानि सर्वैः सुवैद्यैः १०

गौणोपदंशस्वरूपम्—

प्रशान्ति प्रयातेऽपि मुख्योपदंशे विषं देहसंस्थं विकारानकान् ।
प्रकुर्याच्च तेन त्वचायां विकारो-ऽक्षिरोगः क्षयः केशलोम्नामवश्यम् ११
भवेद् ग्रन्थिरोगोऽथ कुष्ठं तथा पी-
नसं चात्र गौणोपदंशे विशेषात् ।
इतीमानि चिह्नानि वैद्योदितानि
समस्तानि सुज्ञो जनः साधु विद्यात् ॥ १२ ॥

अथ ब्रध्ननिदानम्—

कफस्य च ग्रन्थिषु यत्तु संसृत-पापोपदंशस्य विषं भवेद्धि ।
तत् सज्वरं चामितदुःखदायिनं ब्रध्नाख्यरोगं जनयेदवश्यम् ॥१३॥

इति माधवनिदानपरिशिष्टे ब्रध्नरोगनिदानं समाप्तम् ।

## अथ जरारोगनिदानम् ।

पद्ग्यामतीव गमनेन तथाऽतिशीत-
संसेवनेन च कदन्ननिषेवणाच्च ।
वृद्धाङ्गनासततसंगमनाच्च चेतो-
दुःखादुदेति हि जरा समयाच्च नूनम् ॥ १ ॥

जरायाः पूर्वरूपम्—

क्षीणत्वमत्र समुदेति शरीरशक्ते-
रादौ क्रमेण तदनु स्मृतिनाश एव ।
ग्लानिस्ततोऽप्यवयवेषु जनिर्वलीनां-
पालित्यमप्यधिकतो हि शिरोरुहेषु ॥ २ ॥
दन्तस्य चापि शिथिलत्वमथ स्वभावे भूयान् विपर्यय इति प्रतिमानवं वै ।
प्रायो जराऽऽगमनकालत एव पूर्व-मक्षकमीक्ष्यत उपर्युदितं तु कृत्स्न ॥३॥

जरायाः स्वरूपम्—

प्राग्रूपसंकथितलक्ष्मचयप्रकाशो वह्नेश्च मान्द्यमथ साहसहीनताऽद्धा ।
धैर्यप्रणाश उदरव्यति संशयः स्यात् संपादने युवजनोचितकृत्यराशेः ॥४॥

चिन्ता घृणाबहुलता कृशताऽतिरोषो-
वृद्धया कफस्य हि गले नितरां च सक्तिः ।
निष्ठीवनेन सह तस्य च निर्गमो वा
हस्ताङ्घ्रिमध्यगतवेपथुरप्यजस्रम् ॥ ५ ॥
कम्पोऽधिजिह्वमपि च स्खलनं तु मूर्ध्नः-
पादद्वयस्य च धनुर्वद्थाग्रतः स्यात् ॥
देहस्य चातिनमनं ह्यधिबुद्धि बाल्यं-
जायेत चातिखरता प्रकृतौ विशेषात् ॥ ६ ॥
वातामयादिकगदा विविधा भवेयुः-
स्वल्पाऽपि शक्तिरवशिष्यत एव सोढुम् ॥
क्लेशं च कं चन कथं चन नैव देहे
कासस्तथा श्वसनमप्यतिविस्मरत्वम् ॥ ७ ॥
दण्डाश्रयेण गमनं रदहीनताऽऽस्ये
चिह्नान्यमूनि गदितानि जरोत्थितानि ॥
नैयोत्तमैर्बहु विविच्य च यानि तानि
ज्ञेयानि संप्रति जराऽऽकृतिमाप्नुमि वैं॥ ८ ॥
सत्पथ्यसेवनवशादपि यूनि रोगा-
ये यान्ति चाशु सुखसाध्यदशामवश्यम् ॥
ते याप्यतां दधति चात्र हि सच्चिकित्सा-
निःशेषपादसमुपस्थितिकाल एव ॥ ९ ॥

अत्र साध्यतावर्णनम्—

सुसाध्ये तथा कृच्छ्रसाध्ये जराऽऽख्ये-
गदे तन्निवृत्त्यै तदुत्पादकानाम् ।
शुभं वर्जनं तौ निदानव्रजानां-
प्रयोगोऽपि रासायनः शोभनः स्यात् ॥ १० ॥

इति माधवनिदानपरिशिष्टे जरारोगनिदानं समाप्तम् ।

## अथ मस्तिष्कचयापचयनिदानम् ।

तत्र मस्तिष्कचयस्य निदानादिकमाह—

प्रायः शिशूनां क्वचिदेव यूनां-सौभाग्यतोऽजस्रमपि स्वभावात् ।
कपालमत्यर्थमुपैति वृद्धि-मस्तिष्कवृद्धौ खलु मस्तुलुङ्गः ॥ १ ॥
वृद्धिः समाना यदि मस्तुलुङ्ग-कपालगा स्याद्धि तदा तु तत्र ।
प्रायेण काचिन्न विकारजाता-भीतिर्भिषग्भिः क्वचिदूहनीया ॥ २ ॥
स्वाभाविकी चेदथवाऽस्त्ववस्था-क्वचित्कपालस्य तथा च वृद्धिः ।
मस्तिष्कमध्ये तु तदाऽतिघोरा-उपद्रवाः सन्तु तदीयपीडनात् ॥३॥

उपद्रवानाह—

शिरोऽर्त्तिर्भ्रमो मूर्च्छनं पक्षनाशो-बलस्यापि हानिस्तथाऽऽक्षेपरोगः ।
तथाऽन्तेऽपि मृत्युश्च मस्तिष्कवृद्धा-वुपद्रुत्य एता भिषग्भिर्विभाव्याः ४

मस्तिष्कह्रासमाह—

वृद्धिस्तु मस्तिष्कभवा यथा स्या-द्धासस्तथैवाप्युपजायते हि ।
ह्रासोऽपि मस्तिष्कगतः कपाले प्रवर्द्धमानेऽतिभयङ्करः स्यात् ॥ ५ ॥
ह्रासो यदा स्यात्क्वचिदेकपार्श्वे-मृत्युर्भवेन्नैव तदाऽऽतुरस्य ।
चेन्मस्तुलुङ्गस्य समन्ततो वा-ह्रासस्तदाऽऽश्वस्तु मृतिस्तदीया ॥ ६ ॥
स्यान्मस्तुलुङ्गस्य सदैव वृद्धि-र्ह्रासोऽपि नूनं मरणाय लोके ।
व्यर्थो भवेदत्र यदप्युपाय-स्तथाऽपि रासायनिको विधेयः ॥ ७ ॥

इति माधवनिदानपरिशिष्टे मस्तिष्कचयापचयनिदानं समाप्तम् ।

---

## अथ मस्तिष्करोगनिदानम् ।

शीर्षकम्पस्य निदानम्—

यदा भवेन्मूर्ध्न्यभिघात उच्चकै—स्तदा तदीयानुगुणैः स्वलक्षणैः ।
सुलक्ष्यमाणः खलु शीर्षकम्पा-मयो भवेद्वैद्यजनाभिभाषितः ॥ १ ॥

शीर्षकम्पस्य लक्षणम्—

हृल्लासमूर्च्छे वमनं जडत्वं-चित्तस्य चाञ्चल्यमतीव वेपथुः ।
स्यात्कर्णनादो मलिनास्यता च प्रविस्तृतिर्नेत्रकनीनिकायाः ॥ २ ॥
नाड्यास्तथा स्पन्दनमल्पमात्रं शैत्यं तनोर्दुर्बलताऽधिकाऽपि ।
वाचो विकारः खलु पक्षहानौ-रोगे प्रजायेत हि शीर्षकम्पे ॥ ३ ॥

इति माधवनिदानपरिशिष्टे मस्तिष्ककम्पनिदानं समाप्तम् ।

## अथ शीर्षाम्बुरोगनिदानम् ।

शीर्षाम्बुरोगस्य निदानसंप्राप्त्यादिकमाह—

दुष्टाम्बुपानादतिशैत्यतो वा-ऽऽन्त्रेषु क्रिमेरुद्भवतोऽभिघातात् ।
असात्म्यभोज्याशनतः सुराया-अत्यर्थपानात् पवनप्रकोपात् ॥ १ ॥
संचीयते यत्क्रमतः शिरःस्थ-स्नेहस्य भूमौ बहुलं जलं हि ।
तदेव वैद्यैर्गदितस्तु शीर्षा-म्बुरोग एषोऽस्त्वतिदुश्चिकित्स्यः ॥ २ ॥
प्रायः शिशूनामुपजायतेऽसौ-बाल्ये वयस्येव गदो विशेषात् ।
दन्तोद्गमेऽनेकविधाहितानां-निषेवणात्सद्भिषजां मतेन ॥ ३ ॥

शीर्षाम्बुरोगस्य पूर्वरूपम्—

जिह्वा वृता गाढपुरीषताऽथो-दौर्बल्यनिद्राऽधिकृते तथा च ।
निःश्वासमध्येऽपि च पूतिगन्धः शीर्षाम्बुरोगेऽस्त्विति पूर्वरूपम् ॥४॥

शीर्षाम्बुरोगस्य लक्षणम्—

तीव्रा व्यथा शिरसि कृष्णपुरीषताऽथो-
मूत्राल्पता श्रुतिगताऽक्षिण च तीक्ष्णता स्यात् ॥
वेगं समाश्रितवती धमनी त्वचायां
रूक्षोष्णते च वमनं विषमाऽक्षितारा ॥ ५ ॥
कण्डू रदच्छदगताऽपि च नासिकाया-
लौहित्यमक्षियुगले च विवर्णताऽऽस्ये ।
आक्षेपकः प्रलपनं खलु पक्ष्मनाशः-
शीर्षाम्बुरोग इति लक्ष्म विभावनीयम् ॥ ६ ॥

इति माधवनिदानपरिशिष्टे शीर्षाम्बुरोगनिदानं समाप्तम् ।

---

## अथ स्नायुकनिदानम् ।

अत्यन्तवृष्ट्यादिनिमित्ततो यदा-सेवेत दुष्टं बहुशो जलं ना ।
शाखासु दोषः कुपितो विसर्पव-च्छोथं तदा तस्य विधाय भिन्द्यात् ॥१॥
सोष्म स्नायुं तत्क्षते तत्र नूनं संशोष्याथो भवेत्तत्न्तुरूपं तु ।
सूत्रं जीवं संविदध्याद्बहिश्च-स्तौरं स्तौरं निःसरेत् स क्षताच्च ॥ २ ॥
कुप्येच्छेदान्निःसृते तत्र शान्तिः-
शाखावत् स्थानेऽन्यत्र तस्योद्भवोऽपि ।
पूर्वरूपः स्नायुको नाम रोगः-

ख्यातो बीसर्पोदिता च क्रियाऽत्र ॥ ३ ॥
त्रुटयेत बाह्वोर्यदि जङ्घयोर्वा-प्रमादतो यस्य नरस्य जातु ।
तदा तु संकोचमसौ करोति-खञ्जत्वमद्धा क्रमतोऽपि तस्य ॥ ४ ॥

वातादिभेदेन तस्य लक्षणमाह—

श्यावो रूक्षो वायुना चातिपीडा-युक्तो नूनं तन्तुकः स प्रदिष्टः ।
पित्तेनाथो नीलिमोपेतपीतो-ऽवश्यं दाहेनान्वितो दृश्यतेऽपि ॥ ५ ॥
स्थूलः श्वेतः श्लेष्मणा स्याद्गरीयान् रोगो नाम्ना स्नायुको दुष्टरोगः ।
एवं रक्तेनातिदाहान्वितः स-कान्त्या रक्तो द्वन्द्वतो द्वन्द्वलिङ्गः ॥६॥
स स्याद्दोषाणां त्रयेण त्रिलिङ्ग-श्चेत्थं रोगः स्नायुसंज्ञोऽष्टधा तु ।
वैद्यैः प्रोक्तः प्राणहारी विशेषा-न्नानोपद्रव्यन्वितोऽयं प्रमादात् ॥७॥

इति माधवनिदानपरिशिष्टे स्नायुकरोगनिदानं समाप्तम् ।

## अथ योषाऽपस्मारनिदानम् ।

तत्रादौ योषाऽपस्मारविषये भिषजां विचारः—

संबन्धो मानसक्षेत्र-स्य साक्षाद् यत्र नश्यति ।
गतिसंवेदनाक्षेत्र द्वयेन-हि कथं चन ॥ १ ॥
भवेयुर्यत्र चिह्नानि-विचित्राण्यमितान्यपि ।
यं गदं मनसा ध्याये-दाक्रान्ता तेन सा भवेत् ॥ २ ॥
किन्तु वास्तविकी कस्य-चिद्गदस्यात्र न स्थितिः ।
ईदृशोऽसौ गदो योषाऽ-पस्मार इति कथ्यते ॥ ३ ॥
कैश्चिद्भिषग्भिः क्रियते-गणनाऽस्यापतन्त्रके ।
योषासु बहुधोत्पत्त्या-योषाऽपस्मार उच्यते ॥ ४ ॥
किन्तु ये प्रमदातुल्याः कोमलां प्रकृतिं श्रिताः ।
असहिष्णवस्तेष्वपि-प्रेक्ष्यतेऽयं गदः क्वचित् ॥ ५ ॥

योषाऽपस्मारकारणम्-

रक्तक्षयाद्वा बहुशोऽप्यजीर्णा-दुर्द्वेगतः कोष्ठविबन्धतो वा ।
शोकाच्च भङ्गान्मनसो जरायो-विकारतोऽथो रजसो विनाशात् ॥६॥
कुटुम्बिनां निष्ठुरभावतो वा-दौर्बल्यतोऽपि प्रकृतेः कदाचित् ।
पत्युश्च निःस्नेहतया तथावा-वैधव्यशोकादथवा विशेषात् ॥ ७ ॥
योषित्सु रोगो यत एष कष्टः-प्रजायते मानसहेतुकेन ।

चिह्नैरपस्मारसमैः समन्वितः–सुदारुणो गौ भिषगुत्तमैः सदा ॥ ८ ॥
प्रकाशितो भूमितले तु योषा–ऽपस्मारनाम्ना बहुशो गदोऽसौ ।
यावत्प्रवृत्ती रजसः स्त्रियां स्यात्–तावद् गदस्यास्य मतो हि कालः ॥ ९॥

योषाऽपस्मारसंप्राप्तिवर्णनम्—

पूर्वोदितैर्हेतुभिरेव तावत् क्षेत्रे भवेद्धै मनसो विकारः ।
तथैव सांवेदनिकास्तथा गतेः–क्षेत्राच्च्युतिर्मानसिकस्य जायते ॥१०॥
क्षेत्रस्य योगस्य ततः क्रमेण–प्राग्रूपरूपोद्भव एव लोके ।
संप्राप्तिरूपेण विशिष्य योषा–ऽपस्माररोगस्य विलोक्यते जनैः ॥११॥

योषाऽपस्मारपूर्वरूपम्—

हृत्पीडनं जृम्भणमङ्गचित्तयोः–सदाऽवसादो भवतीह योषिताम् ॥
अव्यक्तरूपं गदितं तु योषाऽ–पस्मारसंज्ञे हि गदे भिषग्भिः ॥१२॥

योषाऽपस्मारलक्षणम्—

चिह्नान्यनेकानि विचित्ररूपा–ण्यपि प्रजायन्त इवेत्यवेहि ।
ध्यानं भवेद्यस्य गदस्य यत्र–स्यात्तत्र तस्याक्रमणं विशेषात् ॥१३॥
किंवा क्वचिद्रोगिणि यानि चिह्ना–न्याकर्णितान्यप्यवलोकितानि ।
सर्वाणि तानि स्युरिहापि योषा–ऽपस्मारसंज्ञे हि महागदे गौ ॥१४॥
तथाऽपि चिह्नानि विशेषतोऽस्मिन्–स्युर्यानि दृष्टान्यखिलानि तानि ।
विविच्य सौकर्यकृते चिकित्सा–विधावहं वच्मि भिषग्जनानाम् ॥१५॥
औचित्यमाक्रन्दनरोदने च–भ्रान्तिः प्रलापो मतिविभ्रमश्च ।
द्वेषः सदा ज्योतिषि चोद्धता स्या–दाक्रोश उच्चैर्हसनं च कण्ठे ॥१६॥
श्लेष्माशये पीडनमङ्गमध्ये सदाऽनुभूतिः क्वचन व्यथायाः ।
स्पर्शोत्थशक्तेरपि वृद्धिभावः–श्वासस्य कृच्छ्रत्वमथोदरात्र ॥ १७ ॥
यावद्गलं चानृतगुल्मरोगो–त्पत्तिस्तु मूर्च्छाऽत्र मतिप्रणाशः ।
योषित्सु जायन्त इमानि चिह्ना–न्यनारतं प्रायश एव लोके ॥ १८ ॥

योषाऽपस्मारस्य परिणतिः—

यैः कारणैरेष गदः प्रजायते–प्रयाति शान्तिं विरतेषु तेषु ।
अतः परिस्थित्यनुसारतोऽस्य–स्याल्लोकमध्ये परिणाम एव ॥१९॥
दैवात् कदाचिद् यदि कारणानां–स्थितिर्भवेत्तर्हि गदप्रवृद्धिः ।
एवं निवृत्तेऽपि च हेतुवृन्दे–रोगस्य शान्तिर्नियता प्रदृश्यते ॥२०॥
काचिन्न नारी मृतिमेति रोगे–वयोविवृद्धौ स्वत एव शाम्यति ।

विपर्ययोऽपि प्रकृतेः कदाचि-ज्जायेत नार्या इति यन्न दृश्यते ॥ २१ ॥
ततो गदस्यास्य भवेन्मुहुर्मुहुः-प्रायः सदैवाक्रमणं नृलोके ॥
इत्थं यथामत्यधुना तु योषा-ऽपस्माररोगस्य निदानमुक्तम् ॥२२॥

इति माधवनिदानपरिशिष्टे योषाऽपस्मारनिदानं समाप्तम् ।

## अथ योनिकण्डूनिदानम् ।

योनौ प्रायः श्लेष्मवैगुण्यहेतो-रर्शःकोपाद्वस्तिजातेऽर्बुदेऽपि ।
योनिस्थानां संप्रसारात्सिराणां-किं वा नारीणां विकाराज्जरायोः ॥१॥
पुंसा सार्द्धं सर्वदाऽतिप्रसङ्गात्-प्रायः काले चार्त्तवस्य प्रवृत्तेः ।
गर्भस्य प्रागुद्भवे वातलत्वाद्-योनेः कण्डूर्जायते योनिमध्ये ॥ २ ॥
एवं नारीवृद्धतातो विशेषा-त्प्रोक्तं वैद्यैर्योनिकण्डूनिदानम् ॥ ३ ॥

योनिकण्डूलक्षणम्—

योनौ कण्डूर्योनिकण्डूगदे स्यात्-तोदो रौक्ष्यं शुष्कता चापि नूनम् ।
वृद्धिर्व्याधेरुष्णतातोऽपि शैत्या-च्छान्तिर्लोके वैद्यवर्यैः प्रदिष्टा ॥४॥

इति माधवनिदानपरिशिष्टे योनिकण्डूनिदानं समाप्तम् ।

## अथ योन्याक्षेपनिदानम् ।

योनौ यदा विगुणता पवनस्य नूनं-
स्पर्शस्य वृद्धिरमिता तु तदोदिता स्यात् ।
विक्षेपणं भवति योनिमुखे च तस्य-
स्पर्शो व्यथाऽपि गहना प्रमदाजनस्य ॥ १ ॥
एतद्गदेन कलिता न सहेत नारी-
पुंसा कृतं रतिविलासमथो बलाच्चेद् ।
भर्त्ता रमेत हि तया सह तर्हि पीडाऽऽ-
क्रान्ता भवेत्तु तरुणी विकलेन्द्रियाऽङ्गा ॥ २ ॥
भगव्यथाभीतिसमन्विता सा-यतो न कान्तं प्रति याति कामिनी ।
ततः प्रियेणातितिरस्कृता क्वचित्-समीहते मर्त्तुमतीव दुःखिता ॥ ३ ॥

योन्याक्षेपस्य लक्षणम्—

योन्याक्षेपे वह्निमान्द्यं तथा चो-द्वेगो निद्राऽल्पत्वमुक्तं क्रमेण ।
वस्तौ दाहः पृष्ठदेशे व्यथा च-स्यात्संचारेऽक्षिद्रुपेनाप्यशक्तिः ॥४॥
[illegible] क्षीणता दुर्बलत्वं-वैवर्ण्यं चेमानि चिह्नानि नूनम् ।

आयुर्वेदज्ञानवृद्धैर्विशेषात्-सद्भिः प्रोक्तानीति विज्ञेयमत्र ॥ ५ ॥

इति माधवनिदानपरिशिष्टे योन्याक्षेपनिदानं समाप्तम्।

---

## अथ योनिव्यापत्सु बाधकरोगनिदानम्।

बाधकभेदानाह—

बाधकत्वेन ये लोके-प्रजोत्पत्तौ विशेषतः।
विख्याता बाधका रोगा-वक्ष्ये ताञ्छृणु सादरम्॥ १ ॥
प्रथमा रक्तमाद्री स्यात्-षष्ठी नाम्न्यपरा स्मृता।
ह्यङ्कोऽङ्कुरस्तृतीयो ज्ञे-तुर्यो जलकुमारकः॥ २ ॥

रक्तमाद्रीलक्षणम्—

कट्यां व्यथा यदि भवेदथ नाभिदेशा-
स्याधःस्थले स्तनयुगेऽपि च पार्श्वभागे।
नारी तदा तु कलिता ननु रक्तमाद्री-
दोषेण किंच तत एव फलेन हीना॥ ३ ॥

मासैकं वा मासयुग्मं कदाचि-च्चेन्नारीणामार्त्तवस्रावयोगः।
तर्हि स्युस्ता रक्तमाद्रीतिदोषे-णैव ग्रस्तत्वेनहीनाः फलेन ॥४॥

षष्ठीलक्षणम्—

षष्ठीरोगग्रस्तनार्यास्तु नेत्रे हस्ते ज्वाला स्याद्विशेषादङ्गेऽपि।
एवं शुद्धं लालयाऽप्यार्त्तवं तु-प्रोक्तं चिह्नं चेति कैश्चिरभिज्ञैः ॥ ५ ॥
स्याच्चेत् षष्ठीबाधकाख्यामयेनो-पेता नारी तर्हि वारद्वयं सा।
स्नायान्मासे चार्त्तवस्रावयोगाद्योनिस्तस्या रक्तमाक्लिन्नयुक्ता॥६॥

अङ्कुरलक्षणम्—

स्यादुद्वेगो गौरवं चापि देहे-रक्तस्रावश्चाधिकश्चेत्तरुण्याः।
शूलं नाभेर्निम्नभागे तदा सा-ज्ञेया कैश्चिरङ्कुरेणैव युक्ता॥ ७ ॥
युक्ताऽङ्कुराख्येन हि बाधकेन-मासत्रयं मासचतुष्टयं वा।
नारी भवेदप्यृतुना विहीना-कराङ्घ्रिदाहेन युता कृशाङ्गी॥ ८ ॥

जलकुमारलक्षणम्—

भवतु शूलयुताऽपि च गर्भिणी-यदि हि शुष्कतनुस्तनुरक्तिका।
प्रकटिता किल तत्फलहानता-जलकुमारकदोषतया तदा॥ ९ ॥
जलकुमारकदोषनिपीडिता-कृशतनुः प्रमदा खलुपीवरा।

बहुदिनं च भवेद्वमत्यथो–गुदकुचा क्षतजाल्पतयाऽन्विता ॥१०॥

इति माधवनिदानपरिशिष्टे योनिव्यापत्सु बाधकरोगनिदानं समाप्तम्।

## अथ जरायुरोगनिदानम्।

तस्य निदानम्—

प्रायेणाधानाद्धि गर्भस्य नैर-न्तर्येणाद्वा स्त्रावतस्तस्य वाऽपि।
शैत्यात्तद्वच्चार्द्रभूमौ निवासा-द्रोगाद्वा पा-पोपदंशाद्विशेषात्॥१॥
अत्यर्थं वा मैथुनस्य प्रयोगात् किंवा संगात्पूयमेहादितेन।
संजायेत स्त्रीजने नौ जरायु-रोगस्तस्याकर्णयापि स्वरूपम् ॥ २ ॥

तस्य स्वरूपम्—

ज्वरोऽग्निमान्द्यं त्रिकतोदनं तथा व्यथाऽति निम्नोदरमध्यगाऽपि।
अथोष्णता बस्तिगता गुरुत्वं मुहुर्मुहुर्मूत्रप्रवृत्तिरेव ॥ ३ ॥
भगादपि क्लेदपरिस्रुतिस्तथा मलस्य गाढत्व प्रवृत्तिरप्यथो।
ततोऽवरोधो मुखनीलिमाऽर्त्ती-सि दुर्बलत्वं वमथुः शिरोव्यथा ॥४॥
जरायुरोगे विकृतेर्जरायावेवं विधान्येव हि लक्षणानि
आविर्भवेयुर्निखिलाङ्गनास्वा-युर्वेदविल्लज्जनसंमतानि ॥ ५ ॥

इति माधवनिदानपरिशिष्टे जरायुरोगनिदानं समाप्तम्।

## अथाण्डाधाररोगनिदानम्।

तस्य निदानम्—

अतिव्यवायादतिशीतसेवना-त्तथाऽभिघाताद्विषभोजनादपि।
अथो कुपथ्याशनतो गदोऽण्डाधारः प्रजायेत सदाऽङ्गनासु ॥ १ ॥

तस्य लक्षणम्—

उदर्व्यथोदरमध्यसंस्था-कृच्छ्राल्पते मूत्रगते सरक्तता।
अरोचकत्वं स्वरतिर्बलक्षयो ज्वरश्च हृल्लास इहोद्भवेयुः ॥ २ ॥
क्षुद्रा सवेगा धमनी च जिह्वा रक्तोज्ज्वला स्यादनिशं गदिन्याः।
बोध्यानि चिह्नानि भिषग्भिरण्डा-धारामयस्येति सुभाषितानि ।३।

इति माधवनिदानपरिशिष्टेऽण्डाधाररोगनिदानं समाप्तम्।

## अथ वन्ध्यारोगनिदानम्।

वन्ध्याङ्गनानां नवधा प्रभेदाः–प्रकीर्त्तिताः प्राक्तनवैद्यवर्यैः।
जन्मादिवन्ध्या प्रथमा तु बोध्या तदुद्भवः स्यादतिपापकर्मभिः ॥१॥

रक्तेन वातेन तथैव पित्ते-न श्लेष्मणा चापि समस्तदोषैः ।
एवं भवेत् पञ्चविधाऽथ तिस्रो भूतेन दैवेन तथाऽभिचारात् ॥ २ ॥
तथा प्रकारान्तरतोऽपि वन्ध्या चतुर्विधा संकथिता पुनश्च ।
तत्रादिमा सौ गदिता तु गर्भ-स्राविण्यथाऽन्या मृतपुत्रिका च ॥३॥
कन्याप्रसूः स्याच्च मता तृतीया सकृत्प्रसूर्या नियतं चतुर्थी ।
एषैव लोके किल काकवन्ध्या निगद्यते वैद्यजनैरवद्यम् ॥ ४ ॥
यथैव वन्ध्या भवतीह नारी तथैव वन्ध्योऽपि पुमान् प्रकीर्तितः ।
तच्छुक्रमध्यस्थितदोषजातैः-सर्वं सुधीभिः स्वधियैव बोध्यम् ॥ ५ ॥
इति माधवनिदानपरिशिष्टे वन्ध्यारोगनिदानं समाप्तम् ॥

## अथ सोमरोगनिदानम् ।

अतिप्रसङ्गात्प्रमदाजनाना-मविश्रमाद्व्यतिसारयोगतः ।
गरप्रयोगादतिशोकतो वा-क्षुभ्येत्स्रवेत्कृत्स्नतनुस्थवारि ॥ १ ॥
स्थानच्युतं तत्प्रतियाति मूत्र-मार्गं स्त्रियास्तेन हि गन्धहीनम् ।
शीतं सितं रुग्रहितं प्रसन्नं-मलेन रिक्तं बहुशः स्रवेत्तत् ॥ २ ॥
ततो न शक्नोति तदीयवेगं सुदुर्बला धारयितुं स्वयं सा ।
क्वचिन्न प्राप्नोति सुखं तथाऽलं मुखं विशुष्यत्यपि तालु तस्याः ॥३॥
स्वाचं शैथिल्यं चातिमात्रं प्रलापः-शैथिल्यं स्यान्मस्तकस्याथ मूर्च्छा ।
जृम्भा नूनं भक्ष्यभोज्यान्नपेयै-स्तृप्तिं प्रायो न क्वचिद्विन्दतीह ॥४॥
सोमरोगनिरुक्तिः—
शरीरसंधारणतः स्त्रियास्तद् भिषग्भिरुक्तं खलु सोमसंज्ञितम् ।
ततस्तु सोमस्य परिक्षयादिह स्मृतेऽतिकष्टप्रदसोमरोगः ॥ ५ ॥
इति माधवनिदानपरिशिष्टे सोमरोगनिदानं समाप्तम् ।

## अथ शैशवसंन्यासनिदानम् ।

संदूषितस्य जननीपयसोऽतिपानाद्-वातातपातिरहिते सततं च शीते ।
दुर्वातदूषिततमे गहनान्धकारे-गेहे शिशोरतिनिवासत एव लोके ॥१॥
दन्तोद्गमामय इह क्रिमिवद्धकोष्ठ-श्वास्योश्च कुक्कुटपदाभिधकासरोगे।
किंवाऽन्यकष्टगदे विपुलाभिघाते-मिथ्याऽशनाचरणतो बहुदोषजातैः ॥
पीडयेत कश्चिदथवा च यदाऽर्भकश्चेत्-संन्यासरोग उदितो ननु शैशवादिः।
प्रायेण बालकजनस्य निपीडकस्तु ज्ञेयो भवेद् गदनिमित्तविदा विशेषात्॥

शैशवसंन्यासलक्षणम्—

उत्तारमक्षियुगलं सकलेषु गात्रे-ष्वाक्षेपको भवति चेतनताविघातः ।
संलक्ष्यते मृत इवापतितः स बालः-संजायतेऽस्य च दृढा खलु दन्तपङ्क्तिः॥
अयं शिशूनां गदितो हि शैशवा-भिधस्तु संन्यासगदोऽतिबाधकः ।
चिकित्सितं तत्र विरेचनं भवेद् विशेषतस्तत्क्षणसत्फलप्रदम् ॥ ९ ॥

इति माधवनिदानपरिशिष्टे शैशवसंन्यासनिदानं समाप्तम् ।

---

## अथांशुघातनिदानम् ।

अंशुघातकारणम्—

भूम्नाऽयमुग्रातपहेतुतः सदा-स्यादंशुघातः खलु दुर्बलादिषु ।
उष्णप्रदेशेषु तथैव भूमे-रार्द्रत्वतः स्थैर्यत एव वायोः ॥ १ ॥
उष्णानि कार्याण्यनिशं प्रकुर्व-स्स्वेतत्प्रभावान्मनुजेषु नूनम् ।
ग्रीष्मप्रचण्डांशुनिषेविषूपा-नदातपत्रादिमन्गश्रितेषु ॥ २ ॥
निर्वातकारालयमास्थितेषु-प्राधान्यतो योद्धृजनेष्ववश्यम् ।
संजायते प्राणिवपुर्विमर्दी-घोरो गदः सद्भिषजां मतेन ॥ ३ ॥

अंशुघातस्य संप्राप्तिः—

भवेच्छरीरस्थित 'सेल'विश्ले-षणं विशेषादतितीव्रतापात् ।
ततः समुत्पद्य विषं प्रकुर्या-द्रक्तं विषाक्तं मिलितं च तेन ॥ ४ ॥
किंवा प्रचण्डाः किरणाः खरांशो-र्मूर्ध्नः सुषुम्णास्थिततापकेन्द्रम् ।
संक्षोपयेयुर्यत एव काले-स्यादंशुघातस्य गदस्य जन्म ॥ ५ ॥

अंशुघातस्य लक्षणम्—

अस्यांशुघातस्य गदस्य रौद्र्यै-स्तिस्रस्त्ववस्थाः परिकीर्त्तिता वै ।
शीताऽभिधाऽऽद्या च ततो द्वितीया-साधारणी चान्त्यगता हि तीव्रा ॥६
क्लिन्नत्वशीतत्वसमन्विता त्वग्-मूर्च्छा भ्रमः स्यादथ दुर्बलत्वम् ।
तीव्रत्वमुक्तं ननु नाडिकाया-स्तत्रादिमायां हि रुजो दशायाम् ॥७॥
अस्यां दशायां नहि जातु मृत्युः-प्रद्रवते रोगिजनस्य नूनम् ।
चिकित्सया जीवनमेव रोगी-हत्कार्यरोधात्तु लभेत मृत्युम् ॥ ८ ॥
तथा द्वितीयां हि दशां गतस्यां-शुघातिनो मूर्ध्नि भवेद्धि शूलम् ।
पीडाऽपि शुष्कत्वमथोष्णता च-त्वचो भ्रमस्याश्चपलत्वमुक्तम् ॥९॥

क्षीणत्वमेवं बहु दुर्बलत्वं-हृच्छ्वासयोरप्यतिनिश्चयेन ।
मूर्च्छाऽऽदिचिह्नानि भवेयुरत्र-प्रायेण पूर्वोक्तदशासमानि ॥१०॥
एवं दशामाप्नुवतोऽन्तिमां च-ज्वरस्तु तीव्रः श्वसनं प्रलापः ।
भवेद्गुदार्त्तास्य च वर्णनीलता-संन्यासरोगो मरणं तथाऽन्ते ॥११॥

असाध्यलक्षणम्—

करद्वयेऽङ्घ्रिद्वितये च नीलिमा-तथा धमन्याः क्षणलुप्तता च ।
विक्षेपणं चावयवस्य रोगिणोऽ-शुघातिनो मृत्युकृते भवन्ति ॥१२॥

इति माधवनिदानपरिशिष्टेऽशुघातरोगनिदानं समाप्तम् ।

---

## अथ पारदविकारनिदानम् ।

यदा दोषहीनो भवेत् पारदो नौ तदा सोऽत्र मृत्युज्वरघ्नः स्मृतः स्यात् ।
अतोऽसौ विशुद्धः सुधासंनिभोऽथो विषाभो विशेषादशुद्धः प्रदिष्टः ॥१॥
अयुक्तिप्रयुक्तो रसो रोगमूलं-सुयुक्तिप्रयुक्तो जराव्याधिशूलम् ।
यतः संप्रदिष्टो विशिष्टैर्भिषग्भि-स्ततः सेवनीयो यथाविध्यभिज्ञैः ॥२॥
विधिवदोष रसो ननु सेवितो-हराति नुर्नियतं सकलामयान् ।
अविधिना स हि भक्षित एव वै-भुवि करोति गदान् विविधानिमान् ३
नासाभङ्गः पीनसो दन्तपातो-नेत्रास्योस्थो रोगजातो विसर्पः ।
कोठः कण्डूर्मस्तके चातिपीडा-त्वग्वैवर्ण्यं नासिकाऽऽदौ क्षतञ्च ॥४॥
पीडायुक्तग्रन्थिवच्छोथकाठि-न्यं जायेताप्यण्डकोशद्वये च ।
पक्षाघातो ग्रन्थिवातोऽस्थिदाहो-ऽप्युग्रो जाड्यं चापि चेतोविकारः ॥५॥
भगन्दरो नैकविधानि कुष्ठा-पदंशचिह्नानि शरीरमध्ये ।
तथाऽपरे कृच्छ्रतमा गदाः स्यु-र्यथोचितं भेषजमत्र कल्प्यम् ॥६॥

इति माधवनिदानपरिशिष्टे पारदविकारनिदानं समाप्तम् ।

---

## अथ शीतलानिदानम् ।

देव्या शीतलया-क्रान्ता मसूर्यः शीतला बहिः ।
ज्वरयेयुर्यथा भूताधिष्ठितो विषमज्वरः ॥ १ ॥
ताश्च सप्तविधाः ख्यातास्तासां भेदान् प्रचक्ष्महे ।
ज्वरपूर्वा बृहत्स्फोटैः शीतला बृहती भवेत् ॥ २ ॥
सप्ताहान्निःसरत्येव सप्ताहात् पूर्णतां व्रजेत् ।
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम् ॥ ३ ॥

वातश्लेष्मासमुद्भूता कोद्रवा कोद्रवाकृतिः ।
तां कश्चित् प्राह पक्वेति सा तु पाकं न गच्छति ॥४॥
जलशूकवदङ्गानि सा विध्यति विशेषतः ।
सप्ताहाद्वा दशाहाद्वा शान्तिं याति विनौषधम् ॥५॥
ऊष्मणा तृष्णजाड्या सकण्डूः स्पर्शनप्रिया ।
नाम्ना पाणिसहा ख्याता सप्ताहाच्छुष्यति स्वयम् ॥६॥
चतुर्थी सर्षपाकारा पीतसर्षपवर्णिनी ।
नाम्ना सर्षपिका ज्ञेयाऽभ्यङ्गमत्र विवर्जयेत् ॥ ७ ॥
किञ्चिदूष्मनिमित्तेन जायते राजिकाऽऽकृतिः ।
एषा भवति बालानां सुखं शुष्यति च स्वयम् ॥ ८ ॥
कोठवज्जायते षष्ठी लोहितोन्नतमण्डला ।
ज्वरपूर्वा व्यथायुक्ता ज्वरस्तिष्ठेद्दिनत्रयम् ॥ ९ ॥
स्फोटानां मेलनादेषा बहुस्फोटाऽपि दृश्यते ।
एकस्फोटा च कृष्णा च बोद्धव्या चर्मजाऽभिधा ॥ १० ॥

इति माधवनिदानपरिशिष्टे शीतलानिदानं समाप्तम् ।

---

## अथाशीतिर्वातजरोगनामानि ।

ये चाशीतिर्वातजाता मुनीन्द्रैः ख्याता रोगास्तान् समस्तान् ब्रवीमि ।
[1]बाह्यायाम-[2]आन्तरायाम-[3]ऊरु-स्तम्भो-[4]जिह्वास्तम्भ [5]उद्गार एव ॥ १ ॥
[6]खल्ली-[7]पक्षाघात-[8]आक्षेपकोऽथो-[9]मन्यास्तम्भः [10]पङ्गुत्वं [11]क्रोष्टुशीर्षः ।
[12]प्रत्यष्ठीला-[13]ऽष्ठीलिका [14]वामनत्वं-[15]कम्पः [16]कार्श्यं [17]श्यावता च [18]प्रलापः ॥
[19]निद्रानाशः [20]स्वेदनाशोऽपि रेतो-[21]नाशो [22]रेतोऽतिप्रवृत्तिश्च [23]तोदः ।
कार्श्यं [24]शुक्रस्यापि [25]काठिन्य-[26]माध्मा-नं-[27]मौकत्वं [28]दुर्बलत्वं च [29]कण्डूः ॥
[30]प्रत्याध्मानं [31]शीतता [32]रोमहर्षः-[33]स्तम्भो [34]विश्वाची [35]हनुस्तम्भ एव ।
[36]सङ्कोचोऽथो [37]गृध्रसी [38]पादहर्षो [39]मूकत्वं वातीव [40]जृम्भा तथा च ॥
[41]शिरोग्रहश्चापि [42]कटीग्रहो[43]ऽर्दिता [44]तथाऽपतानोऽथ [45]कलायखञ्जता ।
[46]बलक्षयश्चाप्य[47]नवस्थितात्मता-[48]रसाज्ञता [49]मिन्मिनताऽथ [50]कुब्जता ॥

[51]शब्दाश्रुतता [52]चाप्यपतन्त्रको [53]भ्रमा-[54]यामः [55]प्रसुप्तिर्विरसास्यता च ।
[56]दृशोः क्षयो [57]विड्ग्रह एव [58]कल्लता-ऽ[59]पबाहुकश्चापि [60]कषायवक्त्रता ॥
[61]गन्धाज्ञत्वं [62]क्षिप्रमूत्रत्व-[63]मङ्ग-[64]शूलं-[65]तूनी चाङ्गपीडाऽ[66]ङ्गभङ्गः ।
[67]पार्श्वे शूलं [68]वातकण्टोऽ[69]ङ्गभेदः-[70]शोषश्चाङ्ग[71]विभ्रंश एव ॥

[72]दण्डापतानको वात-[73]प्रवृत्तिश्चान्त्र[74]कूजनम्
[75]सिराणां पूरणं तद्वत् [76]स्फुरणं [77]बद्ध-विट्कता ॥
[78]खञ्जता [79]कुब्जता-[80]चैव प्रतितूनी पुरातनैः ।
भिषग्भिर्गदिता एते ज्ञेया रोगा तु कोविदैः ॥

इति माधवनिदानपरिशिष्टे अशीतिवातरोगनामानि ।

---

## अथ चत्वारिंशत्पित्तरोगनामानि ।

चत्वारिंशत्संख्यकाः पित्तजाताः-ख्याता रोगा ये मुनीन्द्रैः पुराणैः ।
संकथ्यन्ते चाधुना सावधानं श्रोतव्यास्तेऽवश्यमेवाप्यभिज्ञैः ॥१॥
[1]उष्णाढ्यत्वं [2]कण्ठशोषो [3]विदाहो-[4]धूमोद्गारः [5]कान्तिहानिः [6]क्लमश्च ।
[7]तिक्तास्यत्वं [8]चाल्पशुक्रत्वमम्ल-[9]वक्त्रत्वं [10]चाप्यास्यशोषोऽ[11]क्षिपाकः ॥२॥
[12]स्वेदस्रावो [13]लोहगन्धास्यता चा-[14]तृप्तिश्चाथो [15]पीतविट्कत्वमेव ।
[16]रक्तस्रावोऽ[17]थारतिः [18]पीतमूत्र-त्वं [19]दौर्गन्ध्यं [20]पीतगात्रत्वमद्धा ॥३॥
[21]उष्णोच्छ्वासत्वं च [22]कोपोऽथ [23]गात्र-सादः [24]शीतेच्छाऽ[25]ल्पनिद्रत्वमेव ।
[26]तेजोद्वेषो [27]भिन्नविट्कत्वमा[28]न्ध्यं-[29]मूत्रस्योष्णत्वं [30]मलस्योष्णता च ॥४॥

[31]मतिभ्रमोऽ[32]ङ्गदरणं-तथा [33]पीतावलोकनम् ।
[34]तमसो दर्शनं [35]पीत-नखता [36]पीतदन्तता ॥ ५ ॥
[37]निःसरत्वं तथा [38]पीत-मण्डकानां च दर्शनम् ।
अथो [39]हरितवर्णत्वं [40]पीतनेत्रत्वमित्यकम् ॥ ६ ॥

इति श्रीमाधवनिदानपरिशिष्टे चत्वारिंशत् पित्तरोगनामानि ।

### अथ विंशतिश्लेष्मरोगनामानि ।

ये विंशतिः श्लेष्मसमुद्भवा गदा उदीरिता रोगनिदानसंविदा ।
त एव संप्रत्यखिला विशेषत-स्त्वाकर्णनीया ननु सावधानतः ॥१॥

मुख[1]माधुर्यं शै[2]त्यं गौर[3]वमतिनिद्र[4]ता तन्द्रा ।
उष्णेच्छा[6] मुखलेपः[7] प्रसेकता[8] तिक्तकामिता[9] चापि ॥
श्वेतावलोकनं[10] वा-जौतल्यं[11] मन्दबुद्धिता[12]ऽतृप्तिः[13] ।
श्वेताङ्गवर्णता[14]ऽथो बहुमूत्रत्वं[15] मलाधिता[16] ॥
आलस्यं[17] विण्मूत्र[18]-श्वेतत्वं चापि चेतनाविरहः[19] ।
घर्घरवाक्यत्वं[20] च-ज्ञेया एते गदाः कफजाः ॥

इति माधवनिदानपरिशिष्टे कफजा रोगाः ।

इति माधवनिदाने नव्यरोगनिदानपरिशिष्टं समाप्तम् ।

---

### अथ ग्रन्थकारपरिचयः ।

इत्थं यथामति यथाश्रुति हृद्यपद्यै-रायुर्विदां मतमवेक्ष्य परीक्षितं सत् ।
प्रायो निदानमखिलं सकलैस्तदङ्गैः सार्द्धं सविष्ण्यभिहितं नवरोगराशेः ॥१॥
श्रीव्रजमोहनितया प्रथितेन पृथ्व्यां-श्रीबान्धवीतनयतां श्रयताऽपि काशीम् ।
श्रीमत्त्रिपाठिमणि-रामचरित्रशर्म-पोष्यात्मजेन जनताहिततत्परेण ॥२॥
गोस्वामिवर्यनिगमागमपारदृश्व-दामोदराङ्घ्रिरसिकेन च गौतमेन ।
श्रीगौरचन्द्रचरणाश्रयणप्रियेण सत्पङ्क्तिपावनपदाह्वमहीसुरेण ॥ ३ ॥
रासेश्वरीतनयया प्रियया‌ऽन्वितेन-संपादकेन बहुवैद्यकपुस्तकानाम् ।
विद्यार्थिसङ्घसततोन्नतिवर्त्मगेन-विद्यार्थिजीवनमनारतमाश्रितेन ॥४॥
बस्तीनरेश्वरसमर्पितभूमिसंस्थ-मिश्रौलियाऽऽवसथवासिषु वैष्णवेन ।
आयुर्विदागमविचारचिराध्वगेन-श्रीब्रह्मशंकरपदाभिधपण्डितेन ॥५॥

---

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तका
*Lal Bahadur Shastri National Academy of Administration*

मसूरी
MUSSOORIE

अवाप्ति सं०
Acc. No. 122666

कृपया इस पुस्तक को निम्न लिखित दिनांक या उससे पहले
कर दें।

Please return this book on or before the date last sta
below.

| दिनांक Date | उधारकर्ता की संख्या Borrower's No. | दिनांक Date | उधारकत की सख्य Borrower No. |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

15.536
माधव

अवाप्ति सं० 14110
ACC. No..................

सं. पुस्तक सं.
ss No................ Book No..............

क
thor.............................................

र्षक माधवनिदानम् ।
le...........................................

536 LIBRARY 14110

LAL BAHADUR SHASTRI
al Academy of Administration
MUSSOORIE

ion No. 122666

are issued for 15 days only but
ve to be recalled earlier if urgen-
uired.

r-due charge of 25 Paise per day per
e will be charged.

may be renewed on request, at the
tion of the Librarian.

dicals, Rare and Reference books may
e issued and may be consulted only
Library.

s lost, defaced or injured in any way
have to be replaced or its double
shall be paid by the borrower.

*o keep this book fresh, clean & moving*